७—(शायी) शीङ् शयने—णिनिः। शयनशीलः। (गायनः) गै गाने—ल्युः। गानोपजीवी (नर्तनः) नर्तकः। नटः (सरणः) सरणशीलः। गमनशीलः (निष्ठीवेत्) नि+ष्ठिवु निरासे। मुखेन श्लेष्मादिवमनं कुर्यात्। (अभीक्ष्णम्, अभीक्ष्णशः) वारंवारम् (निवासाः) गृहाणि (आक्रन्दान्) रोदनकर्माणि (धावन्ते) गच्छति। प्राप्नोति (प्रेतान्) मृतान् (संविशन्ते) सम्यक् प्रविशति (श्मशानम्)श्मन्+शानम्। शीङ् स्वप्ने—मनिन् डिच्च। श्मानः शवाः शेरते यत्र। शीङ्—शानच्, डिच्च। श्मशानं श्म शयनं श्म शरीरम्—निरु० ३। ५।

यदीदमृतुकाम्या…१, अघं रिप्रमुपेयिम अन्धः श्लोण इव हीयतां…२, मा नोऽन्वागादघं यतः—इति) जो वह [मरघट में] ठहरे, जल हाथ में करके—यदीदमृतुकाम्या …इस [ब्राह्मण वचन] को पढ़ करके जप करता हुआ मार्जन करके घूमे और समय [आचार] के लिए ऊपर जावे, यदीदमृतुकाम्या…१, अघं रिप्रमुपेयिम अन्धः श्लोण इव हीयताम्…२, मा नोऽन्वागादघं यतः…इति ३, [इन तीन ब्राह्मण वचनों से वह अपने को मन्त्र के अनुकूल करे] ६। (अथ ह एतत् देवानां परिषूतं यत् ब्रह्मचारी) और भी यह दिव्य लोकों का चलाने वाला है जो ब्रह्मचारी है।

(तत् अपि एतत् ऋचा उक्तम्—देवानामेतत्परिषूतमनभ्यारूढं चरति रोचमानं, तस्मिन् सर्वे पशवस्तत्र यज्ञास्तस्मिन्नन्नं सह देवताभिः—इति ब्राह्मणम्) वह भी इस ऋचा से कहा गया है—देवानामेतत्…रोचमानं—अथ०—११। ५। २३॥ तस्मिन् सर्वे……देवताभिः—ब्राह्मण वचन, दिव्य लोकों का सर्वथा चलाने वाला, कभी न हराया गया, प्रकाशमान यह [व्यापक ब्रह्म] विचरता है, उसमें सब पशु [जीव], उसमें यज्ञ, उसमें अन्न सब दिव्य पदार्थों के साथ हैं—यह ब्राह्मण है॥ ७॥

भावार्थः—ब्रह्मचारी दोष करने पर अनेक प्रकार प्रायश्चित्त करके परमात्मा में ध्यान लगाने से शुद्ध होवे॥ ७॥

विशेषः—प्रतीक वाले वेद मन्त्र अर्थ सहित लिखे जाते हैं।

१—दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद् रसेन। समिन्द्रियेण पयसाहमग्ने छन्दोभिर्यज्ञैः सुकृतां कृतेन॥ अथ० ६। १२४। १॥ (दिवः) प्रकाशमान सूर्य से, (नु) अथवा (बृहतः) [सूर्य से] बड़े (अन्तरिक्षात्) आकाश से (अपाम्) जल का (स्तोकः) बिन्दु (माम् अभि) मेरे ऊपर (रसेन) रस के साथ (अपप्तत्) गिरा है। (सुकृताम्) सुकर्मियों के (कृतेन) कर्म से, (अग्ने) हे सर्वव्यापी परमेश्वर! (इन्द्रियेण) इन्द्रपन अर्थात् सम्पूर्ण ऐश्वर्य के साथ (पयसा) अन्न के साथ, (छन्दोभिः) आनन्ददायक कर्मों के साथ, (यज्ञैः) विद्यादि दानों के साथ (अहम्) मैं (सम्=संगच्छेयम्) मिला रहूँ॥

२—देवानामेतत् परिषूतमनभ्यारूढं चरति रोचमानम्। तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम्॥ अथ० ११। ५। २३॥ (देवानाम्) प्रकाशमान लोकों का (परिषूतम्) सर्वथा चलाने वाला, (अनभ्यारूढम्) कभी न हराया गया, (रोचमानम्) प्रकाशमान (एतत्) यह [व्यापक ब्रह्म] (चरति) विचरता है, (तस्मात्) उस [ब्रह्मचारी] से (ज्येष्ठम्) सर्वोत्कृष्ट

शवदाहस्थानम् (समयाय) सम्+इण् गतौ—पचाद्यच्। आचाराय (अघम्) पापम् (रिप्रम्) लीरीङोर्ह्रस्वः पुट् च तरौ० (उ० ५। ५५) रीङ् स्रवणे—रप्रत्ययः पुडागमो ह्रस्वश्च। रिप्रं पापनाम—निरु० ४। २१। पापम्। (उपेयिम) उप+इण् गतौ—लिट्। वयं प्राप्तवन्तः (श्लोणः) रस्य लः। श्रोणः। पङ्गुः (परिषूतम्) षू क्षेपे प्रेरणे—क्तः। परितः सूतम्। सर्वतः प्रेरकम्॥

(ब्राह्मणम्) ब्रह्म ज्ञान और (ब्रह्म) बुद्धिकारक धन (जातम्) प्रकट [होता है], (च) और (सर्वे देवाः) सब विद्वान् (अमृतेन साकम्) अमरपन [मोक्ष सुख] के साथ [होते हैं] ।।

कण्डिका ८ ।।

प्राणापानौ जनयन्निति शङ्खस्य मूले महर्षेर्वसिष्ठस्य पुत्र एतां वाचं ससृजे, शीतोष्णाविहोत्सौ प्रादुर्भवेयातामिति तथा तच्छश्वदनुवर्त्तते, अथ खलु विपाण्मध्ये वसिष्ठशिला नाम प्रथम आश्रमो, द्वितीयः कृष्णशिलास्तस्मिन् वसिष्ठः समतपद्विश्वामित्रजमदग्नी जामदग्ने तपतः, गौतमभरद्वाजौ सिंहौ प्रभवे तपतः गुंगुर्गुंगुवासे तपत्यृषिर्ऋषिद्रोणेऽभ्यतपदगस्त्योऽगस्त्यतीर्थे तपन्ति दिव्यत्रिर्ह तपति स्वयम्भूः कश्यपः कश्यपतुङ्गेऽभ्यतपद्गुलवृकक्षुतरक्षुः श्वा वराहचिल्वटिबभ्रुकाः सर्पदंष्ट्रनः संहनुकृण्वानाः कश्यपतुङ्गदर्शनात्स्मरणवाटात् सिद्धिर्भवति ब्राह्म्यं वर्षसहस्रमृषिवने ब्रह्मचार्य्येकपादेनातिष्ठद् द्वितीयं वर्षसहस्रं मूर्द्धन्येवामृतस्य धाराम-धारयद्, ब्राह्माण्यष्टाचत्वारिंशतं वर्षसहस्राणि सलिलस्य पृष्ठे शिवोऽभ्यतपत्त-स्मात्तप्तात्तपसो भूय एवाभ्यतपत् । तदप्येता ऋचोऽभिवदन्ति प्राणापानौ जनयन्निति ब्राह्मणम् ।। ८ ।।

कण्डिका ८ ।। ब्रह्मचारी के आश्रम वा तपोवन ।।

(प्राणापानौ जनयन् इति—शंखस्य मूले महर्षेः वसिष्ठस्य पुत्रः एतां वाचं ससृजे, शीतोष्णौ उत्सौ इह प्रादुर्भवेयाताम् इति—तथा तत् शश्वत् अनुवर्त्तते) [प्राणापानौ जनयन्—अथ० ११ । ५ । २४ पाद ३, ४, मन्त्र २५. २६] प्राण और अपान [बल वर्धक श्वास और दोषनाशक प्रश्वास] को प्रकट करता हुआ······इन मन्त्रों से शङ्ख के मूल में [मुख लगाने के स्थान पर] महर्षि वसिष्ठ के पुत्र ने इस वाणी को उत्पन्न किया—शीत और उष्ण दो झरने यहाँ प्रकट हो आवें—वह वैसा ही सदा लगातार होता रहता है [अर्थात् पदार्थों में प्राण और अपान द्वारा शीत और उष्णता का प्रवाह होता है]। (अथ खलु विपाण्मध्ये वसिष्ठशिला नाम प्रथमः आश्रमः, द्वितीयः कृष्णशिलाः तस्मिन् वसिष्ठः समतपत्) और कहा जाता है कि विपाट् [विविध प्रकार चलने वाली वा रोकने वाली नदी] के बीच में वसिष्ठ शिला नाम पहिला आश्रम है, [जिसके समीप] दूसरा कृष्णशिला है, उस [वसिष्ठ शिला आश्रम] में वसिष्ठ ने यथाविधि तप किया । (विश्वामित्रजमदग्नी जामदग्ने तपतः) विश्वामित्र और जमदग्नि

८—(उत्सौ) उन्दिगुधिकुषिभ्यश्च (उ० ३ । ६८) उन्दी क्लेदने-सप्रत्ययः । जलस्रवणस्थाने (विपाट्) वि+पट गतौ, यद्वा । पश बाधनस्पर्शनयोः, ण्यन्तौ—क्विप् । विपाड् विपाटनाद्वा विपाशनाद्वा विप्रापणाद्वा—निरु० ९ । २६ । विपाट् या विविधं पटति गच्छति विपाटयति वा सा--दयानन्दभाष्ये, ऋग्वेद ३ । ३३ । १ । विविधं गमनशीला नदी (वसिष्ठः) वसुमत्--इष्ठन्. मतुपो लुक् । वसुमत्तमः । अतिशयेन धनवान् । यद्वा वसु–इष्ठन् । सर्वश्रेष्ठः (विश्वामित्रः) मित्रे चर्षौ (पा० ६ ।

दोनों जामदग्न में तप करते हैं। (गौतमभरद्वाजौ सिंहौ प्रभवे तपतः) गौतम और भरद्वाज दोनों सिंह [बलवान्] प्रभव [आश्रम] में तप करते हैं। (गुङ्गुः गुगुवासे तपति) गुङ्गु गुगुवास में तप करता है। (ऋषिः ऋषिद्रोणे अभ्यतपत्) ऋषि ने ऋषि द्रोण [ऋषिवन] में सब ओर से तप किया। (अगस्त्यः अगस्त्यतीर्थे तपति) अगस्त्य अगस्त्यतीर्थ में तप करता है। (दिवि अत्रिः ह तपति) द्यौः [स्वर्ग, सुखस्थान] में अत्रि तप करता है। (स्वयम्भूः कश्यपः कश्यपतुङ्गे अभ्यतपत्) स्वयम्भू कश्यप ने कश्यप तुङ्ग [कश्यप पहाड़] पर सब प्रकार तप किया। [यह दस ऋषि दस इन्द्रियाँ हैं] (उलवृक-ऋक्षु-तरक्षुः श्वा वराह चिल्वटि-बभ्रुकाः सर्पदंष्ट्रनः संहनु कृण्वानाः) उलवृक—[भेड़िया], ऋक्षु [ऋक्ष, रीछ], तरक्षु [लकड़बग्घा], श्वा [कुत्ता], वराह [सूअर], चिल्वटि, बभ्रुक [बभ्रु, नेवला], सर्पदंष्ट्रन [सांप के समान डाढ़ों वाला जन्तु, यह आठ बनैले जीव] संगति करते हुये वा परस्पर हिंसा का नाश करते हुए [तप करते हैं]। (कश्यपतुङ्गदर्शनात् सरणवाटात् सिद्धिः भवति) कश्यप तुङ्ग के दर्शन से और चलने के मार्ग से सिद्धि [ऐश्वर्य प्राप्ति] होती है। (ब्राह्म्य वर्षसहस्रम् ऋषिवने ब्रह्मचारी एकपादेन अतिष्ठत्, द्वितीयं वर्षसहस्रं मूर्द्धनि एव अमृतस्य धाराम् अधारयत्) ब्रह्मा के सहस्र वर्ष [द्वीप समान नाड़ियों में] ऋषिवन में

---

३ । १३०) इति दीर्घः । विश्वामित्रः सर्वमित्रः—निरु० २ । २४ । सर्वहितः (जमदग्निः) जमु भक्षणे दीप्तौ च—शतृ+अग्निः । जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा। निरु० ७ । २४ । जमन्तः प्रज्वलन्तोऽग्नयो यज्ञे शिल्पसिद्धौ वा यस्य स महर्षिः (गौतमः) गोतमस्यापत्यं शिष्यो वा (भरद्वाजः) भृञ् धारणपोषणयोः—शतृः+वज-गतौ घञ्। अन्नस्य बलस्य विज्ञानस्य वा भर्त्ता धारकः पोषको वा (गुङ्गुः) गुङ् ध्वनौ—डुः+गम्लृ गतौ—डुः। अलुक्समासः। गुङ् ध्वनिं गच्छति प्राप्नोति यः स. वेदपाठकः (गुगुवासे) गुग्गुलवने (ऋषिद्रोणे) ऋषिवने (अगस्त्यः) अग वक्रगतौ—अच्। वसेस्तिः (उ० ४ । १८०) अग+असु क्षेपणे—तिप्रत्ययः। तत्र साधुः (पा० ४ । ४ । ९८) यत्, दीर्घाभावः। अगस्य कुटिलगतेः पापस्य असने क्षेपणे समर्थः (दिवि) स्वर्गे। सुखस्थाने (अत्रिः) अदेस्त्रिनिश्च (उ० ४ । ६८) अद भक्षणे, अत सातत्यगमने वा-त्रिप्। दोषस्य पापस्य भक्षको नाशकः। सदा ज्ञानशीलः (कश्यपः) कश शब्दे यत्+पा पाने-कः। सोमपानशीलः। यद्वा, दृशिर् प्रेक्षणे—वुन्। अशिति परतो ऽपि दृशेः पश्य् इत्यादेशः। आद्यन्तविपर्य्ययेन रूपसिद्धिः। कश्यपः। यथार्थद्रष्टा (उलवृकः) वृकभेदः (ऋक्षुः) ऋक्षः। भल्लूकः (तरक्षुः) तर+क्षि हिंसायाम्—डुः। तरं गतिं मार्गं वा क्षिणोतीति। क्षुद्रव्याघ्रः (चिल्वटिः) जाङ्गलपशुभेदः (बभ्रुकः) बभ्रुः। नकुलः। (संहनु) शॄस्वृस्निहित्रप्यसि० (उ० १ । १०) सम्+हन हिंसागत्योः—उप्रत्ययः। संगतिम् परस्परहिंसनम् (कृण्वानाः) कृवि हिंसाकरणयोः गतौ च-शानच्, उप्रत्ययः, वस्य अकारः। हिंसन्तः। कुर्वाणाः (सरणवाटात्) गमनमार्गात् (सिद्धिः) ऐश्वर्यप्राप्तिः (ब्राह्म्यम्) ब्रह्मन्-ष्यञ्। ब्रह्मसम्बन्धि (वर्षम्) वृषु सेचने-अच् यद्वा, वृतॄवदिवचि०

[इन्द्रिय गणों के बीच] ब्रह्मचारी एक पग से खड़ा रहा, दूसरे सहस्र वर्ष [नाड़ियों में] मस्तक पर ही अमृत [जल] को धारा को धारण किया (ब्राह्माणि अष्टाचत्वारिंशतं वर्षसहस्राणि सलिलस्य पृष्ठे--शिवः अभ्यतपत्) ब्रह्मा के अड़तालीस सहस्र वर्ष [सलिलस्य पृष्ठे—अथ० ११ । ५ । २६] जल के ऊपर [विद्या रूप जल में स्नान करने के लिये] शिव [मंगलदायक ब्रह्मचारी] ने सब ओर से तप किया, (तस्मात् तप्तात् तपसः भूयः एव अभ्यतपत्) उस तप किये हुये तप से अधिक भी उसने तप किया। (तत् अपि एताः ऋचः अभिवदन्ति—प्राणापानौ जनयन्--इति ब्राह्मणम्) वह भी यह ऋचायें बतलाती हैं [अथ० ११ । ५ । २४ पाद ३, ४, मन्त्र २५, २६] प्राण और अपान [बलवर्धक श्वास और दोषनाशक प्रश्वास] को प्रकट करता हुआ...यह मन्त्र है, यह ब्राह्मण है ॥ ८ ॥

भावार्थः—यह कण्डिका [प्राणापानौ जनयन्......] इन अढ़ाई मन्त्रों से आरम्भ होकर इन ही मन्त्रों पर समाप्त होती है, इससे इस कण्डिका का इन मन्त्रों से दृढ़ सम्बन्ध है, वे मन्त्र यह हैं।

प्राणापानौ जनयन्नाद् व्यानं वाचं मनो हृदयं ब्रह्म मे धाम् ॥ २४ ॥ चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ॥ २५ ॥ तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपोऽतिष्ठत् तप्यमानः समुद्रे । स स्नातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ॥ २६ ॥ अथ० ११ । ५ । २४, म० २५, २६ ॥ वह [ब्रह्मचारी] (प्राणापानौ) प्राण और अपान [श्वास प्रश्वास विद्या] को (आत्) और (व्यानम्) व्यान [सर्वशरीर व्यापक वायु विद्या] को (वाचम्) वाणी [भाषण विद्या] को, (मनः) मन [मनन विद्या] को, (हृदयम्) हृदय [के ज्ञान] को, (ब्रह्म) ब्रह्म [परमेश्वर ज्ञान] को और (मेधाम्) धारणावती बुद्धि को (जनयन्) प्रकट करता हुआ [वर्तमान होता है] ॥ २४ पाद ३, ४ ॥ [हे ब्रह्मचारी !] (अस्मासु) हम लोगों में (चक्षुः) नेत्र, (श्रोत्रम्) कान (यशः) यश, (अन्नम्) अन्न, (रेतः) वीर्य, (लोहितम्) रुधिर और (उदरम्) उदर [की स्वस्थता] (धेहि) धारण कर ॥२५॥ (ब्रह्मचारी) ब्रह्मचारी (तानि) उन [कर्मों] को (कल्पत्) करता हुआ (समुद्रे) समुद्र [के समान गम्भीर ब्रह्मचर्य] में (तपः तप्यमानः) तप तपता हुआ [वीर्य निग्रह आदि तप करता हुआ] (सलिलस्य पृष्ठे) जल के ऊपर [विद्या रूप जल में स्नान करने के लिये] (अतिष्ठत्) स्थित हुआ है। (सः) वह (स्नातः) स्नान किये हुये [स्नातक-ब्रह्मचारी] (बभ्रुः) पोषण करने वाला और (पिङ्गलः) बलवान् होकर (पृथिव्याम्) पृथिवी पर (बहु) बहुत (रोचते) प्रकाशमान होता है ॥ २६ ॥

ऐसे बहुत से मन्त्र हैं जैसे (जीवेम शरदः शतम् ॥ भूयसीः शरदः शतात् ॥ अथ० १९ । ६७ । २,८) अर्थ—सौ वर्षों तक हम जीते रहें ॥ और सौ से भी अधिक

(उ० ३ । ६२) वृञ् वरणे--सप्रत्ययः । संवत्सरः । द्वीपं यथा भारतवर्षम्, हरिवर्षम् । नाडीसमूहः (ब्राह्माणि) ब्रह्मन्--अण् । ब्रह्मसम्बन्धीनि ॥

वर्षों तक ॥ ८ ॥ इस से जाना जाता है कि इस कण्डिका का सम्बन्ध शरीर से, और ब्रह्मा के सहस्र वर्ष, दूसरे सहस्र वर्ष, और अड़तालीस सहस्र वर्ष और उससे अधिक सहस्र वर्ष, शरीर की नाड़ियों से तात्पर्य है। वर्ष द्वीप को भी कहते हैं, जैसे भारतवर्ष, हरिवर्ष यहां नाड़ी समूहों को वर्ष माना है। और ऋषि आदि इन्द्रियों के भी नाम हैं, और प्राण और अपान के सम्बन्ध से इन्द्रियां बलवर्धक और दोषनाशक हैं॥ विद्वान् लोग पदों के साथ अर्थ की संगति विचार कर लगा लेवें ॥ ८ ॥

कण्डिका ९ ॥

एकपाद् द्विपद इति वायुरेकपात्तस्याकाशं पादश्चन्द्रमा द्विपात्तस्य पूर्वपक्षापरपक्षौ पादावादित्यस्त्रिपात्तस्येमे लोकाः पादा अग्निः षट्पादस्तस्य पृथिव्यन्तरिक्षं द्यौराप ओषधिवनस्पतय इमानि भूतानि पादास्तेषां सर्वेषां वेदा गतिरात्मा प्रतिष्ठिताश्चतस्रो ब्रह्मणः शाखा, अथो आहुः षडिति मूर्तिराकाशश्चेत्यृचा मूर्त्तिर्याजुषी गतिः साममयन्तेजो भृग्वङ्गिरसामापैतद् ब्रह्मैव यज्ञश्चतुष्पाद् द्विः संस्थित इति। तस्य भृग्वङ्गिरसः संस्थे अथो आहुरेकसंस्थित इति, यद्धोतर्चा मण्डलैः करोति पृथिवीं तेनाप्याययति एतस्यां ह्यग्निश्चरति।

तदप्येतदृचोक्तम्। अग्निवासाः पृथिव्यसि तज्ञूरिति।

यदध्वर्युर्यजुषा करोत्यन्तरिक्षं तेनाप्याययति तस्मिन् वायुर्न निविशते कतमच्च नाहः इति।

तदप्येतदृचोक्तम्। अन्तरिक्षे पथिभिर्ह्रीयमाणो न निविशते कतमच्च नाहः। अपां योनिः प्रथमजा ऋतस्य क्व स्विज्जातः कुत आबभूवेति।

यदुद्गाता साम्ना करोति दिवं तेनाप्याययति तत्र ह्यादित्यः शुक्रश्चरति।

तदप्येतदृचोक्तम्। उच्चा पतन्तमरुणं सुपर्णमिति। यद् ब्रह्मर्चा काण्डैः करोत्यपस्तेनाप्याययति चन्द्रमा ह्यप्सु चरति।

तदप्येतदृचोक्तम्। चन्द्रमा अप्स्वन्तरिति। तासामोषधिवनस्पतयः काण्डानि, ततो मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैर्यज्ञो वर्त्ततेऽद्भिः कर्माणि प्रवर्त्तन्तेऽद्भिः सोमोऽभिषूयते. तद् यद् ब्रह्माणं कर्मणि कर्मण्यामन्त्रयत्यपस्तेनानुजानात्येषो ह्यस्य भागस्तद्यथा भोक्ष्यमाणोऽप एव प्रथममाचामयेदप उपरिष्टादेवं यज्ञोऽद्भिरेव प्रवर्त्ततेऽप्सु संस्थाप्यते तस्माद् ब्रह्मा पुरस्ताद्धोमसंस्थितहोमैर्यज्ञो वर्त्ततेऽन्तरा हि पुरस्ताद्धोमसंस्थितहोमैर्यज्ञं परिगृह्णात्यन्तरा हि भृग्वङ्गिरसः वेदानोदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते सोमात्मको ह्ययं वेदः।

तदप्येतदृचोक्तम्। सोमं मन्यते पपिवानिति।

तद्यथेमां पृथिवीमुदीर्णां ज्योतिषा धूमायमानां वर्षा शमयत्येवम् ब्रह्मा भृग्वङ्गिरोभिर्व्याहृतिभिर्यज्ञस्य विरिष्टं शमयत्यग्निरादित्याय शमयत्येतेऽङ्गिरस एत इदं सर्वं समाप्नुवन्ति, वायुरापश्चन्द्रमा इत्येते भृगव एत इदं सर्वं समाप्याययन्त्येकमेव संस्थं भवतीति ब्राह्मणम् ॥ ९ ॥

---

१. अत्र "म इति" पू० सं० भ्रष्टः पाठः ॥ सम्पा० ॥

कण्डिका ९ ॥ होता, अध्वर्यु, उद्गाता और ब्रह्मा का वर्णन ।

(एकपाद् द्विपदः इति वायुः एकपात् तस्य आकाशं पादः) एकपाद् द्विपदः— इति–अथ० १३ । २ । २७, इस मन्त्र में पवन एक पग वाला है, उसका आकाश पग है, (चन्द्रमाः द्विपात् तस्य पूर्वपक्षापरपक्षौ पादौ) चन्द्रमा दो पग वाला है उसके पहिला पाख और दूसरा पाख दो पग हैं, (आदित्यः त्रिपात् तस्य इमे लोकाः पादाः) सूर्य तीन पग वाला है, उसके यह [ऊँचे नीचे और मध्य] लोक पग हैं, (अग्निः षट्पादः तस्य पृथिवी, अन्तरिक्षं द्यौः आपः ओषधिवनस्पतयः इमानि भूतानि पादाः) अग्नि छह पग वाला है, उसके पृथिवी, अन्तरिक्ष, प्रकाश जल, ओषधि और वनस्पतियें यह सब सत्तायें पग हैं । (तेषां सर्वेषां वेदाः गतिः आत्मा प्रतिष्ठिताः) इन सब में वेद [वेद ज्ञान], गति [प्रवृत्ति] और आत्मा ठहरे हुए हैं । (ब्रह्मणः चतस्रः शाखाः, अथो आहुः षट् इति मूर्तिः आकाशः च इति) ब्रह्म [यज्ञ] की चार शाखायें [वायु, चन्द्रमा, सूर्य और अग्नि] हैं, कोई कहते हैं छह हैं मूर्ति और आकाश [मिलाकर] । (ऋचा मूर्तिः याजुषी गतिः साममयं तेजः भृग्वङ्गिरसाम् आप - आपः, एतत् ब्रह्म एव चतुष्पात् यज्ञः द्विः संस्थितः इति) ऋचा [ऋग्वेद विद्या] मूर्ति, याजुषी [यजुर्वेद विद्या] गति, साममय [सामवेद ज्ञान] तेज, और भृगु अङ्गिरसाओं [प्रकाशमान ज्ञान वाले चारों वेदों] का जल है, यह ब्रह्म ही चार पग वाला यज्ञ और दो बार संस्था [ठीक ठीक ठहराव] वाला है । (तस्य भृग्वङ्गिरसः संस्थे अथो आहुः एकसंस्थितः इति) उस भृगु अङ्गिरा [चारों वेद] दो संस्थायें हैं, कोई कहते हैं एक संस्था वाला है ।

(यत् होता ऋचां मण्डलैः करोति, पृथिवीं तेन आप्याययति एतस्यां हि अग्निः चरति) जो होता ऋचाओं [ऋग्वेद मन्त्रों] के समूहों से कर्म करता है पृथिवी को उसके द्वारा पुष्ट करता है, इस [पृथिवी] में ही अग्नि विचरता है । (तत् अपि एतद् ऋचा उक्तम् । अग्निवासाः पृथिवी असितज्ञूः इति) यह भी इस ऋचा करके कहा गया है—अग्निवासाः पृथिव्यसितज्ञूः—अथ० १२ । १ । २१ ॥

(यत् अध्वर्य्युः यजुषा करोति अन्तरिक्षं तेन आप्याययति तस्मिन् वायुः कतमत् चन अहः न निविशते इति) जो अध्वर्य्यु यजुर्वेद से कर्म करता है अन्तरिक्ष को

९—(भूतानि) सत्तामात्राणि (गतिः) प्रवृत्तिः (आत्मा) प्राणः (प्रतिष्ठिताः) स्थापिताः (ब्रह्मणः) यज्ञस्य (मूर्तिः) आकारः (ऋचा) ऋग्मन्त्रेण (याजुषी) यजुः—अण्, ङीप् । संगतिकरणयुक्ता । यजुर्वेदमन्त्रसम्बन्धिनी (साममयम्) सामवेदमन्त्रसंबद्धम् (भृग्वङ्गिरसाम्) प्रकाशमानज्ञानानां चतुर्वेदानाम् (आप) विभक्तिलोपः । (आपः) जलानि (संस्थितः) सम्यक्स्थितः । समाप्तियुक्तः (भृग्वङ्गिरसः) चतुर्वेदाः (संस्थे) समाप्ति यज्ञ विशेषद्वयम् (ऋचाम्) ऋग्मन्त्राणाम् (मण्डलैः) समूहैः (करोति) यज्ञकर्म करोति (अग्निवासाः) वसेर्णित् (उ० ४ । २१८) वस निवासे आच्छादने च—असुन् । अग्निना तापेन सह निवासो यस्याः सा । यद्वा तापो वस्त्रं यस्याः सा (असितज्ञूः)

उससे वह पुष्ट करता है, उसमें वायु किसी दिन भी नहीं बैठता [रुकता] है। (तत् अपि एतत् ऋचा उक्तम्। अन्तरिक्षे पथिभिः ह्लीयमाणः न निविशते कतमत्चन अहः। अपां योनिः प्रथमजाः ऋतस्य क्व स्वित् जातः कुतः आबभूव इति) यह मन्त्र कुछ भेद से ऋग्वेद में है—१०। १६८। ३। यह भी इस ऋचा करके कहा गया है—अन्तरिक्षे······। अर्थ—अन्तरिक्ष में अनेक मार्गों से ले जाया गया [वायु] किसी दिन भी नहीं बैठता है। जल का कारण और सत्य नियम से पहिले पदार्थों में उत्पन्न होने वाला वह कहां उत्पन्न हुआ और कहां से प्राप्त हुआ है।

(यत् उद्गाता साम्ना करोति दिवं तेन आप्याययति तत्र हि शुक्रः आदित्यः चरति) जो उद्गाता सामवेद से कर्म करता है सूर्य के प्रकाश को उससे वह पुष्ट करता है, उस [प्रकाश] में ही वीर्यवान् सूर्य विचरता है। (तत् अपि एतत् ऋचा उक्तम्। उच्चा पतन्तम् अरुणं सुपर्णम् इति अथ० १३। २। ३६) यह भी इस ऋचा करके कहा गया है - उच्चा पतन्तमरुणं सुपर्णम् इति॥

(यत् ब्रह्मा ऋचां काण्डैः करोति अपः तेन आप्याययति, चन्द्रमाः हि अप्सु चरति) जो ब्रह्मा [चारों वेद जानने वाला] ऋचाओं [चारों वेदों] के काण्डों [भागों] से कर्म, करता है. जल को उससे वह पुष्ट करता है, चन्द्रमा ही जल में विचरता है। (तत् अपि एतत् ऋचा उक्तम्। चन्द्रमा अप्स्वन्तः इति) वह भी इस ऋचा करके कहा गया है—चन्द्रमा अप्स्वन्तः—इति अ० १८। ४। ८९। (तासाम् ओषधिवनस्पतयः काण्डानि, ततः मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैः यज्ञः वर्तते) उन [जलों] की ओषधिवनस्पतियां शाखायें हैं, उससे जड़ शाखा पत्ता फूल फल अङ्कुर रस और गन्ध के साथ यज्ञ होता है, (अद्भिः कर्माणि प्रवर्तन्ते, अद्भिः सोमो ऽभिषूयते) जल से कर्म होते रहते हैं, जल से सोम [अमृत रस] निचोड़ा जाता है। (तत् यत् ब्रह्माणम् कर्मणि कर्मणि आमन्त्रयति, अपः तेन अनुजानाति) वह जब ब्रह्मा को काम काम में बुलाता है जल को उससे वह आज्ञा देता है। (एषः हि अस्य भागः तत् यथा भोक्ष्यमाणः अपः एव प्रथमम् आचामयेत् अपः उपरिष्टात्, एवं यज्ञः अद्भिः एव प्रवर्तते अप्सु संस्थाप्यते) यही इस [ब्रह्मा] का भाग है, सो जैसे भोजन चाहता हुआ पुरुष जल को ही पहिले आचमन करे और जल को ही उपरान्त में, इसी प्रकार यज्ञ जल से ही चलता रहता है और जल में समाप्त होता है। (तस्मात् पुरस्तात्-होम संस्थितहोमैः अन्तरा यज्ञः वर्तते, ब्रह्मा हि पुरस्तात्—होम संस्थितहोमैः अन्तरा यज्ञं परिगृह्णाति) इस कारण पुरस्तात्-होम और संस्थित-होमों

वेदे। अ + षिञ् बन्धने—क्तः। अन्दूदृम्फूजम्बू० (उ० १। ९३) ज्ञा विज्ञापने—कूः। अबद्धं कर्म ज्ञापयति बोधयति नियोजयति वा मा (निविशते) उपविशते (ह्लीयमाणः) नीयमानः (प्रथमजाः) प्रथमेषु जातः (ऋतस्य) सत्यनियमस्य (उच्चायतं तम्) उच्चा पतन्तम्—इति वेदे। उच्चैः ऐश्वर्यं प्राप्नुवन्तम् (ब्रह्मा) चतुर्वेदवेत्ता (काण्डैः) क्वादिभ्यः कित् (उ० १। ११५) कमु कान्तौ—डप्रत्ययो दीर्घत्वंच। ग्रन्थभागैः (अप्सु अन्तः) जलेषु मध्ये (आमन्त्रयति) संबोधयति (अपः) जलानि (अनुजानाति) आज्ञापयति (भोक्ष्यमाणः) भोक्तुम् इष्यमाणः (उपरिष्टात्)

के बीच में यज्ञ होता है, ब्रह्मा ही पुरस्तात्-होम और संस्थित-होमों के बीच में यज्ञ को धरता है। (भृग्वङ्गिरसः वेदान् हि ओदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते, सोमात्मकः हि अयं वेदः) प्रकाशमान ज्ञान वाले वेदों को ही भले प्रकार प्राप्त करके प्रकाशमान ज्ञानवाले मनुष्य सोम पान को जानते हैं, सोमात्मक [अमृतमय] यह वेद है। (तत् अपि एतत् ऋचा उक्तम् । सोमं मन्यते पपिवान् इति) वह भी इस ऋचा से कहा गया है— सोमं मन्यते पपिवान्......अथ० १४ । १ । ३ ।

(तत् यथा इमाम् उदीर्णां ज्योतिषा धूमायमानां पृथिवीं वर्षा शमयति एवं ब्रह्मा भृग्वङ्गिरोभिः व्याहृतिभिः यज्ञस्य विरिष्टं शमयति) सो जैसे इस उदार, तेज से धुआं उठती हुई पृथिवी को वर्षा शान्त करती है, वैसे ही ब्रह्मा प्रकाशमान ज्ञानवाले वेदों और व्याहृतियों से यज्ञ के उपद्रव को शान्त करता है। (अग्निः आदित्याय शमयति एते एते अङ्गिरसः इदं सर्वं समाप्नुवन्ति, वायुः आपः चन्द्रमाः इति एते एते भृगवः इदं सर्वं समाप्याययन्ति, एकम् एव संस्थं भवति इति ब्राह्मणम्) [प्रदत्त आहुति के रस को] अग्नि आदित्य को पहुँचाने हेतु [द्रव्य के] भस्म करता[1] है। यह सब विद्वान् लोग इस सब कर्म को पूरा करते हैं। वायुः आपः चन्द्रमाः [वह ब्राह्मण वचन है इस से] यह सब भृगु [प्रकाशमान लोग] इस सब [जगत्] को यथावत् पुष्ट करते हैं, एक ही संस्था होता है—वह ब्राह्मण है ॥ ९ ॥

भावार्थः–मनुष्यों को योग्य है कि वे ऋग्वेदी को होता, यजुर्वेदी को अध्वर्य्यु सामवेदी को उद्गाता और चारों वेद जानने वाले को ब्रह्मा वरण करके यज्ञ की सिद्धि करें ॥ ९ ॥

विशेषः—प्रतीक वाले मंत्र अर्थ सहित नीचे दिए जाते हैं।

१–एकपाद् द्विपदो भूयो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात् । द्विपाद्ध षट्पदो भूयो वि चक्रमे त एक पदस्तन्वं समासते—अथ० १३ । २ । २७ । (एकपात्) एक रस व्यापक परमेश्वर (द्विपदः) दो प्रकार की स्थिति वाले [जङ्गम स्थावर जगत्] से (भूयः) अधिक आगे (वि) फैल कर (चक्रमे) चला गया, (द्विपात्) दो [भूत भविष्यत्] में गति वाला परमात्मा (पश्चात्) फिर (त्रिपादम्) तीन [प्रकाशमान, अप्रकाशमान और मध्य लोकों] में व्याप्ति वाले संसार में (अभि) सब ओर से (एति) प्राप्त होता है, (द्विपात्) दो [जङ्गम और स्थावर जगत्] में व्यापक ईश्वर (ह) निश्चय करके (षट्पदः) छह [पूर्व दक्षिण पश्चिम उत्तर ऊंची और नीची दिशाओं] में स्थिति वाले ब्रह्माण्ड से (भूयः अधिक आगे (वि चक्रमे) निकल गया, (ते) वे [योगी जन] (एकपदः) एक रस व्यापक परमेश्वर की (तन्वम्) उपकार क्रिया को (सम् निरन्तर (आसते) सेवते हैं।

ऊर्ध्वम् (संस्थाप्यते) समाप्यते (ओदुह्य) आ+उत्+वह प्रापणे—ल्यप् । समन्तात् प्राप्य (भृग्वङ्गिरसः) प्रकाशमानज्ञानयुक्ता विद्वांसः (वेदः) चतुर्वेदसमूहः (उदीर्णाम्) उत्+ऋ गतौ—क्तः । उदाराम् । महतीम् (वर्षम्) वृष्टिः (विरिष्टम्) दोषम् ॥

---

१. इस अर्थ की तुलना मनुस्मृति ३।७६ से करें—
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ सम्पा० ॥

२—अग्निवासाः पृथिव्यसितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु—अथ० १२ । १ । २१ (अग्निवासाः) अग्नि के साथ निवास करने वाली [अथवा अग्नि के वस्त्र वाली], (असितज्ञूः) बन्धन रहित कर्म को जताने वाली (पृथिवी) पृथिवी (मा) मुझको (त्विषीमन्तम्) तेजस्वी और (संशितम्) तीक्ष्ण [फुरतीला] (कृणोतु) करे ।

३—अन्तरिक्षे पथिभिरीयमानो न निविशते कतमच्चनाहः । अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव—ऋग्० १० । १६८ । ३ (अन्तरिक्षे) अन्तरिक्ष में (पथिभिः) अनेक मार्गों से (ईयमानः) चलता हुआ [वायु] (कतमत् चन अहः) किसी दिन भी (न) नहीं (नि विशते) बैठता है । (अपाम्) जल का (सखा) सखा [वायु] (प्रथमजाः) पहले पदार्थों में उत्पन्न होने वाला (ऋतावा) सत्य नियम वाला वह (क्व स्वित्) कहां पर (जातः) उत्पन्न हुआ और (कुतः) कहां से (आ बभूव) प्राप्त हुआ है ॥

४—उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम् । पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्ददत्रिः—अथ० १३ । २ । ३६ (उच्चा) ऊँचे (पतन्तम्) ऐश्वर्यवान् होते हुये, (अरुणम्) सर्वव्यापक, (सुपर्णम्) बड़े पालने वाले, (दिवः) व्यवहार के (मध्ये) मध्य (तरणिम्) पार करने वाले, (भ्राजमानम्) प्रकाशमान, (सवितारम्) सर्वप्रेरक (त्वा) तुझ [परमेश्वर] को (पश्याम) हम देखें, (यम्) जिसको (अजस्रम्) निरन्तर (ज्योतिः) ज्योति (आहुः) वे [विद्वान् लोग] बताते हैं (यत्) जिस [ज्योति] को (अत्रिः) निरन्तर ज्ञानी [योगी पुरुष] ने (अविन्दत्) पाया है ॥

५—चन्द्रमा अप्स्व १ न्तरा सुपर्णो धावते दिवि । न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी—अथ० १८ । ४ । ८९, ऋग्० १ । १०५ । १, साम० पू० ५ । ३ । ६ । (सुपर्णः) सुन्दर पूर्ति करने वाला (चन्द्रमाः) चन्द्रलोक (अप्सु अन्तः) [अपने] जलों के भीतर (दिवि) सूर्य के प्रकाश में (आ धावते) दौड़ता रहता है । (हिरण्यनेमयः) हे प्रकाशस्वरूप परमात्मा में सीमा रखने वाले (विद्युतः) विविध प्रकाशमान [सब लोकों !] (वः) तुम्हारे (पदम्) ठहराव को (न विन्दन्ति) नहीं पाते हैं, (रोदसी) हे सूर्य के समान स्त्री पुरुषो ! (मे) मेरे (अस्य) इस [वचन] का (वित्तम्) तुम दोनों ज्ञान करो ॥

६—सोमं मन्यते पपिवान् यत् संपिषन्त्योषधिम् । सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः—अथ० १४ । १ । ३, ऋग्० १० । ८५ । ३ । (सोमम्) चन्द्रमा [के अमृत] को (पपिवान्) मैने पी लिया [यह बात मनुष्य] (मन्यते) मानता है, (यत्) जब (ओषधिम्) ओषधि [अन्न सोमलता आदि] को (संपिषन्ति) वे [मनुष्य] पीसते हैं । (यम्) जिस (सोमम्) जगत्-स्रष्टा परमात्मा को (ब्रह्माणः) ब्रह्मज्ञानी लोग (विदुः) जानते हैं, (तस्य)

७

उसका [अनुभव] (पार्थिवः) पृथिवी [के विषय] में आसक्त पुरुष (न) नहीं (अश्नाति) भोगता है ॥

कण्डिका १० ॥

विचारी ह वै काबन्धिः कवन्धस्याथर्वणस्य पुत्रो मेधावी मीमांसकोऽनूचान आस, स ह स्वेनातिमानेन मानुषं वित्तं नेयाय, तं मातोवाच, त एवैतदन्नमवोचंस्त इममेषु कुरुपञ्चालेषु अङ्गमगधेषु काशिकौशल्येषु शाल्वमत्स्येषु शवसोशीनरेषु उदीच्येष्वन्नमदन्तीत्यथ वयं तवैवातिमानेनानाद्यास्मो वत्स वाहनमन्विच्छेति स मान्धातुर्यौवनाश्वस्य सार्वभौमस्य राज्ञः सोमं प्रसूतमाजगाम, स सदोऽनुप्रविश्यर्त्विजश्च यजमानश्चामन्त्रयामास, तद्याः प्राच्यो नद्यो वहन्ति याश्च दक्षिणाच्यो याश्च प्रतीच्यो याश्च उदीच्यस्ताः सर्वाः पृथङ्नामधेया इत्याचक्षते, तासां समुद्रमभिपद्यमानानां छिद्यते नामधेयं समुद्र इत्याचक्षते, एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्याताः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्यास्तेषां यज्ञमभिपद्यमानानां छिद्यते नामधेयं यज्ञ इत्येवाचक्षते ॥ १० ॥

कण्डिका १० ॥ काबन्धि की मान्धाता के यज्ञ में यज्ञविषयक वार्त्ता ॥

(विचारी ह वै काबन्धिः आथर्वणस्य कबन्धस्य पुत्रः मेधावी मीमांसकः अनूचानः आस) तत्त्व निर्णय करने वाला काबन्धि आथर्वण [निश्चल ब्रह्मज्ञान में श्रद्धा वाले] कबन्ध [ब्रह्म में संयम करने वाले ऋषि] का पुत्र अटल बुद्धि वाला, मीमांसा शास्त्र जानने वाला, साङ्गोपाङ्ग वेद पढ़ा हुआ था । (सः ह स्वेन अतिमानेन मानुषं वित्तं न इयाय) उसने अपने अति घमण्ड से मनुष्य योग्य धन न पाया । (तं माता उवाच—ते एव एतत् अन्नम् अवोचन्) उससे माता बोली—उन्होंने ही इस अन्न के विषय में कहा है । (ते इमम् = इदम् अन्नम् एषु कुरुपञ्चालेषु अङ्गमगधेषु काशिकौशल्येषु शाल्वमत्स्येषु शवसोशीनरेषु उदीच्येषु अदन्ति इति) वे लोग इस अन्न को इन कुरुपञ्चालों में, अङ्गमगधों में, काशिकौशल्यों में शाल्वमत्स्यों में शवस उशीनरों में, उत्तरदेशवासियों में खाते हैं । (अथ वयं तव एव अतिमानेन

१०—(विचारी) तत्त्वनिर्णेता (काबन्धिः) अत इञ् (पा० ४ । १ । ९५) कबन्ध—इञ् । कबन्धपुत्रः । ऋषिविशेषः (कबन्धस्य) के ब्रह्मणि बन्धः संयमो यस्य तस्य । ऋषिविशेषस्य (आथर्वणस्य) निश्चलब्रह्मज्ञाननिष्ठस्य (मीमांसकः) मीमांसाशास्त्रनिपुणः (अनूचानः) उपेयिवाननाश्वाननूचानश्च (पा० ३ । २ । १०९) अनु + वच परिभाषणे—कानच् । साङ्गवेदविचक्षणः (वित्तम्) धनम् (इयाय) इण् गतौ—लिट् । प्राप्त (उदीच्येषु) द्युप्रागपागुदक्प्रतीचो यत् (पा० ४ । २ । १०१)

अनाद्याः स्मः वत्स वाहनम् अन्विच्छ इति) सो हम तेरे ही अति घमण्ड से बिना अन्न हैं, हे बच्चा ! रथ ढूंढ़कर ला । (सः यौवनाश्वस्य सार्वभौमस्य राज्ञः मान्धातुः प्रसूतं सोमम् आजगाम) वह युवनाश्व के पुत्र, चक्रवर्ती राजा मान्धाता के निचोड़े हुये सोम [सोमयज्ञ] में आया । (स सदः अनुप्रविश्य ऋत्विजः च यजमानं च आमन्त्रयामास) वह यज्ञशाला में प्रवेश करके ऋत्विजों और यजमान [मान्धाता] से बोला—(तत् याः प्राच्यः याः च दक्षिणाच्यः याः च प्रतीच्यः याः च उदीच्यः नद्यः वहन्ति ताः सर्वाः पृथङ्नामधेयाः इति आचक्षते, तासां समुद्रम् अभिपद्यमानानां नामधेयं छिद्यते समुद्रः इति आचक्षते) सो जो पूर्व ओर वाली और जो दक्षिण ओर वाली, और जो पश्चिम ओर वाली और जो उत्तर ओर वाली नदियां बहती हैं, वे सब अलग अलग नामवाली हैं, ऐसा कहते हैं, उन समुद्र में पहुँचने वालियों का नाम मिट जाता है, यह समुद्र है—ऐसा कहते हैं, (एवम् इमे सर्वे वेदाः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्याताः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्याः निर्मिताः तेषां यज्ञम् अभिपद्यमानानां नामधेयं छिद्यते यज्ञः इति एव आचक्षते) ऐसे ही यह सब वेद कल्पों सहित रहस्यों सहित, ब्राह्मण ग्रन्थों सहित, उपनिषदों सहित, इतिहासों सहित, व्याख्यानों सहित, पुराणों सहित, स्वरों सहित, संस्कारों सहित, निरुक्तों [निर्वचनों] सहित, अनुशासनों [धर्मशास्त्रों] सहित, अनुमार्जनों [संशोधनों] सहित, वाकोवाक्यों [द्र० १ । २१] सहित बने हुये हैं, उन यज्ञ में पहुँचते हुओं का नाम मिट जाता है, यह यज्ञ है ऐसा ही कहते हैं ॥ १० ॥

भावार्थः—स्पष्ट है ॥ १० ॥

कण्डिका ११ ॥

भूमेर्ह वै एतद्विच्छिन्नं देवयजनं यदप्राक्प्रवणं यदनुदक्प्रवणं यत् कृत्रिमं यत्समविषममिदं ह त्वेव देवयजनं यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति, यत्र ब्राह्मणस्य ब्राह्मणतां विद्याद् ब्रह्मा ब्रह्मत्वं करोतीति वोचे[1] छन्दस्तन्न विन्दामो येनोत्तरमेमहीति । तान् ह पप्रच्छ किं विद्वान् होता हौत्रं करोति, किं विद्वानध्वर्युराध्वर्य्यवं करोति, किं विद्वानुद्गातोद्गात्रं करोति, किं विद्वान् ब्रह्मा ब्रह्मत्वं करोतीति वोचे छन्दस्तन्न विन्दामो येनोत्तरमेमहीति । ते ब्रूमो वागेव होता हौत्रं करोति वाचो हि स्तोमाश्च वषट्काराश्चा-

उदच्—यत् । उत्तरदेशभवेषु (अनाद्याः) खाद्यवस्तुरहिताः(मान्धातुः) मान पूजायाम्—क्विप् + दधातेः—तृच् । सत्कारधारकस्य राजविशेषस्य (यौवनाश्वस्य) युवनाश्वपुत्रस्य (सार्वभौमस्य) चक्रवर्तिनृपस्य । राजराजेश्वरस्य (प्रसूतम्) षूङ् प्राणिप्रसवे—क्तः । निष्पन्नम् । निष्पीडितम् (सदः) यज्ञशालाम् (आमन्त्रयामास) सम्बोधितवान् (अभिपद्यमानानाम्) प्राप्यमाणानाम् (सान्वाख्याताः) सव्याख्यानाः (सानुमार्जनाः) संशोधनाः ॥

१. 'अवोचम्' इति भवितव्यम् । भ्रष्टोऽयं पाठः प्रतीयते ॥ सम्पा० ॥

भिसम्पद्यन्ते, ते ब्रूमो वागेव होता वाग् ब्रह्म वाक् देव इति । प्राणापानाभ्यामेवाध्वर्युराध्वर्य्यवं करोति, प्राणः प्रणीतानि ह भूतानि प्राणः प्रणीताः प्रणीतास्ते ब्रूमः प्राणापानावेवाध्वर्य्यू प्राणापानौ ब्रह्म प्राणापानौ देव इति । चक्षुषैवोद्गाता औद्गात्रं करोति चक्षुषा हीमानि भूतानि पश्यन्त्यथो चक्षुरेवोद्गाता चक्षुर्ब्रह्म चक्षुर्देव इति । मनसैव ब्रह्मा ब्रह्मत्वं करोति मनसा हि तिर्य्यक् च दिश ऊर्ध्वं च यच्च किञ्च मनसैव करोति तद् ब्रह्म ते ब्रूमो मन एव ब्रह्मा मनो ब्रह्म मनो देव इति ॥ ११ ॥

कण्डिका ११ ॥ काबन्धि के देवयजन और ऋत्विजों के विषय में प्रश्नोत्तर ॥

(भूमेः ह वै एतत् विच्छिन्नं देवयजनं यत् अप्राक्प्रवणं यत् अनुदक्प्रवणं यत् कृत्रिमं यत् समविषमम्) यह भूमि से बांटा गया देवयजन [विद्वानों का पूजास्थान] है, जो पूर्व की ओर न झुका हुआ और न उत्तर की ओर झुका हुआ है, जो बना हुआ है, और जो चौरस और ऊंचा नीचा है। (इदं ह तु एव देवयजनं यत् समं समूलम् अविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णम् इव भवति, यत्र ब्राह्मणस्य ब्राह्मणतां विद्यात् ब्रह्मा ब्रह्मत्वं करोति इति) यह तो देवयजन है जो चौरस, नेव [नींव] वाला. बिना जला हुआ, प्रतिष्ठा वाला, पूर्व और उत्तर को झुका हुआ, चौरस, और एक सा फैला हुआ सा है, और जिसमें ब्राह्मण की ब्राह्मणता जानी जावे, [वहाँ] ब्रह्मा ब्रह्मत्व [ब्रह्मा का काम] करता है। (छन्दः वोचे तत् न विन्दामः येन उत्तरम् एमहि इति) मैंने वेदज्ञान कहा है, उसको हम [वैसा] नहीं पाते हैं जिससे हम उत्तर पावें। (तान् ह पप्रच्छ किं विद्वान् होता हौत्रं करोति, किं विद्वान् अध्वर्युः आध्वर्य्यवं करोति, किं विद्वान् उद्गाता औद्गात्रं करोति, किं विद्वान् ब्रह्मा ब्रह्मत्वं करोति इति) उनसे उसने पूछा – कौन विद्वान् होता होतृकर्म करता है, कौन विद्वान् अध्वर्यु अध्वर्यु कर्म करता है, कौन विद्वान् उद्गाता उद्गातृ कर्म करता है, कौन विद्वान् ब्रह्मा ब्रह्मा का कर्म करता है। (छन्दः वोचे तत् न विन्दामः येन उत्तरम् एमहि इति) मैंने वेदज्ञान कहा है, उसको हम [वैसा] नहीं पाते हैं जिससे हम उत्तर पावें। [उन्होंने उत्तर दिया] (ते ब्रूमः वाक् एव

११—(विच्छिन्नम्) विभक्तम् (देवयजनम्) विदुषां पूजास्थानम् (अप्राक्प्रवणम्) प्रुङ् गतौ—ल्युट्। अपूर्वदिक्क्रमनिम्नम् (अनुदक्प्रवणम्) अनुत्तरदिक्क्रमनिम्नम् (कृत्रिमम्) ड्वितः क्त्रिः (पा० ३ । ३ । ८८) डुकृञ् करणे—क्त्रिः। क्त्रेर्मम्नित्यम् (पा० ४ । ४ । २०) इति मप्। करणेन निर्वृत्तम्। रचितम् (समविषमम्) समं समानं च विषमम् असमानम् च। उच्चनीचं च (अविदग्धम्) वि+दह भस्मीकरणे—क्तः। अविशेषेण दग्धम्। अभस्मीकृतम् (विद्यात्) जानीयात् (वोचे) अवोचम्। अहं कथितवान् (छन्दः) वेदज्ञानम् (विन्दामः)

वाक् एव होता वाक् ब्रह्म वाक् देवः इति) तुझसे हम कहते हैं--वाणी ही होता [होकर] होतृ कर्म करती है, वाणियों को ही स्तोम [स्तुति के मन्त्र और वषट्कार आहुतियां] प्राप्त होती हैं, तुझसे हम कहते हैं—वाणी ही होता, वाणी ब्रह्म [वेदज्ञान], और वाणी देवता है । (प्राणापानाभ्याम् एव अध्वर्युः आध्वर्य्यवं करोति, प्राणः प्रणीतानि ह भूतानि, प्राणः प्रणीताः प्रणीताः-ते ब्रूमः प्राणापानौ एव अध्वर्य्यू, प्राणापानौ ब्रह्म, प्राणापानौ देवः इति) दोनों प्राण और अपान [श्वास और प्रश्वास] से ही अध्वर्य्यु अध्वर्य्यु का काम करता है, प्राण ही अच्छे प्रकार लाये गये जीव हैं, प्राण ही अच्छे प्रकार लाये गये प्रणीता [यज्ञपात्रविशेष] हैं--तुझसे हम कहते हैं--दोनों प्राण और अपान ही दो अध्वर्य्यु हैं, प्राण और अपान ब्रह्म [वेदज्ञान], प्राण और अपान देवता हैं । (चक्षुषा एव उद्गाता औद्गात्रं करोति, चक्षुषा हि इमानि भूतानि पश्यन्ति, अथो चक्षुः एव उद्गाता, चक्षुः ब्रह्म, चक्षुः देवः इति) आंख से ही उद्गाता उद्गाता का काम करता है, आंख से ही यह सब जीव देखते हैं, इसलिये आंख ही उद्गाता, आंख ही ब्रह्म [वेदज्ञान] और आंख ही देवता है । (मनसा एव ब्रह्मा ब्रह्मत्वं करोति, मनसा हि दिशः तिर्य्यक् च ऊर्द्ध्वं च यत् च किं च मनसा एव करोति तत् ब्रह्म, ते ब्रूमः मनः एव ब्रह्मा मनः ब्रह्म मनः देवः इति) मन से ही ब्रह्मा ब्रह्मा का काम करता है, मन से ही दिशा के तिरछे काम और ऊंचे काम को और भी जो कुछ है [उसको भी] मन से ही करता है, वह ब्रह्म [वेदज्ञान] है, तुझसे हम कहते हैं—मन ही ब्रह्मा, मन ब्रह्म [वेदज्ञान] और मन देवता है ।। ११ ।।

भावार्थः—इस कण्डिका में भौतिक क्रिया के साथ आत्मिक यज्ञ का वर्णन है । और इसका सम्बन्ध अगली कण्डिका से है ।। ११ ।।

कण्डिका १२ ।।

तद्यथा ह वा इदं यजमानश्च याजयितारश्च दिवं ब्रूयुः पृथिवीति, पृथिवीं वाक् द्यौरिति ब्रूयुस्तदन्यो नानुजानात्येतामेवं नानुजानाति यदेतद् ब्रूयादथ नु कथमिति होतेत्येव होतारं ब्रूयाद्वागिति वाचं, ब्रह्मेति ब्रह्म, देव इति देवमध्वर्यु-रित्येवाध्वर्युं ब्रूयात्, प्राणापानाविति प्राणापानौ, ब्रह्मेति ब्रह्म, देव इति

प्राप्नुमः (एमहि) आ + इण् गतौ—विधिलिङ् । वयं प्राप्नुयाम (हौत्रम्) होतृ—अण् । होतुः कर्म (वषट्काराः[1]) वह प्रापणे डषटि । आहुतय देवयज्ञाः । (वाचः) वाण्यः (समाद्यन्ते) प्राप्नुवन्ति (ते) तुभ्यम् (प्रणीतानि) प्र + णीञ् प्रापणे—क्तः । प्रकर्षेण प्रापितानि (प्रणीताः) यज्ञपात्रविशेषाः ।।

१—वस्तुतः यह अव्युत्पन्न शब्द है । 'कार' प्रत्यय से सूचित होता है कि यह निरर्थक शब्द है । क्योंकि कार प्रत्यय का प्रयोग सदा केवल वर्णमात्र की सूचना देने के लिये ही आता है ।। सम्पा० ।।

देवमुद्गातेत्येवोद्गातारं ब्रूयाच्चक्षुरिति चक्षुर्ब्रह्मेति ब्रह्म, देव इति देवं ब्रह्मेत्येव ब्रह्माणं ब्रूयान्मन इति मनो ब्रह्मेति ब्रह्म देव इति देवम् ॥ १२ ॥

कण्डिका १२ ॥ कावन्धि का अधिक यज्ञ विषयक विचार ॥

(तत् यथा ह वै इदम् यजमानः च याजयितारः च दिवं ब्रूयुः पृथिवी इति, पृथिवीं ब्रूयुः वाक् द्यौः इति) [कावन्धि बोला] सो जैसे यह बात है कि यजमान और याजक लोग प्रकाश को कहें यह पृथिवी है, और पृथिवी को कहें वह वाणी [वा] प्रकाश है । (तत् अन्यः न अनुजानाति एताम् एवं न अनुजानाति यत् एतत् ब्रूयात् अथ नु कथम् इति) उसको दूसरा पुरुष नहीं जान लेता है, इस [वार्ता] को ऐसा नहीं जान लेता है कि इसको [वैसा ही] वह कहे, फिर यह कैसे हो सकता है । (होता इति एव होतारं ब्रूयात्, वाक् इति वाचम्, ब्रह्म इति ब्रह्म, देवः इति देवम्, अध्वर्युः इति एव अध्वर्युं ब्रूयात्) यह होता [होम करने वाला] ही है, होता को कहे, यह वाणी है वाणी को, यह ब्रह्म [वेदज्ञान] है ब्रह्म [वेदज्ञान] को, यह देवता है देवता को, और यह अध्वर्यु ही है अध्वर्यु को बतावे । (प्राणापानौ इति प्राणापानौ, ब्रह्म इति ब्रह्म देवः इति देवं, उद्गाता इति एव उद्गातारं ब्रूयात्) यह प्राण और अपान हैं प्राण और अपान को, यह ब्रह्म है ब्रह्म को, यह देवता है देवता को, और यह उदगाता ही है उद्गाता को ही बतावे । (चक्षुः इति चक्षुः, ब्रह्म इति ब्रह्म, देवः इति देवम्, ब्रह्मा इति एव ब्रह्माणम् ब्रूयात्) यह आंख है आंख को, यह ब्रह्म है ब्रह्म को, यह देवता है देवता को, और यह ब्रह्मा ही है ब्रह्मा को बतावे । (मनः इति मनः, ब्रह्म इति ब्रह्म, देवः इति देवम् ब्रूयात्) यह मन है मन को, यह ब्रह्म [वेदज्ञान] है ब्रह्म [वेदज्ञान] को, यह देवता है देवता को [बतावे] ॥ १२ ॥

भावार्थः—मनुष्य को यथार्थ और स्पष्ट बोलना चाहिये ॥ १२ ॥

कण्डिका १३ ॥

नाना प्रवचनानि ह वा एतानि भूतानि भवन्ति ये चैवासोमपं याजयन्ति ये च सुरापं ये च ब्राह्मणं विच्छिन्नं सोमयाजिनं तं प्रातः समित्पाणय उपोदेयुरुपायामो भवन्तमिति, किमर्थमिति यानेव नो भवांस्तान् ह्यः प्रश्नानपृच्छत्तानेव नो भवान् व्याचक्षीतेति, तथेति तेभ्य एतान् प्रश्नान् व्याचष्टे, तद्येन ह वा इदं विद्यमानश्चाविद्यमानश्चाभिनिदधाति तद् ब्रह्म तद्यो वेद स ब्राह्मणोऽधीयानोऽधीत्याचक्षत इति ब्राह्मणम् ॥ १३ ॥

कण्डिका १३ ॥ कावन्धि का आगे यज्ञ विषयक विचार ॥

(नाना प्रवचनानि ह वै एतानि भूतानि भवन्ति ये च एव असोमपं ये च सुरापं ये च विच्छिन्नं ब्राह्मणं सोमयाजिनं याजयन्ति) अनेक प्रकार से प्रसिद्ध बातें

१२—(दिवम्) प्रकाशम् (ब्रूयुः) कथयेयुः (अनुजानाति) निरन्तरम् अनुभवति ॥

और यह सब जीव होते हैं, जो [जीव] सोम रस को न पीने वाले से, और जो सुरा [मद्य] पीने वाले से, और जो वेद मार्ग से अलग किये हुये सोम यज्ञ कराने वाले ब्राह्मण से यज्ञ कराते हैं, (तं प्रातः समित्पाणयः उपोदेयुः, भवन्तम् उपयामः इति) उस [प्रसिद्ध विद्वान्] के पास प्रातः काल [यज्ञ के लिये] समिधा हाथ में लिये हुये जावें [और कहें] हम आपके पास आये हैं। (किमर्थम् इति) [वह कहे] किस लिये (यान् एव तान् प्रश्नान् नः भवान् ह्यः अपृच्छत् तान् एव नः भवान् व्याचक्षीत इति) जिन ही उन प्रश्नों को हमसे आप ने पूछा है, उनको ही हमें आप बताइये। (तथा इति) [उन्होंने कहा] ऐसा ही हो। (तेभ्यः एतान् प्रश्नान् व्याचष्टे) [और] उनको यह सब प्रश्न बताये। (तत् येन ह वै इदं विद्यमानं च अविद्यमानं च अभिनिदधाति तत् ब्रह्म) सो जिस करके ही यह वर्तमान और अवर्तमान [भूत और भविष्य] सब ओर से धारण किया जाता है वह ब्रह्म है। (तत् यः वेद सः अधीयानः ब्राह्मणः अधीत्य आचक्षते इति ब्राह्मणम्) उसको जो जानता है वह पढ़ा हुआ ब्राह्मण है, [ऐसा] पढ़ करके ही वे लोग कहते हैं—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १३ ॥

भावार्थः—अश्लील कुमार्गी पुरुष से यज्ञ न कराना चाहिये किन्तु वेदज्ञानी सुशील विद्वान् से यज्ञ कराया जावे ॥ १३ ॥

कण्डिका १४ ॥

अथातो देवयजनान्यात्मा देवयजनं श्रद्धा देवयजनमृत्विजो देवयजनं भौमं देवयजनं तद्वा एतदात्मा देवयजनं यदुपव्यायच्छमानो वाऽनुपव्यायच्छमानो वा शरीरमधिवसत्येष यज्ञ एष यजत एतं यजन्त एतद्देवयजनमथैतत् श्रद्धा देवयजनं यदैव कदाचिदादद्यात् श्रद्धा त्वेवैनं नातीयात्तद्देवयजनमथैतदृत्विजो देवयजनं यत्र क्वचिद् ब्राह्मणो विद्यावान् मन्त्रेण करोति तद्देवयजनमथैतद्भौमं देवयजनं यत्रापस्तिष्ठन्ति यत्र स्यन्दन्ति प्रतद्वहन्त्युद्वहन्ति तद्देवयजनं यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति यस्य [1]श्वभ्र ऊर्मो वृक्षः पर्वतो नदी पन्था वा पुरस्तात्स्यान्न देवयजनमात्रं पुरस्तात्पर्य्यवशिष्येन्नोत्तरतोऽग्नेः पर्य्युपासीरन्निति ब्राह्मणम् ॥ १४ ॥

१३—(प्रवचनानि) प्रकृष्टवाक्यानि (असोमपम्) न सोमरसपानकर्त्तारम् (सुरापम्) मद्यपानकर्तारम् (विच्छिन्नम्) वेदमार्गेण वियुक्तम् (तम्) प्रसिद्धं विद्वांसम् (उपोदेयुः) उप+उत्+आ+इयुः, इण् गतौ—विधिलिङ्। प्राप्नुयुः। (व्याचक्षीत) भवान् विवृणोतु (विद्यमानम्) वर्तमानम् (अविद्यमानम्) अवर्तमानं भूतं भविष्यं च (अभिनिदधाति) अभिनिधीयते (अधीत्य) पठित्वा ॥

---

१. पू. सं. "श्वभ्रकूर्मः" इति पाठः ॥ सम्पा० ॥

कण्डिका १४ ॥ कात्रन्धि का देवयजनों के विषय में वर्णन ॥

(अथ अतः देवयजनानि आत्मा देवयजनं श्रद्धा देवयजनम् ऋत्विजः देवयजनं भौमं देवयजनम्) अब यहाँ से देवयजन [विद्वानों के पूजा स्थान] कहे जाते हैं—[देखो कण्डिका ११]—आत्मा देवयजन है, श्रद्धा [पूरा विश्वास] देवयजन है, ऋत्विज् [सब ऋतुओं में यज्ञ कराने वाले] देवयजन हैं, जल [जो भूमि से भाप होकर फिर मेह बनकर बरसता है] देवयजन है। (तत् वै एतत् आत्मा देवयजनं यत् उपव्यायच्छमानः वा अनुपव्यायच्छमानः वा शरीरम् अधिवसति, एषः यज्ञः एषः यजतः, एतं यजन्ते, एतत् देवयजनम्) सो ही यह आत्मा देवयजन है जो [आत्मा] फैलता हुआ अथवा न फैलता हुआ [बड़ा वा छोटा होकर] शरीर में बसता है, यह यज्ञ है, यह यजमान है, इसको पूजते हैं. यह देवयजन है। (अथ एतत् श्रद्धा देवयजनं यदा एव कदाचित् आदद्यात् श्रद्धा तु एव एनं न अतीयात्, तत् देवयजनम्) फिर यह श्रद्धा देवयजन है, जब कभी भी वह [ब्रह्मचारी] लेवे श्रद्धा तो इस [लेने वाले] को न उल्लंघन करे, यह देवयजन है। (अथ एतत् ऋत्विजः देवयजन यत्र क्वचित् विद्यावान् ब्राह्मणः मन्त्रेण करोति तत् देवयजनम्) फिर यह ऋत्विज् लोग देवयजन हैं, जहाँ कहीं विद्वान् ब्राह्मण मन्त्र से कर्म करता है वह देवयजन है। (अथ एतत् भौमं देवयजनं यत्र आपः तिष्ठन्ति यत्र स्यन्दन्ति तत् प्रवहन्ति उद्वहन्ति, तत् देवयजनम्) फिर यह भौम [भूमि से निकला हुआ जल] देवयजन है, जहाँ जल ठहरता है. जहां चूता है, वहाँ बहता है और चढ़ता है, वह देवयजन है, (यत् समं समूलम् अविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णम् इव भवति) जो [स्थान] चौरस नींव वाला, विना जला हुआ, प्रतिष्ठा वाला, पूर्व और उत्तर की ओर झुका हुआ, चौरस और एकसा फैला हुआ होवे (यस्य पुरस्तात् श्वभ्र ऊर्मः वृक्षः पर्वतः नदी पन्थाः वा स्यात्) जिसके आगे चलते हुए पवन वाले हवादार वृक्ष, पहाड़, नदी, अथवा मार्ग हो, (देवयजनमात्रम् पुरस्तात् न पर्य्यवशिष्येत्) देवयजन का परिमाण सामने को न बचा रहे, (न अग्नेः उत्तरतः पर्य्युपासीरन् इति ब्राह्मणम्) और न अग्नि के उत्तर की ओर बैठें—यह ब्राह्मण है ॥ १४ ॥

१४—(श्रद्धा) पूर्णविश्वासः (ऋत्विजः) सर्वेषु ऋतुषु यज्ञकर्तारः। (भौमम्) भूमि—अण्। वाष्पमेघरूपेण भूमेर्जातं जलम् (उपव्यायच्छमानः) उप+वि+आ+यम उपरमे—शानच्। दीर्घीभवन् (अनुपव्यायच्छमानः) अदीर्घीभवन्। अल्पीभवन् (यजतः) भृमृदृशियजि० (उ० ३। ११०) यज देवपूजासंगतिकरणदानेषु-अतच्। यजमानः (यजन्ते) पूजयन्ति (आदद्यात्) गृह्णीयात् (अतीयात्) अति+इण् गतौ—विधिलिङ्। उल्लंघयेत् (आपः) जलानि (तत्) तत्र (प्रवहन्ति) प्रकर्षेण गच्छन्ति (श्वभ्रः) श्वभ्र गतौ—घञ्। गमनशीलः। (ऊर्मः) अर्तेरुच्च (उ० ४। ४४) ऋ गतौ-मिः, उत्, ततः अर्शआद्यच्। ऋच्छति गच्छतीति ऊर्मः वेगः। (मात्राम्) परिमाणम् (पर्य्यवशिष्येत्) परि+अव+शिष असर्वोपयोगे—विधि-

भावार्थः—मनुष्यों को चाहिये कि भौतिक यज्ञ के साथ आत्मिक यज्ञ का विचार करते रहें ॥ १४ ॥

कण्डिका १५ ॥

अदितिर्वै प्रजाकामौदनमपचत् तत उच्छिष्टमाश्नात् सा गर्भमधत्त, तत आदित्या अजायन्त, य एष ओदनः पच्यत आरम्भणमेवैतत् क्रियते आक्रमणमेव प्रादेशमात्रीः समिधो भवन्त्येतावान् ह्यात्मा प्रजापतिना सम्मितोऽग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छत एषा स्वधृत्या तनूर्यद् घृतम्, यद् घृतेन समिधो अनक्ति ताभ्यामेवैनं तन्तनूभ्यां समर्द्धयति यन्निर्मार्गस्यादधात्यवकूत्या वै वीर्यं क्रियते यन्निर्मार्गस्यादधात्यवकूत्या एव संवत्सरो वै प्रजननमग्निः प्रजननमेतत् प्रजननं यत्संवत्सर ऋचाऽग्नौ समिधमादधाति, प्रजननादेवैनन्तत् प्रजनयिता प्रजनयत्यभक्तुर्वै पुरुषो न हि तद्वेद यदृतुमभिजायते, यन्नक्षत्रं तदाप्नोति, य एष ओदनः पच्यते, योनिरेवैषा क्रियते, यत्समिध आधीयन्ते रेतस्तत् ध्रियते संवत्सरो वै रेतो हितं प्रजायते, ये संवत्सरे पर्य्येतेऽग्निमाधत्ते प्रजापतिरेवैनमाधत्ते, द्वादशसु रात्रीषु पुरा संवत्सरस्याधेयात्ता हि संवत्सरस्य प्रतिमा अथो तिसृष्वथो द्वयोरथो पूर्वेद्युराधेयात् ते वा अग्निमादधानेनादित्या वा इत उत्तरमेव मेऽमुष्मिंल्लोक आयंस्ते पथि रक्षन्त इयन्तदु यक्ष्यमाणं प्रतिनुदन्त उच्छेषणभाजा वा आदित्या यदुच्छिष्टं यदुच्छिष्टेन समिधो अनक्ति तेभ्य एव प्रोवाच तेभ्य एव प्रोच्य स्वर्गलोकं यन्ति ॥ १५ ॥

कण्डिका १५ ॥ अदिति की सृष्टि रचना के दृष्टान्त से भौतिक यज्ञ की रचना ॥

(प्रजाकामा अदितिः वै ओदनम् अपचत्) सन्तान चाहने वाली अदिति [अदीन और अखण्ड परमेश्वर शक्ति] ने सींचने वाला भात वा अन्न पकाया [परमाणुओं को चलाया], (ततः उच्छिष्टम् आश्नात्) फिर बचे हुये को खाया [प्रलय से पीछे बचे संयोग वियोग सामर्थ्य को काम में लाया] । (सा गर्भम् अधत्त) उसने गर्भ धारण

लिङ । अवशिष्टं भवेत् (पर्य्युपासीरन्) परि+उप+आस उपवेशने–विधिलिङ् । उपविशेयुः ॥

१५—(अदितिः) कृत्यल्युटो बहुलम् (पा० ३ । ३ । ११३) दीङ् क्षये, दो अवखण्डने, दाप् लवने—क्तिन् । द्यतिस्यतिमास्थामित्ति किति (पा० ७ । ४ । ४०) इति इत्वम् । दीङ्पक्षे ह्रस्वत्वं नञ्समासः । अदितिः पृथिवी - निघ० १ । १ । वाक्—निघ० १ । ११ । गौः—निघ० २ । ११ । अदीना देवमाता—निरु० ४ । २२ । अदीना अक्षीणा अखण्डिता वा परमेश्वरशक्तिः (ओदनम्) उन्देर्नलोपश्च (उ० २ । ७६) उन्दी क्लेदने—युच् । ओदनो मेघः—निघ० १ । १० । ओदनमुदकदानं मेघम्—निरु० ६ । ३४ । सेचकं भक्तम् । अन्नम् (उच्छिष्टम्) उत्+शिष असर्वोपयोगे—क्तः । यः प्रलयात् शिष्यते शेषो भवति तं शेषपदार्थम् ।

किया। [गर्भ वा पिंड के रूप में पदार्थ बनाये], (ततः आदित्याः अजायन्त) उस [कर्म] से आदित्य [अखण्ड परमात्मा से उत्पन्न पदार्थ] उत्पन्न हुये। (यः एषः ओदनः पच्यते एतत् आरम्भणम् एव, आक्रमणम् एव क्रियते) [इसी प्रकार यज्ञ में] जो यह भात पकाया जाता है वह आरम्भ कर्म ही और आगे बढ़ने का कर्म ही किया जाता है, (प्रादेशमात्रीः समिधः भवन्ति, एतावान् हि आत्मा प्रजापतिना सम्मितः) प्रादेशमात्री [अँगूठे से तर्जनी तक परिमाण वाली] समिधायें होती हैं, इतना ही आत्मा प्रजापति [परमेश्वर] करके नापा गया है। (अश्वत्थे अग्नेः वै या यज्ञिया तनूः तया समगच्छत) पीपल [आदि काष्ठ] में अग्नि का जो निश्चय करके पूजनीय शरीर है, उसके साथ वह [अग्नि] मिला है, (एषा स्वधृत्या तनूः यत् घृतम्) यह अपने आप [अग्नि को] पुष्ट करने वाला शरीर है जो घृत है, (यत् घृतेन समिधः अनक्ति ताभ्यां तनूभ्याम् एव एनं तं समर्धयति) वह जो घी से समिधाओं को सींचता है, उन दोनों शरीरों [घी और समिधा] से ही इस प्रसिद्ध [अग्नि] को बढ़ाता है। (यत् निर्मार्गस्य अवकूत्या आदधाति वीर्य्यं वै क्रियते) जो निश्चित मार्ग के संकल्प से अग्न्याधान करता है, [उससे] वीर्य्य [सामर्थ्य] ही किया जाता है, (यत् निर्मार्गस्य अवकूत्या एव आदधाति संवत्सरः वै प्रजननम्, अग्निः प्रजननम्, एतत् प्रजननम् यत् संवत्सरः) जो निश्चित मार्ग के संकल्प से ही अग्न्याधान करता है वह संवत्सर ही उत्पादन सामर्थ्य है, अग्नि उत्पादन सामर्थ्य है, यह उत्पादन सामर्थ्य है जो संवत्सर है, (ऋचा अग्नौ समिधम् आदधाति) मन्त्र के साथ अग्नि में समिधा को रखता है। (प्रजननात् एव एनं तत् प्रजनयिता प्रजनयति) उत्पादन सामर्थ्य से ही इस अग्नि को वह उत्पन्न करने वाला [यजमान] उत्पन्न करता है (अभक्तुर्वै पुरुषः नहि तत् वेद यत् ऋतुम् अभिजायते) इस सृष्टि विज्ञान को न समझने वाला पुरुष यह नहीं जानता है कि ऋतुयें कैसे बनती हैं। (यत् नक्षत्रं तत् आप्नोति) जो नक्षत्र [नक्षत्र का वृष्टि आकर्षणादि प्रभाव] है उसको वह पाता है। (यः एषः ओदनः पच्यते एषा एव योनिः क्रियते) जो यह भात [यज्ञ में] पकाया जाता है यही गर्भाशय किया जाता है, (यत् समिधः आधीयन्ते तत् रेतः ध्रियते) जो समिधायें यथावत् रक्खी जाती हैं उससे वीर्य्य धरा जाता है, (संवत्सरः वै हितं रेतः प्रजायते) संवत्सर [समय] ही हितकारी वीर्य हो जाता है। (ये एते संवत्सरे, परि अग्निम् आधत्ते प्रजापतिः एव एनम् आधत्ते) यह जो [नियम हैं उनसे] संवत्सर तक अग्न्याधान करता है, प्रजापति [यजमान] ही

(आश्नात्) अश भोजने–लङ्। अभक्षयत्। अगृह्णात् (आदित्याः) दित्यदित्यादित्य० (पा० । ४ । १ । ८५) अदिति–ण्यप्रत्ययः, अपत्यार्थे। अदितिपुत्राः। सर्वे परमेश्वरजनितपदार्थाः (प्रादेशमात्रीः) इलश्च (पा० ३ । ३ । १२१) प्र+दिश अतिसर्जने–घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलम् (पा० ६ । ३ । १२२) इति दीर्घः। मात्रच् प्रत्ययः। अंगुष्ठतर्जनीपरिमिताः। (सम्मितः) परिमितः। (स्वधृत्या) स्व+धृञ् धारणे–क्यप्। स्वपोषिका (अनक्ति) संयोजयति (निर्मार्गस्य) निश्चितमार्गस्य (अवकूत्या) अव+कूञ् शब्दे–क्तिन्। आकूत्या।

इस [अग्नि] को यथावत् रखता है । (द्वादशसु रात्रीषु संवत्सरस्य पुरा आदधेयात् ताः हि संवत्सरस्य प्रतिमाः, अथो तिसृषु अथो द्वयोः अथो पूर्वेद्युः आदधेयात्) बारह रात्रियों में संवत्सर के पहिले [अग्नि को] यथावत् रक्खे वे ही [बारह रातें] संवत्सर की प्रतिमायें [स्थानापन्न] हैं, फिर तीन [रातों] में फिर दो में फिर पहिले दिन में [अग्नि को] यथावत् रक्खे । (ते वै आदित्याः अग्निम् आदधानेन इतः वै उत्तरम् एव मे अमुष्मिन् लोके आयन्) वे ही आदित्य [परमेश्वर के उत्पन्न पदार्थ] निश्चय करके अग्न्याधान से इससे पीछे भी मेरे लिये उस लोक [सुख स्थान] में प्राप्त होवें । (ते पथि रक्षन्तः इयम् = इदम् तत् उ यक्ष्यमाण प्रतिनुदन्ते उच्छेषणभाजाः वै आदित्याः) वे मार्ग में रक्षा करते हुये इस और उस दातव्य पदार्थ को भेजते रहते हैं, विशेष सामर्थ्य के बांटने वाले ही आदित्य [ईश्वर के उत्पन्न पदार्थ] हैं, (यत् उच्छिष्टम्) जो बचा हुआ पदार्थ है, (यत् उच्छिष्टेन समिधः अनक्ति तेभ्यः एव प्रोवाच तेभ्य. एव प्रोच्य स्वर्गलोकं यन्ति) जो वह बचे हुये पदार्थ से समिधायें सींचता है [पूर्ण आहुति देता है,] उसने उन [ईश्वर के उत्पन्न पदार्थों] के लिये ही कहा है, उन [ईश्वर के उत्पन्न पदार्थों] के लिये ही व्याख्या करके वे पुरुष स्वर्ग-लोक पाते हैं ॥ १५ ॥

भावार्थः—मनुष्यों को भौतिक यज्ञ के साथ परमात्मा और जीवात्मा का भी विचार करना चाहिये ॥ १५ ॥

विशेषः—इस कण्डिका को मिलाओ—अथ० ११ । १ ॥

कण्डिका १६ ॥

प्रजापतिरथर्वा देवः स तपस्तप्त्वैतच्चातुष्प्राश्यं ब्रह्मौदनं निरमिमीत, चतुर्लोकं चतुर्देवं चतुर्वेदं चतुर्होत्रमिति, चत्वारो वा इमे लोकाः पृथिव्यन्तरिक्षं द्यौराप इति, चत्वारो वा इमे देवा अग्निर्वायुरादित्यश्चन्द्रमाः, चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति, चतस्रो वा इमाः होत्रा होत्रमाध्वर्य्यवमौद्गात्र ब्रह्मत्वमिति ।

तदप्येतदृचोक्तम् । चत्वारि श्रृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश इति ।

चत्वारि श्रृङ्गेति वेदा वा एत उक्ताः, त्रयो अस्य पादा इति सवनान्येव, द्वे शीर्ष इति ब्रह्मौदनप्रवर्ग्यावेव, सप्त हस्तासो अस्येति छन्दांस्येव, त्रिधा बद्ध इति मन्त्रः कल्पो ब्राह्मणं, वृषभो रोरवीत्येष ह वै वृषभ एष तद्रोरवीति यद्य-

---

संकल्पेन (यक्ष्यमाणम्) यज दाने स्यः, शानच् । दातव्यपदार्थम् (प्रतिनुदन्ते) प्रत्यक्षेण प्रेरयन्ति (उच्छेषणभाजाः) उत्+शिष अनवयोगे—ल्युट्+भाज पृथक्कर्मणि—अण् । विशेषसामर्थ्यस्य विभक्तारः (यन्ति, प्राप्नुवन्ति ॥

१—अर्थ तुलनीय निरु० १३ । ७ ॥ सम्पा० ॥

ज्ञेषु शस्त्राणि शंसत्यृग्भिर्यजुर्भिः सामभिर्ब्रह्मभिरिति, महोदेवो मर्त्यां आविवेशेत्येष ह वै महान् देवो यद्यज्ञ एषः मर्त्यां आविवेश। यो विद्यात्सप्त प्रवत इति प्राणानाह सप्त विद्यात्परावत इत्यपानानाह। शिरो यज्ञस्य यो विद्यादित्येतद्वै यज्ञस्य शिरो यन्मंत्रवान् ब्रह्मौदनो यो ह वा एतममन्त्रवन्तं ब्रह्मौदनमुपेयादपशिरसा ह वा अस्य यज्ञमुपेतो भवति तस्मान्मंत्रवन्तमेव ब्रह्मौदनमुपेयान्नामन्त्रवन्तमिति ब्राह्मणम् ॥ १६ ॥

कण्डिका १६ ॥ ब्रह्मज्ञानियों को चार चार प्रकार से ब्रह्मप्राप्ति ॥

(प्रजापतिः अथर्वा देवः) प्रजापति अथर्वा [प्रजापालक निश्चल] प्रकाशमान परमात्मा है। (सः तपः तप्त्वा एतं चातुष्प्राश्यं ब्रह्मौदनं निरमिमीत, चतुर्लोकं चतुर्देवं चतुर्वेदं चतुर्होत्रम् इति) उसने तप करके इस चार प्रकार से फैले हुये ब्रह्मौदन [ब्रह्मज्ञानियों के अन्न] को बनाया, चार लोक, चार देव, चार वेद. और चार ऋत्विजों के कर्म [को बनाया]। (चत्वारः वै इमे लोकाः पृथिवी अन्तरिक्षं द्यौः आपः इति) चार लोक यह हैं—पृथिवी, अन्तरिक्ष, प्रकाश और जल। (चत्वारः वै इमे देवाः अग्निः वायुः आदित्यः चन्द्रमाः) चार देव यह हैं अग्नि, पवन, सूर्य और चन्द्रमा। (चत्वारः वै इमे वेदाः ऋग्वेदः यजुर्वेदः सामवेदः ब्रह्मवेदः इति) चार वेद यह हैं ऋग्वेद, यजुर्वेद, सामवेद और ब्रह्मवेद [अथर्ववेद] (चतस्रः वै इमाः होत्राः होत्रम्, आध्वर्य्यवम् औद्गात्रं ब्रह्मत्वम् इति) चार ऋत्विजों की क्रियायें यह हैं—होता का कर्म, अध्वर्य्यु का कर्म उद्गाता का कर्म और ब्रह्मा का कर्म।

(तत् अपि एतत् ऋचा उक्तम्) यह भी इस ऋचा करके कहा गया है। (चत्वारि शृङ्गाः त्रयः अस्य पादाः द्वे शीर्षे अस्य सप्त हस्तासः त्रिधा बद्धः वृषभः रोरवीति महः देवः मर्त्यान् आ विवेश इति)—ऋग्वेद ४। ५८। ३, आदि। तथा निरुक्त १३। ७। (चत्वारि अस्य शृङ्गा इति एते वै वेदाः उक्ताः, त्रयः पादाः इति सवनानि एव द्वे शीर्षे इति ब्रह्मौदनप्रवर्ग्यौ एव, सप्त हस्तासः अस्य इति छन्दांसि एव) इस [यज्ञ] के चार सींग [के समान] यह वेद कहे गये हैं, तीन पग [के समान] सवन [प्रातः सवन, माध्यन्दिन सवन और तृतीय सवन अथवा कर्म उपासना ज्ञान], दो सिर [के समान] ब्रह्मौदन और प्रवर्ग्य [ब्रह्मज्ञानियों का अन्न और यज्ञाग्नि, अथवा अभ्युदय और निश्रेयस् सुख] हैं, सात हाथ [के समान गायत्री आदि प्रधान] छन्द ही हैं। (त्रिधा बद्धः इति मन्त्रः कल्पः ब्राह्मणम्) वह तीन

१६—(अथर्वा) गो० पू० १। ४। निश्चलः परमेश्वरः (चातुष्प्राश्यम्) चतुर्+प्र+अशूङ् व्याप्तौ-ण्यत्, स्वार्थे ष्यञ्। हलो यमां यमि लोपः (पा० ८। ४। ६४) यलोपः। चतुर्धा व्याप्यम् (ब्रह्मौदनम्) ब्रह्मभ्यो ब्रह्मज्ञानिभ्यः ओदनम् अन्नम् (चतुर्ल्लोकम्) चतुर्णां लोकानां समाहारम् (द्यौः) प्रकाशलोकः (ब्रह्मवेदः) अथर्ववेदः (होत्राः) हुयामाश्रुभसिभ्यस्त्रन् (उ० ४। १६८) हु दानादानेषु —त्रन्, टाप्। होत्रा वाक्—निघ० १। ११, यज्ञः—निघ० ३। १७। होत्राशब्दः

प्रकार से बंधा है, यह मन्त्र [वेदमन्त्र], कल्प [यज्ञपद्धति] और ब्राह्मण [ब्रह्मज्ञान] हैं (एषः वृषभः रोरवीति एषः वृषभः ह वै तत् रोरवीति यत् यज्ञेषु शस्त्राणि ऋग्भिः यजुर्भिः सामभिः ब्रह्मभिः शंसति इति) यह वृषभ [बैल समान यज्ञ] बड़ा शब्द करता है, यही वृषभ [यज्ञ] वह बड़ा शब्द करता है जो यज्ञों में शस्त्रों [स्तोत्रों] को ऋग्वेद के मन्त्रों, यजुर्वेद के मन्त्रों सामवेद के मन्त्रों और ब्रह्मवेद के मन्त्रों से बोलता है । (महः देवः मर्त्यान् आविवेश इति एषः ह वै महान् देवः यत् यज्ञः एषः मर्त्यान् आविवेश) बड़ा देव मनुष्यों में प्रवेश करता है, यही बड़ा देव है जो यज्ञ है वह इन [भूतों] के बीच मनुष्यों में प्रवेश करता है ।

(यः सप्त प्रवतः विद्यात् इति) [अथ० १० । १० । २ ।] (प्राणान् आह सप्त परावतः विद्यात् इति [दूसरा पाद] अपानान् आह) जो सात [२ हाथ, २ पांव, १ पायु, १ उपस्थ, १ उदर] उत्तम गति वालों को जाने, यह प्राणों को कहता है. सात [२ कान, २ नथने, २ आंखें, १ मुख] दूर गति वालों को जाने यह अपानों को कहा है । (यः यज्ञस्य शिरो विद्यात् इति [तीसरा पाद] एतत् वै यज्ञस्य शिरः यत् मन्त्रवान् ब्रह्मौदनः) जो यज्ञ के शिर को जाने यही यज्ञ का शिर है जो मन्त्रों सहित ब्रह्मौदन [ब्रह्मज्ञानियों का अन्न] है । (यः ह वै एतम् अमन्त्रवन्तम् ब्रह्मौदनम् उपेयात् अस्य [व्यवहारः] ह वै अपशिरसा यज्ञम् उपेतः भवति) जो कोई भी इस बिना मन्त्र वाले ब्रह्म ओदन को प्राप्त करे उसका [व्यवहार] बिना शिर वाले यज्ञ युक्त होता है । (तस्मात् मन्त्रवन्तम् एव ब्रह्मौदनम् उपेयात् न अमन्त्रवन्तम् इति ब्राह्मणम्) इसलिये मन्त्र वाले ही ब्रह्मौदन को प्राप्त करे, न बिना मन्त्र वाले को यह ब्राह्मण [ब्रह्मज्ञान है] ॥ १६ ॥

भावार्थः—जो मनुष्य चारों वेदों को विचार कर श्रेष्ठ कर्म करता है वही सिद्धि पाता है ॥ १६ ॥

विशेषः— ऊपर दिये हुए मन्त्र अर्थ सहित लिखे जाते हैं ।

१—चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश—ऋ० ४ । ५८ । ३, यजु० १७ ।

ऋत्विग्वाची स्त्रीलिङ्गः । होत्राभ्यश्छः (पा० ५ । १ । १ :५) इति निर्देशात् । ततः अर्शआद्यच् टाप् । ऋत्विजीयाः क्रियाः (हौत्रम्) होतुः कर्म (अस्य) वृषभस्य (वृषभः) ऋषिवृषिभ्यां कित् (उ० ३ । १२३) वृषु सेचने—अभच्, कित् । सुखवर्षको यज्ञः (रोरवीति) रु शब्दे—यङ्लुकि रूपम् । भृशं रौति शब्दयति (महः) मह पूजायाम्--घञर्थे कः । महान् (प्रवर्ग्यः) प्रवर्ग—यत् स्वार्थे । यज्ञाग्निः (शस्त्राणि) स्तोत्राणि (शंसति) कथयति (एषः) उक्तपदार्थः (प्रवतः) उपसर्गाच्छन्दसि धात्वर्थे (पा० ५ । १ । ११८) प्र—वति धात्वर्थे साधने । प्रकृष्टगतीन् लोकान् (परावतः) परा वति प्रत्ययः पूर्ववत् । दूरगतीन् देशान् (अपशिरसा) सुपां सुलुक्० (पा० ७ । १ । ३९) अपशिरस्--आ प्रत्ययो द्वितीयार्थे । अपशिरसम् । शिरोरहितम् ॥

६१, निरुक्त १३। ७। [शृङ्गाः पद के स्थान पर वहां शृङ्गा पद है] (अस्य) इस [वृषभरूप यज्ञ] के (चत्वारि) चार [वेद] (शृङ्गा) सींग, (त्रयः) तीन [कर्म उपासना ज्ञान] (पादाः) पैर, (द्वे) दो [प्रायणीय और उदयनीय अर्थात् अस्तकाल और उदयकाल] (शीर्षे) सिर और (अस्य) इसके (सप्त) सात [गायत्री आदि छन्द] (हस्तासः) हाथ [समान] हैं। (त्रिधा) तीन प्रकार [मन्त्र, कल्प वा यज्ञ पद्धति और ब्राह्मण वा ब्रह्मज्ञान से] (बद्धः) बन्धा हुआ (वृषभः) वह बैल [समान यज्ञ] (रोरवीति) बड़ा शब्द करता है, (महः देवः) उस महान् देव [कामना योग्य यज्ञ] ने (मर्त्यान्) मनुष्यों में (आ विवेश) प्रवेश किया है॥

२—यो विद्यात् सप्त प्रवतः सप्त विद्यात् परावतः। शिरो यज्ञस्य यो विद्यात् स वशां प्रतिगृह्णीयात्॥ अथ० १०। १०। २। (यः) जो [विद्वान्] (सप्त) सात [२ हाथ, २ पांव १ पायु, १ उपस्थ, १ उदर] (प्रवतः) उत्तम गति वाले [लोकों] को (विद्यात्) जाने और (सप्त) सात [२ कान, २ नथने, २ आँखें, १ मुख] (परावतः) दूर गति वाले [लोकों] को (विद्यात्) जान जावे। (यः) जो (यज्ञस्य) यज्ञ [श्रेष्ठ कर्म] के (शिरः) शिर [प्रधान अपने आत्मा] को (विद्यात्) जान लेवे, (सः) वह [पुरुष] (वशाम्) वशा [कामना योग्य परमेश्वर शक्ति] को (प्रति) प्रतीति से (गृह्णीयात्) ग्रहण करे॥

कण्डिका १७॥

किमुपयज्ञ आत्रेयो भवतीत्यादित्यं हि तमो जग्राह, तदत्रिरपनुनोद तदत्रिरन्वपश्यत्। तदप्येतदृचोक्तम्। स्तुतायमत्रिर्द्दिवमुन्निनाय दिवि त्वाऽत्रिरधारयत् सूर्य्या मासाय कर्त्तव इति। तं होवाच वरं वृणीष्वेति, स होवाच दक्षिणीया मे प्रजा स्यादिति, तस्मादात्रेयाय प्रथमं दक्षिणा यज्ञे दीयन्त इति ब्राह्मणम्॥ १७॥

कण्डिका १७॥ ईश्वर मानने वाले की महिमा॥

(उपयज्ञः आत्रेयः किं भवति) यज्ञ में आया हुआ आत्रेय [अत्रि, नित्य ज्ञानी परमेश्वर का मानने वाला ब्राह्मण] क्या होता है। [उत्तर] (आदित्यं हि तमः जग्राह, तत् अत्रिः अपनुनोद, तत् अत्रिः अनु अपश्यत्) सूर्य्य को अन्धकार [प्रलय के अन्धेरे] ने पकड़ लिया था, उसको अत्रि [नित्य ज्ञानी परमेश्वर] ने हटा दिया, उसको अत्रि ने [नित्य ज्ञानी परमेश्वर ने वेद में] दिखा दिया है। (तत् अपि एतत् ऋचा उक्तम्) वही इस ऋचा करके कहा गया है—(स्तुतः त्यम् अत्रिः दिवम् उन्निनाय, सूर्य्या अत्रिः मासाय कर्तवे त्वा दिवि अधारयत् इति अथ० १३। २। ४ और अथ० १३। २। १२) जिस [सूर्य] को अत्रि [नित्य ज्ञानी परमात्मा]

१७—(उपयज्ञः) उपगतयज्ञः। प्राप्तयज्ञः (आत्रेयः) अदेस्त्रिनिश्च (उ० ४। ६८) अत सातत्यगमने—त्रिप्। अत्रिः। सदा ज्ञानवान् परमात्मा। इतश्चानिञः (पा० ४। १। १२२) अत्रि—ढक् अपत्यार्थे। अत्रेः सदा ज्ञानवतः परमेश्वरस्य पुत्रः, ब्राह्मणः (तमः) प्रलयान्धकारः (अत्रिः) उपरि द्रष्टव्यम्। अनन्तज्ञानी

ने बहते हुए [प्रकृति रूप समुद्र] से आकाश में ऊँचा किया है, हे सूर्य [लोकों के चलाने वाले रवि मण्डल] अत्रि [सदा ज्ञानी परमात्मा] ने महीना [काल विभाग] करने के लिए उस तुझको आकाश में धारण किया है। (तं ह उवाच वरं वृणीष्व इति) उस [ब्राह्मण] से वह [यजमान] बोला—वर मांग। (स: ह उवाच मे प्रजा दक्षिणीया स्यात् इति) वह [ब्राह्मण] बोला—मेरी प्रजा [मेरे समान ब्रह्मज्ञानी] दक्षिणा योग्य होवे। (तस्मात् आत्रेयाय प्रथमं दक्षिणा: यज्ञे दीयन्ते इति ब्राह्मणम्) इसलिए आत्रेय [अत्रि, नित्य ज्ञानी परमेश्वर के मानने वाले ब्राह्मण] को पहिले दक्षिणायें यज्ञ में दी जाती हैं—यह ब्राह्मण है ॥ १७ ॥

भावार्थ:—मनुष्यों को चाहिये कि चारों वेद जानने वाले ब्रह्मज्ञानी का आदर सबसे अधिक करे ॥ १७ ॥

विशेष:—प्रतीक वाला मन्त्र अर्थ सहित दिया जाता है ॥

स्रुताद् यमत्रिर्दिवमुन्निनाय—अथ० १३। २। ४, दिवि त्वात्रिरधारयत् सूर्या मासाय कर्तवे—अथ० १३। २। १२—(यम्) जिस [सूर्य] को (अत्रि:) नित्य ज्ञानी [परमात्मा] ने (स्रुतात्) बहते हुए [प्रकृति रूप समुद्र] से (दिवम्) आकाश में (उन्निनाय) ऊँचा किया है, (सूर्य) हे सूर्य ! [लोकों के चलाने वाले रवि मण्डल] (अत्रि:) सदा ज्ञानवान [परमात्मा] ने (मासाय) महीना [काल विभाग] (कर्तवे) करने के लिए (त्वा) [उस] तुझको (दिवि) आकाश में (अधारयत्) धारण किया है ॥

कण्डिका १८ ॥

प्रजापतिर्वेदानुवाच अग्नीनादधीयेति, तान्वागभ्युवाचाश्वो वै सम्भाराणामिति, तद्घोरात् क्रूरात्सलिलात्सरस उदानिन्युस्तान् वागभ्युवाचाश्व: शम्येतेति, तथेति तमृग्वेद एत्योवाचाहमश्वं शमेयमिति तस्मा अविसृप्ताय महद्भयं ससृजे, स एतां प्राचीं दिशम्भेजे स होवाचाशान्तोन्वयमश्व इति। तं यजुर्वेद एत्योवाचाहमश्वं शमेयमिति तस्मा अविसृप्ताय महद्भयं ससृजे, स: एतां प्रतीचीन्दिशं भेजे स होवाचाशान्तो न्वयमश्व इति। तं सामवेद एत्योवाचाहमश्वं शमेयमिति, केन नु त्वं शमयिष्यसीति, रथन्तर नाम मे सामाघोरञ्चाक्रूरञ्च तेनाश्व अभिष्टूयेत तस्मा अविसृप्ताय तदेव महद्भयं ससृजे. स एतामुदीचीन्दिशम्भेजे, स होवाचाशान्तो न्वयमश्व इति। तान्वागभ्युवाच शंयुमाथर्वणं गच्छतेति, ते शंयुमाथर्वणमासीनं प्राप्योचुर्नमस्ते अस्तु भगवन्नश्व: शम्येतेति। तथेति स खलु कबन्धस्याथर्वणस्य पुत्रमामन्त्रयामास विचारिन्निति, भगो इति

परमेश्वर: (अपनुनोद) दूरीकृतवान् (अन्वपश्यत्) निरन्तरं दर्शितवान् वेदे (स्रुतात्) स्रवणशीलात् प्रकृतिरूपसमुद्रात् (दिवम्) आकाशम् (उन्निनाय) उन्नीतवान् (सूर्य्या) सांहितको दीर्घ:। हे सूर्य्य (कर्तवे) तुमर्थे सेसेनसे० (पा० ३। ४। ९) करोते:—तवेन्। कर्तुम्। (दक्षिणीया:) कडङ्करदक्षिणाच्छ च (पा० ५। १। ६९) दक्षिणा—छप्रत्यय:। दक्षिणायोग्या:।

हास्मै प्रतिश्रुतं प्रतिशुश्रावाश्वः शम्येतेति, तथेति स खलु शान्त्युदकं चकाराथर्वणीभिश्चाङ्गिरसोभिश्चातनैर्मातृनामभिर्वास्तोष्पत्यैरिति शमयति तस्य ह स्नातस्याश्वस्याभ्युक्षितस्य सर्वेभ्यो रोमशमरेभ्योऽङ्गारा आशीर्य्यन्त सोऽश्वस्तुष्टो नमस्कारं चकार नमः शंयुमाथर्वणाय यो मा यज्ञमचीक्लृपदिति, भविष्यन्ति ह वा अतोऽन्ये ब्राह्मणा लघुसम्भारतमास्त आदित्यस्य पद आधास्यन्त्यनडुहो वत्सस्याजस्य श्रवणस्य ब्रह्मचारिणो वा एतद्वा आदित्यस्य पदं यद्भूमिस्तथैव पद आहितं भविष्यतीति सोऽग्नौ प्रणीयमानेऽश्वेऽन्वारब्धं ब्रह्मा यजमानं वाचयति यदक्रन्दः प्रथमं जायमान इति पञ्च, तं ब्राह्मणा उपवहन्ति तद्ब्रह्मोपाकुरुते एष ह वै विद्वांत्सर्वविद् ब्रह्मा यद्भृग्वङ्गिरोविदिति ब्राह्मणम् ॥ १८ ॥

कण्डिका १८ ॥ विघ्नों को हटाकर अश्व नामक अग्नि की स्थापना ॥

(प्रजापतिः वेदान् उवाच अग्नीन् आ-दधीय इति) प्रजापति [परमेश्वर] ने वेदों से कहा--अग्नियों [आहवनीय, गार्हपत्य, दक्षिणाग्नि--क० २२] को मैं स्थापित करूँ। (तान् वाक् अभ्युवाच) उन [वेदों] से वाणी ने स्पष्ट कहा--(अश्वः वै सम्भाराणाम् इति) अश्व [व्यापक वा घोड़ा रूप अग्नि] ही संग्रहों का [ले जाने वाला है, यह ब्राह्मण वचन है]। (तं घोरात् क्रूरात् सलिलात् सरसः उत्--आ--निन्युः) उस [अश्व अग्नि] को भयंकर हिंसक, और जल से भरे हुये सरोवर से उन्हीं [वेदों] ने ऊँचा किया। (तान् वाक् अभि-उवाच अश्वः शम्येत इति) उनसे वाणी ने स्पष्ट कहा—अश्व [अग्नि] शान्त किया जावे। [वे बोले] (तथा इति) वैसा ही होगा (तम् ऋग्वेदः एत्य उवाच अहम् अश्वं शमेयम् इति) उससे ऋग्वेद आकर बोला—मैं अश्व को शान्त करूँ। (तस्मै अविसृप्ताय महत् भयं ससृजे) उस न सरकते हुए [ठहरे हुए अहंकारी] को बड़ा भय उत्पन्न हुआ। (सः एतां प्राचीं दिशं भेजे) उसने इस पूर्व दिशा को सेया [ऋग्वेदी होता अग्नि के पूर्व में बैठा]। (सः उवाच अशान्तः नु अयम् अश्वः) उसने कहा—यह अश्व [अग्नि] अशान्त ही है। (तं यजुर्वेदः एत्य उवाच अहम् अश्वं शमेयम् इति) उससे यजुर्वेद आकर बोला—मैं अश्व [अग्नि] को शान्त करूँ। (तस्मै अविसृप्ताय महत् भयं ससृजे) उस न सरकते हुए [ठहरे हुए, अहंकारी] को बड़ा भय उत्पन्न हुआ। (सः एतां प्रतीचीं दिशं भेजे) उसने

१८—(प्रजापतिः) प्रजापालकः परमात्मा (अग्नीन्) आहवनीयगार्हपत्यदक्षिणाग्नीन्—क० २२ (आदधीय) आ+दधातेः विधिलिङ्। अहं यथाविधि धरेयम् (अश्वः) अशूप्रुषिलटि० (उ० १। १५१) अशूङ् व्याप्तौ—क्वन्। व्यापको घोटकरूपो वा अग्निः (वाक्) वेदवाणी (सम्भाराणाम्) संग्रहाणां वोढा, इत्यध्याहारः (घोरात्) हन्तेरच् घुर् च (उ० ५। ६४) हन हिंसागत्योः—अच्, धातोः घुरादेशश्च। भयानकात्। (क्रूरात्) कृतेश्छः क्रू च (उ० २। २१) कृती छेदने—रक्, धातोः क्रू इत्यादेशः। हिंसकात्। कठिनात् (सलिलात्) सलिल—अर्श आद्यच्। जलपूर्णात् (सरसः) सरोवरात्। जलोपद्रवादित्यर्थः (उदानिन्युः) उन्नीतवन्तः (अविसृप्ताय) अविगताय। स्थिताय। अहङ्कारयुक्ताय। (रथन्तरम्)

इस पश्चिमी दिशा को सेया [यजुर्वेदी अध्वर्यु वेदी के पश्चिम में बैठा] (सः उवाच अशान्तः नु अयम् अश्वः इति) वह बोला—यह अश्व [अग्नि] अशान्त ही है। (तं सामवेदः एत्य उवाच अहम् अश्वं शमेयम् इति) उससे सामवेद आकर बोला—मैं अश्व [अग्नि] को शान्त करूं। [वाणी ने कहा] (केन नु त्वं शमयिष्यसि इति) किससे तू शान्त करेगा। [सामवेद बोला] (रथन्तरं नाम अघोरं च अक्रूरं च मे साम तेन अश्वः अभि—स्तूयते) रमणीय पदार्थों के साथ पार लगाने वाला प्रसिद्ध अभयानक और अहिंसक मेरा सामवेद सूक्त है, उससे अश्व की [अग्नि] स्तुति किया जाये। (तस्मै अविसृप्ताय तत् एव महत् भयं ससृजे) उस न सरकते हुये [ठहरे हुये अहंकारी] को वैसा ही बड़ा भय उत्पन्न हुआ। (स एताम् उदीचीं दिशं भेजे) उसने उत्तर वाली दिशा को सेया [सामवेदी उद्गाता वेदी के उत्तर में बैठा]। (सः ह उवाच अशान्तः नु अयम् अश्वः इति) वह बोला - यह अश्व [अग्नि] अशान्त ही है। (तान् वाक् अभि–उवाच आथर्वणं शंयुं गच्छत इति) उनसे वाणी ने स्पष्ट कहा—निश्चल ब्रह्म को जानने वाले शंयु [शान्तिवाले मुनि] के पास जाओ। (ते आथर्वणं शंयुम् आसीनं प्राप्य ऊचुः भगवन् ते नमः अस्तु अश्वः शम्येत इति) वे निश्चल ब्रह्म के जानने वाले शंयु [शान्तिवाले मुनि] को बैठा हुआ पाकर बोले—हे भगवन् तेरे लिये नमस्कार होवे, आप अश्व [अग्नि] को शान्त करें। [शंयु ने कहा] (तथा इति) वैसा ही होवे। (सः खलु आथर्वणस्य कबन्धस्य पुत्रम् आमन्त्रयामास विचारिन्निति) प्रसिद्ध है उसने निश्चल ब्रह्म को जानने वाले कबन्ध के पुत्र [काबन्धि–क० १०] को हे विचारिन्! ऐसा कहकर बुलाया—(भगो इति ह अस्मै प्रतिश्रुतं प्रतिशुश्राव) [काबन्धि बोला] हाँ भगवन्! मैंने इस विचार को सुन लिया। (अश्वः शम्येत इति) [कि] अश्व [अग्नि] शान्त हो जाये। (तथा इति) ऐसा ही हो। (सः खलु शान्त्युदकम् आथर्वणीभिः च आङ्गिरसीभिः च आततैः मातृनामभिः वास्तोष्पत्यैः चकार इति) उसने तब निश्चल ब्रह्म वाली और पूर्ण ज्ञान वाली ऋचाओं के साथ विस्तार वाले प्रमाणकर्ताओं के नाम वाले और गृहपति वाले व्यवहारों से शान्ति के जल को बनाया, (शमयति) और [उसे] शान्त किया। (तस्य ह स्नातस्य अभि–उक्षितस्य अश्वस्य सर्वेभ्यः रोमशमरेभ्यः अङ्गाराः आ—अशीर्य्यन्त) उस शुद्ध किये हुये और भले प्रकार सींचे हुये अश्व [अग्नि] के सब रोम कूपों से अङ्गारे निकल पड़े। (सः अश्वः तुष्टः

रमु क्रीडायां—क्थन्+तॄ प्लवनसंतरणयोः—खच् [1]मुम् च। रथैः रमणीयपदार्थैस्तरति येन तत् (शंयुम्) कंशंभ्यां बभयुस्तितुतयसः (पा० ५ । २ । १३८) शं—युस् मत्वर्थे, सकारः पदत्वार्थः। शान्तिमन्तम् (आथर्वणम्) निश्चलब्रह्मवेत्तारम् (कबन्धस्य) गो० पू० २ । १० । मुनिविशेषस्य (रोमशमरेभ्यः) लस्य रः। रोमशमलेभ्यः। रोममलकूपेभ्यः। (अङ्गाराः) अङ्गिमदिमन्दिभ्यः आरन् (उ० ३ । १३४) अगि गतौ—आरन्। निर्धूमाग्नयः (आशीर्य्यन्त)

---

१. 'क्थन्' उ० २ । २ एवं खच् प्रत्यय अष्टा० ३ । २ । ४६ से हुआ है ॥ सम्पा० ॥

नमस्कारं चकार आथर्वणाय शंयुं नमः यः मा यज्ञम् अचीक्लृपत् इति) उस अश्व [अग्नि] ने संतुष्ट होकर नमस्कार किया—निश्चल ब्रह्म को जानने वाले शंयु [शांतिमान मुनि] को नमस्कार हो, जिसने मुझे यज्ञ के लिये समर्थ बनवाया है । (अतः अन्ये ब्राह्मणाः ह वै लघुसम्भारतमाः भविष्यन्ति) इस [कर्म] से दूसरे ब्रह्मज्ञानी लोग हलके बोझ वाले होंगे, (ते आदित्यस्य पदे अनड्डुहः वत्सस्य अजस्य श्रवणस्य ब्रह्मचारिणः [पदम्] वै आ—धास्यन्ति) वे सूर्य के पद में जीवन पहुँचाने वाले, निवास कराने वाले, प्रेरणा कराने वाले, सुनने वाले ब्रह्मचारी के [पद को] स्थापित करेंगे । (एतत् वै आदित्यस्य पदम् यत् भूमिः तया एव पदे [पदम्] आहितं भविष्यति इति) यही सूर्य का पद है जो भूमि है, उसके साथ ही पद में [पद] स्थापित होगा [अग्नि को भूमि पर हवन कुंड में रक्खे] । (अश्वे अग्नौ प्रणीयमाने स ब्रह्मा, अन्वारब्धं यजमानं वाचयति—यत् अक्रन्दः प्रथमं जायमानः इति पंच) अश्व अर्थात् अग्नि के संस्कार होते हुये पर वह ब्रह्मा अनुष्ठान करते हुये यजमान से बुलवाता है—[हे अश्व !] जो तूने उत्पन्न होते हुये पहिले शुद्ध किया है इन पांच को [यह प्रतीक ऋग्वेद १ । १६३ । १–५ की है—देखो क० २' ।] (तं ब्राह्मणाः उपवहन्ति तत् ब्रह्मा उपाकुरुते) उस [यजमान] को ब्राह्मण समीप लाते हैं और तब ब्रह्मा [उसका] संस्कार करता है । (एषः ह वै विद्वान् सर्ववित् ब्रह्मा यत् भृग्वङ्गिरोवित् इति ब्राह्मणम्) यही विद्वान् सब जानने वाला ब्रह्मा है जो प्रकाशमान ज्ञानों का जानने वाला [अर्थात् चतुर्वेदी पुरुष] है, यह ब्राह्मण है ॥ १८ ॥

भावार्थः—यज्ञ में ऋग्वेदी, यजुर्वेदी, और सामवेदी अलग अलग अपना काम करें और चतुर्वेदी आप्त विद्वान् पुरुष ब्रह्मा का आसन ग्रहण करके सब कार्य करावे। देखो गो० पू० ५ । ११, तथा निरुक्त १ । ८ में लिखा है–"ब्रह्मो जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति । ब्रह्मा परिवृढः श्रुततः" एक ब्रह्मा उत्पन्न हुये प्रत्येक कर्म में विद्या को बताता है, ब्रह्मा सब विद्याओं वाला होता है, अतः सब कुछ जानने में समर्थ होता है एवं वह वेदज्ञान के कारण से बढ़ा हुआ=समुन्नत होता है ॥ १८ ॥

कण्डिका १९ ॥

देवाश्च ह वा असुराश्चास्पर्द्धन्त ते देवा इन्द्रमब्रुवन्निमन्नस्तावद्यज्ञं गोपाय

आङ्+शॄ हिंसायां—कर्मणि लङ् । विशीर्णा अभवन् (शंयुम्) शंयवे (अचीक्लृपत्) क्लृपू सामर्थ्ये—लुङि चङि रूपम् । समर्थं कारितवान् (अनड्डुहः) सर्वधातुभ्योऽसुन् (उ० ४ । १८९) अन प्राणने–असुन् । क्विप् च (पा० ३ । २ । ७६) अनस्+वह प्रापने—क्विप्, अनसो डश्च । अनसः प्राणस्य जीवनस्य वा वाहकस्य प्रापकस्य (वत्सस्य) वृतॄवदिवचिवसि० (उ० ३ । ६२) वस निवासे—स प्रत्ययः । निवासकस्य (अजस्य) अज गतिक्षेपणयोः—अच् । प्रेरकस्य (श्रवणस्य) श्रवणशीलस्य (आहितम्) स्थापितम् (प्रणीयमाने) संस्क्रियमाणे (अन्वारब्धम्) कृतानुष्ठानम् (उपाकुरुते) संस्करोति ॥

यावदसुरैः संयतामहा इति, स वै नस्तेन रूपेण गोपाय येन नो रूपेण भूयिष्ठं छादयसि येन शक्ष्यसि गोप्तुमिति, स ऋग्वेदो भूत्वा पुरस्तात्परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व नैतेन नो रूपेण भूयिष्ठं छादयसि नैतेन शक्ष्यसि गोप्तुमिति, स यजुर्वेदो भूत्वा पश्चात्परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व नैतेन नो रूपेण भूयिष्ठं छादयसि नैतेन शक्ष्यसि गोप्तुमिति, स सामवेदो भूत्वा उत्तरतः परीत्योपातिष्ठत् तं देवा अब्रुवन्नन्यदेव तद्रूपं कुरुष्व नैतेन नो रूपेण भूयिष्ठं छादयसि नैतेन शक्ष्यसि गोप्तुमिति, स इन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत्तं देवा अब्रुवन्नेतत्तद्रूपं कुरुष्वैतेन नो रूपेण भूयिष्ठं छादयस्येतेन शक्ष्यसि गोप्तुमिति, तद्यदिन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत्तद् ब्रह्माऽभवत्तद्ब्रह्मणो ब्रह्मत्वं तद्वा एतदथर्वणो रूपं यदुष्णीषी ब्रह्मा, तं दक्षिणतो विश्वेदेवा उपासीदंस्तं यद्दक्षिणतो विश्वेदेवा उपासीदंस्तत्सदस्योऽभवत्तत्सदस्यस्य सदस्यत्वं बलेर्हं वा एतद् बलमुपजायते यत्सदस्य ओमयनो वै ब्रजस्य बहुलतरं ब्रजं विदन्ति, घोरा वा एषा दिग्दक्षिणा शान्ता इतरास्तद्यानि स्तुतानि ब्रह्माऽनुमन्त्रयते मनसैव तानि सदस्यो जनदित्येतां व्याहृतिं जपन् चेत्यात्मानं जनयति न जित्यात्मानमर्पित्वे दधाति, तं देवा अब्रुवन्वरं वृणीष्वेति वृणा इति, स वरमवृणीतास्यामेव मां होत्रायामिन्द्रभूतं पुनन्त स्तुवन्तः शंसन्त; तिष्ठेयुरिति तं तस्यामेव होत्रायामिन्द्रभूतं पुनन्त स्तुवन्त; शंसन्तोऽतिष्ठंस्तं यत्तस्यामेव होत्रायामिन्द्रभूतं पुनन्त स्तुवन्तः शंसन्तोऽतिष्ठंस्तद् ब्राह्मणाच्छंस्यभवत्तद्ब्राह्मणाच्छंसिनो ब्राह्मणाच्छंसित्वं सैषैन्द्री होत्रा यद् ब्राह्मणाच्छंसीया, द्वितीयं वरं वृणीष्वेति वृणा इति स वरमवृणीतास्यामेव मां होत्रायां वायुभूतं पुनन्त स्तुवन्तः शंसन्तस्तिष्ठेयुरिति तं तस्यामेव होत्रायां वायुभूतं पुनन्तः स्तुवन्तः शंसन्तोऽतिष्ठंस्तं यत्तस्यामेव होत्रायां वायुभूतं पुनन्तः स्तुवन्तः शंसन्तोऽतिष्ठंस्तत् पोता ऽभवत्तत् पोतुः पोतृत्वं सैषा वायव्या होत्रा यत् पोत्रिया, तृतीयं वरं वृणीष्वेति वृणा इति स वरमवृणीतास्यामेव मां होत्रायामग्निभूतमिन्धानाः पुनन्तः स्तुवन्तः शंसन्तस्तिष्ठेयुरिति तन्तस्यामेव होत्रायामग्निभूतमिन्धानाः पुनन्तः स्तुवन्तः शंसन्तोऽतिष्ठंस्तं यत्तस्यामेव होत्रायामग्निभूतमिन्धाना पुनन्तः स्तुवन्तः शंसन्तोऽतिष्ठंस्तदाग्नीध्रोऽभवत्तदाग्नीध्रस्याग्नीध्रत्वं सैषाग्नेयी होत्रा यदाग्नीध्रीयेति ब्राह्मणम् ॥ १८ ॥

कण्डिका १९ ॥ आख्यायिका—असुरों से इन्द्र द्वारा देवताओं की रक्षा और अग्न्याधान ॥

(देवाः च ह वै असुराः च अस्पर्धन्त) देवता और असुर लड़ने लगे। (ते देवाः इन्द्रम् अब्रुवन् इमं नः यज्ञं तावत् गोपाय, यावत् असुरैः संयतामहै इति)

१८—(गोपाय) रक्ष (संयतामहै) यती प्रयत्ने-लोट्। संग्रामं करवामहै।

वे देवता इन्द्र से बोले—इस हमारे यज्ञ की तब तक रक्षा कर, जब तक हम असुरों से लड़ें। (सः वै नः तेन रूपेण गोपाय येन रूपेण नः भूयिष्ठं छादयसि येन गोप्तुं शक्ष्यसि इति) सो तू हमें उस रूप से बचा जिस रूप से तू हमें बहुत बहुत छिपाता है और जिससे तू रक्षा कर सकता है। (सः ऋग्वेदो भूत्वा पुरस्तात् परीत्य उपातिष्ठत्) वह [इन्द्र] ऋग्वेद होकर पूर्व ओर से घूम कर पास बैठ गया [देखो कण्डिका १८]। (तं देवाः अब्रुवन् अन्यत् तत् रूपं कुरुष्व एतेन रूपेण नः भूयिष्ठं न छादयसि न एतेन गोप्तुं शक्ष्यसि इति) उससे देवता बोले—दूसरा वह रूप कर, इस रूप से तू हमें बहुत बहुत नहीं छिपाता है और न इससे तू बचा सकता है।

(सः यजुर्वेदः भूत्वा पश्चात् परीत्य उपातिष्ठत्) वह यजुर्वेद हो कर पश्चिम ओर से घूम कर पास बैठ गया। (तं देवाः अब्रुवन् अन्यत् तत् रूपं कुरुष्व एतेन रूपेण नः भूयिष्ठं न छादयसि न एतेन गोप्तुं शक्ष्यसि इति) उससे देवता बोले—दूसरा वह रूप कर, इस रूप से तू हमें बहुत बहुत नहीं छिपाता है और न इससे तू बचा सकता है। (स सामवेदः भूत्वा उत्तरतः परीत्य उपातिष्ठत्) वह सामवेद होकर उत्तर की ओर से घूमकर पास बैठ गया। (तं देवा अब्रुवन् अन्यत् एव तत् रूपं कुरुष्व एतेन रूपेण नः भूयिष्ठं न छादयसि न एतेन गोप्तुं शक्ष्यसि इति) उससे देवता बोले—दूसरा ही वह रूप कर, इस रूप से तू हमें बहुत बहुत नहीं छिपाता है और न इससे तू बचा सकता है। (सः उष्णीषी इन्द्रः ब्रह्मवेदः भूत्वा दक्षिणतः परीत्य उपातिष्ठत्) वह पगड़ी वाला इन्द्र ब्रह्मवेद [चारों वेदों का समूह] होकर दक्षिण की ओर से घूम कर पास बैठ गया। (तं देवाः अब्रुवन् एतत् तत् रूपं कुरुष्व एतेन रूपेण नः भूयिष्ठं छादयसि एतेन गोप्तुं शक्ष्यसि इति) उससे देवता बोले—इससे वह रूप कर, इस रूप से तू हमें बहुत बहुत छिपाता है और इससे बचा सकता है। (तत् यत् उष्णीषी इन्द्रः ब्रह्मवेदः भूत्वा दक्षिणतः परीत्य उपातिष्ठत्, तत् ब्रह्मा अभवत् तत् ब्रह्मणः ब्रह्मत्वम्, तत् वै एतत् अथर्वणः रूपम् यत् उष्णीषी ब्रह्मा) वह जो पगड़ी वाला इन्द्र ब्रह्मवेद [चारों वेदों का समूह] हो कर दक्षिण की ओर से घूम कर पास बैठ गया वह ब्रह्मा हो गया, वह ब्रह्मा का ब्रह्मापन है, वही यह अथर्वा [निश्चल ब्रह्म] का रूप है जो पगड़ी वाला ब्रह्मा है [अर्थात् सब वेद जानने वाला ब्रह्मा होता है—क० १८]।

(तं दक्षिणतः विश्वेदेवाः उपासीदन्) उसके दक्षिण ओर सब देवता बैठ गये। (तं दक्षिणतः यत् विश्वेदेवाः उपासीदन् तत् सदस्यः अभवत् तत् सदस्यस्य

(छादयसि) वेष्टयसि (उष्णीषी) उष्णीष—इनिः। शिरोवेष्टनवान् (ब्रह्मवेदः) चतुर्वेदसमूहः (ब्रह्मा) चतुर्वेदवेत्ता (अथर्वणः) निश्चलब्रह्मणः (विश्वे देवाः) सर्वे याजकाः (उपासीदन्) षद्लृ विशरणगत्यवसादनेषु—लङ्। उपातिष्ठन् (सदस्यः) सदस्—यत्। सभायां साधुः (बलेः) उपहारात्। पूजनद्रव्यात्

सदस्यत्वं, बलेः ह वै [1]एतत् बलम् उपजायते यत् सदस्यः आमयतः वै व्रजस्य बहुलतरं व्रजं विदन्ति) उसके दक्षिण ओर जो सब देवता बैठ गये, उससे वह सदस्य [सभा में चतुर] हुआ, वह सभा में चतुर पुरुष का सभा में चतुर्पन है। बलि [भेंट] से ही यह बल [सामर्थ्य] उत्पन्न होता है जो सभा में चतुर है चलते हुये मार्ग के देश की बहुत कर के बड़ाई करते हैं। (एषा दक्षिणा दिक् वै घोरा इतराः शान्ताः) यह दक्षिण दिशा भयानक है और दूसरी शान्त हैं। [क्योंकि दक्षिण में यज्ञ का द्वार होता है]। (तत् यानि स्तुतानि ब्रह्मा अनुमंत्रयते मनसा एव सदस्यः तानि जनत् इति एतां व्याहृतिं जपन् च इति आत्मानं जनयति, जित्या आत्मानम् अपित्वे न दधाति) सो जिन स्तोत्रों को ब्रह्मा मन्त्र के अनुकूल करता है, मन से ही सदस्य उन [स्तोत्रों] को और जनत् [गो० पू० १। ८] इस व्याहृति को जपता हुआ [यज्ञ के] आत्मा को प्रकट करता है और जीव से आत्मा को अप्राप्ति [वस्तुओं को अभाव] में नहीं रखता है [अर्थात् सब पदार्थ पा लेता है]। (तं देवाः अब्रुवन् वरं वृणीष्व इति) उससे देवता बोले—वर मांग। (वृणै इति) [इन्द्र बोला] मैं मांगूं। (स वरम् अवृणीत अस्याम् एव होत्रायां माम् इन्द्रभूतं पुनन्तः स्तुवन्तः शंसन्तः तिष्ठेयुः इति) उसने वर मांगा—इस ही स्तुति में मुझ इन्द्र [सूर्य समान] होते हुये को पवित्र करते हुये, पूजते हुये और बड़ाई करते हुये आप लोग ठहरें। (तस्याम् एव होत्रायां तम् इन्द्रभूतं पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन्) उस ही स्तुति में उस इन्द्र होते हुए को पवित्र करते हुए, पूजते हुए और बड़ाई करते हुए वे ठहरे। (यत् तस्याम् एव होत्रायां तम् इन्द्रभूतं पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन् तत् ब्राह्मणाच्छंसी अभवत्) जो उसी ही स्तुति में उस इन्द्र [सूर्य] होते हुए को पवित्र करते हुए, पूजते हुए, और बड़ाई करते हुए वे ठहरे, उससे वह ब्राह्मणाच्छंसी [ब्रह्मज्ञान

(आमयतः) अम गतौ चुरादिः - शतृ। गच्छतः (व्रजस्य) मार्गस्य (व्रजम्) देशम् (विदन्ति) विद ज्ञाने–लट्। जानन्ति (स्तुतानि) स्तोत्राणि (जित्या) जयेन (अपित्वे) अ + पि गतौ—त्वन्। अभिपित्वम् = अभिप्राप्तिम्—निरु० ३। १५। अप्राप्तौ (होत्रायाम्) क० १६। स्तुतौ। (स्तुवन्तः) स्तौति = अर्चति—निघ० ३। १४। पूजयन्तः (शंसन्तः) प्रशंसन्तः (ब्राह्मणाच्छंसी) ब्राह्मणात्–

---

१. यहाँ अर्थ की सङ्गति इस प्रकार है—दक्षिण दिशा की ओर समासीन ब्रह्मा के सामने सभी देवता सभा के रूप में बैठ गये इससे वह ब्रह्मा (सदसि साधुः) सदस्य कहलाया। बलशाली ब्रह्मा का बल भी तभी उत्पन्न होता है जब सदस्य (देव) बैठते हैं।

आगे—'आमयतः वै व्रजस्य' यहाँ 'छादयति' का अध्याहार तथा विभक्ति विपरिणाम करके वाक्य होगा 'आमयतः वै व्रजम् छादयति' अर्थात् इस यज्ञ से व्रज = गोष्ठ रोगमुक्त हो जाता है, इस प्रकार पुष्कल पशुधन प्राप्त होते हैं।

ऐसी अर्थसङ्गति 'बली' को इनि प्रत्ययान्त तथा 'व्रजः' में पचाद्यच् मानने से होगी॥ सम्पा०॥

से स्तुति वाला] हुआ, (तत् ब्राह्मणाच्छंसिनः ब्राह्मणाच्छंसित्वम्) वही ब्राह्मणाच्छंसी का ब्राह्मणाच्छंसीपन है । (सा एषा ऐन्द्री होत्रा यत् ब्राह्मणाच्छंसीया) वही इन्द्र की स्तुति है जो ब्राह्मणाच्छंसी की है ।

(द्वितीयं वरं वृणीष्व इति) [देवता बोले] दूसरा वर मांग । (वृणै इति) [इन्द्र बोला] मैं मांगूं । (सः वरम् अवृणीत अस्याम् एव होत्रायां मां वायुभूतं पुनन्तः स्तुवन्तः शंसंतः तिष्ठेयुः इति) उसने वर मांगा उस ही स्तुति में मुझ पवन होते हुये को पवित्र करते हुये, पूजते हुये और बड़ाई करते हुये आप ठहरें । (तस्याम् एव होत्रायां तं वायुभूतं पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन्) उस ही स्तुति में उस पवन होते हुये को पवित्र करते हुये, पूजते हुये और बड़ाई करते हुये वे ठहरें । (यत् तस्याम् एव होत्रायां तं वायुभूतं पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन् तत् पोता अभवत् तत् पोतुः पोतृत्वम्) जो उसी ही स्तुति में उस पवन रूप होते हुये को पवित्र करते हुये. पूजते हुए और बड़ाई करते हुये वे ठहरे, इससे वह पोता [शोधने वाला] हुआ, वही पोता का पोतापन है । (सा एषा वायव्या होत्रा यत् पोत्रिया) वही पवन की स्तुति है जो पोता की है ।

(तृतीयं वरं वृणीष्व) [देवता बोले] तीसरा वर मांग । (वृणै इति) [इन्द्र बोला] मैं मांगूं । (सः वरम् अवृणीत अस्याम् एव होत्रायां माम् अग्निभूतम् इन्धानाः पुनन्तः स्तुवन्तः शंसन्तः तिष्ठेयुः इति) उसने वर मांगा–इस ही स्तुति में मुझ अग्नि [समान] होते हुए को प्रकाश करते हुये, पवित्र करते हुये, पूजते हुये और बड़ाई करते हुये आप ठहरें । (तस्याम् एव होत्रायां तम् अग्निभूतम् इन्धानाः पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन्) उस ही स्तुति में उस अग्नि होते हुये को प्रकाश करते पवित्र करते हुये पूजते हुये और बड़ाई करते हुये वे ठहरे । (यत् तस्याम् एव होत्रायां तम् अग्निभूतम् इन्धानाः पुनन्तः स्तुवन्तः शंसन्तः अतिष्ठन् तत् आग्नीध्रः अभवत् तत् आग्नीध्रस्य आग्नीध्रत्वम्) जो उस ही स्तुति में उस अग्नि होते हुए को प्रकाश करते हुए, पवित्र करते हुए, पूजते हुए और बड़ाई करते हुए वे ठहरे, वह अग्नीध्र [अग्नि प्रकाशक] हुआ, यही आग्नीध्र का आग्नीध्रपन है, (सा एषा आग्नेयी होत्रा यत् आग्नीध्रीया इति ब्राह्मणम्) और वही अग्नि की स्तुति है जो आग्नीध्र की है–यह ब्राह्मण है ॥ १६ ॥

शंसी–इनिप्रत्ययान्तः । ब्राह्मणाद् ब्रह्मज्ञानाद् शंसा प्रशसा यस्य सः । इन्द्रस्य विशेषणम् (ऐन्द्री) इन्द्र–अण्, ङीप् । इन्द्रसम्बन्धिनी (ब्राह्मणाच्छंसीया) वृद्धाच्छः (पा० ४ । २ । ११४) ब्राह्मणाच्छंस–छः । ब्रह्मज्ञानाद् प्रशंसासंबद्धा (पोता) नप्तृनेष्टृत्वष्टृहोतृपोतृ० (उ० २ । ९५) पुनातेः–तृन् । शोधकः । ऋत्विक् (वायव्या) वाय्वृतुपित्रुषसो यत् (पा० ४ । २ । ३१) वायु–यत् । पवनसंबन्धिनी (पोत्रियाः) पोतृ–घप्रत्ययः । पोतृसंबन्धिनी (इन्धानाः) प्रदीपयन्तः (आग्नीध्रः) पू० १ । २३ । अग्नीध्रः । ऋत्विग्विशेषः । अग्निरक्षकः । अग्निप्रदीपकः (आग्नेयी) अग्नेर्ढक् (पा० ४ । २ । ३३) अग्नि–ढक्, ङीप् । अग्निसम्बन्धिनी (आग्नीध्रीया) छप्रत्ययान्तः । अग्निप्रदीपकसंबन्धिनी ॥

भावार्थ :—जो मनुष्य चारों वेदों में निपुण है वही निर्विघ्न होकर सब सामग्री यथावत् एकत्र करके अग्न्याधान करावे ॥ १९ ॥

कण्डिका २० ॥

ब्राह्मणो ह वा इममग्निं वैश्वानरं बभार। सोऽयमग्निर्वैश्वानरो ब्राह्मणेन भ्रियमाण इमांल्लोकान् जनयतेऽथायमीक्षतेऽग्निर्जातवेदा ब्राह्मणद्वितीयो ह वा अयमिदमग्निर्वैश्वानरो ज्वलति हन्ताहं यन्मयि तेज इन्द्रियं वीर्य्यन्तद्दर्शयाम्युत वै मा बिभ्रियादिति, स आत्मानमाप्याययेत्तं पयोधोक्तमिमं ब्राह्मणं दर्शयित्वा-ऽऽत्मन्यजुहोत् सद्वितीयमात्मानमाप्याययेत्तं घृतमधोक्तमिमं ब्राह्मणं दर्शयित्वा आत्मन्यजुहोत्, स तृतीयमात्मानमाप्याययेत्तदिदं विश्वं विकृतमन्नाद्यमधोक्तमिमं ब्राह्मणं दर्शयित्वाऽऽत्मन्यजुहोत्, स चतुर्थमात्मानमाप्याययेत्तेन ब्राह्मणस्य जायां विराजमपश्यत् तामस्मै प्रायच्छत् स आत्मा अपित्वमभवत्तत इममग्निं वैश्वानरं परास्युर्ब्राह्मणोऽग्निं जातवेदसमधत्त, सोऽयमब्रवीत् अग्ने जातवेदो अभिनिधेहि मैहीति तस्य द्वैतं नामाधत्ताघोरं चाक्रूरञ्च, सोऽश्वोऽभवत्तस्मादश्वो वहेत् रथं न भवति पृष्ठेन सादिनं, स देवानागच्छत्स देवेभ्योऽन्वातिष्ठत् तस्माद्देवा अविभयुस्तं ब्रह्मणे प्रायच्छन्तमेतयच्चर्चाऽशमयत् ॥ २० ॥

कण्डिका २० ॥ वैश्वानर, जातवेदा और अश्व नामक अग्नि ॥

(ब्राह्मणः ह वै इमं वैश्वानरं अग्निं बभार) ब्राह्मण [ब्रह्मज्ञानी] ने ही इस वैश्वानर [सब नरों के हित करने वाले] अग्नि को धारण किया। (सः अयं वैश्वानरः अग्निः ब्राह्मणेन भ्रियमाणः इमान् लोकान् जनयते) सो यह वैश्वानर अग्नि ब्राह्मण से धारण किया हुआ होकर इन लोकों को उत्पन्न करता है। (अथ ब्राह्मणद्वितीयः अयम् जातवेदाः अग्निः ह वै [इदम्] ईक्षते, अयम् वैश्वानरः अग्निः इदम् ज्वलति) फिर ब्राह्मण को सहायक रखने वाला यह जातवेदा [उत्पन्न पदार्थों में विद्यमान] अग्नि [इस जगत को] देखता है, और यह वैश्वानर [सब नरों का हितकारी] अग्नि इस [जगत्] को प्रकाशित करता है। (हन्त यत् मयि तेजः इन्द्रियं वीर्य्यं तत् अहम् दर्शयामि, उत् वै मा बिभ्रियात् इति) [अग्नि बोला] हर्ष हो! जो मुझमें तेज, ईश्वरत्व और वीरपन है उसको मैं दिखाऊँ और वह निश्चय करके मुझको धारण

२०—(वैश्वानरम्) नॄ नये—अच्। नृणाति, नयतीति नरः। पुरुषः। नरे संज्ञायाम् (पा० ६। ३। १२९) विश्वस्य दीर्घः। तस्मै हितम् (पा० ५। १। ५) इत्यण्। वैश्वानरः कस्माद् विश्वान् नरान् नयति विश्व एनं नरा नयन्ति—निरु० ७। २१। सर्वनरहितम् (जातवेदाः) गतिकारकोपपदयोः० (उ० ४। २२७) जात+विद ज्ञाने विद्लृ लाभे, विद सत्तायां वा—असिप्रत्ययः। जातवेदाः कस्मात् जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा—निरु० ७। १९। जातेषु उत्पन्नपदार्थेषु विद्यमानः (ब्राह्मणद्वितीयः) ब्राह्मणो द्वितीयः सहायो यस्य सः (इदम्)

करे। (सः आत्मानम् आप्याययेत् तं पयः अधोक्) वह [ब्राह्मण, अग्नि के] स्वरूप को पुष्ट करे, और उस [ब्राह्मण] को उस [अग्नि] ने दूध दुहा है, (इमं ब्राह्मणं दर्शयित्वा आत्मनि अजुहोत्) और [वह दूध] इस ब्राह्मण को दिखा कर उस [अग्नि] ने अपने में ले लिया। (सः द्वितीयम् आत्मानम् आप्याययेत् तं घृतम् अधोक् तम् इमम् ब्राह्मणं दर्शयित्वा आत्मनि अजुहोत्) वह [ब्राह्मण, अग्नि के] दूसरे स्वरूप को पुष्ट करे, और उस ब्राह्मण को उस [अग्नि] ने घृत दुहा है और [वह घृत] इस ब्राह्मण को दिखाकर उस [अग्नि] ने अपने में ले लिया। (सः तृतीयम् आत्मानम् आप्याययेत् तत् इदं विश्वं विकृतम् अन्नाद्यम् अधोक्, तम् इमं ब्राह्मणं दर्शयित्वा आत्मनि अजुहोत्) वह [ब्राह्मण, अग्नि के तीसरे स्वरूप को पुष्ट करे, और इस सब विविध प्रकार किये हुये अन्न को उस [अग्नि] ने दुहा है और इस ब्राह्मण को दिखा कर उसने अपने में ले लिया है। (सः चतुर्थम् आत्मानम् आप्याययेत् तेन ब्राह्मणस्य विराजं जायाम् अपश्यत्) वह [ब्राह्मण, अग्नि के] चौथे स्वरूप को पुष्ट करे, उससे उस [अग्नि] ने ब्राह्मण की विविध ऐश्वर्यवाली जनयित्री शक्ति को देखा। (ताम् अस्मै प्रायच्छत्) उसने उस [जनयित्री शक्ति] को उस [ब्राह्मण] को दे दिया। (सः आत्मा अपित्वम् अभवत्) उस [ब्राह्मण] ने अपने में [अग्नि की] अप्राप्ति को पाया। (ततः परास्युः ब्राह्मणः इमं वैश्वानरम् अग्निं जातवेदसम् अग्निम् अधत्त) तब श्रेष्ठ व्यवहारों के ग्रहण करने वाले ब्राह्मण ने वैश्वानर [सब नरों के हितकारक] अग्नि और जातवेदा [सब प्राणियों में वर्त्तमान] अग्नि को धारण किया। (सः अयम् अब्रवीत् जातवेदः अग्ने मा अभिनिधेहि एहि इति) सो यह [ब्राह्मण] बोला—हे जातवेदा [उत्पन्न पदार्थों में विद्यमान] अग्नि! मुझे सब ओर से पुष्ट कर, तू आ। (तस्य द्वैतं नाम अघोरं च अक्रूरं च अधत्त) और उसका दो प्रकार वाला नाम अभयानक और अहिंसक रक्खा। (सः अश्वः अभवत्) वह [अग्नि] अश्व [व्यापक घोड़े के समान] हो गया। (तस्मात् अश्वः रथं वहेत् न पृष्ठेन सादिनम् भवति) इसलिये अश्व रथ [देह] को ले चलता है जैसे वह पीठ से

दृश्यमानं जगत् (ज्वलति) ज्वलयति (हन्त) हर्षे (आत्मानम्) स्वरूपम्। देहम् (पयः) दुग्धम् (अधोक्) दुह प्रपूरणे—लङ्। दुग्धवान्। पूरितवान् (अजुहोत्) हु दानादानादनेषु—लङ्। गृहीतवान् (विकृतम्) विविधं कृतम्। उत्पादितम् (अन्नाद्यम्) भक्षणीयमन्नम्। (जायाम्) जनेर्यक् (उ० ४। १११) जन जनने—यक्, आत्वम्, टाप्। जनयित्रीं शक्तिम् (विराजम्) सत्सूद्विषद्रुह० (पा० ३। २। ६१) वि+राजृ दीप्तौ ऐश्वर्य्ये च—क्विप्। विविधदीप्यमानाम्। विविधैश्वर्य्याम् (आत्मा) आत्मनि (अपित्वम्) क० १६। अप्राप्तिम् (अभवत्) भू प्राप्तौ—लङ्। अप्राप्नोत्। (परास्युः) परान् श्रेष्ठव्यवहारान् असति गृह्णातीति। यजिमनिशुन्धि० (उ० ३। २०) पर+अस गतिदीप्त्यादानेषु—युच्, बाहुलकात्। श्रेष्ठव्यवहाराणां ग्रहीता (द्वैतम्) द्विधाभेदयुक्तम् (वहेत) गमयेद् (रथम्) यानम्। शरीरम् (न) उपमायाम्। यथा (सादिनम्) अश्ववारम्॥

अश्ववार को पाता है । (सः देवान् आगच्छत् स देवेभ्यः अन्वातिष्टत्) वह [अग्नि] देवों [इन्द्रियों] में आया और वह देवों के लिये अनुष्ठान करने लगा । (तस्मात् देवाः अबिभयुः, तं ब्रह्मणे प्रायच्छन्) उससे देव डर गये, उसे उन्होंने ब्राह्मण को दे दिया । (तम् एतया ऋचा अशमयत्) उस [ब्राह्मण] ने उसको इस ऋचा से शान्त किया [कण्डिका २१ देखो] ॥ २० ॥

भावार्थः—देव इन्द्रियां और असुर रोगादि विघ्न हैं, ब्राह्मण जीव है, अश्व, वैश्वानर और जातवेदा अग्नि के नाम हैं । भावार्थ यह है कि जीवात्मा अग्नि को रोगादि विघ्नों से बचाकर, शरीर को स्वस्थ रखकर कार्यकुशल होवे—मिलाओ क० १८, १९, और २० को ॥ २० ॥

कण्डिका २१ ॥

अग्निं त्वाहुर्वैश्वानरं सदनान् प्रदहन्वगाः । स नो देवत्राधिब्रूहि मा रिषामा वयन्तवेति । तमेताभिः पञ्चभिर्ऋग्भिरुपाकुरुते यदक्रन्दः प्रथमं जायमान इति ।

सोऽशाम्यत्तस्मादश्वः पशूनां जिघत्सुतमो भवति वैश्वानरो ह्येष तस्मादग्निपदमश्वं ब्रह्मणे ददाति ब्रह्मणे हि प्रत्तस्तस्य रसमपीडयत् स रसोऽभवद्रसो ह वा एष तं वा एतं रसं सन्तं रथ इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः । स देवानागच्छत् स देवेभ्योऽन्वातिष्ठत्तस्माद्देवा अबिभयुस्तं ब्रह्मणे प्रायच्छन्तमेतयर्चाऽऽज्याहुत्याऽभ्यजुहोदिन्द्रस्यौजो मरुतामनीकमिति । रथमभिहुत्य तमेतयर्चाऽतिष्ठद् वनस्पते वीड्वङ्गो हि भूया इति ।

तस्मादाग्न्याधेयिकं रथं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्तं तस्य तक्षाणस्तनूज्येष्ठां दक्षिणां निरमिमीत । तां पञ्चस्वपश्यदृचि यजुषि साम्नि शान्तेऽथ घोरे ।

तासां द्वे ब्रह्मणे प्रायच्छद्वाचं च ज्योतिश्च, वाग्वै धेनुर्ज्योतिर्हिरण्यं तस्मादाग्न्याधेयिकां चातुष्प्राश्यां धेनुं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्ता पशुषु शाम्यमानेषु चक्षुर्हापयन्ति चक्षुरेव तदात्मनि धत्ते यद्वै चक्षुस्तद्धिरण्यं तस्मादाग्न्याधेयिकं हिरण्यं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्तं तस्यात्मन्नधत्त तेन प्राज्वलयत् यन्नाधत्त तदाग्लाऽभवत्तदाग्ला भूत्वा सा समुद्रं प्राविशत्सा समुद्रमदहत्तस्मात्समुद्रो दुर्गिरपि वैश्वानरेण हि दग्धः सा पृथिवीमुदैत्सा पृथिवीं व्यदहत्सा देवानागच्छत्सा देवानहेडत्त[1] देवा ब्रह्माणमुपाधावन् स नैवागायन्नानृत्यत् सैषा ग्लैषा कारुविदा नाम तं वा एतमाग्लाहतं सन्तमाग्लागृध इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः । य एष ब्राह्मणो गायनो वा नर्त्तनो वा भवति तमाग्लागृध इत्याचक्षते, तस्माद् ब्राह्मणो नैव गायेन्नानृत्येन्माग्लागृधः स्यात्तस्माद् ब्राह्म्यं पूर्वं हविरपरं प्राजापत्यं प्राजापत्याद् ब्राह्म्यमेवोत्तममिति ब्राह्मणम् ॥ २१ ॥

---

१. हेडृ धातोः आत्मनेपदित्वात् 'अहेडत' इति समीचीनः पाठः प्रतिभाति ॥ सम्पा० ॥

कण्डिका २१ ॥ वैश्वानर, जातवेदा और अश्व नामक अग्नि का वही विषय ॥

(त्वा वैश्वानरम् अग्निम् आहुः सदनान् प्रदहन् उ अगाः, सः नः देवत्रा अधिब्रूहि, वयं तव मा रिषाम इति) [क० देखो २०] तुझको वैश्वानर [सब नरों का हितकारी] अग्नि लोग कहते हैं, [शत्रुओं के] घर वालों को जलाता हुआ तू चला है, सो तू हमसे विद्वानों के बीच अधिकार पूर्वक बोल, हम तेरे होकर दुखी न होवें [यह ब्राह्मण वचन है]।

(तम् एताभिः पंचभिः ऋग्भिः उपाकुरुते, यत् प्रथमं जायमानः अक्रन्दः इति) उस [अश्व] को इन पांच ऋचाओं से वह [ब्राह्मण] संस्कार करता है—जो तूने उत्पन्न होते हुये पहिले शब्द किया है, [यह प्रतीक ऋग्वेद १। १६३। १—५ की, है, देखो क० १८]।

(सः अशाम्यत्) वह [अश्व अग्नि] शान्त हो गया, (तस्मात् अश्वः पशूनां जिघत्सुतमः भवति) इसलिये अश्व पशुओं में अधिक खानेवाला होता है [वैसा ही अग्नि है]। (एषः हि वैश्वानरः) यही [अश्व] वैश्वानर [अग्नि] है, (तस्मात् अग्निपदम् अश्वं ब्रह्मणे ददाति) इसलिये अग्नि पद वाले अश्व को ब्रह्मा [विद्वान्] के लिये देता है। (ब्रह्मणे हि प्रत्तं तस्य रसम् अपीडयत्) ब्रह्मा के लिये उस दिये हुये के रस को उस [प्रजापति] ने निचोड़ा। (सः रसः अभवत्) वह रस हो गया। (रसः ह वै एषः, तं वै एतं रसं सन्तं रथः इति आचक्षते) रस ही यह है उस रस होते हुये को ही—यह रथ है—ऐसा लोग कहते हैं। (परोक्षेण) परोक्ष [आंख ओट प्रलय में वर्त्तमान ब्रह्म] के द्वारा (परोक्षप्रियाः इव हि) परोक्षप्रिय [आंख ओट भविष्य के प्रेमी] लोगों के समान ही (देवाः) देवता [विद्वान् लोग] (प्रत्यक्षद्विषः) प्रत्यक्ष [वर्त्तमान अवस्था] के द्वेषी [विरोधी] (भवन्ति) होते हैं [देखो गो० पू० १। १]। (सः देवान् आगच्छत्) वह [रथ वा रस] देवों [इन्द्रियों] में आया। (सः देवेभ्यः अन्वातिष्ठत्) और वह देवों के लिये अनुष्ठान करने लगा। (तस्मात् देवाः अबिभयुः, तं ब्रह्मणे प्रायच्छन्) उससे देव डर गये, उसे उन्होंने ब्रह्मा को दे दिया (तम् एतया ऋचा आज्याहुत्या अभ्यजुहोत्) उसको इस ऋचा द्वारा घृत की आहुति से उसने ग्रहण किया—(इन्द्रस्यौजो मरुतामनीकम् इति) इन्द्रस्यौजो मरुतामनीकम्—अथ० ६। १२५। ३॥

२१—(आहुः) कथयन्ति (सदनात्) सदन—अर्शआद्यच्। शत्रुगृहवतः पुरुषान् (उ) वितर्के (अगाः) प्राप्तवान् (नः) अस्मान् (मा रिषाम) हिंसिता मा भूम (जिघत्सुतमः) अद भक्षणे—सन्, घस्लृ आदेशः। सनाशंसभिक्ष उः (पा० ३। २। १६८) जिघत्स—उः, तमप्। अतिशयेन भक्षणेच्छुः। महाशनः—निरु० २। २७। (पदम्) प्रापणीयम् (प्रत्तम्) अच उपसर्गात्तः (पा० ७। ४। ४७)

(रथम् अभिहृत्य तम् एतया ऋचा अतिष्ठत्) रथ को ग्रहण करके उस पर इस ऋचा द्वारा वह बैठा- (वनस्पते वीड्वङ्गो हि भूयाः। इति) वनस्पते वीड्वङ्गो हि भूयाः । इति······अथ० ६ । १२५ । १ ।

(तस्मात् आग्न्याधेयिकं रथं ब्रह्मणे ददाति) इसलिये अग्नि रूप आधेय के रक्षक रथ को ब्रह्मा के लिये देता है। (ब्रह्मणे हि प्रत्तं तस्य तक्षाणः तनूज्येष्ठां दक्षिणां निरमिमीत) ब्रह्मा के लिये दिये हुये उसके सूक्ष्म बनाने वालों ने सूक्ष्मता को महाप्रधान रखने वाली दक्षिणा को बनाया है। (तां पंचसु अपश्यत् ऋचि यजुषि साम्नि शान्ते अथ घोरे) उस [दक्षिणा] को पांच में देखा—ऋग् [स्तुति योग्य विद्या] में, यजु [सत्कर्म विद्या] में, साम [मोक्ष विद्या] में, शान्त [शान्त व्यवहार] में और घोर [भयानक व्यवहार] में।

(तासां द्वे ब्रह्मणे प्रायच्छत् वाचं च ज्योतिः च) उन [विद्याओं] में से दो ब्रह्मा को दीं—वाणी और ज्योति। (वाक् वै धेनुः, ज्योतिः हिरण्यम्) वाणी ही दुधैल गौ [के समान] और ज्योति तेज है। (तस्मात् आग्न्याधेयिकां चातुष्प्राश्यां धेनुं ब्रह्मणे ददाति) इसलिये अग्नि रूप आधेय की रक्षक चार प्रकार से फैलने योग्य [क० १६] दुधैल गाय ब्रह्मा को देता है। (ब्रह्मणे हि प्रत्ता पशुषु शाम्यमानेषु चक्षुः हापयति) ब्रह्मा को ही दी हुई गौ पशुओं के शान्त होने पर आंख पहुंचाती है। (चक्षुः एव तत् आत्मनि धत्ते) आंख को ही तब वह अपने में धारण करता है। (यत् वै चक्षुः तत् हिरण्यम्) जो आंख है वही तेज है (तस्मात् आग्न्याधेयिकं हिरण्यं ब्रह्मणे ददाति) इसलिये अग्नि रूप आधेय का रक्षक तेज ब्रह्मा को वह देता है। (ब्रह्मणे हि प्रत्तं तस्य आत्मन्[1] अधत्त तेन प्राज्वलयत्) ब्रह्मा को दिया हुआ [तेज] उसके आत्मा में उसने धारण किया है, उससे उसने [जगत् को] प्रकाशित किया है। (यत् न अधत्त तत् आग्ला अभवत्) जो (तेज को) उसने न धारण किया, उस से आग्ला [बड़ी ग्लानि वा थकावट] हुई। (तत् आग्ला भूत्वा सा समुद्रं प्राविशत्) बड़ी ग्लानि हो कर उस [ग्लानि] ने समुद्र में प्रवेश किया।

प्र + ददातेः—क्तः। प्रकर्षेण दत्तम्। दत्तस्य वा (आग्न्याधेयिकम्) रक्षति (पा० ४ । ४ । ३३) अग्न्याधेय—ठक्। अग्निरूपस्याधेयस्य रक्षकम् (तक्षाणः) कनिन् युवृषितक्षि० (उ० १ । १५६) तक्षू तनूकरणे—कनिन्। सूक्ष्मीकर्तारः (तनुज्येष्ठाम्) तनूः सूक्ष्मक्रिया ज्येष्ठा महाप्रधाना यस्यां ताम् (धेनुः) धेट इच्च (उ० ३ । ३४) धेट् पाने—नुः। धेनुर्वाक्—निघ० १ । ११ । धेनुर्धयतेर्वा धिनोतेर्वा—निरु० ११ । ४२) दोग्ध्री वाक्। नवप्रसूता गौः (चातुष्प्राश्याम्) गो० पू० २ । १६ । चतुर्धा व्याप्याम् (हापयति) ओहाङ् गतौ—णिच्, हापयति गमयति प्रापयति (आग्ला) आ + ग्लै हर्षक्षये क्लमे च—डः, टाप्। समन्ताद् ग्लानिः। श्रमार्तिः

---

१. आत्मन्यधत्त यह पाठ समीचीन प्रतीत होता है ॥ सम्पा० ॥

(सा समुद्रम् अदहत्) उसने समुद्र को जला दिया । (तस्मात् दुर्गिः अपि समुद्रः वैश्वानरेण हि दग्धः) इस लिये दुर्गम भी समुद्र वैश्वानर [अग्नि] करके जलाया गया । (सा पृथिवीम् उदैत्, सा पृथिवीं व्यदहत्) वह पृथिवी में उदय हुई उसने पृथिवी को जला दिया । (सा देवान् आगच्छत् सा देवान् अहेडत्) वह देवों में आई, उसने देवों का अनादर किया । (ते देवाः ब्रह्माणम् उपाधावन्) वे देव ब्रह्मा के पास दौड़े गये । (सः न एव अगायत् न अनृत्यत्) उस [ब्रह्मा] ने न तो गाया न नाचा । (सा एषा आग्ला एषा कारुविदा नाम) सो यही आग्ला है यही कर्म करने वालों की वेदना [पीड़ा] नाम है । (तं वै एतम् आग्लाहतं सन्तम् आग्लागृधः इति आचक्षते) उस बड़ी ग्लानि करके ताड़े गये होते हुये [ब्राह्मण] को—यह बड़ी ग्लानि का लालची है—ऐसा लोग कहते हैं । (परोक्षेण) परोक्ष [आँख ओट प्रलय में वर्तमान ब्रह्म] के द्वारा (परोक्षप्रियाः इव हि) परोक्षप्रिय [आंख ओट भविष्य के प्रेमी] लोगों के समान ही (देवाः) देवता [विद्वान् लोग] (प्रत्यक्षद्विषः) प्रत्यक्ष [वर्तमान अवस्था] के द्वेषी [विरोधी] (भवन्ति) होते हैं [ऊपर देखो] । (यः एषः ब्राह्मणः गायनः वा नर्तनः वा भवति तम् आग्लागृधः इति आचक्षते) जो यह ब्राह्मण गवैया वा नचकैया होता है, उसको—यह आग्लागृध [बड़ी ग्लानि का लालची] है—ऐसा लोग कहते हैं । (तस्मात् ब्राह्मणः न एव गायेत् न आनृत्येत् आग्लागृधः मा स्यात्) इस लिये ब्राह्मण न गावै न नाचै और आग्लागृध [बड़ी ग्लानि का लालची] न होवे । (तस्मात् ब्राह्म्यं हविः पूर्वम् प्राजापत्यम् अपरम्) इसलिये ब्राह्म्य [वेद विचार की] हवि पहिले है और प्राजापत्य [व्रत विशेष की हवि] पीछे है । (प्राजापत्यात् ब्राह्म्यम् एव उत्तमम् इति ब्राह्मणम्) प्राजापत्य व्रत की हवि से ब्राह्म्य [वेद विचार की] हवि उत्तम है । [प्राजापत्य व्रत का लक्षण मनु० ११ । २११ में इस प्रकार है—त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन् द्विजः ॥ अर्थ-प्राजापत्य व्रत का आचरण करने वाला द्विज तीन दिन प्रातःकाल, तीन दिन सायंकाल और तीन दिन बिना मांगा अन्न खावे और फिर तीन दिन न खावे । यह १२ दिन का एक प्राजापत्य व्रत होता है] ॥ २१ ॥

भावार्थः—जो मनुष्य अग्नि विद्या का सुप्रयोग करके कर्मकुशल होते हैं, वे आनन्द पाते हैं ॥ २१ ॥

विशेषः—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ।

(दुर्गिः) खनिकष्यज्यसिवसि० (उ० ४ । १४०, गम्लृ गतौ—इप्रत्ययः, स च डित् । दुःखेन गमनीयः (अहेडत्) हेडृ अनादरे—लङ् । तिरस्कृतवती (कारुविदा) कृवापाजिमि० (उ० १ । १) करोतेः–उण् + विद सत्तायाम्–अङ्, टाप् । कारूणां कर्मकृतां पीडा (आग्लाहतम्) आग्लया ताडितम् । (आग्लागृधः) गृधु अभिकांक्षायाम्—कः । आग्लायां लुब्धः (ब्राह्म्यम्) ब्रह्मणः इदम्, ब्रह्मन्–ष्यञ् । ब्रह्मसम्बन्धि (प्राजापत्यम्) प्रजापति–ण्यः, ततः अर्शआद्यच् । द्वादशाहसाध्यव्रतविशेषसंबन्धिहविः—मनु० ११ । २११ ॥

१--यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १ ॥ यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् । गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ २ ॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन । असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ ३ ॥ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यंतः समुद्रे । उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥ ४ ॥ इमा ते वाजिन्नव मार्जनानीमा शफानां सनितुर्निधाना । अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥५॥ ऋग्० १ । १६३ । १—५ अर्थः—(अर्वन्) हे विज्ञानी पुरुष ! (यत्) जिस कारण (समुद्रात्) अन्तरिक्ष से (उत वा) अथवा (पुरीषात्) पूर्ण कारण से (उद्यन्) उदय होते हुए [सूर्य के तुल्य] (जायमानः) उत्पन्न होता हुआ तू (प्रथमम्) पहिले (अक्रन्दः) शब्द करता है, (श्येनस्य) बाज के (पक्षा) दो पंखों के समान और (हरिणस्य) हरिण के (बाहू) दो भुजाओं के तुल्य (ते) तेरा (उपस्तुत्यम्) बहुत प्रशंसनीय और (महि) बड़ा (जातम्) उत्पन्न हुआ कर्म है ॥ १ ॥ [शेष मन्त्रों का अर्थ भाष्य में देखो ।]

२--इन्द्रस्यौजो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः । स इमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ अथ० ६ । १२५ । ३, ऋ० ६ । ४७ । २८, यजु० २९ । ५४ । [हे राजन् ! यहाँ पर] (मरुताम्) शूरों का (अनीकम्) सेना दल, (इन्द्रस्य) बिजुली का (ओजः) बल, (मित्रस्य) प्राण [चढ़ने वाले वायु] का (गर्भः) गर्भ [अधिष्ठान] और (वरुणस्य) अपान [उतरने वाले वायु] का (नाभिः) [मध्यस्थान] है । (सः) सो तू (देव) हे प्रकाशमान ! (रथ) रमणीय स्वरूप विद्वान् ! (नः) हमारे लिए (इमाम्) इस (हव्यदातिम्) देने योग्य पदार्थों की दान क्रिया को (जुषाणः) सेवता हुआ (हव्या) ग्राह्य वस्तुओं को (प्रति) प्रतीति के साथ (गृभाय) ग्रहण कर ॥ ३ ॥

३--वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ १ ॥ अथ० ६ । १२५ । १, ऋग्० ६ । ४७ । २६, यजु० २९ । ५२ । (वनस्पते) हे किरणों के पालन करने वाले सूर्य के समान राजन् ! (वीड्वङ्गः) बलिष्ठ अङ्गों वाला तू (हि) ही (प्रतरणः) बढ़ाने वाला (सुवीरः) अच्छे अच्छे वीरों से युक्त (अस्मत्सखा) हमारा मित्र (भूयाः) हो । तू (गोभिः) बाणों और वज्रों से (सन्नद्धः) अच्छे प्रकार सजा हुआ (असि) है, [हमें] (वीडयस्व) दृढ़ बना, (ते) तेरा (आस्थाता) श्रद्धावान् सेनापति (जेत्वानि) जीतने योग्य शत्रुओं की सेनाओं को (जयतु) जीते ॥

कण्डिका २२ ॥

अथर्वाणश्च ह वा आङ्गिरसश्च भृगुचक्षुषी तद् ब्रह्माभिव्यापश्यंस्तदजानन्वयं वा इदं सर्वं यद्भृग्वङ्गिरस इति । ते देवा ब्राह्म्यं हविर्यत्सान्तपनेऽग्नावजुहवुरेतद्वै ब्राह्म्यं हविर्यत्सान्तपनेऽग्नौ हूयते, एष ह वै सान्तपनोऽग्निर्यद् ब्राह्मणस्तस्योर्ज्ज-

योर्ज्जा देवा अभजन्त सुमनस एव स्वधां पितरः श्रद्धया स्वर्गं लोकं ब्राह्मणास्तेन सुन्वन्त्यृषयोऽन्ततः स्त्रियः केवल आत्मन्यत्रारुन्धत वाह्या उभयेन सुन्वन्ति, यद्वै यज्ञे ब्राह्म्यं हविर्न निरूप्येतानृजवः प्राजापत्यहविषो मनुष्या जायेरन्नसौ यांल्लोकान् शृण्विति पिता ह्येष आहवनीयस्य गार्हपत्यस्य दक्षिणाग्नेर्योऽग्निहोत्रं जुहोतीति, देवा प्रिये धामनि मदन्ति तेषामेषोऽग्निः सान्तपनश्रेष्ठी भवत्येतस्य वाचि तृप्तायामग्निस्तृप्यति, प्राणे तृप्ते वायुस्तृप्यति, चक्षुषि तृप्त आदित्यस्तृप्यति, मनसि तृप्ते चन्द्रमास्तृप्यति, श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति स्नेहेषु तृप्तेष्वापस्तृप्यन्ति, लोमेषु तृप्तेष्वोषधिवनस्पतयस्तृप्यन्ति, शरीरे तृप्ते पृथिवी तृप्यत्येवमेषोऽग्निः सान्तपनः श्रेष्ठस्तृप्तः सर्वांस्तृप्तांस्तर्पयतीति ब्राह्मणम् ॥ २२ ॥

कण्डिका २२ ॥ सान्तपन अग्नि में प्राजापत्य हवि के साथ ब्राह्म्य हवि की आवश्यकता ॥

२२—(अथर्वाणः) निश्चल ब्रह्म के वेद (च च) और (आङ्गिरसः) पूर्णज्ञान युक्त व्यवहार (ह वै) निश्चय करके (भृगुचक्षुषी) परिपक्व ज्ञान वाले मुनि के दो नेत्र हैं, (तद् ब्रह्म अभिव्यपश्यन् तत् अजानन्) उस ब्रह्म को उन्होंने [ऋषियों ने] सब ओर से देख लिया और जाना—(वयं वै इदं सर्वम् [जानीम] यत् भृग्वङ्गिरसः) हम इस सब को [जानें] जो परिपक्वज्ञान है। (यत् ब्राह्म्यं हविः ते देवाः सान्तपने अग्नौ अजुहवुः) जो ब्राह्म्य हवि है [उसको] उन देवों ने सान्तपन [पूरे ताप वाले वा ऐश्वर्य वाले] अग्नि में छोड़ा, अथवा सांतपन व्रत में अग्नि पर छोड़ा। [सान्तपन व्रत का लक्षण मनु ११। २१२ में इस प्रकार है। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥ अर्थ—गोमूत्र गोबर, दूध, दही, घी, कुशा का जल एक दिन खावे और एक रात्रि दिन उपवास करे, यह कृच्छ्र सान्तपन कहा गया है]। (एतत् वै ब्राह्म्यं हविः यत् सान्तपने अग्नौ हूयते) यह ब्राह्म्य हवि है जो सान्तपन अग्नि में छोड़ा जाता है। (एषः वै सान्तपनः अग्निः यत् ब्राह्मणः) यही सान्तपन अग्नि है, जो ब्राह्मण है। (तस्य ऊर्जया देवाः ऊर्जां, सुमनसः पितरः स्वधां स्वर्गं लोकं श्रद्धया एव अभजन्त) उस [ब्राह्मण] के पराक्रम से देवों ने पराक्रम को, प्रसन्न मन वाले पितरों [पालने वाले विद्वानों] ने स्वधा [अपनी

२२—(अथर्वाणः) निश्चलब्रह्मवेदाः (आङ्गिरसः) अङ्गिरस्—अण्। पूर्णज्ञानयुक्तव्यवहाराः (भृगुचक्षुषी) भृगोः परिपक्वज्ञानस्य मुनेर्नेत्रद्वयम् (सर्वम्) सर्वं जानीम इत्यर्थः। (भृग्वङ्गिरसः) परिपक्वज्ञानानि (सान्तपने) सम्+तप दाहे ऐश्वर्य्ये च—ल्युट्। तत्र भवः (पा० ४। ३। ५३) अण्। संतपने सम्यक्तपनयुक्ते पूर्णैश्वर्य्ययुक्ते वा। अथवा व्रतविशेषे—मनुः ११।२१२ (ऊर्जया) ऊर्ज बलप्राणनयोः—पचाद्यच्। पराक्रमेण। शक्त्या (सुमनसः) शोभनमनस्काः। (स्वधाम्) आः समिण्निकषिभ्याम् (उ० ४। १७५) स्वद आस्वादने—आ, दस्य धः। स्वादयति रसान् उत्पादयतीति स्वधा। यद्वा। आतोऽनुपसर्गे कः (पा० ३। २। ३) स्व+डुधाञ्

धारण शक्ति वा अन्न वा अमृत] और स्वर्ग लोग को सेया है। (ब्राह्मणाः ऋषयः तेन अन्ततः सुन्वन्ति) ब्रह्म ज्ञानी ऋषि लोग उस [कर्म] से अन्त में [सोम रस] निचोड़ते हैं। (स्त्रियः केवले आत्मनि अवारुन्धत) स्त्रियों ने सेवनीय परमात्मा में [स्वर्ग आदि] पाया है। (वाह्याः उभयेन सुन्वन्ति , ले चलने योग्य पुरुष दोनों [ब्राह्म्य ओर प्राजापत्य हवि] से [सोम रस] निचोड़ते हैं। (यत् वै यज्ञे ब्राह्म्य हविः न निरूप्येत प्राजापत्यहविषः मनुष्या अनृजवः जायेरन्) जो यज्ञ में ब्राह्म्य हवि न बनाया जावे, प्राजापत्य हवि वाले मनुष्य कुटिल हो जावें। (असौ हि एषः पिता यान् लोकान् शृण्विति) वह पिता [पालन करने वाला पुरुष] भी [उन बुरे लोगों में कुटिल होता है] जिन लोगों को वह सुनता है, (आहवनीयस्य गार्हपत्यस्य दक्षिणाग्ने. यः अग्निहोत्रं जुहोति इति) [वह पुरुष भी कुटिल होता है] जो आहवनीय, गार्हपत्य और दक्षिणाग्नि के अग्निहोत्र को ही करता है। (देवाः प्रिये धामनि मदन्ति तेषाम् एषः अग्निः सान्तपन-श्रेष्ठः भवति) देव [विद्वान् लोग] प्रिय स्थान में सुख पाते हैं, उनका यह अग्नि सान्तपन [पूरे ऐश्वर्य वाला] श्रेष्ठ होता है। (एतस्य वाचि तृप्तायाम् अग्निः तृप्यति) इस [ब्रह्मा] की वाणी तृप्त होने पर अग्नि तृप्त होता है, (प्राणे तृप्ते वायुः तृप्यति) प्राण तृप्त होने पर पवन तृप्त होता है, (चक्षुषि तृप्ते आदित्यः तृप्यति) नेत्र तृप्त होने पर सूर्य तृप्त होता है, (मनसि तृप्ते चन्द्रमाः तृप्यति) मन तृप्त होने पर चन्द्रमा तृप्त होता है, (श्रोत्रे तृप्ते दिशः च अन्तर्देशाः च तृप्यन्ति) कान तृप्त होने पर दिशायें और बीच की दिशायें तृप्त होती हैं। (स्नेहेषु तृप्तेषु आपः तृप्यन्ति) रसों वा चिकने पदार्थों के तृप्त होने पर जल तृप्त होते हैं, (लोमेषु तृप्तेषु ओषधिवनस्पतयः तृप्यन्ति) लोमों के तृप्त होने पर ओषधि और वनस्पतियां तृप्त होती हैं, (शरीरे तृप्ते पृथिवी तृप्यति) शरीर तृप्त होने पर पृथिवी तृप्त होती है। (एवं एषः सान्तपनः श्रेष्ठः तृप्तः सर्वान् तृप्तान् तर्पयति इति ब्राह्मणम्) इस प्रकार से यह श्रेष्ठ तृप्त सान्तपन [बड़े ऐश्वर्य वाला] अग्नि सब तृप्त [पदार्थों] को तृप्त करता है, यह ब्राह्मण है ।२२॥

भावार्थः—मनुष्य सान्तपन अग्नि में ब्राह्म्य हवि और प्राजापत्य हवि छोड़ें। प्राजापत्य और स्त्री आदि शब्दों से शास्त्र रीति पर सन्तानोत्पादन की ओर संकेत जान पड़ता है। इस विषय के लिये देखो—बृहदारण्यकोपनिषद्, अध्याय ६ ब्राह्मण ५॥

कण्डिका २३ ॥

सान्तपना इदं हविरित्येष ह वै सान्तपनोऽग्निर्यद् ब्राह्मणो यस्य गर्भा-

---

धारणपोषणयोः—कः, टाप्। अथवा क्विप्। स्वधा = उदकम्—निघ० १।१२। अन्नम् निघ० २।७। पितॄणाम् अन्नम्। अमृतम्। आत्मधारणसामर्थ्यम् (सुन्वन्ति) सोमरसम् निष्पीडयन्ति (केवले) केवृ सेवने—कलच्। सेवनीये। निश्चिते। (आत्मनि) परमात्मनि (वाह्य) वह प्रापणे ण्यत्। प्रापणीयाः पुरुषाः (उभयेन) ब्राह्म्येन प्राजापत्येन च हविषा (शृण्विति) आर्षप्रयोगः। शृणोति। (धामनि) स्थाने (मदन्ति) हर्षन्ति (स्नेहेषु) रसयुक्तपदार्थेषु॥

धानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनगोदानचूडाकरणोपनयनप्लावनाग्निहोत्रव्रतचर्य्यादीनि कृतानि भवन्ति, स सान्तपनोऽथ योऽयमनग्निकः स कुम्भे लोष्टः, तद्यथा कुम्भे लोष्टः प्रक्षिप्तो नैव शौचार्थाय कल्पते नैव शस्यं निर्वर्त्तयत्येवमेवायं ब्राह्मणोऽनग्निकस्तस्य ब्राह्मणस्यानग्निकस्य नैव दैवं दद्यान्न पित्र्यं न चास्य स्वाध्यायाशिषो न यज्ञ आशिषः स्वर्गङ्गमा भवन्ति ।

तदप्येतदृचोक्तम् । अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुमिति ब्राह्मणम् । २३ ॥

कण्डिका २३ ॥ बिना यज्ञ अग्नि वाला ब्राह्मण स्वर्ग नहीं पाता ॥

(सान्तपनाः इदं हविः इति) सान्तपन अग्नियां यह हवि है । (एषः ह वै सान्तपनः अग्निः यत् ब्राह्मणः) यही सान्तपन [बड़े ऐश्वर्य वाला] अग्नि है जो ब्राह्मण है । (यस्य गर्भाधान पुंसवन सीमन्तोन्नयन—जातकर्म—नामकरण—निष्क्रमण—अन्नप्राशन—गोदान—चूडाकरण—उपनयन—प्लावन—अग्निहोत्र—व्रतचर्य—आदीनि कृतानि भवन्ति सः सान्तपनः) जिस [ब्राह्मण] के गर्भाधान १, पुंसवन २, सीमन्तोन्नयन ३ जातकर्म ४, नामकरण ५, निष्क्रमण [बाहर निकालना] ६, अन्नप्राशन [अन्न चटाना] ७, गोदान [केश काटना] ८, चूडाकरण [चोटी रखना] ९, उपनयन [जनेऊ और वेदारम्भ] १० प्लावन [विद्यास्नान वा समावर्तन] ११, अग्निहोत्र [नित्यहवन] १२, व्रतचर्य [ब्रह्मचर्य] १३, आदि कर्म किये हुये होते हैं, वह [ब्राह्मण] सान्तपन [अग्नि] है । (अथ यः अयम् अनग्निकः सः कुम्भे लोष्टः) और जो यह [ब्राह्मण] बिना यज्ञ अग्निवाला है, वह घड़े में ढेला है । तत् यथा कुम्भे प्रक्षिप्तः लोष्टः न एव शौचार्थाय कल्पते न एव शस्यं निर्वर्तयति, एवम् एव अयम् ब्राह्मणः अनग्निकः) सो जैसे घड़े में गिराया हुआ ढेला न तो शौच के ही योग्य उपकारी होता है और न धान्य को ही सिद्ध करता है, ऐसे ही यह बिना यज्ञ अग्नि वाला ब्राह्मण है । (तस्य अनग्निकस्य ब्राह्मणस्य नैव दैवं न पित्र्यं [सुफलम्] दद्यात्) उस बिना यज्ञ अग्नि वाले ब्राह्मण का दैव [पहिले जन्म का कर्म] और न पिता का धन [उत्तम फल] देता है । (न च अस्य स्वाध्यायाशिषः न यज्ञे आशिषः स्वर्गङ्गमाः

२३—(सान्तपनाः) अग्नयः (हविः) दातव्यं द्रव्यम् (गोदानम्) गावः केशाः दीयन्ते छिद्यन्ते अत्र । गो + दो अवखण्डने –ल्युट् । केशच्छेदनसंस्कारः (चूडाकरणम्) मस्तके शिखाधारणसंस्कारः (प्लावनम्) प्लुङ् गतौ—णिच्—ल्युट् । मज्जनम् । विद्यान्तस्नानम् । समावर्तनसंस्कारः (अनग्निकः) यज्ञाग्निरहितः । (लोष्टः) लोष्टपलितौ (उ० ३ । ९२) लूञ् छेदने—क्तः, सुडागमः धातोर्गुणश्च । यद्वा लोष्ट संघाते—घञ् । मृत्तिकाखण्डः (निर्वर्तयति) निष्पादयति (दैवम्) पूर्वजन्मकृतकर्म (दद्यात्) सुफलं प्रयच्छेत् (पित्र्यम्) पितुर्यच्च (पा० ४ ।

१—गोदान, उपप्लवन आदि कुछ अन्य संस्कार, जो गृह्य सूत्रों में नहीं हैं वे ध्यातव्य हैं ॥ सम्पा० ॥

भवन्ति) और न इसके स्वाध्याय [वेदों के पढ़ने] के आशीर्वाद और न यज्ञ में पाये आशीर्वाद स्वर्ग में पहुँचाने वाले होते हैं।

(तत् अपि एतत् ऋचा उक्तम्) वह भी इस ऋचा करके कहा गया है—(अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्)। अथ २०। १०१। १, ऋ० १। १२। १, साम० उ० २। १। तृच ६, तथा पू० १। १। ३। (दूतम्) पदार्थों के पहुँचाने वाले, (होतारम्) वेग आदि देने वाले, (विश्ववेदसम्) सब धनों के प्राप्त कराने वाले (अस्य) इस [प्रसिद्ध] (यज्ञस्य) यज्ञ [संयोग वियोग व्यापार] के (सुक्रतुम्) सुधारने वाले (अग्निम्) अग्नि [आग, बिजुली, सूर्य] को (वृणीमहे) हम स्वीकार करते हैं—(इति ब्राह्मणम्) यह ब्राह्मण मत है ॥ २३ ॥

भावार्थ:—ब्रह्मज्ञानी पुरुष गर्भाधान आदि संस्कारों को अग्निहोत्र के साथ करके जीवन सुफल करें ॥ २३ ॥

कण्डिका २४ ॥

अथ ह प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाच, कं वो होतारं वृणीयां, कमध्वर्युं, कमुद्गातारं, कं ब्रह्माणमिति। त ऊचुऋंग्विदमेव होतारं वृणीष्व, यजुर्विदमध्वर्युं, सामविदमुद्गातारमथर्वाङ्गिरोविदं ब्रह्माणं, तथा हास्य यज्ञश्चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पाद् यज्ञः प्रतिष्ठति, प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद, तस्मादृग्विदमेव होतारं वृणीष्व, स हि होत्रं वेदाग्निर्वै होता, पृथिवी वा ऋचामायतनमग्निर्देवता गायत्रं छन्दः भूरिति शुक्रं तस्मात्तमेव होतारं वृणीष्वेत्येतस्य लोकस्य जितय एतस्य लोकस्य विजितय एतस्य लोकस्य सञ्जितय एतस्य लोकस्यावरुद्धय एतस्य लोकस्य व्यृद्धय एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय एतस्य लोकस्य व्याप्तय एतस्य लोकस्य पर्य्याप्तय एतस्य लोकस्य समाप्तये, अथ चेन्नैवंविदं होतारं वृणुते, पुरस्तादेवैषां यज्ञो रिच्यते। यजुर्विदमेवाध्वर्युं वृणीष्व स ह्याध्वर्य्यवं वेद, वायुर्वा अध्वर्य्युरन्तरिक्षं वै यजुषामायतनं वायुर्देवता त्रैष्टुभं छन्दो भुव इति शुक्रं तस्मात्तमेवाध्वर्युं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमध्वर्य्युं वृणुते, पश्चादेवैषां यज्ञो रिच्यते। सामविदमेवोद्गातारं वृणीष्व स ह्यौद्गात्रं वेदादित्यो वा उद्गाता द्यौर्वै साम्नामायतनमादित्यो देवता जागतं छन्दः स्वरिति शुक्रं तस्मात्तमेवोद्गातारं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमुद्गातारं वृणुते, उत्तर एवैषां यज्ञो रिच्यते। अथर्वाङ्गिरोविदमेव ब्रह्माणं वृणीष्व स हि ब्रह्मत्वं वेद चन्द्रमा वै ब्रह्मा आपो वै भृग्वङ्गिरसामायतनं चन्द्रमा

३। ७९) पितृ—यत्। रीङ् ऋतः (पा० ७। ४। २७) रीङादेशः। पितुरागतं धनम् (स्वर्गङ्गमाः) स्वर्गप्रापिकाः (दूतम्) पदार्थानां प्रापकं तापकं वा (वृणीमहे) स्वीकुर्मः (होतारम्) वेगादिदातारम् (विश्ववेदसम्) वेदः धनं—निघ० २। १०। सर्वधनप्रापकम् (सुक्रतुम्) शोभनकर्तारम् ॥

देवता वैद्युतश्चोष्णिक्ककुभे छन्दसी ओमित्यथर्वणां शुक्रं जनदित्यङ्गिरसां, तस्मात्तमेव ब्रह्माणं वृणीष्वेत्येतस्य लोकस्य जितय एतस्य लोकस्य विजितय एतस्य लोकस्य सञ्जितय एतस्य लोकस्यावरुद्धय एतस्य लोकस्य व्यृद्धय एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय एतस्य लोकस्य व्याप्तय एतस्य लोकस्य पर्य्याप्तय एतस्य लोकस्य समाप्तयेऽथ चेन्नैवंविदं ब्रह्माणं वृणुते, दक्षिणत एवैषां यज्ञो रिच्यते ॥ २४ ॥

इति अथर्ववेदे गोपथब्राह्मणपूर्वभागे द्वितीयः प्रपाठकः समाप्तः ।

कण्डिका २४ ॥ ऋत्विजों के चुनाव में ऋग्वेदी होता, यजुर्वेदी अध्वर्य्यु, सामवेदी उद्गाता, चतुर्वेदी ब्रह्मा हो ॥

(अथ ये पुरस्तात् अष्टौ आज्यभागाः, आज्यभागानां पंचप्रयाजाः, द्वौ आज्यभागौ द्वौ आघारौ आग्नेयौ, प्रथमः द्वितीयः सौम्यः) [सौदायन ने उत्तर दिये - कण्डिका ८ देखो] फिर जो पहिले आठ आज्यभाग [घी की आहुतियां] हैं, उन आज्यभागों में पांच प्रयाज [पांच प्राण देवता वाली आहुतियां—प्राणाः वै प्रयाजाः—ऐतरेय ब्राह्मण १ । ११ । ५] दो आज्यभाग दो आघार [नामक आहुति] दोनों आग्नेय [अग्नि देवता वाली] और पहिली और दूसरी सौम्य [एक सोम देवता की] है। (हविर्भागानां हविः हि एव सौम्यम्, आग्नेयः पुरोडाशः, अग्नीषोमीयः उपांशुयाजः अग्नीषोमीयः पुरोडाशः, अग्निः स्विष्टकृत् इति एते मध्यत पंचहविर्भागाः) हविर्भागों में हवि ही सोम देवता का है १, अग्नि का पुरोडाश २, अग्नि और सोम का उपांशु याज [मौन आहुति] ३, अग्नि और सोम का पुरोडाश ४, अग्नि का स्विष्टकृत् [आहुति] है ५, यह मध्य के पांच हविर्भाग हैं। (अथ ये षट् प्राजापत्याः, इडा च प्राशित्रं च यत् च आग्नीध्रीयौ अद्यति, ब्रह्मभागः, अन्वाहार्यः यजमानभागः, एव षष्ठः) और जो छः प्राजापत्य [प्रजापति देवता की] आहुति हैं उनमें

---

१० -(सौम्यः) सोमदेवताकः (उपांशुयाजः) अप्रकाशमन्त्रयज्ञः (प्राशित्रम्—प्र + अश भोजने—इत्रन् । प्राशनम् (इडा) इल स्वप्नक्षेपणयोः—कः, टाप् । पृथिवी । गौः । वाक्, (अद्यति)—आर्षं दिवादित्वम् । अत्ति । भक्षति (अन्वाहार्य्य) अनु + आ + हृञ् हरणे—ण्यत् । प्रतिमासकर्त्तव्याऽमावास्याविहितश्राद्धोपेतः ।

इडा=भूमि नामक १, और प्राशित्र [प्राशन वा ओदन नामक] २, और जो दो आग्नीध्रीय [आग्नीध्र वाली दो आहुति को अग्नि] खाता है ३, ४, ब्रह्मा का भाग ५, और प्रति मास अमावस को करने योग्य श्राद्ध वाला यजमान का भाग छठा है ६। (अथ ये उपरिष्टात् अष्टौ आज्यभागाः, त्रयः अनुयाजाः, चत्वारः पत्नीसंयाजाः अष्टमं समिष्टयजुः) और जो पिछले आठ आज्य भाग हैं, [उनमें] तीन अनुयाज, चार पत्नी संयाज और आठवाँ समिष्टयजु है। (अथ या गायत्री हरिणी ज्योतिष्पक्षा सर्वैः यज्ञैः यजमानं स्वर्गं लोकं अभिवहति सा वेदिः एव) और जो गायत्री सुवर्ण मूर्ति, ज्योति के पंख वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्गलोक में पहुँचाती है वह वेदी [यज्ञ कुण्ड] ही है। (तस्य ये पुरस्तात् अष्टौ आज्यभागाः स दक्षिणः पक्षः, अथ ये उपरिष्टात् अष्टौ आज्यभागाः स उत्तरः पक्षः, हवींषि आत्मा, गार्हपत्यः जघनम्, आहवनीयः शिरः, सौवर्णराजतौ पक्षौ) उस [यजमान] के जो पहिले आठ आज्य भाग हैं वह [वेदी का] दाहिना पंख है, और जो पीछे वाले आठ आज्य भाग हैं वह बांया पंख है, सब हवि आत्मा हैं, गार्हपत्य [अग्नि] जंघा है, आहवनीय शिर है, सोने और चांदी वाले दोनों पंख हैं. (तत् यत् आदित्यं पुरस्तात् पर्य्यन्तं न पश्यन्ति तस्मात् अज्योतिष्कः उत्तरः भवति) सो जो सूर्य को पूर्व से पश्चिम में जाता हुआ नहीं देखते हैं इसलिये बिना ज्योति वाला पिछला [यज्ञ वा पक्ष] होता है। [अर्थात् सूर्य को अवश्य देखे जिससे ज्योति बढ़े]। (अथ या पङ्क्तिः पंचपदा सप्तदशाक्षरा सर्वैः यज्ञैः यजमानं स्वर्गं लोकम् अभिवहति सा याज्या इव) और जो पङ्क्ति पांच पाद वाली सत्रह अक्षर वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुँचाती है वह याज्या [नाम वाली इष्टि] ही है। (तस्याः ओं श्रावय इति चतुरक्षरम्, अस्तु श्रौषट् इति चतुरक्षरम्, यज इति द्व्यक्षरं, ये यजामहे इति पंचाक्षरं, द्व्यक्षरः वै वषट्कारः) उस [याज्या] के ओं श्रावय [ओम् को तू सुना] यह चार अक्षर वाला है, अस्तु श्रौषट् [श्रौषट् होवे] यह चार अक्षर वाला है, यज [यज्ञ कर] यह दो अक्षर वाला है, ये यजामहे [जो हम यज्ञ करते हैं] यह पांच अक्षर वाला है, वषट् [यह शब्द] दो अक्षर वाला ही है। (सा एषा पङ्क्तिः पंचपदा सप्तदशाक्षरा सर्वैः यज्ञैः यजमानं स्वर्गं लोकम् अभिवहति) सो यही पङ्क्ति पांच पाद वाली और सत्रह अक्षर वाली होकर सब यज्ञों के द्वारा यजमान को स्वर्ग लोक में पहुँचाती है (तत् यत्र अस्य ऐश्वर्यं स्यात्, वा यत्र एनम् अभिवहेयुः एवंविदम् एव तत्र ब्रह्माणं वृणीयात् न अनेवंविदम् इति ब्राह्मणम्) सो जहां [यज्ञ में] इस [यजमान] का ऐश्वर्य होवे, अथवा जहां इसको [शत्रु लोग] हरावें, वहां ऐसे जानकार को ही ब्रह्मा चुने, ऐसे न जानने वाले को नहीं, यह ब्राह्मण है॥ १०॥

भावार्थः—यथाविधि यज्ञ करने से मनुष्य कार्यसिद्धि करें॥ १०॥

(पुरस्तात्) पूर्वस्यां दिशि (पर्य्यन्तम्) परिगतो अन्तो येन तम्। (याज्या) यजतेः ण्यत्। याजनीया। इष्टिः (श्रौषट्) श्रु श्रवणे—डौषटि+यज्ञादौ हविर्दानम् (वषट्कारः) वह प्रापणे—डषटि+कृञ्+घञ्। देवोद्देश्यकहविस्त्यागः (वृणीयात्) स्वीकुर्यात् (अनेवंविदम्) अनेवंविधज्ञातारम्॥

कण्डिका ११ ॥

अथ ह प्राचीनयोग्य आजगामाग्निहोत्रं भवन्तं पृच्छेद् गोतम इति, पृच्छ प्राचीनयोग्येति । किन्देवत्यं ते गवीडायां १, किन्देवत्यमुपहूतायां २, किन्देवत्यमुपसृष्टायां ३, किन्देवत्यं वत्समुन्नीयमानं ४, किन्देवत्यं वत्समुन्नीतं ५, किन्देवत्यं दुह्यमानं ६, किन्देवत्यं दुग्धं ७, किन्देवत्यं प्रक्रम्यमाणं ८, किन्देवत्यं ह्रियमाणं ९, किन्देवत्यमधिश्रियमाणं १०, किन्देवत्यमधिश्रितं ११, किन्देवत्यमभ्यवज्वाल्यमानं १२, किन्देवत्यमभ्यवज्वालितं १३, किन्देवत्यं समुद्वान्तं १४, किन्देवत्यं विष्यन्नं १५, किन्देवत्यमद्भिः प्रत्यानीतं १६, किन्देवत्यमुद्वास्यमानं १७, किन्देवत्यमुद्वासितं १८, किन्देवत्यमुन्नीयमानं १९, किन्देवत्यमुन्नीतं २०, किन्देवत्यं प्रक्रम्यमाणं २१, किन्देवत्यं ह्रियमाणं २२, किन्देवत्यमुपसाद्यमानं २३, किन्देवत्यमुपसादितं २४, किन्देवत्या समित् २५, किन्देवत्यां प्रथमामाहुतिमहौषीः २६, किन्देवत्यं गार्हपत्यमवेक्षिष्ठाः २७, किन्देवत्योत्तराहुतिः २८, किन्देवत्यं हुत्वा स्रुचं त्रिरुदञ्चमुदनैषीः २९, किन्देवत्यं बर्हिषि स्रुचन्निधायोन्मृज्योत्तरतः पाणी निरमा[1]र्क्षीः ३०, किन्देवत्यं द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षीः ३१, किन्देवत्यं प्रथमं प्राशीः ३२, किन्देवत्यं द्वितीय ३३, किन्देवत्यमन्ततः सर्वमेवाप्राशीः ३४, किन्देवत्यमप्रक्षालितयोदकं स्रुचा न्यनैषीः ३५, किन्देवत्यं प्रक्षालितया ३६, किन्देवत्यमपरेणाहवनीयमुदकं स्रुचा न्यनैषीः ३७, किन्देवत्यं स्रुवं स्रुचञ्च प्रत्यताप्सीः ३८, किन्देवत्यं रात्री स्रुग्दण्डमवा[2]मार्क्षीः ३९, किन्देवत्यं प्रातरुदमा[3]र्क्षीरित्येतच्चेद्वेत्थ ४०, गोतम हुतं, यदि[4] न वेत्थाहुतं त इति ब्राह्मणम् ॥ ११ ॥

कण्डिका ११ ॥ प्राचीनयोग्य मुनि के उद्दालक से अग्निहोत्र विषयक चालीस प्रश्न ॥

(अथ ह प्राचीनयोग्यः आजगाम) फिर प्राचीनयोग्य [सनातन वेदों में समर्थ मुनि विशेष] आया । (अग्निहोत्रं भवन्तं पृच्छेत् गोतम इति) [उसने कहा] अग्निहोत्र को आपसे वह पूंछेगा, हे गोतम ! (पृच्छ प्राचीनयोग्य इति) [उद्दालक ने कहा—क० ६] पूंछ, हे प्राचीनयोग्य । [प्राचीनयोग्य बोला] (किंदेवत्यं ते इडायां गवि १) तेरी इडा [पाने योग्य] गौ [यज्ञ के लिये दूध देने वाली कामधेनु] में कौन देवता वाला कर्म है १, (किंदेवत्यम् उपहूतायाम् २) उस बुलायी हुई में कौन देवता वाला कर्म है २, (किंदेवत्यम् उपसृष्टायाम् ३) उस पास आयी हुई में कौन देवता

११—(प्राचीनयोग्यः) प्राचीनेषु सनातनेषु वेदेषु योग्यः समर्थः । मुनिविशेषः (किन्देवत्यम्) किम्+देवता—यत् । किंदेवताविषयकं कर्म (गवि) यज्ञार्थं दुग्धदात्र्यां

१. पू सं० "निर्माक्षीः" इति पाठः ॥ २. पू. सं० अवमार्क्षीः इति पाठः ॥

३. पू. स० उन्मार्क्षीः इति पाठः ॥

४. पू. सं० 'चेद्यद्यु न' इति पाठः । जर्मनसंस्करणे यद्यु न इति पाठः, अस्माभिः 'यदि न' संशोधितः ॥ सम्पा० ॥

वाला कर्म है ३, (वत्सम् उन्नीयमानम् किंदेवत्यम् ४) बछड़े को लाया जाता हुआ कर्म कौन देवता वाला है ४, (वत्सम् उन्नीतं किंदेवत्यम् ५) बछड़ा लाया गया कर्म कौन देवता वाला है ५, (दुह्यमानं किंदेवत्यम् ६) दुहता हुआ कर्म क्या देवता है ६, (दुग्धं किंदेवत्यम् ७) दूध क्या देवता है ७, (प्रक्रम्यमाणं किंदेवत्यम् ८) घुमाया जाता हुआ [दूध] क्या देवता है ८, (ह्रियमाणं किंदेवत्यम् ९) लिया जाता हुआ [दूध] क्या देवता है ९, (अधिश्रियमाणं किंदेवत्यम् १०) रक्खा जाता हुआ दूध क्या देवता है १०, (अधिश्रितं किंदेवत्यम् ११) रक्खा गया दूध क्या देवता है ११, (अभ्यवज्वाल्यमान किंदेवत्यम् १२) औंटता हुआ दूध क्या देवता है १२, (अभ्य-वज्वालितं किंदेवत्यम् १३) औंटा हुआ दूध क्या देवता है १३, (समुद्वान्तं किंदेवत्यम् १४) उफनता हुआ दूध क्या देवता है १४, (विष्यन्नं किंदेवत्यम् १५) बहता हुआ दूध क्या देवता है १५, (अद्भिः प्रत्यानीतं किंदेवत्यम् १६) जल से लौटा दिया गया दूध क्या देवता है १६, (उद्वास्यमानं किंदेवत्यम् १७) छोड़ा जाता हुआ दूध क्या देवता है १७, (उद्वासितं किंदेवत्यम् १८) छोड़ा हुआ दूध क्या देवता है १८, (उन्नीयमानं किंदेवत्यम् १९) ऊपर लाया जाता हुआ [नवनीत = माखन] क्या देवता है १९, (उन्नीतं किंदेवत्यम् २०) ऊपर लाया गया नवनीत क्या देवता है २०, (प्रक्रम्यमाण किंदेवत्यम् २१) घुमाया जाता हुआ नवनीत क्या देवता है २१, (ह्रियमाणं किंदेवत्यम् २२) लिया जाता हुआ नवनीत क्या देवता है २२, (उप-साद्यमानं किंदेवत्यम् २३) पास लाया जाता हुआ नवनीत क्या देवता है २३, (उपसादितं किंदेवत्यम् २४) पास रक्खा गया नवनीत क्या देवता है २४, (समित् किंदेवत्या २५) समिधा कौन देवता वाली है २५, (किंदेवत्यां प्रथमाम् आहुतिम् अहौषीः २६) कौन देवता वाली पहिली आहुति को तूने दिया है २६, (किंदेवत्यं गार्हपत्यम् अवेक्षिष्ठाः २७) कौन देवता वाली गार्हपत्य अग्नि वाली हवि को तूने विचारा है २७, (किंदेवत्या उत्तरा आहुतिः २८) कौन देवता वाली पिछली आहुति है २८, (किंदेवत्यं हुत्वा उदञ्चं स्रुचं त्रिः उदनैषीः २९) कौन देवता वाली हवि को देकर उत्तर की ओर रक्खी हुई स्रुचा [वट के पत्ते के समान रूप वाला विकङ्कट काठ का बना हुआ भुजा तुल्य चमचा] को तीन बार तूने उठाया है २९, (किंदेवत्यं स्रुचं बर्हिषि निधाय उन्मृज्य उत्तरतः पाणी निरमार्क्षीः ३०) कौन देवता वाली स्रुचा को कुशासन पर धर के और धोके उत्तर की ओर दोनों हाथों को तूने धोया है ३०, (किंदेवत्यं द्वितीयम् उन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधाम्

धेनौ (इडायाम्) इल गतौ कः, टाप् । प्रापणीयायां गवि (उपसृष्टायाम्) संगतायाम् (वत्सम्) गोशिशुम् (प्रक्रम्यमाणम्) मथ्यमानम् (ह्रियमाणम्) निः-स्रियमाणम् (समुद्वान्तम्) सम् + उत् + टुवम उद्गिरणे–क्तः । उद्गीर्णम् । उद्गतम् (विष्यन्नम्) वि + स्यन्दू प्रस्रवणे—क्तः । प्रस्रुतम् (उद्वास्यमानम्) विसृज्यमानम् (उद्वासितम्) विसृष्टम् (उपसादितम्) समीपे स्थापितम् (अहौषीः) हु दानादनयोः–लुङ् । हुतवान् असि (अवेक्षिष्ठाः) अव + ईक्ष दर्शने—लुङ्, आडभावः । दृष्टवानसि (स्रुचम्) यज्ञपात्रम् (उदञ्चम्) उदङ्मुखं कृत्वा (उत्तरतः) उत्तरस्यां दिशि

अकार्षीः ३१) कौन देवता वाली दूसरी [स्रुचा] को धोकर पित्र्य [पितृतीर्थ अर्थात् तर्जनी और अंगूठें के बीच] में यज्ञोपवीत करके दक्षिण ओर में पितरों [बड़े बूढे विद्वानों] के लिये तूने स्वधा [अन्न] किया है ३१, (किंदेवत्यं प्रथम प्राशीः ३२) कौन देवता वाली पहिली [हवि] को तूने खाया है ३२, (किंदेवत्यं द्वितीयम् ३३) कौन देवता वाली दूसरी [हवि को तूने खाया है] ३३, (किंदेवत्यं सर्वम् एव अन्ततः आप्राशीः ३४) कौन देवता वाली सब ही [हवि] को तूने खा लिया है ३४, (किंदेवत्यम् उदकम् अप्रक्षालितया स्रुचा न्यनैषीः ३५) कौन देवता वाले जल को बिना धुली हुई स्रुचा से तूने गिराया है ३५, (किंदेवत्यं प्रक्षालितया ३६) कौन देवता वाले [जल] को धुली हुई [स्रुचा] से [गिराया है] ३६, (किंदेवत्यं उदकम् अपरेण स्रुचा आहवनीयम् न्यनैषीः ३७) कौन देवता वाले जल को दूसरे स्रुचा से आहवनीय अग्नि पर तूने गिराया है ३७, (किंदेवत्यं स्रुवं स्रुचं च प्रत्यताप्सीः ३८) कौन देवता वाले स्रुवा [खैर की लकड़ी का बना हुआ हाथ भर का यज्ञ पात्र] और स्रुचा को तूने तपाया है ३८, (किंदेवत्यं स्रुग्दण्डं रात्री अवामार्क्षीः ३९) कौन देवता वाले स्रुचा के दण्ड को रात्रि में तूने धोकर रख दिया है ३९, (किंदेवत्यं प्रातः उदमार्क्षीः इति ४०) कौन देवता वाले [स्रुचा के दण्ड को] प्रातःकाल तूने धोकर उठाया है ४०, (एतद् चेद् वेत्थ, गोतम, हुतम्, यदि न वेत्थ ते अहुतम् इति ब्राह्मणम्) इसको जो तू जानता है, हे गोतम ! [उद्दालक ! तेरा] अग्निहोत्र है, और जो तू नहीं जानता है, तेरा निषिद्ध अग्निहोत्र है, यह ब्राह्मण है ॥ ११ ॥

भावार्थः—स्पष्ट है ॥ ११ ॥

कण्डिका १२ ॥

स होवाच, रौद्रं मे गवीडायां १, मानव्यमुपहूतायां २, वायव्यमुपसृष्टायां ३, वैराजं वत्समुन्नीयमानं ४, जागतमुन्नीतम् ५, आश्विनं दुह्यमानं ६, सौम्यं दुग्धं ७, बार्हस्पत्यं प्रक्रम्यमाणं ८, द्यावापृथिव्यं ह्रियमाणम् ९, आग्नेयमधिश्रियमाणं १०, वैश्वानरीयमधिश्रितं ११, वैष्णवमभ्यवज्वाल्यमानं १२, मारुतमभ्यवज्वालितं १३, पौष्णं समुद्रान्तं १४, वारुणं विष्यन्नं १५, सारस्वतमद्भिः प्रत्यानीतं १६, त्वाष्ट्रमुद्वास्यमानं १७, धात्रमुद्वासितं १८, वैश्वदेवमुन्नीयमानं १९, सावित्रमुन्नीतं २०, बार्हस्पत्यं प्रक्रम्यमाणं २१, द्यावापृथिव्यं ह्रियमाणम् २२, ऐन्द्रमुपसाद्यमानं २३, बलायोपसन्नम् २४, आग्नेयी समिद् २५, यां प्रथमामाहुतिमहौषं मामेव तत् स्वर्गे लोकेऽधां २६, यद्गार्हपत्यमवेक्षिषमस्य लोकस्य सन्तत्यै २७, प्राजापत्योत्तराहुतिः, तस्मात् पूर्णतरा मनसैव सा २८, यद्भुत्वा

(निरमार्क्षीः) निर्+मृजूष् शुद्धौ—लुङ् । नितरां शोधितवानसि (पित्र्युपवीतम् = पित्र्योपवीतम्) पित्र्यं पितृतीर्थे तर्जन्यङ्गुष्ठयोर्मध्ये स्थितं यज्ञोपवीतम् । (दक्षिणतः) दक्षिणस्यां दिशि (पितृभ्यः) पितृतुल्यमाननीयेभ्यो विद्वद्भ्यः (प्राशीः) अश भोजने—लुङ् । भक्षितवानसि (अप्रक्षालितया) अशोधितया (प्रत्यताप्सीः) प्रत्यक्षेण तप्तवानसि (वेत्थ) विद ज्ञाने—लट् । जानासि (हुतम्) अग्निहोत्रम् (अहुतम्) निषिद्धाग्निहोत्रम् ॥

स्रुचं त्रिरुदश्चमुदनै[1]षं रुद्रांस्तेनाप्रैषं २९, यद्बर्हिषि स्रुचं निधायोन्मृज्योत्तरतः पाणी [2]निरमार्क्षमोषधिवनस्पतींस्तेनाप्रैषं ३०, यद् द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षं पितृंस्तेनाप्रैषं ३१, यत्प्रथमम्प्राशिषं प्राणांस्तेनाप्रैषं ३२, यद् द्वितीयं गर्भास्तेन, तस्मादनश्नन्तो गर्भा जीवन्ति ३३, यदन्ततः सर्वमेवाप्राशिषं विश्वान्देवांस्तेनाप्रैषं ३४, यदप्रक्षालितयोदकं स्रुचा न्यनैषं सर्पेतरजनांस्तेनाप्रैषं ३५ यत् प्रक्षालितया सर्पपुण्यजनांस्तेन ३६, यदपरेणाहवनीयमुदकं स्रुचा न्यनैषं गन्धर्वाप्सरसस्तेनाप्रैषं ३७, यत् स्रुवं स्रुचश्च प्रत्यताप्सं सप्तऋषींस्तेनाप्रैषं ३८, यद्रात्री स्रुग्दण्डमवामार्क्षं[3] ये रात्री संविशन्ति दक्षिणांस्तानुदनैषं ३९, यत् प्रातरुदमार्क्षं ये प्रातः प्रव्रजन्ति दक्षिणांस्तानुदनैषमिति ४०, ब्राह्मणम् ॥ १२ ॥

कण्डिका १२ ॥ प्राचीनयोग्य के ४० प्रश्नों के उद्दालक के दिये उत्तर ॥

(सः ह उवाच) वह [उद्दालक] बोला—(रौद्रं मे इडायां गवि १) रुद्र [शत्रुओं का रुलाने वाला शूरवीर] देवता वाला कर्म मेरी प्राप्ति योग्य गौ में है १, (मानव्यम् उपहूतायाम् २) मानव [मननशील मनुष्य] देवता वाला कर्म उस बुलाई हुई में है २, (वायव्यम् उपसृष्टायाम् ३) वायु [गति वाला पवन] देवता वाला कर्म उस पास आयी हुई में है ३, (वैराजं वत्सम् उन्नीयमानम् ४) विराट् [विविध प्रकाश वाले] देवता वाला कर्म बछड़े को लाया जाता हुआ कर्म है ४, (जागतम् उन्नीतम् ५) जगत् [संसार] देवता वाला कर्म लाया गया [बछड़ा] है ५ (आश्विनं दुह्यमानम् ६) दोनों अश्वी [स्त्री पुरुष] देवता वाला दुहा जाता हुआ कर्म है ६, (सौम्यं दुग्धम् ७) सोम [सोमलता ओषधि] देवता वाला दूध है ७, (बार्हस्पत्यं प्रक्रम्यमाणम् ८) बृहस्पति [बड़ी विद्याओं का स्वामी] देवता वाला घुमाया जाता हुआ दूध है ८, (द्यावापृथिव्यं ह्रियमाणम् ९) द्यावापृथिवी [सूर्य और भूमि] देवता वाला लिया जाता हुआ दूध है ९, (आग्नेयम् अधिश्रियमाणम् १०) अग्निदेवता वाला रक्खा जाता हुआ दूध है १०, (वैश्वानरीयम् अधिश्रितम् ११) वैश्वानर [सब नरों का हितकारक] देवता वाला रक्खा गया दूध है ११, (वैष्णवम् अभ्यवज्वाल्यमानम् १२) विष्णु [व्यापक अग्नि] देवता वाला औंटता हुआ दूध है १२, (मारुतम्

१२—(रौद्रम्) रुद्रदेवत्यम्, रुद्रः शत्रुरोदकः शूरवीरः (मानव्यम्) ब्राह्मणमाणववाडवाद् यन् (पा० ४ । २ । ४२) मानव[4]—यन् । मानवसमूहदेवताकम् । मानवो मननशीलो मनुष्यः (वायव्यम्) वाय्वृतुपित्रुषसो यत् । (पा० ४ । २ । ३१) वायु—यत् । वायुदेवताकम् (वैराजम्) विराज्—अण् । विराड्देवताकम् । विराड् विविधैश्वर्यवान् (जागतम्) जगत्—अण् । जग-

१. पू. सं सर्वत्र 'उन्नैषं' इति पाठः ॥ २. पू. सं. 'निर्मार्क्ष्यं' इति पाठः ॥
३. पू सं. 'अवमार्क्ष्यं' इति पाठः ॥
४. माणव शब्द से कहा हुआ यन् प्रत्यय ज्ञापक के बल से मानव शब्द से भी होता है । द्र. पदमञ्जरी ४ । २ । ४२ ॥ सम्पा० ॥

अभ्यवज्वालितम् १३) मरुत् [वायु] देवता वाला औंटा हुआ दूध है १३, (पौष्णं समुद्वान्तम् १४) पूषा [पुष्ट करने वाला सूर्य] देवता वाला उफनता हुआ दूध है १४, (वारुणं विष्यन्नम् १५) वरुण [जल] देवता वाला बहता हुआ दूध है १५, (सारस्वतम् अद्भिः प्रत्यानीतम् १६) सरस्वती [जल वाली नदी] देवता वाला जल से लौटा दिया गया दूध है १६, (त्वाष्ट्रम् उद्वास्यमानम् १७) त्वष्टा [सूक्ष्म बनाने वाला विद्वान्] देवता वाला छोड़ा जाता हुआ दूध है १७ (धात्रम् उद्वासितम् १८) धाता [सब का धारण करने वाला] देवता वाला छोड़ा हुआ दूध है १८, (वैश्वदेवम् उन्नीयमानम् १९) विश्वेदेवा [सब दिव्य गुण] देवता वाला ऊपर लाया जाता हुआ [नवनीत माखन] है १९, (सावित्रम् उन्नीतम् २०) सविता [सर्वप्रेरक] देवता वाला ऊपर लाया गया नवनीत है २०, (बार्हस्पत्यं प्रक्रम्यमाणम् २१) बृहस्पति [बड़ी विद्याओं का स्वामी] देवता वाला घुमाया जाता हुआ नवनीत है २१, (द्यावापृथिव्यं ह्रियमाणम् २२) द्यावापृथिवी [सूर्य और भूमि] देवता वाला लिया जाता हुआ नवनीत है २२, (ऐन्द्रम् उपसाद्यमानम् २३) इन्द्र [बड़े ऐश्वर्य वाले] देवता वाला पास लाया जाता हुआ नवनीत है २३, (बलाय उपसन्नम् २४) बल के लिये पास रक्खा गया नवनीत है २४, (आग्नेयी समित् २५) अग्नि देवता वाली समिधा है २५, (यां प्रथमाम् आहुतिम् अहौषम् माम् एव तत् स्वर्गे लोके अधाम् २६) जिस पहिली आहुति को मैंने दिया है, उस से अपने को मैंने स्वर्गलोक में रक्खा है २६, (यत् गार्हपत्यम् अवेक्षिषम् अस्य लोकस्य संतत्यै २७) जो मैंने गार्हपत्य अग्नि वाली हवि को विचारा है, वह इस लोक के विस्तार के लिये है २७, (प्राजापत्या उत्तरा आहुतिः, तस्मात् सा पूर्णतरा मनसा एव २८) प्रजापति [प्रजापालक ईश्वर वा गृहस्थ] देवता वाली पिछली आहुति है, इस कारण वह मन के साथ ही अधिक पूर्ण है २८, (यत् हुत्वा उदञ्चम् स्रुचं त्रिः उदनैषं रुद्रान् तेन अप्रैषम् २९) जो हवि देकर उत्तर ओर रक्खी हुई स्रुचा [वट के पत्ते के समान रूप

द्देवताकम् (आश्विनम्) अश्विन्--अण् । अश्विदेवताकम् । अश्विनौ स्त्रीपुरुषौ । कुहस्विद् दोषा कुह वस्तोरश्विना--ऋ० १० । ४० । २ (सौम्यम्) सोम--टचण् । सोमदेवताकम् । ओषधिः सोमः सुनोतेः--निरु० ११ । २ (बार्हस्पत्यम्) बृहस्पति--ण्यः । बृहस्पतिदेवताकम् । बृहस्पतिः । बृहतीनां विद्यानां पतिः । वाचस्पतिः (वैश्वानरीयम्) वैश्वानर--छः । वैश्वानरदेवताकम् । वैश्वानरः सर्वनरहितः (वैष्णवम्) विष्णुदेवताकम् । विष्णुः व्यापकोऽग्निः (मारुतम्) मरुत्--स्वार्थे अण् । वायुदेवताकम् (पौष्णम्) पूषन्--अण् । पूषदेवताकम् । पूषा पोषकः सूर्यः (वारुणम्) वरुणदेवताकम् । वरुणो जलम् (सारस्वतम्) सरस्वतीदेवताकम् । सरस्वती जलवती नदी (त्वाष्ट्रम्) त्वष्टृदेवताकम् । त्वष्टा सूक्ष्मीकर्ता । विश्वकर्मा (वैश्वदेवम्) सर्वदिव्यगुणदेवताकम् (सावित्रम्) सर्वप्रेरकदेवताकम् (ऐन्द्रम्) ऐश्वर्यवद्देवताकम् (अहौषम्) हुतवानस्मि (माम्) आत्मानम् (अधाम्) धारितवानस्मि (प्राजापत्या) प्रजापतिः ईश्वरो गृहस्थो वा, तद्देवताका (रुद्रान्)

वाला विकङ्कट काष्ठ का बना हुआ भुजा तुल्य चमचा] को तीन बार मैंने उठाया है, रुद्रों [शत्रुनाशक शूरवीरों] को मैंने तृप्त किया है २९, (यत् बर्हिषि स्रुचं निधाय उन्मृज्य उत्तरतः पाणी निरमार्क्षं तेन ओषधिवनस्पतीन् अप्रैषम् ३०) जो कुशासन पर स्रुचा को धर के उत्तर की ओर दोनों हाथों को मैंने धोया है, उससे ओषधि वनस्पतियों को मैंने तृप्त किया है ३०, (यत् द्वितीयम् उन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधाम् अकार्षम् तेन पितॄन् अप्रैषम् ३१) जो दूसरी [स्रुचा] को धोकर पित्र्य [पितृतीर्थ अर्थात् तर्जनी और अंगूठे के बीच] में यज्ञोपवीत करके दक्षिण ओर में पितरों [बड़े बूढ़े विद्वानों] के लिये स्वधा [अन्न] मैंने किया है, उस से पितरों [बड़े बूढ़े विद्वानों] को मैंने तृप्त किया है ३१, (यत् प्रथमं प्राशिषं तेन प्राणान् अप्रैषम् ३२) जो पहिली [हवि] को मैंने खाया है, उस से प्राणों को मैंने तृप्त किया है ३२, (यत् द्वितीयं तेन गर्भान्, तस्मात् अनश्नन्तः गर्भाःजीवन्ति, ३३) जो दूसरी [हवि] को [मैंने खाया है] उससे गर्भों को [मैंने तृप्त किया है] इस कारण बिना खाते हुये [अर्थात् नाभि की नाड़ी से रस खींचते हुये] गर्भ जीते हैं ३३, (यत् अन्ततः सर्वम् एव आप्राशिषं तेन विश्वान् देवान् अप्रैषम् ३४) जो अन्त में सब ही [हवि] को मैंने खा लिया है उस से सब दिव्य गुणों को मैंने तृप्त किया है ३४, (यत् उदकम् अप्रक्षालितया स्रुचा न्यनैष तेन सर्पेतरजनान् अप्रैषम् ३५) जो जल को बिना धुली स्रुचा से मैंने गिराया है, उससे गतिशीलों से भिन्न पामरजनों को मैंने तृप्त किया है ३५, (यत् प्रक्षालितया तेन सर्पपुण्यजनान् ३६) जो धुली हुई [स्रुचा] से [मैंने जल गिराया है], उससे गतिशील पवित्र आचरण वाले लोगों को [मैंने तृप्त किया है] ३६, (यत् अपरेण स्रुचा उदकम् आहवनीयं न्यनैषं तेन गन्धर्वाप्सरसः अप्रैषम् ३७) जो दूसरी स्रुचा से जल को आहवनीय अग्नि पर मैंने गिराया है, उससे गन्धर्व अप्सरसों [पृथिवी के धारण करने वालों और आकाश में चलने वालों] को मैंने तृप्त किया है ३७, (यत् स्रुवं स्रुचं च प्रत्यताप्सं तेन सप्तऋषीन् अप्रैषम् ३८) जो स्रुवा [खैर की लकड़ी का बना हुआ हाथ भर का यज्ञपात्र] और स्रुचा को मैंने तपाया है, उससे सात ऋषियों [त्वचा, नेत्र, कान, जिह्वा, नाक, मन और बुद्धि] को मैंने तृप्त किया है ३८,

---

शत्रुरोदकान् (अप्रैषम्) प्रीञ् तर्पणे—लुङ् । तर्पितवानस्मि (प्राशिषम्) प्रकर्षेण भक्षितवानस्मि (अनश्नन्तः) न भक्षयन्तः (सर्पेतरजनान्) सर्पन्ति गच्छन्ति सर्पाः गतिशीलाः । इतरः भिन्नः जनः पामरलोकः । गतिशीलेभ्यो भिन्नान् पामरजनान् (सर्पपुण्यजनान्) गतिशीलान् पवित्राचरणान् (गन्धर्वाप्सरसः) गां वाणीं पृथिवीं गतिं वा धरति धारयति वा स गन्धर्वः । कृगृशृदृभ्यो वः (उ० १ । १५५) गो+धृञ् धारणे—वप्रत्ययः, गो शब्दस्य गम् । सर्तेरप्पूर्वादसिः (उ० ४ । २३७) अप्+सृ गतौ—असिः । अप्सरसः अप्सु आकाशे सरणशीलाः । पृथिवीधारकान् आकाशे गमनशीलान् च (सप्तऋषीन्) इगुपधात् कित् (उ० ४ । १२०) ऋषी गतौ दर्शने च—इन् । ऋत्यकः (पा० ६ । १ । १२८) इति प्रकृतिभावः । सप्त ऋषयः प्रतिहिताः शरीरे—यजु० ३४ । ५५ । त्वक्चक्षुःश्रवण-

(यत् रात्रौ स्रुग्दण्डम् अवामार्क्षं ये रात्रौ संविशन्ति तान् दक्षिणान् उदनैषम् ३९) जो रात्रि में स्रुचा के दण्डे को मैंने धोया है, जो रात्रि में सोते हैं उन चतुर लोगों को मैंने उठाया है ३९, (यत् प्रातः उदमार्क्षम्, ये प्रातः प्रव्रजन्ति तान् दक्षिणान् उदनैषम् ४० इति ब्राह्मणम्) जो प्रातःकाल [स्रुचा के दण्डे को] मैंने धोया है, जो प्रातःकाल चलते फिरते हैं उन चतुर लोगों को मैंने उठाया है ४०, यह ब्राह्मण [ब्रह्मज्ञान] है १२ ॥

भावार्थः—दूध घी आदि पदार्थों का उपयोग विचारपूर्वक करना चाहिये ॥ १२ ॥

कण्डिका १३ ॥

एवमेवैतद्भो यथा भवानाह पृच्छामि त्वेव भवन्तमिति, पृच्छ प्राचीनयोग्येति । यस्य सायमग्नय उपसमाहिताः स्युः सर्वे ज्वलयेयुः प्रक्षालितानि यज्ञपात्राण्युपसन्नानि स्युरथ चेद् दक्षिणाग्निरुद्वायात् किं वा ततो भयमागच्छेदिति, क्षिप्रमस्य पत्नी प्रैति, यो विद्वान् जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति १, गार्हपत्यादधि दक्षिणाग्निं प्रणीय प्राचोऽङ्गारानुद्धृत्य प्राणापानाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात्सा मे विद्या सा प्रायश्चित्तिरिति २, अथ चेदाहवनीय उद्वायात् किं वा ततो भयमागच्छेदिति क्षिप्रमस्य पुत्रः प्रैति, यो विद्वाञ्जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति २, गार्हपत्यादध्याहवनीयं प्रणीय प्रतीचोऽङ्गारानुद्धृत्य समानव्यानाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरञ्जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति २ । अथ चेद्गार्हपत्य उद्वायात् किं वा ततो भयमागच्छेदिति क्षिप्रं गृहपतिः प्रैति, यो विद्वाञ्जुहोति विद्यया त्वेवाहमभिजुहोमि इति का ते विद्या का प्रायश्चित्तिरिति ३, सभस्मकमाहवनीयं दक्षिणेन दक्षिणाग्निं परिहृत्य गार्हपत्यस्यायतने प्रतिष्ठाप्य ततः आहवनीयं प्रणीय उदीचोऽङ्गारानुद्धृत्योदानरूपाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ३, अथ चेत्सर्वेऽग्नय उद्वायेयुः किं वा ततो भयमागच्छेदिति, क्षिप्रं गृहपतिः सर्वज्यानिञ्जीयते, यो विद्वां जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरिति ४, आनडुहेन शकृत्पिण्डेनाग्न्यायतनानि परिलिप्य होम्यमुपसाद्याग्निं निर्मथ्य प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहा उदानरूपाभ्यां स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरञ्जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ४, अथ चेन्नाग्निं जनयितुं शक्नुयुर्न कुतश्चन वातो वायात् किं वा ततो भयमागच्छेदिति मोघमस्येष्टं च हुतञ्च भवति, यो विद्वां जुहोति विद्यया त्वेवाहमभिजुहोमीति, का ते विद्या का प्रायश्चित्तिरित्यानडुहेनैव शकृत्पिण्डे-

---

रसनाघ्राणमनोबुद्धीः (संविशन्ति) शेरते (दक्षिणान्) कुशलान् (प्रव्रजन्ति) प्रकर्षेण गच्छन्ति ॥

नाग्न्यायतनानि परिलिप्य होम्यमुपसाद्य वात आवातु भेषजमिति सूक्तेनात्मन्येव जुहुयादथ प्रातरग्निं निर्मथ्य यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिरिति ५ ब्राह्मणम् ॥ १३ ॥

कण्डिका १३ ॥ तीनों अग्नियों में विघ्न पड़ने पर उपाय और प्रायश्चित्त ॥

(भो एवम् एव एतत् यथा भवान् आह, तु एव भवन्तं पृच्छामि इति) [प्राचीनयोग्य बोला] महाराज! ऐसा ही यह है जैसा आप कहते हैं, फिर भी आपसे मैं पूछता हूं। (प्राचीनयोग्य पृच्छ इति) [उद्दालक बोला] हे प्राचीनयोग्य! पूंछ। (यस्य सायम् अग्नयः उपसमाहिताः स्युः सर्वे ज्वलयेयुः प्रक्षालितानि यज्ञपात्राणि उपसन्नानि स्युः) [प्राचीनयोग्य बोला] जिसकी सायंकाल को सब अग्नियां यथाविधि ठीक की गयी हों, और सब जलती हों और धुले हुये यज्ञपात्र समीप हों, (अथ चेत् दक्षिणाग्निः उद्वायात् किं वा ततः भयम् आगच्छेत् इति, क्षिप्रम् अस्य पत्नी प्रैति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति १) फिर जो दक्षिणाग्नि भड़क उठे [अधिक बढ़ जावे] अथवा उससे कुछ भय आवे, [जिससे] उसकी पत्नी शीघ्र चली जावे, और जो विद्वान् पुरुष होम करता है—(विद्यया······) विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, उसमें] तेरी क्या विद्या है और क्या प्रायश्चित्त [पापशोधन विधि] है १। (गार्हपत्यात् अधि दक्षिणाग्निं प्रणीय प्राचः अङ्गारान् उद्धृत्य प्राणापानाभ्यां स्वाहा इति जुहुयात्, अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति) [उद्दालक बोला] गार्हपत्य अग्नि से दक्षिणाग्नि लेकर पूर्व दिशा वाले अङ्गारों को निकाल कर—(प्राणापानाभ्यां स्वाहा) भीतर जाने वाले और बाहर आने वाले श्वास के लिये सुन्दर आहुति है—[इस मन्त्र से] होम करे फिर प्रातःकाल अपने अपने स्थान में अग्नियों को ठीक कर के पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है १। (अथ चेत् आहवनीयः उद्व यात् किं वा ततः भयम् आगच्छेत् इति क्षिप्रम् अस्य पुत्रः प्रैति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति २) [प्राचीनयोग्य बोला] फिर जो आहवनीय अग्नि भड़क उठे अथवा उस से कुछ भय आवे, [जिससे] उसका पुत्र शीघ्र चला जावे और जो विद्वान् होम करता है—(विद्यया······) विद्या के साथ फिर भी

१३—(तु) पुनः (उपसमाहिताः) यथाविधिसंस्कृताः (प्रक्षालितानि) क्षल शोधकर्मणि—क्तः। संशोधितानि (उपसन्नानि उप+षद्लृ गतौ—क्तः। समीपस्थानि (उद्वायात्) उद्गच्छेत् (प्रैति) प्र+इण् गतौ—लट्। प्रकर्षेण गच्छति (प्रायश्चित्तिः) प्र+इण् गतौ घञ्+चिती संज्ञाने—क्तिन्। प्रायस्य चित्तिचित्तयोः (वा० पा० ६। १। १५७) इति सुट्। पापशोधनविधिः (प्राचः) पूर्वदिक्स्थितान् (समाधाय) यथाविधि संस्कृत्य (यथापुरम्) पुर अग्रगमने—कः।

मैं सब प्रकार होम करूं [यह कहे, इस में] तेरी क्या विद्या है और क्या प्रायश्चित्त है २। (गार्हपत्यात् अधि आहवनीयं प्रणीय प्रतीचः अङ्गारान् उद्धृत्य समानव्यानाभ्यां स्वाहा इति जुहुयात्) [उद्दालक बोला] गार्हपत्य अग्नि से आहवनीय अग्नि को लेकर पश्चिम ओर वाले अङ्गारों को निकाल कर—(समानव्यानाभ्यां स्वाहा) नाभि वाले और सब शरीर में फैलने वाले श्वास के लिये सुन्दर आहुति है—इस मन्त्र से होम करे (अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति २) फिर प्रातःकाल अपने अपने स्थान पर अग्नियों को ठीक कर के पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है २। (अथ चेत् गार्हपत्यः उद्वायात् किं वा ततः भयम् आगच्छेत् इति, क्षिप्रं गृहपतिः प्रैति यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ३) [प्राचीनयोग्य बोला] फिर जो गार्हपत्य अग्नि भड़क उठे अथवा उस से कुछ भय आवे, [जिससे] गृहपति शीघ्र चला जावे, और जो विद्वान् होम करता है (विद्यया······) विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, उस में] तेरी क्या विद्या है और क्या प्रायश्चित्त है ३। (दक्षिणेन दक्षिणाग्निं परिहृत्य सभस्मकम् आहवनीयं गार्हपत्यस्य आयतने प्रतिष्ठाप्य ततः आहवनीयं प्रणीय उदीचः अङ्गारान् उद्धृत्य उदानरूपाभ्यां स्वाहा इति जुहुयात्, अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति ३) [उद्दालक बोला] दाहिने हाथ से दक्षिणाग्नि को छोड़ कर, भस्म सहित आहवनीय अग्नि को गार्हपत्य के स्थान में रख कर फिर आहवनीय अग्नि को लेकर उत्तर ओर वाले अङ्गारों को निकाल कर—(उदानरूपाभ्यां स्वाहा) कण्ठ से ऊपर वाले वायु और रूप के लिए सुन्दर आहुति है—इस मन्त्र से हवन करे, फिर प्रातःकाल अपने-अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ३। (अथ चेत् सर्वे अग्नयः उद्वायेयुः किं वा ततः भयम् आगच्छेत् इति, क्षिप्रं गृहपतिः सर्वज्यानिं जीयते, यः विद्वान् जुहोति विद्यया तु एव अहम् अभि जुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ४) [प्राचीन-योग्य बोला] फिर जो सब अग्नियां भड़क उठें, अथवा उससे कुछ भय आवे [जिससे] गृहपति शीघ्र सब हानि प्राप्त करे, और जो विद्वान् होम करता है—[विद्यया······] विद्या के साथ फिर भी मैं सब प्रकार होम करूं [यह कहे, इसमें] तेरी क्या विद्या है और क्या प्रायश्चित है ४। (आनडुहेन शकृत्पिण्डेन अग्न्यायतनानि परिलिप्य होम्यम् उपसाद्य अग्निं निर्मथ्य प्राणापानाभ्यां स्वाहा,

---

यथापूर्वम् (प्रतीचः) पश्चिमदिशि स्थितान् (परिहृत्य) परित्यज्य (आयतने) यज्ञस्थाने (उद्धृत्य) उत्+हृञ् हरणे—ल्यप्। बहिष्कृत्य (सर्वज्यानिम्) वीज्याज्वरिभ्यो निः (उ० ४ । ४८) ज्या वयोहानौ— निः। सर्वक्षतिः। (जीयते) कर्मणि प्रयोग आर्षः। जयति प्राप्नोति (आनडुहेन) अनुडुही—अण्। धेनुसंबन्धिनी (शकृत्पिण्डेन) विष्ठासंचयेन (होम्यम्) होम—यत्। होमाय हितं हविः। (मोघम्) निष्फलम् (इष्टम्) अभीष्टम् (आत्मनि) मनसि ॥

समानव्यानाभ्यां स्वाहा, उदानरूपाभ्यां स्वाहा इति जुहुयात् अथ प्रातः यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात् सा मे विद्या सा प्रायश्चित्तिः इति ४) [उद्दालक बोला] गौ के गोबर से अग्नि के स्थानों को लीप कर, होम योग्य द्रव्य को पास लाकर, अग्नि को मथ कर (प्राणापानाभ्यां स्वाहा, समानव्यानाभ्यां स्वाहा, उदानरूपाभ्यां स्वाहा) [ऊपर वाले इन तीन मन्त्रों से] होम करे, फिर प्रातःकाल अपने अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ४ । (अथ चेत् अग्निं जनयितुं न शक्नुयुः न कुतश्चन वातः वायात् किं वा ततः भयम् आगच्छेत् इति अस्य इष्टं च हुतं च मोघं भवति, यः विद्वान् जुहोति विद्यया तु एव अहम् अभिजुहोमि इति, का ते विद्या का प्रायश्चित्तिः इति ५) [प्राचीनयोग्य बोला] फिर जो अग्नि को लोग न उत्पन्न कर सकें और जो कहीं से वायु न चले अथवा उससे कुछ भय आवे [जिससे] उसका अभीष्ट और होम निष्फल होवे, और जो विद्वान्—होम करता है—(विद्यया......) विद्या के साथ फिर भी मैं सब प्रकार होम करूँ [यह कहे, इसमें] तेरी क्या विद्या है और क्या प्रायश्चित्त है ५ । (आनडुहेन एव शकृत्पिण्डेन अग्न्यायतनानि परिलिप्य होम्यम् उपसाद्य, वातः आवातु भेषजम् इति सूक्तेन आत्मनि एव जुहुयात् अथ प्रातः अग्निं निर्मथ्य यथास्थानम् अग्नीन् उपसमाधाय यथापुरं जुहुयात्, सा मे विद्या सा प्रायश्चित्तिः ५ इति ब्राह्मणम्) [उद्दालक बोला] गौ के ही गोबर से अग्नि के स्थानों को लीप कर, होमयोग्य पदार्थ को पास लाकर (वातः आवातु भेषजम्) वायु औषध लावे—[इस मन्त्र का मिलान करो अथर्व ४।१३।३] इस सूक्त से आत्मा [अपने] में ही [मानसिक] होम करे, फिर प्रातःकाल अग्नि को मथ कर अपने अपने स्थान में अग्नियों को ठीक करके पहिले के समान होम करे, यह मेरी विद्या और यह प्रायश्चित्त है ५ । यह ब्राह्मण है ॥ १३ ॥

भावार्थः—अग्नियों के अभाव में मनुष्य मानसिक हवन ही करे ॥ १३ ॥

विशेषः—पूर्वोक्त मन्त्र यहां लिखा जाता है—आ वात वाहि भेषजं वि वात वाहि यद् रपः । त्वं हि विश्वभेषज देवानां दूत ईयसे ॥ अथ० ४।१३।३ ऋ० १०।१३७।३। (वात) हे वायु (भेषजम्) स्वास्थ्य को (आ वाहि) बहकर ला, और (वात) हे वायु ! (यत् रपः = यत् रपः तत्) जो दोष है उसे (वि वाहि) बह कर निकाल दे, (हि) क्योंकि (विश्वभेषज) हे सर्वरोगनाशक [वायु]! (त्वम्) तू (देवानाम्) इन्द्रियों, विद्वानों और सूर्यादि लोकों के बीच (दूतः) चलने वाला वा दूत [समान सन्देश पहुंचाने वाला] होकर (ईयसे) फिरता रहता है ॥

कण्डिका १४ ॥

एवमेवैतद् भो भगवन् यथा भवानाहोपेयामि त्वेव भवन्तमित्येवं चेन्नावक्ष्यो मूर्द्धा ते व्यपतिष्यदिति हन्त तु ते तद्वक्ष्यामि यथा ते न व्यपतिष्यतीति, यो ह वा एवं विद्वानश्नाति च पिबति च वाक् तेन तृप्यति, वाचि तृप्तायामग्निस्तृप्यत्यग्नौ तृप्ते पृथिवी तृप्यति, पृथिव्यां तृप्तायां यानि पृथिव्यां भूतान्यन्वायत्तानि

तानि तृप्यन्ति १, यो ह वा एवं विद्वानश्नाति च पिबति च प्राणस्तेन तृप्यति, प्राणे तृप्ते वायुस्तृप्यति, वायौ तृप्तेऽन्तरिक्षं तृप्यति अन्तरिक्षे तृप्ते यान्यन्तरिक्षे भूतान्यन्वायत्तानि तानि तृप्यन्ति २, यो ह वा एवं विद्वानश्नाति च पिबति च चक्षुस्तेन तृप्यति, चक्षुषि[3] तृप्त आदित्यस्तृप्यत्यादित्ये तृप्ते द्यौस्तृप्यति, दिवि तृप्तायां यानि दिवि भूतान्यन्वायत्तानि तानि तृप्यन्ति ३, यो ह वा एवं विद्वानश्नाति च पिबति च मनस्तेन तृप्यति, मनसि तृप्ते चन्द्रमास्तृप्यति चन्द्रमसि तृप्ते आपस्तृप्यन्त्यप्सु तृप्तासु यान्यप्सु भूतान्यन्वायत्तानि तानि तृप्यन्ति ४, यो ह वा एवं विद्वानश्नाति च पिबति च श्रोत्रं तेन तृप्यति, श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति, दिक्षु चान्तर्देशेषु च तृप्तेषु च यानि दिक्षु चान्तर्देशेषु च भूतान्यन्वायत्तानि तानि तृप्यन्ति ५, यो ह वा एवं विद्वानश्नाति च पिबति च तस्यायमेव दक्षिणः पाणिर्जुहूः सव्य उपभृत् कण्ठो ध्रुवाऽन्नं हविः प्राणा ज्योतींषि सदेष्टं सदाहुतं सदाशितं पायितमग्निहोत्रं भवति य एवं वेद यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ॥१४॥

कण्डिका १४ ॥ खान पान के लाभ ॥

(भो भगवन् एवम् एव एतत् यथा भवान् आह, उपयामि तु एव भवन्तम् इति) [प्राचीनयोग्य बोला] हे भगवन् यह वैसा ही है जैसा आपने कहा कि मैं तो आप के पास ही आया हूँ । (एवं चेद् न अवक्ष्यः ते मूर्द्धा व्यपतिष्यत् इति) जो तू ऐसा [यथार्थ] न कहता तो तेरा मस्तक गिर जाता [देखो कं० ८], (तु हन्त ते तत् वक्ष्यामि यथा ते न व्यपतिष्यति इति) किन्तु, हे भाई ! तुझसे वह कहूंगा जिस से तेरे लिये [मेरा मस्तक] न गिरेगा । (यः ह वै एव विद्वान् अश्नाति च पिबति च वाक् तेन तृप्यति) जो ही ऐसा [सत्यवादी] विद्वान् खाता और पीता है वाणी उससे तृप्त होती है १, (वाचि तृप्तायाम् अग्निः तृप्यति) वाणी के तृप्त होने पर अग्नि तृप्त होता है २, (अग्नौ तृप्ते पृथिवी तृप्यति) अग्नि के तृप्त होने पर पृथिवी तृप्त होती है ३, (पृथिव्यां तृप्तायां पृथिव्यां यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) पृथिवी के तृप्त होने पर जो एक दूसरे के वशीभूत प्राणी आदि हैं वे तृप्त होते हैं । ४,१। (यः ह वै एवं विद्वान् अश्नाति च पिबति च प्राणः तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है प्राण उससे तृप्त होता है १, (प्राणे तृप्ते वायुः तृप्यति) प्राण के तृप्त होने पर वायु तृप्त होता है २, (वायौ तृप्ते अन्तरिक्षं तृप्यति) वायु के तृप्त होने पर अन्तरिक्ष [मध्यलोक] तृप्त होता है ३, ((अन्तरिक्षे तृप्ते अन्तरिक्षे यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) अन्तरिक्ष के तृप्त होने पर

१४—(उपयामि) उप+या प्रापणे – लट् । आगतवानस्मि (अवक्ष्यः) वच परिभाषणे—लङ् । अकथयिष्यः (व्यपतिष्यत्) वि+पत्लृ गतौ – लृङ्, विविधमपतिष्यत् । (वक्ष्यामि) कथयिष्यामि (अश्नाति) भक्षति (पिबति) पानं करोति (तृप्यति) हृष्यति (भूतानि) सत्तामात्रवस्तूनि (अन्वायत्तानि)

---

१. २. ३. पू. सं. 'उपायाम्' 'व्यपतिष्यति' 'चक्षुषी' इत्येते पाठाः ॥ सम्पा० ॥

अन्तरिक्ष में जो एक दूसरे के आधीन प्राणी आदि हैं वे तृप्त होते हैं ४ २। (यः ह वै एवं विद्वान् अश्नाति च पिबति च चक्षुः तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है आंख उससे तृप्त होती है १, (चक्षुषि तृप्ते आदित्यः तृप्यति) आंख तृप्त होने पर सूर्य तृप्त होता है २, (आदित्ये तृप्ते द्यौः तृप्यति) सूर्य के तृप्त होने पर प्रकाशलोक [जहा पर सूर्य का प्रकाश है] तृप्त होता है ३, (दिवि तृप्तायां दिवि यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) प्रकाशलोक तृप्त होने पर प्रकाशलोक में जो एक दूसरे के आधीन प्राणी आदि हैं वे तृप्त होते हैं ४, ३। (यः ह वै एवं विद्वान् अश्नाति च पिबति च मनः तेन तृप्यति) जो ही ऐसा विद्वान् खाता पीता है, मन उससे तृप्त होता है १, (मनसि तृप्ते चन्द्रमाः तृप्यति) मन तृप्त होने पर चन्द्रमा तृप्त होता है २, (चन्द्रमसि तृप्ते आपः तृप्यन्ति) चन्द्रमा तृप्त होने पर जल तृप्त होता है ३, (अप्सु तृप्तासु अप्सु यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) जल तृप्त होने पर जल में जो एक दूसरे के आधीन प्राणी आदि हैं, वे तृप्त होते हैं ४, ४। (यः ह वै एवं विद्वान् अश्नाति च पिबति च श्रोत्रं तेन तृप्यति) जो ही ऐसा विद्वान् खाता और पीता है, कान उससे तृप्त होता है १, (श्रोत्रे तृप्ते दिशः च अन्तर्देशाः च तृप्यन्ति) कान तृप्त होने पर दिशायें और बीच वाले देश तृप्त होते हैं २, (दिक्षु च अन्तर्देशेषु च तृप्तेषु च दिक्षु च अन्तर्देशेषु च यानि अन्वायत्तानि भूतानि तानि तृप्यन्ति) दिशाओं और बीच वाले देशों के तृप्त होने पर दिशाओं और बीच वाले देशों में जो एक दूसरे के आधीन प्राणी आदि हैं, वे तृप्त होते हैं ३, ५। (यः ह वै एवं विद्वान् अश्नाति च पिबति च, तस्य अयम् एव दक्षिणः पाणिः जुहूः, सव्यः उपभृत्, कण्ठः ध्रुवा, अन्नं हविः, प्राणाः ज्योतींषि, सदेष्टं सदाहुतं सदाशितं पायितम् अग्निहोत्रं भवति, यः एवं वेद यः च एवं विद्वान् अग्निहोत्रं जुहोति इति ब्राह्मणम्) जो ही ऐसा विद्वान् खाता और पीता है, उसका यही दाहिना हाथ जुहू [पलाश की लकड़ी का बना हुआ चन्द्राकार यज्ञपात्र], बायां हांथ उपभृत् [चक्राकार यज्ञपात्र], कण्ठ ध्रुवा [बट के पत्राकार का यज्ञपात्र] है, अन्न हवि है, प्राण ज्योति हैं, सदा अभीष्ट, सदा हवन और सदा खाया पिया अग्निहोत्र है, जो ऐसा जानता है और जो ऐसा विद्वान् अग्निहोत्र करता है, यह ब्राह्मण है ॥ १४ ॥

भावार्थः—मनुष्य खान पान के उपयोग से स्वस्थ रहकर संसार का उपकार करे ॥ १४ ॥

परस्परवशीभूतानि (अन्तरिक्षम्) मध्यलोकः (चक्षुषि) नेत्रे (द्यौः) सूर्य-प्रकाशस्थानम् (जुहूः) हु दानादानादनेषु—क्विप्। पलाशकाष्ठनिर्मितार्ध-चन्द्राकृतियज्ञपात्रभेदः (उपभृत्) उप + भृञ् भरणे—क्विप्। चक्राकारयज्ञपात्रम् (ध्रुवा) ध्रु स्थैर्ये—कः, टाप्। वटपत्राकृतियज्ञपात्रम्। (ज्योतींषि) सूर्य्यादीनि (सदा—अशितम्) नित्यभक्षितम् (पायितम्) पा पाने स्वार्थे—णिच्, क्तः। पीतम् ॥

कण्डिका १५ ॥

प्रियमेधा ह वै भरद्वाजा यज्ञविदो मन्यमानास्ते ह स्म न कश्चन[1] वेदविदमुपयन्ति, ते सर्वमविदुस्ते सहैवाविदुस्तेऽग्निहोत्रमेव न समवादयन्त तेषामेकः सकृदग्निहोत्रमजुहोत् द्विरेकस्त्रिरेकस्तेषां यः सकृदग्निहोत्रमजुहोत्तमितरावपृच्छतां कस्मै त्वं जुहोषीति एकधा वा, इदं सर्वं प्रजापतिः प्रजापतय एवाहं सायं जुहोमीति प्रजापतये प्रातरिति। तेषां यो द्विरजुहोत् तमितरावपृच्छतां काभ्यां त्वं जुहोषीति, अग्नये प्रजापतय इति सायं, सूर्य्याय प्रजापतय इति प्रातः। तेषां यस्त्रिरजुहोत्तमितरावपृच्छतां केभ्यस्त्वं जुहोषीत्यग्नये प्रजापतयेऽनुमतय इति सायं, सूर्य्याय प्रजापतये अग्नये स्विष्टकृत इति प्रातः। तेषां यो द्विरजुहोत्स आर्ध्नोत्स भूयिष्ठोऽभवत्प्रजया चेतरौ श्रिया चेतरावत्याक्रामत्तस्य ह प्रजामितरयोः प्रजे [2]सजातत्वमुपेयातां तस्माद् द्विर्होतव्यं, यजुषा चैव मनसा च यामेव ऋद्धिमार्ध्नोति तामृध्नोति य एव वेद, यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ॥ १५ ॥

कण्डिका १५ ॥ क्रियात्मक और मानसिक यज्ञ करना चाहिए ॥

(प्रियमेधाः ह वै भरद्वाजाः यज्ञविदः मन्यमानाः) भरद्वाज गोत्र वाले बुद्धि को प्रिय रखने वाले [अपने को] यज्ञवित् समझते हुये। (ते ह स्म कश्चन वेदविदं न उपयन्ति) वे किसी वेदज्ञाता के पास नहीं जाते थे। (ते सर्वम् अविदुः ते सह एव अविदुः) [वे मानते थे] वे सब जानते हैं, वे मिलकर ही जानते थे। (ते अग्निहोत्रम् एव न समवादयन्त) वे अग्निहोत्र का ही अब संवाद करने लगे। (तेषाम् एकः सकृत् अग्निहोत्रम् अजुहोत् द्विः एकः त्रिः एकः) उनमें एक एक बार [एक देवता के लिये] अग्निहोत्र करता था, दो बार [दो देवता के लिये] एक और तीन बार [तीन देवता के लिये] एक।

(तेषां यः सकृत् अग्निहोत्रम् अजुहोत् तम् इतरौ अपृच्छताम् कस्मै त्वम् एकधा वं जुहोषि इति) उनमें जो एक बार अग्निहोत्र करता था, उससे अन्य दोनों ने पूंछा—तू किस देवता के लिये एक प्रकार ही यज्ञ करता है। (इद सर्वं प्रजापतिः प्रजापतये एव अहं सायं जुहोमि इति, प्रजापतये प्रातः इति) [वह बोला] यह सब प्रजापति है, प्रजापति के लिये ही मैं सायंकाल होम करता हूँ, और प्रजापति के लिये प्रातःकाल। (तेषां यः द्विः अजुहोत् तम् इतरौ अपृच्छताम्, काभ्यां त्वं जुहोषि

१५—(प्रियमेधाः) प्रिया मेधा धारणावती बुद्धिर्येषां ते ऋषयः (भरद्वाजाः) भरद्वाजवंशीयाः (यज्ञविदः) यज्ञवेत्तारः (मन्यमानाः) जानन्तः (कश्चन) कमपि (उपयन्ति) समीपे गच्छन्ति (अविदुः) अजानन् (न) सम्प्रति—निरु० ७। ३१ (समवादयन्त) परस्परम् अकथयन्त (सकृत्) एकवारम्।

---

१. पू. सं. 'कश्चना' इति पाठः ॥ २. अत्रत्यः पाठोऽतीवभ्रष्टः, अस्माभिः संशोधितः ॥सम्पा०॥

इति) उनमें से जो दो बार होम करता था, उससे अन्य दोनों ने पूंछा—कौन दो देवताओं के लिये तू होम करता है। (अग्नये प्रजापतये इति सायं, सूर्याय प्रजापतये इति प्रातः) [वह बोला] अग्नि प्रजापति के लिये सायंकाल, [तथा] सूर्य प्रजापति के लिये प्रातःकाल [अग्नि और सूर्य एक ही देवता हैं] (तेषां यः त्रिः अजुहोत् तम् इतरौ अपृच्छताम् केभ्यः त्वं जुहोषि इति) उनमें जो तीन बार [तीन देवताओं के लिये] होम करता था, उससे अन्य दोनों ने पूंछा—किन देवताओं के लिये तू होम करता है। (अग्नये प्रजापतये अनुमतये इति सायं, सूर्याय प्रजापतये स्विष्टकृते अग्नये इति प्रातः) [वह बोला] अग्नि, प्रजापति और अनुमति [अनुकूल बुद्धि वाले] के लिये सायंकाल और सूर्य, प्रजापति और स्विष्टकृत् [उत्तम मनोरथ सिद्ध करने वाले] अग्नि के लिये प्रातःकाल [होम करता हूँ]।

(तेषां यः द्विः अजुहोत् सः आर्ध्नोत्, सः भूयिष्ठः अभवत्, प्रजया च इतरौ श्रिया च इतरौ अत्याक्रामत्) उनमें जो दो बार [दो देवता के लिये] होम करता था वह समृद्ध हुआ और बहुत अधिक हुआ और प्रजा [बाल बच्चों] के साथ अन्य दूसरों से और लक्ष्मी के साथ अन्य दूसरों से बढ़ गया। (तस्य ह प्रजाम् इतरयोः [आत्मनोः] प्रजे सजातत्वम् उपेयाताम्) उसकी प्रजा को, प्रजाओं में वे दोनों प्राप्त करें। (तस्मात् द्विः होतव्यम्) इसलिये दो बार [दो देवता के लिये] हवन करना चाहिये। (यजुषा च एव मनसा च याम् एव ऋद्धिम् आर्ध्नोति ताम् ऋध्नोति यः एवं वेद यः च एवं विद्वान् अग्निहोत्रं जुहोति इति ब्राह्मणम्) यजु [हवि आदि सामग्री के संगतिकरण] से और मन [मानसिक यज्ञ] से जिस ऋद्धि को पूजता है उसको वह बढ़ाता है जो ऐसा जानता है जो ऐसा विद्वान् अग्निहोत्र करता है यह ब्राह्मण है॥ १५॥

कण्डिका १६॥

स्वाहा वै कुतः सम्भूता, केन प्रकृता, किं वाऽस्या गोत्रं, कत्यक्षरा, कतिपदा, कति वर्णा, किम्पूर्वावसाना, क्वचित् स्थिता, किमधिष्ठाना, ब्रूहि स्वाहाया यद्दैवतं रूपञ्च। स्वाहा वै सत्यसम्भूता, ब्रह्मणा प्रकृता, लामगायनसगोत्रा, द्वे अक्षरे, एकं पदं त्रयश्च वर्णाः शुक्लः पद्मः सुवर्ण इति सर्वच्छन्दसां वेदेषु समासभूतैकोच्छ्वासा वर्णान्ते चत्वारो वेदाः शरीरे, षडङ्गान्योषधिवनस्पतयो लोमानि

एकस्मै देवाय (द्विः) द्विवारम्। द्वाभ्यां देवाभ्याम् (त्रिः) त्रिवारम्। त्रिभ्यो देवेभ्यः (एकधा) एकप्रकारेण (अनुमतये) अनुकूलबुद्धियुक्ताय (स्विष्टकृते) उत्तममनोरथसाधकाय (आर्ध्नोत्) अवर्धत (भूयिष्ठः) बहु—इष्ठन्। अतिशयेन बहुः (अत्याक्रामत्) अति+आ+अक्रामत्। अत्यगच्छत् (उपेयाताम्) उप+इण् गतौ—विधि लिङ्। उपगच्छेताम् (यजुषा) हविरादिसंगतिकरणेन। भौतिकयज्ञेन (मनसा) अन्तःकरणेन। मानसिकयज्ञेन (ऋद्धिम्) सिद्धिम्। ऐश्वर्य्यम् (आर्ध्नोति) पूजयति (ऋध्नोति) वर्धयति।

चक्षुषी सूर्य्याचन्द्रमसौ, सा स्वाहा सा स्वधा सैषा यज्ञेषु वषट्कारभूता प्रयुज्यते, तस्या अग्निर्दैवतं ब्राह्मणो रूपमिति ब्राह्मणम् ॥ १६ ॥

कण्डिका १६ ॥ स्वाहा शब्द के विषय में प्रश्नोत्तर ॥

(स्वाहा वै कुतः सम्भूता १, केन प्रकृता २, किं वै अस्याः गोत्रम् ३, कत्यक्षरा ४ कतिपदा ५, कति [1]वर्णाः ६ किंपूर्वावसाना ७, क्वचित् स्थिता ८, किमधिष्ठाना ९, ब्रूहि स्वाहायाः यद् दैवतम् १० रूपं च ११) स्वाहा [सुवाणी, आशीर्वाद, सुदान] कहां से उत्पन्न हुई १, किस करके बनाई गई २, क्या इसका गोत्र है ३, कितने अक्षर वाली है ४, कितने पाद वाली है ५, कितने वर्ण वाली है ६, कौन आदि अन्त वाली है ७, कहां ठहरी हुई है ८, कौन अधिष्ठान [आश्रय] वाली है ९, तू बता स्वाहा का जो देवता १० और रूप है ११, (स्वाहा वै सत्यसम्भूता) [उत्तर] स्वाहा सत्य से उत्पन्न है १, (ब्रह्मणा प्रकृता) ब्रह्म करके बनाई गई है २, (लामगायनसगोत्रा) लामगायन [मनोहर वेदों के गाने वाले] के साथ एक गोत्र वाली है ३, (द्वे अक्षरे) दो अक्षर हैं ४, (एकं पदम्) एक पाद है ५, (त्रयः च वर्णाः शुक्लः पद्मः सुवर्णः इति) और तीन वर्ण हैं शुक्ल [श्वेत], पद्म [कमलवर्ण] और सुवर्ण [सोना] ६, (वेदेषु सर्वच्छन्दसां समासभूता वर्णान्ते एकोच्छ्वासा) वेदों में सब छन्दों के संग्रह रूप और वर्णों के अन्त में एक श्वास वाली है ७, (चत्वारः वेदाः षट् अङ्गानि शरीरे, ओषधिवनस्पतयः लोमानि चक्षुषी सूर्याचन्द्रमसौ) चारों वेद और छह अङ्ग [शिक्षा कल्प व्याकरण निरुक्त छन्द और ज्योतिष] दो शरीर, ओषधि वनस्पति लोम और दोनों आंखें सूर्य चन्द्रमा हैं ८, (सा स्वाहा सा स्वधा सा एषा यज्ञेषु वषट्कारभूता प्रयुज्यते, तस्याः अग्निः दैवतम् ब्राह्मणः रूपम् इति ब्राह्मणम्) वह स्वाहा वह स्वधा और वही वषट्कार रूप होकर यज्ञों में प्रयुक्त की जाती है, उसका अग्नि देवता ९, और ब्राह्मण [वेदज्ञाता] रूप है १०—यह ब्राह्मण है ॥ १६ ॥

१६—(स्वाहा) सु+आङ्+ह्वेञ् आह्वाने—डा। वाङ्नाम—निघ० १। ११ स्वाहेत्येतत् सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति—निरु० ८। २० सुवाणी। आशीर्वादः। सुदानम्। (संभूता) उत्पन्ना (प्रकृता) सृष्टा (कतिपदा) कतिपादयुक्ता (किंपूर्वावसाना) किमाद्यन्ता (लामगायनसगोत्रा) रमु क्रीडायाम्—घञ्, रस्य लः, गै गाने ल्युट्। लामगायनेन रामगायनेन मनोहरवेदगायकेन समानगोत्रा (समासभूता) संग्रहभूता (एकोच्छ्वासा) एकश्वासयुक्ता। एकविरामा (वर्णान्ते) मन्त्राणां वर्णान्ते (शरीरे) शरीरद्वयम् ॥

---

१. पूर्व संस्करण में "कति वर्णाः" यह प्रश्नात्मक पाठ कण्डिका में नहीं है, किन्तु उत्तर दिया है, तथा जर्मन सं. में भी कण्डिका में है अतः हमने बढ़ाया है। उत्तरों में "किम्पूर्वावसाना" का उत्तर कण्डिका में नहीं है अतः कण्डिका का पाठ अस्त व्यस्त प्रतीत होता है। पाठान्तरों के अभाव में हम संशोधन नहीं कर सके ॥ सम्पा० ॥

कण्डिका १७ ॥

अथापि कारवो ह नाम ऋषयो अल्पस्वा आसंस्त इममेकगुमग्निष्टोम ददृशुस्तमाहरंस्तेनायजन्त ते स्वर्य्ययुः स य इच्छेत् स्वर्यामी[1]ति स एतेनैकगुनाऽग्निष्टोमेन यजेतेति ब्राह्मणम् ॥ १७ ॥

कण्डिका १७ ॥ अग्निष्टोम विषय ॥

(अथ अपि कारवः ह नाम ऋषयः अल्पस्वाः आसन्) फिर स्तुति करने वाले प्रसिद्ध ऋषि थोड़े धन वाले थे। (ते इमम् एकगुम् अग्निष्टोमं ददृशुः) उन्होंने इस एक वाणी [पाद] वाले अग्निष्टोम [स्वाहाकार] को देखा। (तम् आहरन् तेन अयजन्त, ते स्वः ययुः) वह उसे ले आये, उससे यज्ञ किया और उन्होंने स्वर्ग पाया। (स. य. इच्छेत् स्वर्यामि इति सः एतेन एकगुना अग्निष्टोमेन यजेत इति ब्राह्मणम्) जो चाहे कि मैं स्वर्ग पाने वाला होऊं वह इस एक वाणी [पाद] वाले अग्निष्टोम [स्वाहाकार] से यज्ञ करे—यह ब्राह्मण है ॥ १७ ॥

कण्डिका १८ ॥

अथातः सवनीयस्य पशोर्विभागं व्याख्यास्यामः उद्धृत्यावदानानि, हनू सजिह्वे प्रस्तोतुः, कण्ठः सकाकुदः प्रतिहर्त्तुः, श्येनं वक्ष[2] उद्गातुर्दक्षिणं पार्श्वं सांसमध्वर्य्योः, सव्यमुपगातृणां, सव्योंऽसः प्रतिप्रस्थातुर्दक्षिणा श्रोणिरथ्यास्त्री ब्रह्मणोऽवरसक्थं ब्राह्मणाच्छंसिनः, ऊरुः पोतुः, सव्या श्रोणिर्होतुरवरसक्थं मैत्रावरुणस्योरुरच्छावाकस्य, दक्षिणा दोर्नेष्टुः, सव्या सदस्यस्य, सदश्चानूकश्च गृहपतेर्जाघनी पत्न्यास्तां सा ब्राह्मणेन प्रतिग्राहयति, वनिष्टुर्हृदयं वृक्कौ चाङ्गुल्यानि दक्षिणो बाहुराग्नीध्रस्य, सव्य आत्रेयस्य, दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य, ·व्यौ पादौ गृहपत्न्या व्रतप्रदायाः, सहैवैनयोरोष्ठस्तं गृहपतिरेवानुशास्ति मणिकाश्च[3] स्कन्धास्तिस्रश्च कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा अर्द्धश्चापानश्चोन्नेतुरत ऊर्द्ध्वं चमसाध्वर्यूणां क्लोमाः शमयितुः, शिरः सुब्रह्मण्यस्य, यश्च सुत्यामाह्वयते तस्य चर्म तथा खलु षट्त्रिंशत्सम्पद्यन्ते षट्त्रिंशदवदाना गौः

१७—(कारवः) कृवापाजिमि० (उ० १ । १) करोतेः—उण्। कारुरहमस्मि कर्ता स्तोमानाम्—निरु० ६ । ६ स्तोतारः (नाम) प्रसिद्धौ (ऋषयः) सूक्ष्मदर्शिनः (अल्पस्वाः) अल्पधनाः (इमम्) पूर्वोक्तं स्वाहाकारम् (एकगुम्) गोस्त्रियोरुपसर्जनस्य (पा० १ । २ । ४८) गोशब्दस्य ह्रस्वः। गौर्वाङ्नाम—निघ० १ । ११ । एकवाचम्। एकपादयुक्तम् (आहरन्) आनीतवन्तः (स्वः) स्वर्गलोकम् (ययुः) जग्मुः । प्रापुः ।

१. पू० सं० स्वर्यायीति पाठः ॥ २. पू० सं० पक्ष इति पाठः ॥
३. पू० सं० "मणिजाः" इति पाठः ॥ सम्पा० ॥

षट्त्रिंशदक्षरा बृहती, बार्हतो वै स्वर्गो लोकः बृहत्या वै देवाः स्वर्गे लोके यजन्ते, बृहत्या स्वर्गे लोके प्रतितिष्ठन्ति, प्रतितिष्ठन्ति प्रजया पशुभिर्य एवं विभजन्ते। अथ यदतोऽन्यथाशीलिको वा पापकृतो वा हुतादो वाऽन्यजना वाऽपि मथ्नीरन्नेवमेवैषां पशुर्विमथितो भवत्यस्वर्ग्यो[1] देवता यो ह वा इमं[2] श्रुत ऋषिः पशोर्विभागं विदाञ्चकार, तामु ह गिरिजाय बाभ्रव्यायाऽन्यो मनुष्येभ्यः प्रोवाच, ततोऽयमर्वाङ् मनुष्येष्वासीदिति ब्राह्मणम् ॥ १८ ॥

कण्डिका १८ ॥ पशुरूप वेदवाणी की सूक्ष्मता का विचार ॥

(अथ अतः सवनीयस्य पशोः अवदानानि उद्धृत्य विभागं व्याख्यास्यामः) अब यहां यज्ञ योग्य पशु के खण्डों को निकाल कर विभाग की हम व्याख्या करेंगे। (सजिह्वे हनू प्रस्तोतुः) जिह्वा सहित दोनों जावड़े प्रस्तोता [ऋत्विज्] के हैं १, (सकाकुदः कण्ठः प्रतिहर्तुः) तालु सहित कण्ठ प्रतिहर्ता का है २, (श्येनं वक्षः उद्गातुः) श्येन पक्षी के आकार वाली छाती उद्गाता की है ३, (सांसं दक्षिणं पार्श्वम् अध्वर्योः) कन्धे सहित दाहिना पांजर अध्वर्यु का है ४, (सव्यम् उपगातॄणाम्) बांयां [पांजर] उपगाताओं का है ५, (सव्यः अंसः प्रतिप्रस्थातुः) बांयां कन्धा प्रतिप्रस्थाता का है ६, (दक्षिणा श्रोणिः अथ्यास्त्रो ब्रह्मणः) दाहिना कूल्हा अथ्यास्त्री [? ?] ब्रह्मा का है ७, (अवरसक्थं ब्राह्मणाच्छंसिनः) [दाहिनी] नीचे वाली पिंडली ब्राह्मणाच्छंसी की है ८, (ऊरुः पोतुः) जांघ पोता [ऋत्विज्] की है ९, (सव्या श्रोणिः होतुः) बांयां कूल्हा होता का है १०, (अवरसक्थं मैत्रावरुणस्य) [बायीं] नीचे वाली पिंडली मैत्रावरुण [प्राण और अपान वायु के जानने वाले ऋत्विज्] की है ११, (ऊरुः अच्छावाकस्य) [बायीं] जांघ अच्छावाक की है १२, (दक्षिणा दोः नेष्टुः) दाहिना भुजदण्ड नेष्टा का है १३, (सव्या सदस्यस्य) बांयां [भुजदण्ड] सदस्य का है १४, (सदं च अनूकं च गृहपतेः) पीठ का बांस [रीढ़] और मूत्र की थैली गृहपति की है १५, १६ (जाघनी पत्न्याः तां सा ब्राह्मणेन प्रतिग्राहयति) पूंछ पत्नी की है, उसको वह ब्राह्मण [ब्रह्मज्ञानी] से स्वीकार कराती है १७, (वनिष्टुः हृदयं वृक्कौ च आङ्गुल्यानि दक्षिणः बाहुः आग्नीध्रस्य) वनिष्ठु [भीतरली मल की मोटी आंत], हृदय, दो अण्डकोश, अंगुलियों के जोड़ और दाहिनी भुजा आग्नीध्र की है १८, १९, २०, २१, २२, (सव्यः आत्रेयस्य) बायीं [भुजा] आत्रेय

१८—(सवनीयस्य) यज्ञीयस्य (उद्धृत्य) उत् + हृञ् हरणे—ल्यप्। उत्क्षिप्य (अवदानानि) खण्डनानि (श्येनम्) श्येनाकारम् (वक्षः) पचिवचिभ्यां सुट् च (उ० ४। २२०) वच व्यक्तायां वाचि-असुन्, सुट् च। उरः (पार्श्वम्) स्पृशेः श्वण्शुनौ पृ च (उ० ५। २७) स्पृश संस्पर्शने—श्वण् पृ इत्यादेशः। कक्षाधोभागः (श्रोणिः) वहिश्रिश्रुयुद्रु० (उ० ४। ५१) श्रु गतौ श्रुतौ च—निः। कटेः पश्चाद्भागः। नितम्बः। (अथ्यास्त्री) ? ? (अवरसक्थम्) असिसञ्जिभ्यां क्थिन्

---

१. पू० सं० 'स्वर्गो' इति पाठः ॥ २. पू० सं० "इमां, इयम्" इति पाठः ॥ सम्पा० ॥

[सदा ज्ञानी परमेश्वर के उपासक ऋत्विज्] की है २३, (दक्षिणौ पादौ गृहपतेः व्रतप्रदस्य) दोनों दाहिने पांव गृहपति के भोजन देने वाले के हैं २४, (सव्यौ पादौ गृहपत्न्याः व्रतप्रदायाः) दोनों बायें पांव गृहपत्नी के भोजन देने वाली के हैं २५, (ओष्ठः सह एव एनयोः तं गृहपतिः एव अनुशास्ति) ओंठ मिल करके ही इन दोनों [भोजन देने वाले या देने वाली] का है, उसको गृहपति ही बांटता है २६, (मणिकाः च स्कन्धाः तिस्रः कीकसाः च ग्रावस्तुतः) मणिका [अर्थात् मणि समान मांसखण्ड] और स्कन्धों के अवयव और तीन कीकसायें [हंसली की हड्डियां] ग्रावस्तोता [शास्त्र जनाने वालों की स्तुति करने वाले] के हैं २७, २८, २६, (तिस्रः च एव कीकसाः अर्धं च अपानः च उन्नेतुः) तीनों ही कीकसायें और डेढ़ अपान [गुह्यस्थान उपस्थेन्द्रिय] उन्नेता के हैं ३०, ३१ ½, (अतः ऊर्ध्वं चमसा अध्वर्य्यूणाम्) उससे ऊपर वाला [आधा अपान] और चमसा [अङ्गविशेष] सब अध्वर्य्यु का है [३१ + ½] ३२, ३३, (क्लोमाः शमयितुः) क्लोम [फेफड़ों के अवयव] शमयिता [शान्तिकर्ता] के हैं ३४ (शिरः सुब्रह्मण्यस्य) शिर सुब्रह्मण्य का है ३५, (यः च सुत्याम् आह्वयते तस्य चर्म) और जो [ऋत्विज्] सुत्या [सोम निचोड़ने की क्रिया] को बुलाता है उसका चर्म है ३६ । (तथा खलु षट्त्रिंशत् सम्पद्यन्ते) इस प्रकार से ही छत्तीस [भाग] बनते हैं । (षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती) छत्तीस खण्ड वाली गौ है [और गौ के समान] छत्तीस अक्षर वाला बृहती छन्द [अर्थात् समस्त वेदवाणी] है । (बार्हतः वै स्वर्गः लोकः) बृहती [वेदवाणी] वाला ही स्वर्गलोक है । (बृहत्या वै देवाः स्वर्गे लोके यजन्ते) बृहती [वेदवाणी]

(उ० ३ । १५४) षञ्ज संगे—क्थिन् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (पा० ५ । ४ । ११३) समासान्तः षच् प्रत्ययः । तत्पुरुषेऽपि बाहुलकात् । दक्षिणजंघाधोभागः (मैत्रावरुणस्य) प्राणापानयोर्वेत्तुः । ऋत्विग्विशेषस्य (अच्छावाकस्य) वच परिभाषणे –घञ् । ऋत्विग्विशेषस्य (दोः) भुजदण्डः (सदम्) पृष्ठवंशः (अनूकम्) मूत्रवस्तिः (जाघनी) जघन—अण्, ङीप् । पुच्छम् । लाङ्गूलम् (प्रतिग्राहयतिं) स्वीकारयति (वनिष्टुः[1]) वन सम्भक्तौ—इष्टुप् । वनिष्ठुः । स्थूलान्तरम् (वृक्कौ) सृवृभूशुषिमुषिभ्यः कक् (उ० ३ । ४१) वृक आदाने–कक् । अण्डकोशौ (आत्रेयस्य) गो० पू० २ । १७ । सदाज्ञानवतः परमेश्वरस्य सेवकस्य ऋत्विग्विशेषस्य (व्रतप्रदस्य) भोजनदायिनः (व्रतप्रदायाः) भोजनदात्र्याः (अनुशास्ति विभज्य ददाति (मणिकाः) मणिसदृशमांसखण्डाः (ग्रावस्तुतः) अन्येभ्योऽपि दृश्यन्ते (पा ३ । २ । ७५) ग्रह उपादाने, गॄ शब्दे, निगरणे वा—क्वनिप्, पृषोदरादिरूपम् । ष्टुञ् स्तुतौ—क्विप् । ग्रावाणां शास्त्रविज्ञापकानां स्तोतुः (अपानः) गुह्यस्थानम् । उपस्थेन्द्रियम् (कीकसाः) अत्यविचमि० (उ० ३ । ११७) कक लौल्ये—असच्, धातोः कीकादेशः । जत्रुवक्षोगतास्थीनि (चमसा)

---

१. यहाँ वनिष्ठुः या वनिष्टुः पाठ भ्रष्ट है तदनुसार व्युत्पत्ति भी व्यर्थ है । वस्तुतः ऋतन्यञ्जि० (उ० ४ । २) से वन धातु से इष्णुच् होकर वनतीति वनिष्णुः = अपानोपरिस्थानम् सिद्ध होगा ॥ सम्पा० ॥

के द्वारा देवता [विद्वान् लोग] स्वर्गलोक में पूजे जाते हैं । (बृहत्या स्वर्गे लोके प्रतितिष्ठन्ति, प्रजया पशुभिः प्रतितिष्ठन्ति ये एवं विभजन्ते) बृहती [वेदवाणी] के द्वारा स्वर्गलोक में वे ठहरते हैं और प्रजा के साथ और पशुओं के साथ प्रतिष्ठा पाते हैं जो इस प्रकार बांट करते हैं । (अथ यत् अतः अन्यथाशीलिकः वा पापकृतः वा हुतादः वा अन्यजनाः वा अपि मथ्नीरन् एवम् एव एषां पशुः विमथितः अस्वर्ग्यः भवति) फिर जो इससे विरुद्ध शील वाले, अथवा पाप करने वाले, अथवा हवि खाने वाले, अथवा दूसरे मनुष्य ही मथैं [सूक्ष्म विचार करैं], इस प्रकार से इन सबका पशु [पशुरूप वेदज्ञान] विरुद्ध मथा हुआ और अस्वर्ग्य [नरक समान] होता है । (देवता यः ह वै श्रुतः ऋषिः पशोः इमं विभागं विदाञ्चकार, ताम् उ ह बाभ्रव्याय गिरिजाय, अन्यः मनुष्येभ्यः प्रोवाच, ततः अयम् अर्वाङ् मनुष्येषु आसीत् इति ब्राह्मणम्) उस देवता [विद्वान्] ने जिस श्रुत [वेदशास्त्र जानने वाले] ऋषि ने पशु के इस विभाग को जाना था, उस [विभाग] को बभ्रु [पालनकर्ता] के सन्तान गिरिज [ऋषि] को [बताया] और दूसरे [गिरिज ऋषि] ने मनुष्यों को बताया, उससे यह [विभाग] अर्वाचीन मनुष्यों में हुआ है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १८ ॥

कण्डिका ९ ॥ प्रायणीय अतिरात्रादि पन्द्रह प्रकार के यज्ञ और संवत्सर ॥

(अहोरात्राभ्यां वै देवाः प्रायणीयम् अतिरात्रं निरमिमत) दिन और रात से ही विद्वानों ने प्रायणीय [पाने योग्य] अतिरात्र [रात्रि में पूरा होने वाले यज्ञ] को बनाया । १ । (अर्धमासेभ्यः चतुर्विंशम् अहः) आधे महीनों से चतुर्विंशमहः [चौबीस अवयव वाले दिन अर्थात् यज्ञ] को । २ । (ब्रह्मणः अभिप्लवम्) ब्रह्मा से अभिप्लव [उछल जाना, यज्ञ] को । ३ । (क्षत्रात् पृष्ठ्यम्) क्षत्रिय से पृष्ठ्य [सेचन यज्ञ] को । ४ । (अग्नेः अभिजितम्) अग्नि [पराक्रम] से अभिजित् [विजय यज्ञ] को । ५ । (अद्भ्यः स्वरसामानः) जल से स्वरसामों [स्वर सहित साम वाले यज्ञों] को । ६ । (सूर्यात् विषुवन्तम्) सूर्य से विषुवत् [तुल्य रात्रि दिन के काल, अर्थात् ग्रीष्म विषुवत् और हेमन्त विषुवत् वाले यज्ञ] को । ७ । (आवृताः स्वरसामानः उक्ताः) बार बार आने वाले स्वरसाम यज्ञ कहे गये । (इन्द्रात् विश्वजितम्) इन्द्र [ऐश्वर्यवान्] से विश्वजित् [दिग्विजय यज्ञ] को । ८ । (पृष्ठ्याभिप्लवौ उक्तौ) पृष्ठ्य और अभिप्लव यज्ञ कहे गये । (मित्रावरुणाभ्यां गवायुषी) मित्र और वरुण [प्राण और अपान] से गवायुषी [गौ विद्या वा पृथिवी और आयु अर्थात् जीवन दो यज्ञों] को । ९ । (विश्वेभ्यः देवेभ्यः दाशरात्रम्) विश्वे देवाओं [सब दिव्य गुणों] से दशरात्र [दशरात्रि यज्ञ] को । १० । (दिग्भ्यः दशरात्रिकं पृष्ठ्यं षडहम्) दिशाओं से दशरात्रिक पृष्ठ्य षडह को । ११ । (एभ्यः लोकेभ्यः छन्दोमत् त्र्यहम्) इन लोकों से छन्दोमत् त्र्यह [छन्दयुक्त तीन दिन वाले यज्ञ] को । १२ । (संवत्सरात् दशम् अहः) संवत्सर [वर्ष] से दशम अहः [दसवें दिन वाले यज्ञ] को । १३ । (प्रजापतेः महाव्रतम्) प्रजापति [पुरुष] से महाव्रत [उत्तम नियम] को । १४ । (स्वर्गात् लोकात् उदयनीयम्

९—(अतिरात्रम्) अतिक्रान्तो रात्रिम्, अच् समासान्तः । यज्ञविशेषम् (क्षत्रात्) क्षत्रियात् (पृष्ठ्यम्) तिथपृष्ठगूथ० (उ० २ । १२) पृषु सेचने—थक् । पृष्ठादुपसङ्ख्यानम् (वा० पा० ४ । २ । ४२) पृष्ठ—यत् । सेचनम् । (स्वरसामानः) आर्षी प्रथमा द्वितीयार्थे । स्वरसाम्नः । स्वरसहितसामवतो यज्ञान् (विषुवन्तम्) तुल्यरात्रिदिनकालवन्तं यज्ञम् (आवृत्ताः) अभ्यस्ताः (मित्रावरुणाभ्याम्) प्राणापानाभ्याम् (गवायुषी) गौश्च आयुश्च । यज्ञविशेषम्

१. यहाँ देखें १९० पृ० की टिप्पणी ॥ सम्पा० ॥

अतिरात्रम्) स्वर्ग लोक से उदयनीय अतिरात्र [उत्तमता से पाने योग्य रात्रि में पूरे होने वाले यज्ञ] को [बनाया] । १५ । (तत् वै एतत् संवत्सरस्य जन्म) सो यही संवत्सर यज्ञ का जन्म है । (यः एवम् एतत् संवत्सरस्य जन्म वेद सः संवत्सरेण सात्मा सलोकः भूत्वा देवम् अप्येति इति ब्राह्मणम्) जो इस प्रकार संवत्सर के जन्म को जानता है, वह संवत्सर से समान आत्मा वाला और सामान लोक वाला होकर उत्तम गुण पाता है—यह ब्राह्मण [ब्राह्मज्ञान] है ॥ ६ ॥

भावार्थः—जो मनुष्य संवत्सर [काल] यज्ञ के विविध अङ्गों को जानकर उनका ठीक प्रयोग करता है, वह संवत्सर [काल] के समान विजयी होता है ॥ ६ ॥

विशेषः—इस कण्डिका संशोधन के विषय में क० ८२ देखो ॥

कण्डिका १० ॥

अथ यत् प्रायणीयमतिरात्रमुपयन्त्यहोरात्रावेव तद्देवौ देवते यजतोऽहोरात्रौ देवौ देवते भवतोऽहोरात्रयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १ । अथ यच्चतुर्विंशमहरुपयन्त्यर्द्धमासानेव तद्देवां देवतां यजन्तेऽर्द्धमासा देवा देवता भवन्त्यर्द्धमासानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । २ । अथ यदभिप्लवमुपयन्ति ब्रह्माणमेव तत् देवं देवतां यजन्ते ब्रह्मा देवो देवता भवति ब्रह्मणो देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ३ । अथ यत् पृष्ठ्यमुपयन्ति क्षत्रमेव तत् देवं देवतां यजन्ते क्षत्रं देवो देवता भवति क्षत्रस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ४ । अथ यदभिजितमुपयन्त्यग्निमेव तत् देवं देवतां यजन्तेऽग्निर्देवो देवता भवत्यग्नेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ५ । अथ यत् स्वरसाम्न उपयन्त्यप एव तत् देवीर्देवता यजन्ते आपो देव्यो देवता भवन्त्यपां देवीनां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ६ । अथ यद्विषुवन्तमुपयन्ति सूर्य्यमेव तत् देवं देवतां यजन्ते सूर्य्यो देवो देवता भवति सूर्य्यस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ७ । उक्ता आवृताः स्वरसामानः । अथ यद्विश्वजितमुपयन्तीन्द्रमेव तत् देवं देवतां यजन्ते इन्द्रो देवो देवता भवतीन्द्रस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ८ । उक्तौ पृष्ठ्याभिप्लवौ । अथ यद् गवायुषी उपयन्ति मित्रावरुणावेव तत् देवौ देवते यजतो मित्रावरुणौ देवौ देवते भवतो मित्रावरुणयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ९ । अथ यद् दशरात्रमुपयन्ति विश्वानेव तद् देवान् देवतां यजन्ते विश्वेदेवा देवता भवन्ति विश्वेषां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १० । अथ यद् दाशरात्रिकं पृष्ठ्यं षडहमुपयन्ति दिश एव तत् देवीर्देवता यजन्ते दिशो देव्यो देवता भवन्ति दिशां देवीनां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । ११ । अथ यच्छन्दोमत्र्यहमुपयन्तीमानेव तल्लोकां देवान् देवतां यजन्त इमे लोका देवा

(संवत्सरात्) सम्पूर्वाच्चित् (उ० ३ । ७२) सम् + वस निवासे—सरन् चित् । संवत्सरः संवसन्तेऽस्मिन् भूतानि - निरु० ४ । २७ । द्वादशमासात्मकात् कालात् । समयात् ॥

देवता भवन्ति एषां लोकानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १२ । अथ यद् दशममहरुपयन्ति संवत्सरमेव तद् देवं देवतां यजन्ते संवत्सरो देवो देवता भवति संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १३ । अथ यन्महाव्रतमुपयन्ति प्रजापतिमेव तद् देवं देवतां यजन्ते प्रजापतिर्देवो देवता भवति प्रजापतेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १४ । अथ यदुदयनीयमतिरात्रमुपयन्ति स्वर्गमेव तल्लोकं देवं देवतां यजन्ते स्वर्गो लोको देवो देवता भवति स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । १५ । तद् वा एतत्संवत्सरस्य जन्म, स य एवमेतत्संवत्सरस्य जन्म वेदाप्स्वैतत्संवत्सरं स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद संवत्सरेण सात्मा सलोको भूत्वा देवाँ अप्येतीति ब्राह्मणम् ॥ १० ॥

कण्डिका १० ॥ प्रायणीय अतिरात्र आदि पन्द्रह प्रकार के यज्ञ और उनके फल और संवत्सर का जन्म ॥

(अथ यत् प्रायणीयम् अतिरात्रम् उपयन्ति तत् अहोरात्रौ एव देवौ देवते यजतः अहोरात्री देवौ देवते भवतः अहोरात्रयो। देवयोः सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब प्रायणीय अतिरात्र [यज्ञ क० ६] को स्वीकार करते हैं तब दिन और रात ही दोनों देव देवता पूजे जाते हैं, दिन और रात दोनों देव देवता [मुख्य विषय] होते हैं, दिन और रात दोनों देवों के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १ । (अथ यत् चतुर्विशम् अहः उपयन्ति तत् अर्धमासान् एव देवान् देवतां यजन्ते, अर्द्धमासाः देवाः देवताः भवन्ति, अर्द्धमासानां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब चतुर्विंश अहः [यज्ञ] को स्वीकार करते हैं, तब आधे-आधे महीनों देवों देवता को ही पूजते हैं, आधे-आधे महीने देव देवता होते हैं, आधे-आधे महीनों देवों के सहयोग और सहवास वे पाते हैं जो इसको स्वीकार करते हैं । २ । (अथ यत् अभिप्लवम् उपयन्ति तत् ब्रह्माणम् एव देवं देवतां यजन्ते, ब्रह्मा देवः देवता भवति ब्रह्मणः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अभिप्लव को स्वीकार करते हैं, तब ब्रह्मा ही देव देवता को पूजते हैं, ब्रह्मा देव देवता होता है, ब्रह्मा देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ३ । (अथ यत् पृष्ठचम् उपयन्ति तत् क्षत्रम् एव देवं देवतां यजन्ते क्षत्रं देवः देवता भवति, क्षत्रस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब पृष्ठच यज्ञ को स्वीकार करते हैं, तब क्षत्रिय ही देव देवता को पूजते हैं, क्षत्रिय देव देवता होता है, क्षत्रिय देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ४ । (अथ यत् अभिजितम् उपयन्ति तत् अग्निम् एव देवं देवतां यजन्ते अग्निः देवः देवता भवति अग्नेः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अभिजित् यज्ञ को स्वीकार करते हैं, तब अग्नि ही देव देवता को पूजते हैं, अग्नि देव

१०—(यजतः) पूज्येते । अन्यद् व्याख्यातम् क० ८, ६ ॥

देवता होता है, अग्नि देव का सहयोग और सहवास वे पाते हैं जो इसे पूजते हैं । ५ । (अथ यत् स्वरसाम्नः उपयन्ति, तत् अपः एव देवीः देवताः यजन्ते, आपः देव्यः देवताः भवन्ति अपां देवीनां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब स्वरसाम यज्ञों को स्वीकार करते हैं, तब जल ही देव देवता को पूजते हैं, जल देव देवता होता है, जल देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ६ । (अथ यत् विषुवन्तम् उपयन्ति तत् सूर्य्यम् एव देवं देवतां यजन्ते, सूर्यः देवः देवता भवति सूर्य्यस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब विषुवत् [ग्रीष्म और शीत में तुल्य दिन रात वाले यज्ञ] को स्वीकार करते हैं तब सूर्य ही देव देवता को पूजते हैं, सूर्य देव देवता होता है, सूर्यदेव का सहयोग और सहवास वे पाते हैं, जो इसे स्वीकार करते हैं । ७ । (आवृत्ताः स्वरसामानः उक्ताः) बार बार आने वाले स्वरसाम कहे गये । (अथ यत् विश्वजितम् उपयन्ति तत् इन्द्रम् एव देवं देवतां यजन्ते, इन्द्रः देवः देवता भवति, इन्द्रस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब विश्वजित् यज्ञ को स्वीकार करते हैं तब इन्द्र [ऐश्वर्यवान्] ही देव देवता को पूजते हैं, इन्द्र देव देवता होता है, इन्द्र देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ८ । (पृष्ठ्याभिप्लवौ उक्तौ) पृष्ठ्य और अभिप्लव यज्ञ दोनों कहे गये । (अथ यत् गवायुषी उपयन्ति तत् मित्रावरुणौ एव देवौ देवते यजतः मित्रावरुणौ देवौ देवते भवतः मित्रावरुणयोः देवयोः सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब गवायुषी [गो विद्या वा पृथिवी और आयु अर्थात् जीवन वाले दो यज्ञों] को स्वीकार करते हैं, तब मित्र और वरुण [प्राण और अपान] दोनों देव देवता पूजे जाते हैं, मित्र और वरुण दोनों देव देवता होते हैं, मित्र और वरुण देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ९ । (अथ यत् दशरात्रम् उपयन्ति, तत् विश्वान् एव देवान् देवतां यजन्ते, विश्वेदेवाः देवताः भवन्ति विश्वेषां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दशरात्रि यज्ञ को स्वीकार करते हैं, तब सब ही देवों देवता को पूजते हैं सब ही देव देवता होते हैं, सब ही देवों का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । १० । (अथ यत् दाशरात्रिकं पृष्ठ्यं षडहम् उपयन्ति तत् दिशः एव देवीः देवताः यजन्ते दिशः देव्यः देवताः भवन्ति, दिशां देवीनां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दाशरात्रिक पृष्ठ्य षडह [छह दिन वाले यज्ञ] को स्वीकार करते हैं तब दिशा ही देवियों देवता को पूजते हैं दिशा देवियां देवता होती हैं, दिशा देवियों का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ११ । (अथ यत् छन्दोमत्र्यहम् उपयन्ति तत् इमान् एव लोकान् देवान् देवतां यजन्ते इमे लोकाः देवाः देवताः भवन्ति एषां लोकानां देवानां सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब छन्दोमत् त्र्यह [छन्दयुक्त तीन दिन वाले यज्ञ] को स्वीकार करते हैं, तब इन ही लोकों देवों देवता को पूजते हैं, यह लोक देव देवता होते हैं इन दिव्य लोकों का सहयोग और सहवास वे पाते हैं, जो इसे स्वीकार करते हैं । १२ । (अथ यत् दशमम् अहः उपयन्ति तत् संवत्सरम्

एव देवं देवतां यजन्ते, संवत्सरः देवः देवता भवति, संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दशम अहः [दसवें दिन वाले यज्ञ] को स्वीकार करते हैं, तब संवत्सर ही देव देवता को पूजते हैं, संवत्सर देव देवता होता है, संवत्सर देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १३। (अथ यत् महाव्रतम् उपयन्ति तत् प्रजापतिम् एव देवं देवतां यजन्ते. प्रजापतिः देवः देवता भवति, प्रजापतेः देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब महाव्रत यज्ञ को स्वीकार करते हैं तब प्रजापति ही देव देवता को पूजते हैं, प्रजापति देव देवता होता है. प्रजापति देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १४। (अथ यत् उदयनीयम् अतिरात्रम् उपयन्ति तत् स्वर्गम् एव लोकम् देवं देवतां यजन्ते. स्वर्गः लोकः देवः देवता भवति, स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब उदयनीय अतिरात्र यज्ञ को स्वीकार करते हैं तब स्वर्ग ही लोक देव देवता को पूजते हैं, स्वर्ग लोक देव देवता होता है स्वर्ग लोक देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं। १५। (तत् वै एतत् संवत्सरस्य जन्म) सो यही संवत्सर का जन्म है। (यः एवं संवत्सरस्य जन्म वेद सः एतत् संवत्सरम् आप्त्वा स्वर्गे लोके प्रतिष्ठति) जो इस प्रकार संवत्सर के इस जन्म को जानता है. वह इस संवत्सर को पाकर स्वर्ग-लोक में ठहरता है। (प्रजया पशुभिः प्रतितिष्ठति, यः एवं वेद, संवत्सरेण सात्मा सलोकः भूत्वा देवान् अप्येति इति ब्राह्मणम्) वह प्रजा [संतानादि] से और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है, और संवत्सर के साथ एक आत्मा वाला और एक लोक वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १०।

भावार्थः—यहां संवत्सर यज्ञ का विशेष वर्णन है, भावार्थ कण्डिका ६ के समान है ॥ १० ॥

विशेषः—इस कण्डिका का मिलान क० ७। ८। ६ से करो ॥

कण्डिका ११ ॥

स वा एष संवत्सरोऽधिदैवं चाध्यात्मं च प्रतिष्ठितः स य एवमेतत् संवत्सरमधिदैवं चाध्यात्मं च प्रतिष्ठितं वेद प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद स वा एष संवत्सरः ॥ ११ ॥

कण्डिका ११ ॥ संवत्सर के ज्ञान की महिमा ॥

(सः वै एषः संवत्सरः अधिदैवं च अध्यात्मं च प्रतिष्ठितः) सो यही संवत्सर अधिदैव [मुख्य देवता] और अध्यात्म [आत्मा के अधिकार वाला ज्ञान] होकर ठहरा है। (यः एवम् एतत् संवत्सरम् अधिदैवं च अध्यात्मं च प्रतिष्ठितं वेद. सः प्रतिष्ठति) जो पुरुष इस प्रकार इस संवत्सर को अधिदैव और अध्यात्म ठहरा हुआ

जानता है वह ठहरता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) वह प्रजा के साथ और पशुओं के साथ प्रतिष्ठा पाता है जो ऐसा जानता है । (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ ११ ॥

भावार्थः—मनुष्य संवत्सर [यथावत् बसाने वाले काल] को बाहिर और भीतर से ठीक ठीक काम में लाने से संसार में यश पाता है ॥ ११ ॥

कण्डिका १२ ॥

स वा एष संवत्सरो बृहतीमभिसम्पन्नो द्वावक्षरावह्नां षडहो द्वौ पृष्ठयाभिप्लवौ गवायुषी दशरात्रस्तथा खलु षट्त्रिंशत् सम्पद्यन्ते षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती बार्हतो वै स्वर्गो लोको बृहत्या वै देवाः स्वर्गे लोके यजन्ते बृहत्या स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद स वा एष संवत्सरः ॥ १२ ॥

कण्डिका १२ ॥ संवत्सर की बृहती छन्द से उपमा और महिमा ॥

(सः वै एषः संवत्सरः बृहतीम् अभिसंपन्नः) सो यही संवत्सर बृहती [छन्द] से यथावत् मिला हुआ है—(द्वौ अक्षरौ अह्नां षडहः द्वौ पृष्ठयाभिप्लवौ गवायुषी दशरात्रः) दो अक्षर (अह्नाम्) बहुत दिन वाले यज्ञों में (षडहः) छह दिन वाला यज्ञ है, दो पृष्ठय और अभिप्लव तथा गवायुषी [गो और आयु यज्ञ] (दशरात्रः) दश रात्रि वाला यज्ञ है । (तथा खलु षट्त्रिंशत् सम्पद्यन्ते) इस प्रकार से ही वे छत्तीस [? ?] बनते हैं [षडह, पृष्ठय और अभिप्लव तथा गवायुषी और दशरात्र वा दाशरात्रिक पदों के लिये देखो कण्डिका ६, १०] । (षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती) छत्तीस खण्ड वाली गौ है [और गौ के समान] छत्तीस अक्षर वाला बृहती छन्द [वेदवाणी] है । (बार्हतः वै स्वर्गः लोकः) बृहती [वेदवाणी] वाला ही स्वर्ग है । (बृहत्या वै देवाः स्वर्गे लोके यजन्ते) बृहती [वेदवाणी] के द्वारा देवता [विद्वान् लोग] स्वर्ग लोक में पूजे जाते हैं । (बृहत्याः स्वर्गे लोके प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) बृहती [वेदवाणी] से स्वर्ग लोक में वह ठहरता है और प्रजा के साथ और पशुओं के साथ वह प्रतिष्ठा पाता है जो ऐसा जानता है । (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ १२ ॥

भावार्थः—वेदवाणी द्वारा संवत्सर के सुप्रयोग से मनुष्य प्रतिष्ठा पावे ॥ १२ ॥

विशेषः—इस कण्डिका का मिलान करो गो० पू० ३ । १८ तथा ४ । ६, १० ॥

१२—(अभिसंपन्नः) सम्यग् युक्तः (बृहती) वाक् । वेदवाणी छन्दोभेदः (बार्हतः) बृहती—अण् । बृहत्या वेदवाण्या सम्बद्धः ॥

कण्डिका १३ ॥

स वा एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशेन महाव्रतं विषुवति महाव्रतं महाव्रत एव महाव्रतं तं ह स्मैतमेवं विद्वांसः पूर्वे त्रिमहाव्रतमुपयन्ति ते तेजस्विन आसन् सत्यवादिनः संशितव्रता य एनमद्य तथापेयुर्यथाऽऽमपात्रमुदक आसिक्ते निर्मृज्येदेवं यजमाना निर्मृज्येरन्नुपर्य्युपयन्ति तथा हास्य सत्येन तपसा व्रतेन चाभिजितमवरुद्धं भवति य एवं वेद स वा एष संवत्सरः ॥ १३ ॥

कण्डिका १३ ॥ संवत्सर और महाव्रत ॥

(सः वै एषः संवत्सरः त्रिमहाव्रतः, चतुर्विंशेन महाव्रतम्, विषुवति महाव्रतम्, महाव्रते एव महाव्रतम्) सो यही संवत्सर [यज्ञ] तीन महाव्रत वाला है, [अर्थात्] चतुर्विंश [चौबीस पक्ष वाले] के साथ महाव्रत १, विषुवान् [तुल्य दिन रात वाले काल अर्थात् मेष तुला की सङ्क्रान्ति के काल] में महाव्रत २, महाव्रत में महाव्रत ३। (तं ह एतं त्रिमहाव्रतम् एवं पूर्वे विद्वांसः उपयन्ति स्म, ते तेजस्विनः सत्यवादिनः संशितव्रताः आसन्) उस ही तीन महाव्रत वाले [संवत्सर] को इस प्रकार पहिले विद्वानों ने स्वीकार किया, वे तेजस्वी, सत्यवादी, व्रत पूरे करने वाले हुये। (ये एनं अद्य तथा अपेयुः यथा आमपात्रम् उदके आसिक्ते निर्मृज्येत् एवं यजमानाः निमृज्येरन्) जो [याजक] इस [संवत्सर] को आज इस प्रकार नष्ट कर देवें, जैसे कच्चा [मिट्टी का] पात्र जल भर जाने पर घुल जावे, वैसे ही [उन मूर्ख याजकों द्वारा] यजमान घुल जावें। (उपरि उपयन्ति तथा ह सत्येन तपसा व्रतेन च अस्य अभिजितम् अवरुद्धं भवति, यः एवं वेद) वे [उस को] ऊपर [वर्तमान होता हुआ] स्वीकार करते हैं और भी सत्यभाषण से, [ब्रह्मचर्य्यादि] तप से, और अग्निहोत्र आदि व्रत से उस का अभिजित् [सब ओर से जीतने वाला यज्ञ] प्राप्त हो जाता है जो इस प्रकार जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर [यज्ञ] है ॥ १३ ॥

भावार्थः—विद्वान् कर्मकुशल याजकों द्वारा ही यजमानों का यज्ञ सिद्ध होता है ॥१३॥

कण्डिका १४ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यं भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठ्यो निर्मितः, पृष्ठ्यादभिजित्, अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वरसामानः, स्वरसामभ्यो विश्वजित्, विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्या-

---

१३–(त्रिमहाव्रतः) त्रीणि महाव्रतानि यस्मिन् स तथाभूतः (उपयन्ति स्म) स्वीकृतवन्तः (संशितव्रताः) सम्यक्सम्पादितव्रताः (अद्य) अस्मिन् दिने। इदानीम् (अपेयुः) अप—इयुः। नाशयेयुः (आमपात्रम्) अपक्वपात्रम् (आसिक्ते) समन्तात् सिञ्चिते (निर्मृज्येत्) शोधनेन नश्येत् (निर्मृज्येरन्) नश्येयुः (अवरुद्धम्) लब्धम् ॥

भिप्लवाभ्यां गवायुषी गवायुर्भ्यां दशरात्रः, दशरात्रात्[1] महाव्रतं 'महाव्रतादुद'[1]- यनीयोऽतिरात्र उदयनीयोऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै य एवं वेद स वा एष संवत्सरः ॥ १४ ॥

कण्डिका १४ ॥ संवत्सर और महाव्रत यज्ञ के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात्, कथम् अनाकूत्यं भवति इति) फिर जब चतुर्विंश अहः [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रम् विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं, उस से [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे। (अभिप्लवात् पृष्ठचः निर्मितः) [क्योंकि] अभिप्लव [यज्ञ] से पृष्ठय [यज्ञ] बनाया गया है १, (पृष्ठचात् अभिजित्) पृष्ठच से अभिजित् [सब ओर से जीतने वाला यज्ञ] २, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम ३, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् [ग्रीष्म और शीत के तुल्य दिन रात्रि वाले काल में यज्ञ] ४, (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम ५, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित् ६, (विश्वजितः पृष्ठचाभिप्लवौ) विश्वजित् से पृष्ठय और अभिप्लव ७, (पृष्ठचाभिप्लवाभ्यां गवायुषी) पृष्ठच और अभिप्लव से गवायुषी [कण्डिका ६] ८, (गवायुर्भ्यां दशरात्रः) दोनों गवायु [गो और आयु] से दशरात्र ६, (दशरात्रात् महाव्रतम्) दशरात्र से महाव्रत १०, (महाव्रतात् उदयनीयः अतिरात्रः) महाव्रत से उदयनीय अतिरात्र [बनाया गया है] ११। (उदयनीयः अतिरात्रः [अस्य] स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै, यः एवं वेद) उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिये, भोजन योग्य अन्न के लिये और प्रतिष्ठा के लिये होता है, जो ऐसा जानता है। (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥१४॥

विशेषः—इस कण्डिका के साथ देखो कण्डिका १७ तथा २२ ॥

कण्डिका १५ ॥

अथ यच्चतुर्विशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यं भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठचो निर्मितः, पृष्ठचादभिजित्, अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वरसामानः, स्वरसामभ्यो विश्वजित्, विश्वजितः पृष्ठचाभिप्लवौ, पृष्ठचाभिप्लवाभ्यां गवायुषी, गवायुर्भ्यां दशरात्रोऽथ ह देवेभ्यो महाव्रतं न तस्थे

१४—(उपेत्य) स्वीकृत्य (अनुपेत्य) अस्वीकृत्य (अनाकूत्यं) नञ्+आ+कू शब्दे—क्तिन् । अयोग्यसंकल्पाय ।

---

१. पू. सं. "दशरात्राय, 'उदयनीयाय', अतिरात्राय" इति पाठः ॥ सम्पा० ॥

कथमूर्द्ध्वैः स्तोमैर्विषुवन्तमुपागातां वृत्तैर्मामिति ते देवाः इह सामिवासुरुप तं यज्ञक्रतुं जानीमो य ऊर्द्ध्वस्तोमो येनैतदहरवाप्नुयामेति तत एतं द्वादशरात्रमूर्द्ध्वस्तोमं ददृशुस्तमाहरंस्तेनायजन्त तत एभ्योऽतिष्ठंस्तिष्ठति हास्मै महाव्रतं प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद स वा एष संवत्सरः ॥१५॥

कण्डिका १५ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात्, कथम् अनाकूत्यं भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं उससे [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे। (अभिप्लवात् पृष्ठ्यः निर्मितः) [क्योंकि] अभिप्लव [यज्ञ] से पृष्ठ्य [यज्ञ] बनाया गया है १, (पृष्ठ्यात् अभिजित्) पृष्ठ्य से अभिजित् २, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम ३, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् [क० १४] ४, (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम ५, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित् ६, (विश्वजितः पृष्ठ्याभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव ७, (पृष्ठ्याभिप्लवाभ्यां गवायुषी) पृष्ठ्य और अभिप्लव से गवायुषी [क० ९] ८ (गवायुर्भ्यां दशरात्रः) दोनों गवायु से दशरात्र [बनाया गया है] ९। (अथ ह देवेभ्यः महाव्रतं न तस्थे कथम् ऊर्द्ध्वैः स्तोमैः विषुवन्तम् उपागाताम्) फिर भी देवताओं के लिये महाव्रत न ठहरा, किस प्रकार ऊर्द्ध्व स्तोमों [स्तोत्र विशेषों] से विषुवान् यज्ञ को स्वीकार करे। (वृत्तैः माम् इति ते देवाः इह सामिवासुः, तं यज्ञक्रतुम् उपजानीमः यः ऊर्द्ध्वस्तोमः, येन एतत् अहः अवाप्नुयाम इति) सच्चरित्रों से मुझको, तेरे लिये देवता [विद्वान् लोग] यहां मोक्ष विद्या में निवास करने वाले हैं, उस यज्ञ कर्म को समीप होकर हम जानें जो ऊर्द्ध्वस्तोम है और जिससे इस अह [दिन अर्थात् यज्ञ विशेष] को हम प्राप्त करें [इन ब्राह्मण वचनों से विषुवान् यज्ञ को स्वीकार करे]। (ततः एतं द्वादशरात्रम् ऊर्द्ध्वस्तोमं ददृशुः तम् आहरन् तेन अयजन्त ततः एभ्यः अतिष्ठन्) इसी से इस द्वादशरात्र उर्द्ध्वस्तोम को उन्हों [ऋषियों] ने देखा, उसे वे ले आये, उससे यज्ञ किया, उसीसे उन [देवताओं] के लिये वह [महाव्रत] ठहरा। (अस्मै ह महाव्रतं तिष्ठति प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति यः एवम् वेद) उस [पुरुष]

१५—(न) निषेधे (तस्थे) तस्थौ (उपागाताम्) उप+आ+गाङ् गतौ—लोट्। उपागच्छेत्। उपेयात् (वृत्तैः) वृतु वर्तने—क्तः। सच्चरित्रैः (सामिवासुः) कृवापाजिमि० (उ० १। १) साम्नि+वस निवासे—उण्, नकारलोपः। साम्निवासकः। मोक्षज्ञाने निवासशीलः (उप) उपेत्य (यज्ञक्रतुम्) यज्ञकर्म। यज्ञप्रज्ञाम् (अतिष्ठन्) अतिष्ठत् ॥

के लिये ही महाव्रत ठहरता है, महाव्रत अच्छे प्रकार ठहरता है, और वह प्रजा और पशुओं से प्रतिष्ठा पाता है जो ऐसा जानता है। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १५ ॥

कण्डिका १६ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूर्त्यं भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयात् तदाहुः कति संवत्सरस्य पराञ्च्यहानि भवन्ति, कत्यर्वाञ्चि, तद्यानि सकृत् सकृदुपयन्ति तानि पराञ्चि, अथ यानि पुनः पुनरुपयन्ति तान्यर्वाञ्चि, इत्येवैनान्युपासीरन् षडहयो-र्ह्यावृत्तिमन्वावर्त्तन्ते य एवं वेद स वा एष संवत्सर ॥ १६ ॥

कण्डिका १६ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात् कथम् अनाकूर्त्यं भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं, उससे [वह अयोग्य संकल्प के लिये होता है]. ऐसा कहे। (तत् आहुः संवत्सरस्य कति पराञ्चि अहानि भवन्ति, कति अर्वाञ्चि) यह कहते हैं कि संवत्सर के कितने पराञ्चि [प्राचीन वा पुराने] दिन होते हैं और कितने अर्वाञ्चि [अर्वाचीन वा नूतन]। (तत् यानि सकृत् सकृत् उपयन्ति तानि पराञ्चि, अथ यानि पुनः पुनः उपयन्ति तानि अर्वाञ्चि इति एव एनानि उपासीरन्) [उत्तर] सो जिन को एक एक बार स्वीकार करते हैं वे पराञ्चि हैं, फिर जिन को बार २ स्वीकार करते हैं वे अर्वाञ्चि हैं, मनुष्य इनकी ही उपासना करें। (षडहयोः हि आवृत्तिम् अन्वावर्तन्ते यः एवं वेद) वह दोनों षड् अह [छह दिन वाले यज्ञों] की आवृत्ति निरन्तर करता रहे जो ऐसा जानता है, (सः वै एषः संवत्सरः) सो यही संवत्सर है ॥ १६ ॥

कण्डिका १७ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूर्त्यं भवतीति यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवं पुरस्तात्

१६—(कति) संख्याभेदपरिज्ञानाय प्रश्नः (पराञ्चि) पर+अञ्चु गति-पूजनयोः—क्विन्। परकालगतानि। पराचीनानि (अर्वाञ्चि) अवर+अञ्चु गतिपूजनयोः—क्विन्। पृषोदरादित्वात् अवरस्य 'अर्व' आदेशः। पश्चात्काले भवानि। अर्वाचीनानि (सकृत्) एकवारम् (आवृत्तिम्) पुनः पुनरभ्यासम् (अन्वावर्तन्ते) अनुगत्य प्रवर्तन्ते ॥

विषुवतः पूर्वमुपयन्ति पृष्ठ्यमुपरिष्टात् पिता वा अभिप्लवः पुत्रः पृष्ठ्यस्तस्मात्पूर्वे वयसि पुत्राः पितरमुपजीवन्ति पृष्ठ्यं पश्चाद्विषुवतः पूर्वमुपयन्ति अभिप्लवमुपरिष्टात् पिता वा अभिप्लवः पुत्रः पृष्ठ्यस्तस्मादुत्तमे वयसि पुत्रान् पितोपजीवति य एवं वेद तदप्येतदृचोक्तम् । शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरित्युप ह वा एनं पूर्वे वयसि पुत्राः पितरमुपजीवन्त्युपोतमे वयसि पुत्रान् पितोपजीवति य एवं वेद स वा एष संवत्सरः ।। १७ ।।

कण्डिका १७ ।। संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ।।

(अथ यत् चतुर्विंशम् अहः उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात् कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अहः [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् [तुल्य दिन रात वाले काल के यज्ञ] को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य संकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रं विषुवतः पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं उस से [वह अयोग्य संकल्प के लिये होता है] ऐसा कहे । (पूर्वं अभिप्लवं विषुवतः पुरस्तात् उपयन्ति पृष्ठ्यम् उपरिष्टात् पिता वै अभिप्लवः पुत्रः पृष्ठ्यः, तस्मात् पूर्वे वयसि पुत्राः पितरम् उपजीवन्ति) पहिले अभिप्लव को विषुवान् से पहिले स्वीकार करते हैं और पृष्ठ्य [यज्ञ] को पीछे, पिता ही अभिप्लव और पुत्र पृष्ठ्य है, इसलिये पहिली अवस्था में पुत्र पिता के सहारे जीते हैं, (पूर्वं पृष्ठ्यं विषुवतः पश्चात् उपयन्ति अभिप्लवम् उपरिष्टात् पिता वै अभिप्लवः पुत्रः पृष्ठ्यः, तस्मात् उत्तमे वयसि पिता पुत्रान् उपजीवति यः एवं वेद) पहिले पृष्ठ्य को विषुवान् से पीछे स्वीकार करते हैं और अभिप्लव को पीछे, पिता अभिप्लव और पुत्र पृष्ठ्य है, इसलिये पिछली अवस्था में पिता पुत्रों के सहारे जीता है जो ऐसा जानता है ।

(तत् अपि एतत् ऋचा उक्तम्) यही इस ऋचा करके कहा गया है। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः, इति—ऋग्वेद १ । ८९ । ९ ।। (अन्ति) हे जीवधारी

१७—(वयसि) अज गतिक्षेपणयोः—असुन्, वीभावः । अवस्थायाम् (उपजीवन्ति) आश्रित्य जीवन्ति (इत्) निश्चयेन (नु) शीघ्रम् एव (शरदः) शरदृतूपलक्षितान् (अन्ति) पदिप्रथिभ्यां नित् (उ० ४ । १८३) अन प्राणने—तिः, नित् । सुपां सुलुक्० (पा० ७ । १ । ३९) जसो लुक् । हे अन्तयः । जीविताः (देवाः) विद्वांसः (नः) अस्मभ्यम् (चक्र) यूयं कृतवन्तः वा कुरुत, लोडर्थे—लिट् (जरसम्) वृद्धावस्थाम् (पितरः) पितृवद्रक्षितारः (नः) अस्माकम् (मध्या) सप्तम्या डादेशः । मध्ये (मा रीरिषत) रिष हिंसायाम्-णिच् । मा हिंसीष्ट (आयुर्गन्तोः) जीवनस्य मार्गान् ।।

---

१. पू. सं० 'उपजीवन्ति' इति पाठः ।। सम्पा० ।।

(देवाः) विद्वानो ! (यत्र) जहां पर (नः) हमारे लिए (शतं शरदः) सौ वर्ष तक (इत्) निश्चय करके (नु) ही (तनूनाम्) अपने शरीरों के (जरसम्) बुढ़ापे को (चक्र) तुम व्यतीत करो, (यत्र) जहां पर (पुत्रासः) पुत्र लोग (पितरः) पिता [वयोवृद्ध और विद्यावृद्ध पिता के समान] (भवन्ति) होवें, [वहां] (नः) हमारे (आयुः) जीवन और (गन्तोः[1]) गतियों को (मध्या) बीच में (मा रीरिषत) मत नष्ट करो ॥

(पूर्वे उपवयसि पुत्राः ह वै एनं पितरम् उपजीवन्ति, उपोत्तमे वयसि पिता पुत्रान् उपजीवति यः एवं वेद) पहिली अवस्था में पुत्र निश्चय करके इस पिता के ही सहारे जीते हैं और पिछली अवस्था [संन्यास वा बुढ़ापे] में पिता पुत्रों के सहारे जीता है जो ऐसा जानता है । (सः वै एषः संवत्सरः) वही यह संवत्सर [यज्ञ] है ॥१७॥

भावार्थः—जैसे विषुवान् यज्ञ अभिप्लव और पृष्ठ्य यज्ञ से मिला होता है, वैसे ही पिता और पुत्र प्रीतिपूर्वक परस्पर रक्षा करें ॥ १७ ॥

कण्डिका १८ ॥

अथ हैष महासुपर्णस्तस्य यान् पुरस्ताद्विषुवतः षण्मासानुपयन्ति स दक्षिणः पक्षोऽथ यानावृत्तानुपरिष्टात् षडुपयन्ति स उत्तरः पक्षः आत्मा वै संवत्सरस्य विषुवानङ्गानि पक्षौ यत्र वा आत्मा तत्पक्षौ यत्र वै पक्षौ तदात्मा न वा आत्मा पक्षावतिरिच्यते[2] नो पक्षावात्मानमतिरिच्येते इत्येवमु हैव तदपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ १८ ॥

कण्डिका १८ ॥ संवत्सर बड़ा गरुड़, विषुवान् आत्मा और दोनों अर्धसंवत्सर दो पक्ष ॥

(अथ ह एषः महासुपर्णः,) फिर यही [संवत्सर] बड़ा गरुड़ है । (विषुवतः पुरस्तात् तस्य यान् षट् मासान् उपयन्ति सः दक्षिणः पक्षः, अथ उपरिष्टात् यान् आवृत्तान् षट् उपयन्ति सः उत्तरः पक्षः) विषुवान् से पहिले उस [संवत्सर] के जिन छः महीनों को स्वीकार करते हैं वह दक्षिण पक्ष [दाहिना पंख] है, फिर [विषुवान् से] पीछे जिन लौटते हुये छह [महीनों] को स्वीकार करते हैं वह उत्तर पक्ष [बायां पंख] है । (संवत्सरस्य वै आत्मा विषुवान् अङ्गानि पक्षौ) संवत्सर का ही आत्मा [देह] विषुवान् और अङ्ग दोनों पंख हैं । (यत्र वै आत्मा तत् पक्षौ, यत्र वै पक्षौ तत् आत्मा)

१८—(महासुपर्णः) महागरुडः । पक्षिराजः (आवृत्तान्) अभ्यस्तान् पुनः पुनर्वर्त्तमानान् (आत्मा) देहः । जीवः (तत्) तत्र (अतिरिच्यते) अतिरिणक्ति

१. पू. सं० "गतीः" इति पाठः ॥ सम्पा० ॥

२. कर्मणि प्रयोगोऽयम्, तदनुसारेण विभक्तिविपरिणामः भवितव्यः । मूलपाठोऽत्र भ्रष्टः प्रतीयते ॥ सम्पा० ॥

जहाँ पर ही आत्मा [देह] है वहाँ दोनों पंख हैं, जहाँ पर ही दोनों पंख हैं वहाँ आत्मा है। (आत्मा वै पक्षौ न अतिरिच्यते नो पक्षौ आत्मानम् अतिरिच्येते इति) आत्मा निश्चय करके दोनों पक्षों से भिन्न नहीं है और न दोनों पक्ष आत्मा से भिन्न हैं। (एवम् उ ह एव अपरेषाम् अह्नां तत् स्विदितं परेषाम् इति) इसी प्रकार से ही [विपुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है, जो उधर वालों का है। (परेषां च अपरेषां च एव इति ब्रूयात्) और [जो विपुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है–ऐसा कहना चाहिये। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १८ ॥

भावार्थः—संवत्सर में विपुवान् [तुल्य रात्रि दिन का काल] दो बार एक ग्रीष्म में और एक शीत में होता है और दोनों का काल परिणाम और प्रभाव तुल्य है, ऐसा ज्योतिष से जानना चाहिये ॥ १८ ॥

कण्डिका १९ ॥

तदाहुर्यद् द्वादश मासाः संवत्सरोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयादात्मा, वै संवत्सरस्य विषुवानङ्गानि मासा यत्र वा आत्मा तदङ्गानि यत्राङ्गानि तदात्मा, न वा आत्माऽङ्गान्यतिरिच्येते नोऽङ्गान्यात्मानमतिरिच्यन्त इत्येवमु हैव तदपरेषां स्विदितमह्नां परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ १९ ॥

कण्डिका १९ ॥ विपुवान् से संवत्सर के बारह महीने ॥

(तत् आहुः यत् द्वादश मासाः संवत्सरः) यह कहते हैं कि बारह महीने संवत्सर है, (अथ ह एतत् अहः अवाप्नुयाम यत् वैषुवतम् इति) अब ही हम वह दिन प्राप्त करें जो विपुवान् वाला [दिन] है, (अपरेषाम् अह्नां स्विदितं परेषाम् इति, परेषां च अपरेषां च एव इति ब्रूयात्) [विपुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है जो उधर वालों का है, और [विपुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (संवत्सरस्य वै आत्मा विषुवान् अङ्गानि मासाः) संवत्सर का ही आत्मा [देह] विपुवान् और अङ्ग दो महीने [=बारह महीने] हैं। (यत्र वै आत्मा तत् अङ्गानि यत्र अङ्गानि तत् आत्मा) जहां पर ही आत्मा है वहां अङ्ग हैं, जहां अङ्ग हैं वहां आत्मा है। (आत्मा वै अङ्गानि न अतिरिच्येते नो अङ्गानि आत्मानम् अतिरिच्यन्ते इति) आत्मा निश्चय करके अङ्गों से भिन्न नहीं है, न अङ्ग आत्मा से भिन्न हैं। (एवम् उ ह

इत्यर्थः। भिन्नं करोति (अतिरिच्येते) अतिरिङ्क्तः इत्यर्थः। भिन्नं कुरुतः (स्विदितम्) ञिष्विदा घर्मस्रुतौ—क्तः। स्वेदः। घर्मनिस्सरणम् ॥

१९—(अवाप्नुयाम) प्राप्नुयाम (वैषुवतम्) विषुवत्—अण्। विषुवतः सम्बद्धम्। अन्यत् पूर्ववत् ॥

एव अपरेषाम् अह्नां तत् स्विदितं परेषाम् इति) इसी प्रकार से ही [विषुवान् से] इधर वाले दिनों का वह पसीना [निचोड़] है, जो इधर वालों का है। (परेषां च अपरेषां च एव इति ब्रूयात्) और [जो विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (सः वै एषः संवत्सरः) वही यह संवत्सर है ॥ १६ ॥

भावार्थः—विषुवान् अर्थात् मेष-तुला की संक्रान्ति पर तुल्य दिन रात्रि का समय वर्ष में दो बार होता है, एक ग्रीष्म में दूसरा शीत में और दोनों छह मासों में ताप और शीत तुल्य होता है, इससे संवत्सर यज्ञ चाहे किसी विषुवान् से आरम्भ किया जावे ॥१६॥

कण्डिका २० ॥

तदाहुः कथमुभयतो ज्योतिषोऽभिप्लवा अन्यतरो ज्योतिस्पृष्ठ्य इत्युभयतो ज्योतिषो वा इमे लोका अग्निनेता आदित्येनामुत इत्येष ह वा एतेषां ज्योतिर्य एनं प्रमृदीव तपति देवचक्रे ह वा एते पृष्ठ्यं प्रतिष्ठिते पाप्मानं दृंहती परिप्लवेते तद्य एवं विदुषां दीक्षितानां पापकं कीर्त्तयेदेत एवास्य तद्देवचक्रे शिरश्छन्दतो दशरात्रमुद्धिः[1] पृष्ठ्याभिप्लवौ चक्रे दशरात्रमुद्धिः पृष्ठ्याभिप्लवौ चक्रे तन्त्रं कुर्वीतेति ह स्माह वास्युस्तयो स्तोत्राणि च शस्त्राणि च सञ्चारयेद्यः सञ्चारयेत्तस्मादिमे पुरुषे प्राणा नाना सन्त एकोदयाच्छरीरमधिवसति यन्न सञ्चारयेत् प्रमायुको ह यजमानः स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा न चाग्निष्टोमा मासि सम्पद्यन्ते न वै प्राणा प्राणैर्यज्ञस्तायत एकविंशतिरुक्थ्या एकोक्थ्यः षोडश्यन्नं वा उक्थ्यं वीर्य्यं षोडशैव तया रूढ्वा स्वर्गं लोकमध्यारोहन्ति ॥ २० ॥

कण्डिका २० ॥ ज्योतिष्टोम आदि यज्ञों के विषय में प्रश्नोत्तर ॥

(तत् आहुः कथं ज्योतिषः उभयतः अभिप्लवौ, अन्यतरः ज्योतिः पृष्ठ्यः इति) यह कहते हैं कि किस प्रकार ज्योति [ज्योतिष्टोम] के दोनों ओर [आदि और अन्त में] दो अभिप्लव यज्ञ हैं, दोनों में कोई पृष्ठ्य ज्योतिष्टोम होता है। (ज्योतिषः उभयतः वै इमे लोकाः अग्निनेता आदित्येन अमुतः इति) [उत्तर] ज्योति [सूर्य] के दोनों ओर ही ये लोक अग्नि से चलाये गये सूर्य द्वारा उस [सूर्यलोक] से हैं। (एषः ह वै एतेषां ज्योतिः यः एनं प्रमृदी इव तपति) यही सूर्य इन [लोकों] के बीच में है जो [लोढ़ा से] पीसने वाले के समान इस [लोक] को तपाता है। (एते ह वै देवचक्रे पृष्ठ्यं प्रतिष्ठिते दृंहती पाप्मानं परिप्लवेते) यही दोनों देव [सूर्य और

२०—(उभयतः) उभयपार्श्वे। आद्यन्तयोः (ज्योतिषः) ज्योतिष्टोमस्य। सूर्यस्य (अग्निनेता) बहुवचनस्यैकवचनम्। अग्निर्नेता येषां ते अग्निनेतारः (अमुतः) तस्मात्। सूर्यलोकात् (प्रमृदी) प्र + मृद क्षोदे—क्विप्। इयाडियाजीकाराणामुपसंख्यानम् (वा० पा० ७ । १ । ३९) प्रथमायाः ईकारादेशः। प्रमर्दकः। प्रपेष्टा (इव) यथा (तपति) तापयति (देवचक्रे) ज्योतिश्चक्रे

---

१. पू० सं० "ऽद्धिम्" इति पाठः ॥ सम्पा० ॥

अग्नि] के चक्र पृष्ठ्य यज्ञ में स्थापित किये हुये दृढ़ होकर पाप [दोष] को चलायमान कर देते हैं । (तत् यः एवं विदुषां दीक्षितानां पापकं कीर्तयेत्, एते एव देवचक्रे तत् अस्य शिरः छन्दतः) सो जो मनुष्य इस प्रकार विद्वान् दीक्षित लोगों के पाप [दोष] बतावे, यही दोनों देवचक्र [दोनों पृष्ठ्य और अभिप्लव] तब उस [पाप] के शिर को हटा देते हैं । (दशरात्रम् उद्धिः पृष्ठ्याभिप्लवौ चक्रे, [1]दशरात्रम् उद्धिः पृष्ठ्याभिप्लवौ चक्रे) दशरात्र रथनाभि है और दोनों पृष्ठ्य अभिप्लव दो पहिये हैं, दशरात्र रथनाभि है और दोनों पृष्ठ्य अभिप्लव दो पहिये हैं [अर्थात् अवश्य हैं] । (वास्युस्तयः ह स्म आह तन्त्रं कुर्वीत इति स्तोत्राणि च शस्त्राणि च संचारयेत्) दोषनाशक [ब्रह्मा] ऐसा कहता है कि वह [यजमान] उपाय करे और स्तोत्रों और शस्त्रों [स्तुतिविधायक मन्त्रों और नियम विधायक मन्त्रों] को बोले । (यः सञ्चारयेत् तस्मात् पुरुषे इमे प्राणाः नाना सन्तः एकोदयात् शरीरम् अधिवसति) जो पुरुष [स्तोत्रों और शस्त्रों को] बोले उससे [उस] पुरुष में यह प्राण अनेक प्रकार होकर एक में उदय करने के कारण शरीर में टिकते हैं । (यत् न संचारयेत् यजमानः प्रमायुकः ह स्यात्) यदि वह [स्तोत्रों और शस्त्रों को] न बोले, यजमान मृतक ही हो जावे । (एषः ह वै प्रमायुकः यः अन्धः वा बधिरः वा न च अग्निष्टोमाः मासि सम्पद्यन्ते न वै प्राणाः प्राणैः यज्ञः तायते) वही मृतक है जो अन्धा वा बहिरा है और न [जिस करके] अग्निष्टोम महीने में किये जाते हैं और न प्राण प्राणों के साथ [किये जाते हैं और न दूसरा] यज्ञ फैलाया जाता है । (एकविंशतिः उक्थ्याः) इक्कीस उक्थ्य [यज्ञ विशेष] हैं । (एकोक्थ्यः षोडशी, अन्नं वै उक्थ्यं वीर्य्यं षोडश एव) एक उक्थ्य षोडशी [सोलह मन्त्र वाला] है अन्न ही उक्थ्य सम्बन्ध वाला सामर्थ्य षोडश [सोलह प्रकार] है, [वे सोलह यह हैं—चार वर्ण, चार आश्रम, श्रवण,

---

(पाप्मानम्) पापम् । दोषम् (दृंहती) दृहि वृद्धौ—शतृः । वर्धमाना । दृढा (छन्दतः) छदि संवरणे—लट् । अपवारयतः । नाशयतः (उद्धिः) उपसर्गे घोः किः (पा० ३ । ३ । ९२) उत्+डुधाञ् धारणपोषणयोः—किः, प्रधिः । रथनाभिः (चक्रे) रथचक्रद्वयं यथा (तन्त्रम्) उपायम् । यज्ञकार्यम् (वास्युस्तयः) वसिवपियजि० (उ० ४ । १२५) वस वधे—इञ् । वलिमलितनिभ्यः कयन् (उ० ४ । ९९) वासि+वस्त वधे—कयन्, कित्वात् संप्रसारणम् । वासीनां हिंसकानाम् उस्तयो हिंसकः । दोषनाशकः (शस्त्राणि) नियमान् । स्तोत्रविशेषान् (सञ्चारयेत्) सम्यक् चालयेत् । उच्चारयेत् (एकोदयात्) एकस्मिन् देहे उद्गमनात् (अधिवसति) निवसन्ति (प्रमायुकः) लषपतपदस्था० (पा० ३ । २ । १५४) प्र+मीञ् हिंसायाम्–उकञ् । युक् च मृतकः (षोडशी) षोडश–इनिः । षोडशमन्त्रोपेतः (षोडश) षोडशन्—डट् ततः अर्शादिअच् । विभक्तेर्लुक् । षोडशम् । षोडशावयव-

---

१. यहाँ "दशरात्रम् उद्धि पृष्ठ्याभिप्लवौ चक्रे" यह दुबारा पढ़ा हुआ पाठ अपपाठ रूप ही प्रतीत होता है ॥ सम्पा० ॥

मनन, निदिध्यासन=तीन कर्म, अप्राप्त की इच्छा, प्राप्त की रक्षा, रक्षित का बढ़ाना, बढ़े हुये का अच्छे मार्ग में—व्यय करना, और सोलहवां मोक्ष का अनुष्ठान—जैसा दयानन्द भाष्य यजुर्वेद ९ । ३४ में व्याख्यात है]। (तया रूढ्वा स्वर्गं लोकम् अध्यारोहन्ति) उस [इष्टि] के द्वारा चढ़कर स्वर्ग लोक में चढ़ते हैं ॥ २० ॥

भावार्थः—सूर्यमण्डल प्रकाशपिण्ड है, उसके दोनों ओर आगे पीछे प्रकाश है, इसी प्रकार यज्ञ के दोनों ओर आदि अन्त में अभिप्लव अथवा पृष्ठय यज्ञ होता है ॥ २० ॥

कण्डिका २१ ॥

अथातोऽह्नामध्यारोहः । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमध्यारोहन्ति, चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवं, पृष्ठ्येन परं पृष्ठ्यमभिजिता ऽभिजितं, स्वरसामभिः परान् स्वरसामानोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमपरेषां स्विदितमह्नां परेषामित्यपरेषां च परेषां चेति ब्रूयात्स वा एष संवत्सरः ॥ २१ ॥

कण्डिका २१ ॥ संवत्सर का अतिरात्र आदिकों से संबन्ध

(अथ अतः अह्नाम् अध्यारोहः) अब यहां दिनों [यज्ञ विशेषों] का चढ़ाव [कहा जाता है]। (प्रायणीयेन अतिरात्रेण उदयनीयम् अतिरात्रम् अध्यारोहन्ति) प्रायणीय अतिरात्र [यज्ञ] से उदयनीय अतिरात्र को चढ़ते हैं, (चतुर्विंशेन महाव्रतम्) चतुर्विंश से महाव्रत को, (अभिप्लवेन परम् अभिप्लवम्) अभिप्लव से पिछले अभिप्लव को, (पृष्ठ्येन परं पृष्ठ्यम्) पृष्ठ्य से पिछले पृष्ठ्य को, (अभिजिता अभिजितम्) अभिजित् से अभिजित् को (स्वरसामभिः परान् स्वरसामानः) स्वरसामों से पिछले स्वरसामों को [चढ़ते हैं]। (अथ ह एतत् अहः अवाप्नुयाम यत् वैषुवतम् इति) अब हम ही वह दिन प्राप्त करें जो विषुवान् वाला [दिन] है, (अपरेषाम् अह्नां स्विदितं परेषाम् इति, परेषां च अपरेषां च इति ब्रूयात्) [विषुवान् से] इधर वाले दिनों का पसीना [निचोड़] है जो उधर वालों का है, और [विषुवान् से] उधर वाले [दिनों] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये । (सः वै एषः संवत्सरः) वही यह संवत्सर है [देखो क० १९] ॥ २१ ॥

भावार्थः—दोनों विषुवानों में से किसी ही विषुवान् से संवत्सर यज्ञ आरम्भ करना चाहिये । यह विषुवान् से एक ओर वाले यज्ञों का वर्णन है ॥ २१ ॥

युक्तम् । चत्वारो वर्णाश्चत्वारः आश्रमाः, श्रवणमनननिदिध्यासनानि त्रीणि कर्माणि, अलब्धस्य लिप्सा, लब्धस्य यत्नेन रक्षणं, रक्षितस्य वृद्धिः, वृद्धस्य सन्मार्गे व्ययीकरणम् एष चतुर्विधः पुरुषार्थः, एतैः पंचदशभिः प्राप्तः षोडशो मोक्षः—यथा व्याख्यातं दयानन्दभाष्ये यजुर्वेदे । ९ । ३४ । एतैः षोडशभिर्युक्तम् (रूढ्वा) अधिरुह्य ॥

२१—(अध्यारोहः) आरोहणम् (अध्यारोहन्ति) उपरिगच्छन्ति (परम्) पश्चाद्भवम् (स्वरसामानः) स्वरसाम्नः । यज्ञविशेषान् । अन्यद्गतम्—क० १९ ॥

कण्डिका २२ ॥

अथातोऽह्नां निवाहः[1] । प्रायणीयोऽतिरात्रश्चतुर्विंशायाह्ने निवहति, चतुर्विंशमहरभिप्लवाय, अभिप्लवः पृष्ठ्याय, पृष्ठ्योऽभिजिते, अभिजिद् स्वरसामभ्यः, स्वरसामानो विषुवते, विषुवान् स्वरसामभ्यः, स्वरसामानो विश्वजिते, विश्वजित् पृष्ठ्याभिप्लवाभ्यां, पृष्ठ्याभिप्लवौ गवायुभ्यां गवायुषी दशरात्राय, दशरात्रो महाव्रताय महाव्रतमुदयनीयायातिरात्राय, उदयनीयोऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै य एवं वेद स वा एष संवत्सरः ॥ २२ ॥

कण्डिका २२ ॥ संवत्सर का अतिरात्र आदिकों से संबन्ध ॥

(अथ अतः अह्नां निवाहः) अब यहां दिनों [यज्ञ विशेषों] का उतार [कहा जाता है] । (प्रायणीयः अतिरात्रः चतुर्विंशाय अह्ने निवहति) प्रायणीय अतिरात्र चतुर्विंश दिन के लिये उतरता है, (चतुर्विंशम् अहः अभिप्लवाय) चतुर्विंश दिन अभिप्लव के लिये, (अभिप्लवः पृष्ठचाय) अभिप्लव पृष्ठ्य के लिये, (पृष्ठचः अभिजिते) पृष्ठ्य अभिजित् के लिये, (अभिजित् स्वरसामभ्यः) अभिजित् स्वरसामों के लिये, (स्वरसामानः विषुवते) सब स्वरसाम यज्ञ विषुवान् के लिये, (विषुवान् स्वरसामभ्यः) विषुवान् स्वरसामों के लिये, (स्वरसामानः विश्वजिते) सब स्वरसाम विश्वजित् के लिये, (विश्वजित् पृष्ठ्याभिप्लवाभ्याम्) विश्वजित् पृष्ठ्य और अभिप्लव के लिये, (पृष्ठ्याभिप्लवौ गवायुभ्याम्) दोनों पृष्ठ्य और अभिप्लव दोनों गवायु के लिये, (गवायुषी दशरात्राय) दोनों गवायु दशरात्र के लिये, (दशरात्रः महाव्रताय) दशरात्र महाव्रत के लिये, (महाव्रतम् उदयनीयाय अतिरात्राय) महाव्रत उदयनीय अतिरात्र के लिये, (उदयनीयः अतिरात्रः स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै यः एवं वेद) उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिए, भोजन योग्य अन्न के लिये और प्रतिष्ठा के लिये [उतरता है], जो ऐसा जानता है । (सः वै एषः संवत्सरः) सो यही संवत्सर है [देखो क० १४] ॥ २२ ॥

भावार्थः—यहाँ विषुवान् के दूसरी ओर वाले यज्ञों का वर्णन है [देखो कण्डिका १४] ॥ २२ ॥

कण्डिका २३ ॥

आदित्याश्च ह वा आङ्गिरसश्च स्वर्गे लोकेऽस्पर्द्धन्त वयं पूर्वे स्वरेष्यामो वयं पूर्व इति त आदित्या लघुभिः सामभिश्चतुर्भिस्तोमैर्द्वाभ्यां पृष्ठ्याभ्यां स्वर्गं लोकमभ्यप्लवन्त, यदभ्यप्लवन्त तस्मादभिप्लवोऽन्नश्च एवाङ्गिरसो गुरुभिः सामभिः

२२—(निवाहः) अधोगमनम् (निवहति) अधोगच्छति । अन्यद् गतम् ॥

---

१. पू. सं 'नीवाहः' इति पाठः ॥ सम्पा० ॥

सर्वैः[1] स्तोमैः सर्वैस्पृष्ठ्यैः स्वर्गं लोकमभ्यस्पृशन्त, यदभ्यस्पृशन्त तस्मात् स्पृश्यस्तं वा एतं स्पृशं सन्तं पृष्ठ्य इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः। अभिप्लवात् पृष्ठ्यो निर्मितः, पृष्ठ्यादभिजित्, अभिजितः स्वरसामानः, स्वरसामभ्यो विषुवान्, विषुवतः स्वसामानः, स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्यां गवायुषी, गवायुभ्यां दशरात्रस्तानि ह वा एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि तेषां शतं शतं रथानां न्यन्तरं तद्यथाऽरण्यान्यारूढा अशनापिपासे ते पाप्मानं दृंहती परिप्लवेते एवं हैवैते प्रप्लवन्ते ये विद्वांस उपयन्त्यथ ये विद्वांसमुपयन्ति तद्यथा प्रवाहात् प्रवाहं स्थलात् स्थलं समात्समं सुखात् सुखमभयादभयमुपसङ्क्रामन्तीत्येवं हैवैते संवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम् ॥ २३ ॥

कण्डिका २३ ॥ अभिप्लव और पृष्ठ्य की व्युत्पत्ति और दूसरे यज्ञ ॥

(आदित्याः च ह वै आङ्गिरसः च स्वर्गे लोके अस्पर्धन्त, वयं पूर्वे स्वः एष्यामः वयं पूर्वे इति) आदित्य [अखण्ड व्रतधारी सूक्ष्मदर्शी ऋषि] और आङ्गिरस [अङ्गों के रस जानने वाले स्थूलदर्शी ऋषि लोग] स्वर्ग लोक के विषय में झगड़ने लगे, हम पहिले स्वर्ग को जायेंगे, हम पहिले। (ते आदित्याः लघुभिः सामभिः चतुर्भिः स्तोमैः द्वाभ्यां पृष्ठ्याभ्यां स्वर्गं लोकम् अभ्यप्लवन्त) आदित्य ऋषि सूक्ष्म सामों के द्वारा चार स्तोमों के द्वारा और दो पृष्ठ्यों के द्वारा स्वर्ग लोक को कूद कर पहुंचे। (यत् अभ्यप्लवन्त तस्मात् अभिप्लवः अन्नं च एव) जो वे कूद कर पहुँचे, इसी से अभिप्लव [कूदकर पहुँचने वाला यज्ञ हुआ] और वही अन्न है। (आङ्गिरसः गुरुभिः सामभिः सर्वैः स्तोमैः सर्वैः पृष्ठ्यैः स्वर्गं लोकम् अभ्यस्पृशन्त) आङ्गिरस ऋषि स्थूल सामों से, सब स्तोमों से सब पृष्ठ्यों से स्वर्ग लोक को छूकर पहुँचे। (यत् अभ्यस्पृशन्त तस्मात् [2]स्पृश्यः तं वै एतं स्पृशम् सन्तं पृष्ठ्यः इति आचक्षते) जो वे छूकर पहुँचे, इसी से स्पृश्य [छूने योग्य] हुआ, उस ही स्पृश्य [छूने योग्य] होते हुए को यह पृष्ठ्य यज्ञ है–ऐसा कहते हैं। (परोक्षेण) परोक्ष [आंख ओट प्रलय में वर्त्तमान ब्रह्म] के द्वारा (परोक्षप्रियाः इव हि) परोक्षप्रिय [आंख ओट भविष्य के प्रेमी] लोगों के समान ही (देवाः) देवता [विद्वान् लोग] (प्रत्यक्षद्विषः) प्रत्यक्ष [वर्तमान अवस्था] के द्वेषी [विरोधी] (भवन्ति) होते हैं [देखो—गो० पू० १। १]। (अभिप्लवात् पृष्ठ्यः निर्मितः) अभिप्लव से पृष्ठ्य बनाया गया है, (पृष्ठ्यात् अभिजित्) पृष्ठ्य

२३—(आदित्याः) अदिति—ण्यः। अखण्डव्रतधारिणो विद्वांसः। अथवा आङ्+दीपी दीप्तौ—यक्। पृषोदरादिरूपम्। आदीप्यमानाः। सूक्ष्मदर्शिनः (आङ्गिरसः) तं वा एतमङ्गरसं सन्तमङ्गिरा इत्याचक्षते—गो० पू०

---

१. पू. सं. 'सर्वे' इति पाठः ॥ सम्पा० ॥
२. सर्वत्र अर्थानुसारी सकारादिः पाठोऽत्रास्माभिः वर्द्धितः ॥ सम्पा० ॥

से अभिजित्, (अभिजितः स्वरसामानः) अभिजित् से स्वरसाम, (स्वरसामभ्यः विषुवान्) स्वरसामों से विषुवान् (विषुवतः स्वरसामानः) विषुवान् से स्वरसाम, (स्वरसामभ्यः विश्वजित्) स्वरसामों से विश्वजित्, (विश्वजितः पृष्ठ्याभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव, (पृष्ठ्याभिप्लवाभ्यां गवायुषी) दोनों पृष्ठ्य और अभिप्लवों से दोनों गवायु, (गवायुभ्यां दशरात्रः) दोनों गवायु से दशरात्र [यज्ञ बनाया गया है]। (तानि ह वै एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि) वे ही यज्ञरूप वन और यज्ञ करने वाले के तन्त्र [उपाय] हैं। (तेषां शतं शतं रथानां न्यन्तरम्) उन [यज्ञों] के बीच सौ सौ रथों [पगों वा मान विशेषों] का निश्चित अन्तर हो। (तत् यथा अरण्यानि आरूढाः पाप्मानं दृहती ते अशनापिपासे परिप्लवेते एवं ह एव एते प्रप्लवन्ते ये विद्वांसः उपयन्ति, अथ ये विद्वांसम् उपयन्ति) सो जैसे वन में चढ़े हुये पुरुष कष्ट को बढ़ाती हुई उन दोनों भूख प्यास को लांघ जाते हैं, ऐसे ही यह [यजमान लोग यज्ञ को] पार करते हैं जो विद्वान् लोग [यज्ञ को] स्वीकार करते हैं और जो लोग विद्वान् को स्वीकार करते हैं। (तत् यथा प्रवाहात् प्रवाहं स्थलात् स्थलं समात् समं सुखात् सुखम् अभयात् अभयम् उपसङ्क्रामन्ति इति एवं ह एव एते संवत्सरस्य उदृचं समश्नवामहै इति ब्राह्मणम्) सो जैसे प्रवाह [जलबहाव] से प्रवाह को, स्थल [सूखे स्थान] से स्थल को, सम [एक से स्थान] से सम को, सुख से सुख को, और अभय से अभय को यथावत् पाते हैं, वैसे ही यह हम संवत्सर [यज्ञ] की समाप्ति वाली ऋचा को पावें यह ब्राह्मण [ब्रह्मज्ञान] है ॥ २३ ॥

भावार्थः—कोई विद्वान् सूक्ष्म से स्थूल की ओर चल कर अर्थात् कारण से कार्य का ज्ञान प्राप्त करके सुख पाते हैं और कोई स्थूल से सूक्ष्म की ओर जाकर अर्थात् कार्य से कारण को खोज कर आनन्द भोगते हैं ॥ २३ ॥

कण्डिका २४ ॥

प्रेदिर्ह वै कौशाम्बेयः कौसुरविन्दुरुद्दालक आरुणौ ब्रह्मचर्यमुवाच तमाचार्यः पप्रच्छ कुमारः कति ते पिता संवत्सरस्याहान्यमन्यते[1]ति कति त्वेवेति दशेति होवाच दश वा इति होवाच दशाक्षरा विराड् वैराजो यज्ञः १। कति त्वेवेति नवेति होवाच नव वा इति होवाच नव वै प्राणाः प्राणैः यज्ञस्तायते २। कति त्वेवेत्यष्टेति होवाचाष्ट वा इति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञः ३। कति त्वेवेति सप्तेति होवाच सप्त वा इति होवाच सप्त छन्दांसि छन्दोभिर्यज्ञस्तायते ४। कति त्वेवेति

१।७। तदधीते तद्वेद (पा० ४।२।५९) अङ्गिरस्—अण्, बहुवचनस्यैकवचनं च। आङ्गिरसाः। अङ्गानां रसवेत्तारः। स्थूलदर्शिनः (लघुभिः) सूक्ष्मैः (सामभिः) मोक्षज्ञानैः (स्पृश्यः) स्पृश सम्पर्के—क्यप्। (रथानाम्) चरणानाम् मानविशेषाणाम् (न्यन्तरम्) निश्चितव्यवधानम् (परिप्लवेते) परिप्लवन्ते। सर्वतः प्राप्नुवन्ति ॥

१. पू० सं० 'अमन्यथ' इति पाठः ॥ सम्पा० ॥

षडिति होवाच षड् वा इति होवाच षड् वा ऋतव ऋतूनामाप्त्यै ५। कति त्वेवेति पञ्चेति होवाच पञ्च वा इति होवाच पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः ६। कति त्वेवेति चत्वारीति होवाच चत्वारि वा इति होवाच चत्वारो वै वेदा वेदैर्यज्ञस्तायते ७। कति त्वेवेति त्रीणीति होवाच त्रीणि वा इति होवाच त्रिषवणो वै यज्ञः सवनैर्यज्ञस्तायते। ८। कति त्वेवेति द्वे इति होवाच द्वे वा इति होवाच द्विपाद्वै पुरुषो द्विप्रतिष्ठः पुरुषः पुरुषो वै यज्ञः ९। कति त्वेवेत्येकमिति होवाचैकम् वा इति होवाचाहरहरित्येकमेव सर्वं संवत्सरम् १० ॥ २४ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणपूर्वभागे चतुर्थः प्रपाठकः समाप्तः।

कण्डिका २४ ॥ प्रेदि कौशाम्बेय कौसुरविन्दु और उद्दालक आरुण से संवत्सर और यज्ञीय दिनों के विषय में प्रश्नोत्तर ॥

(प्रेदिः ह वै कौशाम्बेयः कौसुरविन्दुः, उद्दालकः आरुणः ब्रह्मचर्यम् उवाच) प्रेदि [बड़ा ऐश्वर्यवान् ऋषि] कौशाम्बेय [कौशाम्बी अर्थात् पटना नगरी का रहने वाला], कौसुरविन्दु [भूमि के ऐश्वर्य का जानने वाला] था, [उसको] उद्दालक गो० पू० ३। ६ आरुण, [अरुण के पुत्र] ने ब्रह्मचर्य का उपदेश किया। (तम् आचार्यः पप्रच्छ कुमारः ते पिता संवत्सरस्य कति अहानि अमन्यत इति, कति तु एव इति) उस [प्रेदि] से आचार्य [उद्दालक] ने पूंछा—हे कुमार! तेरा पिता संवत्सर यज्ञ के कितने दिन मानता था, फिर कितने। (दश इति ह) [प्रेदि] अरे दस। (उवाच दश वै इति ह) वह [उद्दालक] बोला—अरे दस ही। (उवाच दशाक्षरा विराट्, वैराजः यज्ञः) वह [प्रेदि] बोला—दस अक्षर वाला विराट् [छन्द] है और विराट् [अर्थात् वेद] से सिद्ध किया हुआ यज्ञ है। १। (कति तु एव इति), [उद्दालक] फिर कितने। (नव इति ह) [प्रेदि] अरे नौ। (उवाच नव वै इति ह) [उद्दालक] अरे नौ ही हैं। (उवाच नव वै प्राणाः प्राणैः यज्ञः तायते) [प्रेदि] बोला—नौ ही प्राण [सात मस्तक के दो नीचे के छिद्र] हैं, प्राणों से यज्ञ फैलाया जाता है। २। (कति तु एव इति) [उद्दालक] फिर कितने। (अष्ट इति ह) [प्रेदि] अरे आठ। (उवाच अष्ट वै इति ह) [उद्दालक] अरे आठ ही हैं। (उवाच अष्टाक्षरा गायत्री गायत्रः यज्ञः) [प्रेदि] आठ अक्षर [के पाद] वाली गायत्री है, गायत्री से सिद्ध किया हुआ यज्ञ है। ३। (कति तु एव इति) [उद्दालक] फिर कितने। (सप्त इति ह) [प्रेदि] अरे सात। (उवाच सप्त वै

२४—(प्रेदिः) इगुपधात् कित् (उ० ४। १२०) प्र+इदि परमैश्वर्य्ये—इन् कित्, नलोपः। परमैश्वर्य्यवान्। ऋषिविशेषः (कौशाम्बेयः) तेन निर्वृत्तम् (पा० ४। २। ६८) कुशाम्ब—अण्। कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी। कुसुमपुरी। पाटलिपुत्रनगरी। पटना इति भाषायाम्। सोऽस्य निवासः (पा० ४। ३। ८९) कुशाम्बी—ढञ्। कौशाम्बीनिवासी (कौसुरविन्दुः) सुसूधाञ्गृधिभ्यः क्रन् (उ० २। २४) कु+षु प्रसवैश्वर्ययोः—क्रन्। कुसुरः भूमी-

इति ह) [उद्दालक] बोला अरे सात ही हैं। (उवाच सप्त छन्दांसि छन्दोभिः यज्ञः तायते) [प्रैदि] बोला—सात [गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप् और जगती] छन्द हैं, छन्दों से यज्ञ फैलाया जाता है। ४। (कति तु एव इति) [उद्दालक] फिर कितने, (षट् इति ह) [प्रैदि] अरे छह। (उवाच षड् वै इति ह) [उद्दालक] अरे छह ही हैं। (उवाच षट् वै ऋतवः ऋतूनाम् आप्त्यै) [प्रैदि] बोला—छह ही [वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त और शिशिर—साम० उ० ६। १३। २] ऋतु हैं, ऋतुओं के लाभ के लिये [यज्ञ है]। ५। (कति तु एव इति) [उद्दालक] फिर कितने। (पंच इति ह) [प्रैदि] अरे पांच। (उवाच पंच वै इति ह) [उद्दालक] अरे पांच ही हैं। (उवाच पंचपदा पङ्क्तिः पाङ्क्तः यज्ञः) [प्रैदि] बोला—पांच पाद वाली पङ्क्ति [पांच अक्षर के पांच पाद वाली पदपङ्क्ति अथवा आठ अक्षर के पांच पाद वाली पथ्यापङ्क्ति] है, पाङ्क्त [पङ्क्ति, वेदवाणी से सिद्ध किया हुआ] यज्ञ है। ६। (कति तु एव इति) [उद्दालक] फिर कितने। (चत्वारि इति ह) अरे चार। (उवाच चत्वारि वै इति ह) [उद्दालक] अरे चार ही हैं। (उवाच चत्वारः वै वेदाः, वेदैः यज्ञः तायते) [प्रैदि] चार ही वेद [ऋग्, यजुः, साम और अथर्व] हैं, वेदों से यज्ञ फैलाया जाता है। ७। (कति तु एव इति) [उद्दालक] फिर कितने। (त्रीणि इति ह) [प्रैदि] अरे तीन। (उवाच त्रीणि वै इति ह) [उद्दालक] अरे तीन ही हैं। (उवाच त्रिषवणः वै यज्ञः सवनैः यज्ञः तायते) [प्रैदि] बोला—[प्रातःसवन, माध्यन्दिन सवन और तृतीय सवन] तीन सवन वाला ही यज्ञ है, सवनों से यज्ञ फैलाया जाता है। ८। (कति तु एव इति) [उद्दालक] फिर कितने। (द्वे इति ह) [प्रैदि] अरे दो। (उवाच द्वे वै इति ह) [उद्दालक] बोला—अरे दो ही हैं (उवाच द्विपात् वै पुरुषः द्विप्रतिष्ठः पुरुषः पुरुषः वै यज्ञः) [प्रैदि] बोला—दो पांव वाला पुरुष है, दो [कर्म और ज्ञान] से प्रतिष्ठा किया गया पुरुष है, पुरुष ही यज्ञ है। ९। (कति तु एव इति) [उद्दालक] फिर कितने। (एकम् इति ह) [प्रैदि] अरे एक [दिन]। (उवाच एकं वै इति ह) [उद्दालक] अरे एक ही है। (उवाच अहः अहः इति एकम् एव सर्वं

श्वरः, ततः अण् स्वार्थे। कौसुरं भूम्यैश्वर्य्यम्। विन्दुरिच्छुः (पा० ३। २। १६९) विद ज्ञाने—उः, नुमागमः। भूम्यैश्वर्यस्य ज्ञाता (उद्दालकः) गो० पू० ३। ६। मुनिविशेषः (आरुणः) अरुण—अण्। अरुणपुत्रः (कुमारः) हे कुमार (वैराजः) विराजा निर्वृत्तः (गायत्रः) गायत्र्या निर्वृत्तः (पञ्च) सप्यशूभ्यां तुट् च (उ० १। १५७) पचि व्यक्तीकरणे—कनिन्। संख्याविशेषः (पङ्क्तिः) पचि व्यक्तीकरणे विस्तारे—क्तिन् वा क्तिच्। अत्र तु—पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्० (पा० ५। १। ५९) पञ्चन्—तिप्रत्ययः, टिलोपः। पञ्चैव पङ्क्तिः। पदपङ्क्तिः पञ्च। पिङ्गलशास्त्रे ३। ४६। पञ्चाक्षरयुक्ता पञ्चपदा पदपङ्क्तिः। अथवा पथ्यापञ्चभिर्गायत्रैः। पिङ्गल० ३। ४८। अष्टाक्षरयुक्ता पञ्चपदा पथ्यापङ्क्तिः

संवत्सरम्) [प्रेदि] बोला—दिन दिन यह एक ही [मिलकर] पूरा संवत्सर यज्ञ है ॥ १० ॥ २४ ॥

भावार्थः—मनुष्य को यज्ञ के अङ्ग उपाङ्गों के समान प्रत्येक पदार्थ के अङ्ग उपाङ्गों को जानकर कर्तव्य पूरा करना चाहिये ॥ २४ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाड़ा-धिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे चतुर्थः प्रपाठकः समाप्तः ॥

अयं प्रपाठकः प्रयागनगरे भाद्रपदमासे शुक्लद्वादश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात्।

मुद्रितम्—आषाढशुक्ला १२ संवत् १९८१ वि० ता० १३ जुलाई सन् १९२४ ई० ॥

अथ पञ्चमः प्रपाठकः ।

कण्डिका १ ॥

२४--(श्रद्धायाम्) श्रत् सत्यं-निघ० ३। १०। षिद्भिदादिभ्योऽङ् (पा० ३। ३। १०४) श्रत्+दधातेः--अङ्, टाप्। श्रद्धा श्रद्धानात्--निरु० ६। ३०। सत्यधारणशक्तौ। भक्तौ (रेतः) बीजम्। सामर्थ्यम् (तपस्वी) ऐश्वर्यवान् (वैश्वानरः) स्वार्थे--अण्, दीर्घश्च। विश्वेषां नरो नेता (सोमजम्भाः) गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च (उ० ४। २२७) सोम+जभि मैथुने जृम्भणे नाशने च—असिः। सोमस्य अमृतस्य जम्भो भक्षणं यस्मात् सः। जम्भो भक्ष्ये दन्ते च (ऋषेः) ऋषिर्दर्शनात्—निरु० २। ११। सन्मार्गदर्शकस्य (ऋषिः) सन्मार्गदर्शकः (अङ्गिराः) ज्ञानवान्। वेदः। वेदवेत्ता (श्रेयसीम्) अतिप्रशस्ताम् (जिगाय) जितवान् (सोमबिन्दुयुक्ताः) अमृतबिन्दुयुक्ताः (वहन्ति)

ष्ठान् चतुरः भागान् वहन्ति ब्रह्मा ब्रह्मत्वेन+वर्तते ५) और आनन्दों को बढ़ाने वाले अथर्व अङ्गिरा [निश्चल परमात्मा के अथर्ववेद सहित चारों वेद] प्रायश्चित्तों [पाप दूर करने के उपायों] और ओषधियों से संस्तव रखते हुये और शान्ति युक्त होते हुये [इन चारों से] चार भागों को पहुँचाते हैं, [तब ही] ब्रह्मा [चारों वेद जानने वाला] ब्रह्मा पद के साथ [वर्तमान होता है] । ५ ।

(यः ब्रह्मवित्, सः अभिकरः अस्तु शिवः धीरः धिया वः एतं धर्मं रक्षतु कर्मात् च अमृतात् यज्ञात् च प्रमत्तां मा वः, येन अनङ्गिरस. अपियासीत् ६) जो [ब्रह्मा] ब्रह्म जानने वाला है वह सब प्रकार काम करने वाला होवे, और वह कल्याणकारी धीर पुरुष निश्चल बुद्धि से तुम्हारे लिये इस धर्म की रक्षा करे, और वह कर्म को नित्य प्राप्त होने वाला [पुरुषार्थी] अमर परमात्मा और यज्ञ [पूजनीय कर्म] से पृथक् होकर प्रमाद [भूल] न स्वीकार करे, जिससे वह वेद विरोधी पुरुषों को निन्दा से प्राप्त करे । ६ । (आयुं मा दशम्, ताः मा रुशः, मा प्रमेष्ठाः लोकान् विदहाथ, मे भूः युक्ता+स्यात्, दिव्यं भय कलाशस्तुतिगोपलायनं धर्मम् उद्यतं यज्ञं रक्षत ७) [हे ब्रह्मन्] मनुष्य को मत काट, उन [प्रजाओं] को मत सता और मत मार, लोकों की रक्षा कर, मेरे लिये भूमि अनुकूल [होवे], दिव्य [व्यवहार में होने वाले] भय से गति पहुंचाने वाले पुरुषार्थी पुरुष के स्थिति योग्य कर्म से भूमि के पालन मार्ग को बताने वाले धर्म और प्रस्तुत यज्ञ की रक्षा कर । ७ ।

(होता, मैत्रावरुणः च अच्छावाकः च ग्रावस्तुता सह एकं पादम् ऋग्भिः अहरहः स्तुवन्तः पृथिव्याः अग्निं पादं ब्रह्मणा धारयन्ति ८) होता, मैत्रावरुण अच्छावाक ग्रावस्तुत् के सहित [यह चारों ऋत्विज्] एक [अद्वितीय] प्राप्ति के योग्य

प्रापयन्ति (सुकृताम्) सुकर्मिणाम् (प्रमुदः) आनन्दान् (मोदमानाः) वर्धयमानाः (ग्रहैः) ग्र ह्यपदार्थैः । यज्ञपात्रैः (हविर्भिः) दातव्यपदार्थैः (कृताकृतैः) कृतैः सम्पादितैः अकृतैः असंपादितैः मनसि विचारितैश्च कर्मभिः (औदुम्बर्याम्) उदुम्बरनिर्मितायामासन्द्याम् (सामघोषेण) सामगानध्वनिना (संस्तुवन्तः) सम्यक्स्तुतिं कुर्वन्तः (शान्ताः) शान्ति-युक्ताः (असंसृष्टान्) असंयुक्तान् । पृथक् पृथग्भूतान् (अभिकरः) सर्वतः कर्मकर्त्ता (मा वः) मा वृणोतु । मा स्वीकरोतु (अमृतात्) मरणशून्यात् परब्रह्मणः (प्रमत्ताम्) प्रमत्तताम् । प्रमादम् । चित्तविक्षेपम् । (कर्मात्) कर्म+अत सातत्यगमने—क्विप् । कर्मप्रापकः । कर्मकर्ता (अनङ्गिरसः) वेदविरोधिनः पुरुषान् (अपियासीत्) अपि निन्दया प्राप्नुयात् । तिरस्-कुर्यात् (आयुम्) छन्दसीणः (उ० १ । २) इण् गतौ—उण् । मनुष्यम्—निघ० २ । ३ (मा दशम्) दन्श दंशने—लङ्. पुरुषव्यत्ययः । मा दंशतु । मा खण्डयतु (मा रुशः) मा हिंसीः । मा दुःखय (मा प्रमेष्ठाः) मीङ् हिंसायाम्—लुङ् । मा नाशय (भूः) भूमिः (युक्ता) अनुकूला भवेत् (विदहाथ) वह रक्षणे बाहे

[आदि मूल परमात्मा] को ऋग्वेद मन्त्रों [पदार्थों की गुण सूचक विद्याओं] से दिन दिन स्तुति करते हुये पृथिवी के अग्निरूप पाद [स्थिति गुण] को ब्रह्मज्ञान से धारण करते हैं । ८ । (अध्वर्युः प्रतिप्रस्थाता नेष्टा उन्नेता एकं निहितं पादं यजुषा संस्तुवन्तः अन्तरिक्षं वायुं पादं ब्रह्मणा धारयन्ति ९) अध्वर्यु, प्रतिप्रस्थाता, नेष्टा और उन्नेता [यह चारों ऋत्विज्] एक दृढ़ प्राप्ति योग्य [आदि मूल परमात्मा] की यजुर्वेद [संगतिकरण विद्या] से स्तुति करते हुये अन्तरिक्ष में वायु रूप पाद [स्थिति गुण] को ब्रह्मज्ञान से धारण करते हैं । ९ । (साम्ना छादयन् उद्गाता अप्रमत्तः औदुम्बर्यां सगद्गदः स्तोभदेयः विद्वान् प्रस्तोता, अथ सुब्रह्मण्यः प्रतिहर्त्ता सुष्टुतिं यज्ञे विदहाथ, साम्ना एकं निहितं [पादं] निस्तुवन्तः दिवि सूर्यं पादं ब्रह्मणा धारयन्ति १०) साम गान से बल प्राप्त करने हारा उद्गाता औदुम्बरी [उदुम्बर, गूलर की बनी हुई चौकी] पर प्रसन्न चित्त गद्गद [अव्यक्त शब्द] सहित स्तोभ [इडा, हुइ आदि अर्थशून्य गान आदि के स्वर पूरे करने वाले शब्द] का देने वाला, विद्वान् प्रस्तोता, और अच्छे प्रकार ब्रह्मज्ञान में निपुण जो यज्ञ में सुन्दर स्तुति की रक्षा करे, वे [यह चारों] सामवेद [मोक्षविद्या] से एक स्थिर परमात्मा की निरन्तर स्तुति करते हुये प्रकाश मण्डल में सूर्य रूप पाद [स्थिति गुण] को ब्रह्मज्ञान से धारण करते हैं । १० । (एकं ह ब्रह्मा ब्राह्मणाच्छंसिनः, पोत्रा सह आग्नीध्रः एकं निहितं पादम् अथर्वभिः अङ्गिरोभिः च [निस्तुवन्तः] अप्सु गुप्तः चन्द्रं पादं ब्रह्मणा धारयन्ति ११) अकेला ही ब्रह्मा, ब्राह्मणाच्छंसी, और पोता के सहित आग्नीध्र [यह चारों] प्राप्ति के योग्य [आदि मूल परमात्मा] को निश्चल ब्रह्मज्ञानों [चारों वेदों] से [निरन्तर स्तुति करते हुये—श्लो० १०] जल में रक्षित चन्द्रमा रूप पाद [स्थिति गुण] को ब्रह्मज्ञान से धारण करते हैं । ११ ।

(पृथक् चतुर्धा वेदेषु युक्ताः होत्रकाः च षोडशिकम् अभिष्टुवन्ति, मनीषिणः दीक्षिताः श्रद्दधानाः गुप्ताः होतारः यज्ञम् अभिवहन्ति १२) और अलग

दीप्तौ च—लेट्, व्यत्ययेन बहुवचनम् । विविधं रक्ष (दिव्यम्) व्यवहारभवम् (कलाशस्तुतिगोपलायनम्) कल गतौ—घञर्थे कः + अशूङ् व्याप्तौ संघाते च—अण् + स्तुति + गो + पल रक्षणे—अप् + अय गतौ—ल्युट् । कलाशस्य गतिप्रापकस्य पुरुषार्थिनः पुरुषस्य स्तुत्या स्तुत्यक्रियया भूमिपालनमार्गो यस्मात् तम् (पादम्) पद स्थैर्ये गतौ च—घञ् । स्थितिस्थानम् । आदिमूलं परमात्मानम् (धारयन्ति) रक्षन्ति (निहितम्) स्थापितम् । स्थितं । नितरां हितम् (छादयन्) छद बलाधाने जीवने संवरणे च—शतृः । धारयन् (प्रमत्तः) प्रहृष्टः (स्तोभदेयः) ष्टुभु स्तम्भे–घञ् । इडा, होइ प्रभृतयः, अर्थशून्यस्य गानादिस्वरपरिपूर्णार्थस्य स्वरभेदस्य दाता (सगद्गदः) गद्गदेन अव्यक्तशब्देन सहितः (सुब्रह्मण्यः) सुब्रह्मणि सुष्ठु ब्रह्मज्ञाने साधुः (दिवि) प्रकाशे (ब्राह्मणाच्छसिनः) आर्षं बहुवचनम् । ब्राह्मणाच्छंसी । ऋत्विग्विशेषः (गुप्तः) गुप्तं रक्षितम् (षोडशिकम्) षोडशिन्–कन् स्वार्थे । षोडशिनम् । षोडशभिः ऋत्विग्भिर्युक्तम् (होत्रकाः) ऋत्विग्विशेषाः (मनी-

अलग चार प्रकार से वेदों में युक्त सहायक ऋत्विज् लोग षोडशी [सोलह ऋत्विज् रखने वाले परमात्मा—श्लो० ८—११] की सब ओर से स्तुति करते हैं, बुद्धिमान्, दीक्षा पाये हुए, सत्य धारण करने वाले, रक्षा किये हुये होता लोग यज्ञ को सब ओर पहुँचाते हैं । १२ । (दक्षिणतः जनत् इति एतां ब्राह्मणस्य ओम् व्याहृतिं जपन् विदुः तं सप्तदशं सदस्यं पुरा कीर्तयन्ति १३) दक्षिण की ओर जनत् [सबका जनक परमात्मा है] इस ब्रह्मज्ञान का विचार कराने वाली ओम् व्याहृति को जपता हुआ विद्वान् [ऋत्विज्] उस सत्रहवें सदस्य [सभा में योग्य यजमान] को पहिले बखानता है । १३ । (दीक्षितानाम् अष्टादशी दीक्षिता इह यज्ञे श्रद्दधाना युक्ता पत्नी [अस्ति] एकोनविंशः शमिता, विंशः सुन्वन् गृहपतिः एव यज्ञे बभूव १४) दीक्षित पुरुषों में अठारहवीं दीक्षा पाई हुई, सत्य धारण करती हुई, योग्य पत्नी [यजमान की स्त्री] इस यज्ञ में [होती है], उन्नीसवां शमिता [शान्ति करने वाला ऋत्विज्] और बीसवां सोमरस निचोड़ता हुआ गृहपति [गृह कार्य सुधारने वाला पुरुष] यज्ञ में होता है । १४ । (एकविंशतिः एव अङ्गिरः एषां संस्थायां वह, वेदैः अभिष्टुतः लोकः नानावेशापराजित १५) इक्कीसवां ही तू, हे अङ्गिरा ! [वेदवेत्ता पुरुष] इन [वेदों] की व्यवस्था में ले चल, वेदों [वैदिक कर्मों] से सर्वथा स्तुति किया गया मनुष्य अनेक कपट रूप वालों से बिना हराया गया होता है । १५ ॥ २४ ॥

भावार्थः—यह कण्डिका श्लोकबद्ध है । श्रद्धालु, वेदविहित कर्मों में निपुण ऋत्विज् और यजमान आदि सब लोग मिल कर यज्ञ को भली भांति सिद्ध करते हैं ॥ २४ ॥

कण्डिका २५ ॥

सप्त सुत्याः सप्त च पाकयज्ञाः हविर्यज्ञाः सप्त तथैकविंशतिः । सर्वे ते यज्ञा अङ्गिरसोऽपियन्ति नूतना यानृषयो सृजन्ति ये च सृष्टाः पुराणैः । १ । एतेषु वेदेष्वपि चैकमेवापव्रजमृत्विजां सम्भरन्ति । कूटस्त्रिपात् सचते [1]तामशस्तिं विष्कन्धमेनं विधृत प्रजासु । २ । निवर्त्तन्ते दक्षिणा नीयमानाः सुते सोमे वितते यज्ञतन्त्रे । मोघाशिषो यन्त्यनिवर्त्तमाना अनिष्टयज्ञा न तरन्ति लोकान् । ३ । द्वादशवर्षं ब्रह्मचर्य्यं पृथग्वेदेषु तत् स्मृतम् । एवं व्यवस्थिता वेदाः सर्व एव स्वकर्मसु । ४ । सन्ति चैषां समानाः मन्त्राः कल्पाश्च ब्राह्मणानि च । व्यवस्था-

षिणः) कृतॄभ्यामीषन् (उ० ४ । २६) मनु अवबोधने—ईषन्, टाप् । मनीषा प्रज्ञाऽस्यास्ति—इनिः । मेधाविनः—निघ० ३ । १५ । (ब्राह्मणस्य) ब्रह्मज्ञानस्य विनर्कयित्रीं विचारयित्रीम् (सदस्यम्) सदसि साधुं यजमानम् (कीर्तयन्ति) प्रसिद्धीकुर्वन्ति (पुरा) प्रथमम् (विदुः) विद ज्ञाने—कुः । विद्वान् (दीक्षिता) दीक्षित-टाप् । प्राप्तदीक्षा (शमिता) शान्तिकर्ता (सुन्वन्) सोमं निष्पादयन् (एकविंशतिः) एकविंशः (संस्थायाम्) व्यवस्थायाम् (नानावेशापराजितः) विविधकपटरूपिभिः अपराजितः अनभिभूतः ॥

१. पू. सं. 'अशस्तम्' इति पाठः ॥ सम्पा० ॥

नन्तु तत्सर्वं पृथग्वेदेषु तत् स्मृतम् । ५ । ऋग्वेदस्य पृथिवी स्थानमन्तरिक्षस्थानो-ऽध्वरः । द्यौः स्थानं सामवेदस्यापो भृग्वङ्गिरसां स्मृतम् । ६ । अग्निर्देवता ऋग्वे-दस्य यजुर्वेदो वायुर्देवता । आदित्यः सामवेदस्य चन्द्रमा वैद्युतश्च भृग्वङ्गिरसाम् । ७ । त्रिवृत् स्तोम ऋग्वेदस्य यजूंषि पञ्चदशेन सह जज्ञिरे । सप्तदशेन सामवेद एकविंशो ब्रह्मसम्मितः । ८ । वागध्यात्ममृग्वेदस्य यजुषां प्राण उच्यते । चक्षुषी सामवेदस्य मनो भृग्वङ्गिरसां स्मृतम् । ९ । ऋग्भिः सह गायत्रं जागतमाहुर्यजूंषि त्रैष्टुभेन सह जज्ञिरे । उष्णिक्ककुब्भ्यां भृग्वङ्गिरसो जगत्या सामानि कवयो वदन्ति । १० । ऋग्भिः पृथिवीं यजुषाऽन्तरिक्षं साम्ना दिव लोकजित् सोम-जम्भाः । अथर्वभिरङ्गिरोभिश्च गुप्तो यज्ञश्चतुष्पाद् दिवमुद्वहेत । ११ । ऋग्भिः सुशस्तो यजुषा परिष्कृतः सविष्टुतः सामजित् सोमजम्भाः । अथर्वभिरङ्गिरो-भिश्च गुप्तो यज्ञश्चतुष्पाद्दिवमारुरोह । १२ । ऋचो विद्वान् पृथिवीं वेद सम्प्रति यजूंषि विद्वान् बृहदन्तरिक्षम् । दिवं वेद सामगो यो विपश्चित् सर्वान् लोकान् यद्भृग्वङ्गिरोवित् । १३ । यांश्च ग्रामे यांश्चारण्ये जपन्ति मन्त्रान् नानार्थान् बहुधा जनासः । सर्वे ते यज्ञा अङ्गिरसोऽपियन्ति नूतना सा हि गतिर्ब्रह्मणो याऽवराध्यां । १४ । त्रिपिष्टपन्त्रिदिवन्नाकमुत्तमं तमेतया त्रय्या विद्ययेति । अत उत्तरे ब्रह्मलोका महान्तोऽथर्वणामङ्गिरसाञ्च सा गतिरथर्वणामङ्गिरसाञ्च सा गतिरिति ब्राह्मणम् । १५ ॥ २५ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणपूर्वभागे पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥
समाप्तमिदं गोपथब्राह्मणपूर्वार्द्धम् ।

कण्डिका २५ ॥ ऋग्वेद आदि चारों वेदों के स्थान तथा देवता आदि का वर्णन और यह कि चारों वेद ही त्रयी विद्या हैं ॥

(सप्त सुत्याः सप्त च पाकयज्ञाः तथा सप्त हविर्यज्ञाः, एकविंशतिः, ते सर्वे यज्ञाः अङ्गिरसः अपियन्ति, यान् नूतनाः ऋषयः सृजन्ति ये च पुराणैः सृष्टाः १) सात सुत्या और सात पाक यज्ञ और सात हविर्यज्ञ यह सब इक्कीस [क० २३] यज्ञ अङ्गिराओं [वेदज्ञानियों] को प्राप्त होते हैं. जिन [यज्ञों] को नवीन ऋषि [सन्मार्गदर्शक लोग] उत्पन्न करते हैं और जो पुराने [ऋषियों] करके उत्पन्न किये गये हैं। १। (एतेषु वेदेषु अपि च ऋत्विजाम् एकम् एव अपव्रजं सम्भरन्ति, कूटः त्रिपात् प्रजासु विधृतं ताम् एनम् अशस्तिं विष्कन्धं सचते २) और इन वेदों में ही ऋत्विजों के बीच एक ही श्रेष्ठ मार्ग को वे [यज्ञ] यथावत् पुष्ट करते हैं कूट, त्रिपात् [निश्चल, तीन लोकों में व्यापक परमात्मा] प्रजाओं में विविध प्रकार रक्खे हुये उस

२५—(अङ्गिरसः) वेदज्ञानिनः पुरुषान् (अपियन्ति) प्राप्नुवन्ति (अप-व्रजम्) अप + व्रज गतौ--घञर्थे कः । श्रेष्ठपन्थानम् (कूटः) कूट दाहे मन्त्रणे प्रच्छादने च--घञ् । निश्चलः (त्रिपात्) त्रिलोकव्यापकः परमेश्वरः (सचते) सिञ्चति । वर्धयति (अशस्तिम्) शसु हिंसायां—क्तिन् । अविनयशून्यम् । प्रशस्तम् ।

और इस विनीत विशेष वृक्ष [रूप जीवात्मा] को सींचता है। २। (नीयमानाः दक्षिणाः सोमे सुते यज्ञतन्त्रे वितते निवर्त्तन्ते, अनिवर्त्तमानाः मोघाशिषः यन्ति अनिष्टयज्ञः लोकान् न तरन्ति ३) लायी गयीं दक्षिणायें सोम निचोड़ने पर और यज्ञ विस्तार फैल चुकने पर सिद्ध होती हैं, बिना सिद्ध हुई [दक्षिणायें] निरर्थक फलों को प्राप्त होती हैं और प्रतिकूल यज्ञ लोगों को नहीं पार करते हैं। ३। (तत् द्वादशवर्षं ब्रह्मचर्य्यं पृथक् वेदेषु स्मृतम्. एवं सर्वे एव वेदाः स्वकर्मसु व्यवस्थिताः ४) इसलिये बारह वर्ष वाला ब्रह्मचर्य अलग अलग वेदों में कहा गया है, इस प्रकार से सभी वेद अपने अपने कामों में व्यवस्थित हैं। ४। (एषां च मन्त्राः कल्पाः च ब्राह्मणानि च समानाः सन्ति, तत् तत् सर्वं व्यवस्थानं तु पृथक् वेदेषु स्मृतम् ५) और इन [वेदों] के मन्त्र, कल्प [यज्ञविधान] और ब्राह्मण [ब्रह्मज्ञानविधान] समान [एकमोक्ष प्रयोजन वाले] हैं, वह वह सब व्यवस्था तो अलग अलग वेदों में बतायी गयी है। ५।

(ऋग्वेदस्य पृथिवीस्थानम् अन्तरिक्षस्थानः अध्वरः, सामवेदस्य द्यौः स्थानम्, भृग्वङ्गिरसाम् आपः स्मृतम् ६) ऋग्वेद [पदार्थों की स्तुति विद्या] का पृथिवी [भूमिविद्या] स्थान है, अन्तरिक्ष [मध्यलोक विद्या] का स्थान वाला अध्वर [हिंसारहित यजुर्वेद अर्थात् संगतिकरण विद्या] है, सामवेद [मोक्षविद्या] का द्यौ [प्रकाश विद्या] स्थान है, और भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] का जल [स्थान] कहा गया है। ६। (ऋग्वेदस्य अग्निः देवता, यजुर्वेदः वायुर्देवता, सामवेदस्य आदित्यः, भृग्वङ्गिरसां च वैद्युतः चन्द्रमाः ७) ऋग्वेद [पदार्थों की स्तुति विद्या] का अग्नि [अग्नि विद्या] देवता है, यजुर्वेद [संगतिकरण विद्या] वायु [पवन विद्या] देवता वाला है. सामवेद [मोक्षविद्या] का सूर्य और भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] का विविध प्रकाश वाला चन्द्रमा [आनन्दप्रद विद्या देवता] है। ७।

(ऋग्वेदस्य त्रिवृत् स्तोमः [जज्ञे], पंचदशेन सह यजूंषि जज्ञिरे, सप्तदशेन सामवेदः, एकविंशः ब्रह्मसंमितः ८) ऋग्वेद [पदार्थों की स्तुति विद्या] का त्रिवृत् [तीन कर्म उपासना ज्ञान में वर्तमान] स्तोम [उत्पन्न हुआ], पंचदश [स्तोम—कण्डिका १५] के सहित यजुर्वेद मन्त्र [संगतिकरण विद्यायें] उत्पन्न हुये, सप्तदश [स्तोम—क० १५] के सहित सामवेद [मोक्ष विद्या], और एकविंश [स्तोम—क० १५] ब्रह्मवेद [अथर्ववेद] में माना गया है। ८। (ऋग्वेदस्य अध्यात्मं वाक्, यजुषां प्राणः उच्यते, सामवेदस्य चक्षुषी, भृग्वङ्गिरसां मनः स्मृतम् ९) ऋग्वेद का अध्यात्म

विनीतम् (विष्कन्धम्) वि+स्कन्दिर् गतिशोषणयोः—घञ्। विशेषेण वृक्षरूपं जीवात्मानम् (निवर्तन्ते) सिद्ध्यन्ति (मोघाशिषः) निरर्थकफलानि (अनिवर्तमानाः) अनिष्पाद्यमानाः (तरन्ति) तारयन्ति। पारयन्ति (समानाः) एकप्रयोजनाः (द्यौः) प्रकाशः (आपः) जलानि (वैद्युतः) विविधप्रकाशयुक्तः (त्रिवृत्) त्रिषु कर्मोपासनाज्ञानेषु वर्तमान. (उष्णिक्ककुब्भ्याम्) ऋत्विग्दधृक्स्रक्० (पा० ३। २। ५९) उत्+ष्णिह प्रीतौ—स्नेहने च—क्विन्। क+ष्कुम्भु रोधने

[आत्मा संबन्धी ज्ञान] वाणी और यजुर्मन्त्रों का [अध्यात्म] प्राण कहा गया है, सामवेद का [अध्यात्म] दो आखें, और भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] का मन [अध्यात्म] कहा गया है । ६ । (ऋग्भिः सह गायत्रं जागतम् आहुः, यजूंषि त्रैष्टुभेन सह जज्ञिरे, उष्णिक्ककुब्भ्यां भृग्वङ्गिरसः, जगत्या सामानि कवयः वदन्ति १०) ऋग्वेद मन्त्रों के सहित गाने योग्य जगत् उपकारक कर्म को वे कहते हैं, यजुर्मन्त्र त्रैष्टुभ [तीन कर्म उपासना ज्ञान के धारण सामर्थ्य] के सहित उत्पन्न हुये, दो उष्णिक् [अति प्रीति] और ककुभ् [सुख धारण करने वाले शस्त्रों] के सहित भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] को और जगती [जगत् उपकारक विद्या] के सहित साम मन्त्रों [मोक्षज्ञानों] को बुद्धिमान् कहते हैं । १० । (ऋग्भिः पृथिवीं यजुषा अन्तरिक्षं साम्ना दिवम्, अथर्वभिः अङ्गिरोभिः च गुप्तः चतुष्पात् लोकजित् सोमजम्भाः यज्ञः दिवम् उद्वहेत ११) ऋग्मन्त्रों से पृथिवी [विद्या] को, यजुर्वेद से अन्तरिक्ष [मध्यलोक विद्या] को, और सामवेद से सूर्य [विद्या] को [मनुष्य पावे], और अथर्व अङ्गिराओं [निश्चल ब्रह्म के अथर्ववेद मन्त्रों] से रक्षा किया गया, चतुष्पाद [चारों वेदों से चार पांव वाला], संसार को जीतने वाला, सोम [अमृत] का भोग कराने वाला यज्ञ स्वर्ग को चढ़ावे । ११ । (ऋग्भिः सुशस्तः यजुषा परिष्कृतः सामजित् सविष्टुतः, अथर्वभिः अङ्गिरोभिः च गुप्तः चतुष्पात् सोमजम्भाः यज्ञः दिवम् आरुरोह १२) ऋग्वेद मन्त्रों से भले प्रकार प्रशंसा किया हुआ, यजुर्वेद से प्रस्तुत किया हुआ और मोक्ष प्राप्त कराने वाले [सामवेद] से विविध स्तुति वाला [यज्ञ होवे], और अथर्व अङ्गिराओं [निश्चल ब्रह्म के अथर्ववेदमन्त्रों] से रक्षा किया गया, चतुष्पाद [चारों वेदों से चार पांव वाला], सोम [अमृत] का भोग कराने वाला यज्ञ स्वर्ग को चढ़ावे । १२ ।

(ऋचः विद्वान् सम्प्रति पृथिवीं, यजूंषि विद्वान् बृहत् अन्तरिक्षं वेद, सामगः यः विपश्चित् दिवं वेद, यत् भृग्वङ्गिरोवित् सर्वान् लोकान् १३) ऋग्मन्त्रों को जानने वाला ठीक प्रत्यक्ष पृथिवी को, यजुर्वेद मन्त्रों को जानने वाला बड़े अन्तरिक्ष [मध्यलोक] को जानता है, साम गाने वाला जो विद्वान् है वह सूर्यलोक को जानता है, और जो भृगु अङ्गिराओं [परिपक्व ज्ञानवाले चारों वेदों] का जानने वाला है वह सब लोकों को [जानता] है । १३ । (यान् च नानार्थान् मन्त्रान् ग्रामे यान् च अरण्ये जनामः बहुधा जपन्ति, ते सर्वे यज्ञाः अङ्गिरसो अपि यन्ति, ब्रह्मणः सा हि गतिः नूतना या अवराध्या १४) और जिन अनेक अर्थ वाले मन्त्रों को ग्राम में और जिनको वन में लोग प्रायः जपते हैं, वे सब यज्ञ अङ्गिराओं [वेदज्ञानियों] को प्राप्त होते हैं, ब्रह्म

धारणे च सौत्रधातुः—क्विप् । अतिप्रीतिसुखधारणशस्त्राभ्याम् (जगत्या) जगदुपकारकक्रियया (कवयः) मेधाविनः (सोमजम्भाः) क० २४ । सोमभक्षणकारकः (दिवम्) स्वर्गम् । सूर्यम् (उद्वहेत) प्रापयेत (सुशस्त) सुप्रशंसितः (आरुरोह) आरोहयत् (विद्वान्) विद्वन् । जानन् (सम्प्रति) सम्यक् प्रत्यक्षम् (ब्रह्मणः) ब्रह्मज्ञानस्य (अवराध्या) अवर+अर्ध—यत् ।

[वेद वा परमात्मा] की वह ही गति नवीन है जो पिछले काल में वर्तमान [थी] १४ ॥ ([1]त्रिविष्टपं त्रिदिवं तम् उत्तमं नाकम् एतया त्रय्या विद्यया एति, अतः उत्तरे महान्तः ब्रह्मलोकाः अथर्वणाम् अङ्गिरसां च सा गतिः, अथर्वणाम् अङ्गिरसां च सा गतिः, इति ब्राह्मणम् १५) इसलिये जो उत्कृष्ट और बड़े ब्रह्मलोक [ब्रह्मवादियों के स्थान] हैं, अथर्व अङ्गिराओं [चारों वेद जानने वालों] की ही वह गति है, अथर्व अङ्गिराओं [चारों वेद जानने वालों] की ही वह गति [पहुँच] है—यह ब्राह्मण [ब्रह्मज्ञान] है । १५ । ॥ २५ ॥

भावार्थः—मनुष्यों को चाहिये कि वेदों द्वारा यज्ञों का विधान करके आत्मोन्नति करें ॥ २५ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाड़ाधिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे पंचमः प्रपाठकः समाप्तः ॥

समाप्तमिदं गोपथब्राह्मणम् पूर्वार्धम् ॥

अयं प्रपाठकः प्रयागनगरे आश्विनमासे शुक्लदशम्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—श्रावणशुक्ला ५ संवत् १९८१ वि० ता० ५ अगस्त सन् १९२४ ई० ॥

अवरार्धे पश्चात्काले भवा । अर्धः खण्डे तुल्यांशे च (त्रिविष्टपम्) विटपविष्टपविशिपोलपाः (उ० ३ । १४५) त्रि + विश प्रवेशने—कपन्, प्रत्ययस्य तुट् च । त्रीणि शारीरिकात्मिकसामाजिकसुखानि विशन्ति यत्र तम् (त्रिदिवम्) इगुपधत्वात् दिवु व्यवहारादिषु-कः । त्रयाणां धर्मार्थकामानां व्यवहारो यस्मिन् तम् (नाकम्) मोक्षसुखम् (त्रय्या) त्रि + अयच्, ङीप् । कर्मोपासनाज्ञानरूपया (एति) प्राप्नोति (अतः) अस्मात् कारणात् (उत्तरे) उत्कृष्टाः (ब्रह्मलोकाः) सत्यलोकाः । ब्रह्मवादिनः स्थानानि (च) अवधारणे ॥

१. पूर्व संकरण में "त्रिपिष्टपम्" यह भ्रष्ट पाठ था ॥ सम्पा० ॥

ओ३म्

अथर्ववेदस्य गोपथब्राह्मणम्

॥ उत्तरभागः ॥

—::o::—

प्रथमः प्रपाठकः ।

कण्डिका १ ॥

अथ यद् ब्रह्मसदनात्तृणं निरस्यति शोधयत्येवैनं तदथोपविशतीदमहमर्वाग्वसोः सदने सीदामीत्यर्वाग्वसुर्ह वै देवानां ब्रह्मा पराग्वसुरसुराणां तमेवैतत् पूर्वं सादयत्यरिष्टं यज्ञन्तनुतादित्यथोपविश्य जपति बृहस्पतिर्ब्रह्मेति बृहस्पतिर्वा आङ्गिरसो देवानां ब्रह्मा तस्मिन्नेवैतदनुज्ञामिच्छति प्रणीतासु प्रणीयमानासु वाचं यच्छत्या हविष्कृत उद्वादनादेतद्वै यज्ञस्य द्वारं तदेतदशून्यं करोतीष्टे च स्विष्टकृत्यानुयाजानां प्रसवादित्येतद्वै यज्ञस्य द्वितीयं द्वारं तदेवैतदशून्यं करोति यत् परिधयः परिधीयन्ते यज्ञस्य गोपीथाय परिधीन् परिधत्ते यज्ञस्य सात्मत्वाय परिधीन् संमार्ष्टि पुनात्येवैनं त्रिर्मध्यमं त्रय इमे प्राणाः प्राणानेवाभिजयति त्रिर्दक्षिणार्द्धं त्रयो वै लोका लोकानेवाभिजयति त्रिरुत्तरार्द्धं त्रयो वै देवलोका देवलोकानेवाभिजयति त्रिरुपवाजयति त्रयो वै देवयानाः पन्थानस्तानेवाभिजयति ते वै द्वादश भवन्ति द्वादश ह वै मासाः संवत्सरः संवत्सरमेव तेन प्रीणात्यथो संवत्सरमेवात्मा उपदधाति स्वर्गस्य लोकस्य समष्टचै ॥ १ ॥

कण्डिका १ ॥ यज्ञ में ब्रह्मा का आसन, प्रणीतापात्र और परिधियां ॥

(अथ यत् ब्रह्मसदनात् तृणं निरस्यति तत् एनम् एव शोधयति) अब जब ब्रह्मा के स्थान से तिनके को वह [यजमान] फेंकता है, वह तब इस [यज्ञगृह] को शुद्ध करता है। (अथ उपविशति, इदम् अहम् अर्वाक् वसोः सदने सीदामि इति, अर्वाग्वसुः ह वै देवानां ब्रह्मा, पराग्वसुः असुराणाम्) फिर वह [ब्रह्मा] बैठता है [इदम् अहम्...इति] यह मैं समीप वर्तमान यज्ञ के घर में बैठता हूँ—[वह यह ब्राह्मण

१—(ब्रह्मसदनात्) ब्रह्मणः प्रधानयाजकस्य गृहात् (अर्वाक्) समीपे (वसोः) यज्ञस्य (अर्वाग्वसुः) समीपनिवासी पुरुषः (देवानाम्) विदुषाम्

वचन बोलता है] समीपनिवासी पुरुष ही देवों [विद्वानों] का ब्रह्मा होता है और दूरनिवासी पुरुष असुरों का [ब्रह्मा होता] है। (एतत् तम् एव पूर्वं सादयति अरिष्टं यज्ञं तनुतात् इति) इससे उसको ही पहिले वह [यजमान] बिठलाता है—वह निर्विघ्न यज्ञ को विस्तृत करे। (अथ उपविश्य जपति, बृहस्पतिः ब्रह्मा इति) फिर वह बैठकर [यह ब्राह्मण वचन] जपता है—बृहस्पति [बड़ी बड़ी विद्याओं का स्वामी] ब्रह्मा है। (आङ्गिरसः बृहस्पतिः वै देवानां ब्रह्मा, तस्मिन् एव एतत् अनुज्ञाम् इच्छति) आङ्गिरस [चारों वेद जानने वाला] बृहस्पति विद्वानों का ब्रह्मा है, उस [ब्रह्मा] में ही वह [यजमान] यह नियम चाहता है। (प्रणीतासु प्रणीयमानासु हविष्कृतः आ उद्वादनात् वाचं यच्छति) प्रणीताओं [यज्ञ में जलपात्रों] के लाये जाने पर हविष्कृत [हवि की आहुति मन्त्र] के उच्चारण तक वह [ब्रह्मा] वाणी को रोकता है। (एतत् वै यज्ञस्य द्वारं तत् एतत् अशून्यं करोति) यही यज्ञ का द्वार है, सो इसको वह अशून्य [परिपूर्ण वा निर्विघ्न] करता है। (स्विष्टकृति इष्टे च अनुयाजानाम् आ प्रसवात् इति एतत् वै यज्ञस्य द्वितीयं द्वारं तत् एव एतत् अशून्यं करोति) और स्विष्टकृत् [आहुति] दिये जाने पर अनुयाजों की उत्पत्ति तक [वाणी को रोकता है], यह ही यज्ञ का दूसरा द्वार है, सो इसको वह अशून्य [निर्विघ्न] करता है। (यत् परिधयः परिधीयन्ते यज्ञस्य गोपीथाय परिधीन् परिधत्ते) जो परिधियें [घेरे] चारों ओर किये जाते हैं, यज्ञ की भूमि की रक्षा के लिये वह परिधियों को रखता है। (यज्ञस्य सात्मत्वाय परिधीन् संमार्ष्टि) और यज्ञ की चैतन्यता के लिये परिधियों को मार्जन करता है। (एनं मध्यमम् एव त्रिः पुनाति, त्रयः इमे प्राणाः, प्राणान् एव अभिजयति) इस मध्यम [परिधि] को तीन बार वह शुद्ध करता है, [प्राण, अपान, उदान,] तीन प्राण हैं, प्राणों को ही वह जीतता है। (दक्षिणार्धं त्रिः, त्रयः वै लोकाः लोकान् एव अभिजयति) दाहिने भाग को तीन बार [वह शुद्ध करता है], तीन ही लोक [स्थान, नाम, जन्म वा जाति, तीन धाम—निरु० ६। २८] हैं, लोकों को ही वह जीतता है। (उत्तरार्धं त्रिः, त्रयः वै देवलोकाः, देवलोकान् एव अभिजयति) उत्तर भाग को तीन बार [वह शुद्ध करता है], तीन ही [पृथिवी,

---

(परागवसुः) दूरनिवासी पुरुषः (तम्) ब्रह्माणम् (अरिष्टम्) रिष हिंसायां—क्तः। अहिंसितं निर्विघ्नम् (तनुतात्) विस्तारयेत् (बृहस्पतिः) बृहतीनां विद्यानां पालकः (आङ्गिरसः) चतुर्वेदवेत्ता (अनुज्ञाम्) नियमम् (प्रणीतासु) यज्ञे जलपात्रविशेषेषु (यच्छति) नियमयति (आ) मर्यादायाम् (उद्वादनात्) उच्चारणात् (अशून्यम्) अहीनम्। परिपूर्णम् (प्रसवात्) निष्पादनात् (परिधयः) वेष्टनानि (गोपीथाय) निशीथगोपीथावगथाः। (उ० २। ६) गो+पा रक्षणे पा पाने वा—थक्। घुमास्थागापाजहातिसां हलि (पा० ६। ४। ६६) आकारस्य ईत्वम्। भूमिरक्षणाय। जलाशयाय (सात्मत्वाय) सजीवनत्वाय। वृद्धिकरणाय (संमार्ष्टि) सम्यक् शोधयति (मध्यमम्) मध्ये वर्तमानं खण्डम् (त्रिः) त्रिवारम् (दक्षिणार्धम्) दक्षिणभागम् (उत्तरार्धम्) उत्तरभागम् (उप)

अन्तरिक्ष, द्युलोक] देवलोक हैं, देवलोकों को ही वह जीतता है । (त्रिः उप वा जयति, त्रयः वै देवयानाः पन्थानः तान् एव अभि जयति) और तीन बार समीप वाले [भाग] को वह जीतता है [शुद्ध करता है], तीन [कर्म, उपासना, ज्ञान,] ही विद्वानों के चलने योग्य मार्ग हैं, उनको ही वह जीतता है । (ते वै द्वादश भवन्ति, द्वादश ह वै मासाः सवत्सरः) वे [सब] ही बारह हैं बारह ही महीने संवत्सर है । (तेन संवत्सरम् एव प्रीणाति, अथो आत्मा संवत्सरम् एव स्वर्गस्य लोकस्य समष्ट्यै उपदधाति) उस [कर्म] से ही संवत्सर को संतुष्ट करता है, और आत्मा [यह जीवात्मा] संवत्सर [समय] को ही स्वर्गलोक की प्राप्ति के लिये उपकारी कर्ता है ।। १ ।।

भावार्थः—प्राण आदि चार त्रिक बारह महीने वा संवत्सर अर्थात् समय के सूचक हैं । मनुष्य समय को उपयोगी बनाकर संसार में सुख भोगें ।।

कण्डिका २ ।।

प्रजापतिर्वै रुद्रं यज्ञान्निरभजत् सोऽकामयत मेऽयमस्मा आकूतिः समृद्धिर्यो मा यज्ञान्निरमाक्षीदिति । स यज्ञमभ्यायम्याविध्यत्तदाविद्धं[1] निरकृन्तत् तत् प्राशित्रमभवत्तदुदयकृत्तद्भगाय पर्य्यहरंस्तत्प्रत्यैक्षत[2] । तस्य चक्षुः परापतत् तस्मादाहुरन्धो वै भग इत्यपि ह तं नेच्छेद्यमिच्छति तत् सवित्रे पर्य्यहरंस्तत् प्रत्यगृह्णात् तस्य पाणी [3]प्रचिच्छेद तस्मै हिरण्मयौ प्रत्यदधुस्तस्माद्धिरण्यपाणिरिति स्तुतस्तत्पूष्णे पर्य्यहरंस्तत् प्राशनात्तस्य दन्ताः परोप्यन्त तस्मादाहुरदन्तकः पूषा पिष्टभाजन इति तदिध्मायाङ्गिरसाय पर्य्यहरंस्तत् प्राशनात्तस्य शिरो व्यपतत् त यज्ञ एवाकल्पयत् स एष इध्मः समिधो ह पुरातनस्तद्बर्हिय आङ्गिरसाय पर्य्यहरंस्तत्प्राशनात्तस्याङ्गा पर्वाणि व्यस्रंसन्त[4] तं यज्ञ एवाकल्पयतदेतद्बर्हिः प्रस्तरो ह पुरातनस्तद्बृहस्पतय आङ्गिरसाय पर्य्यहरन् सोऽबिभेत् बृहस्पतिरित्थं वाव मार्त्तिमाक्ष्यतीति[5] स एतं मन्त्रमपश्यत् सूर्य्यस्य त्वा चक्षुषा प्रतीक्ष इत्यब्रवीन्न हि सूर्य्यस्य चक्षुः किञ्चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तं मा हिंसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामीत्यब्रवीत्सवितृप्रसूत एवैन तद्देवताभिः प्रत्यगृह्णात्तद्व्यूह्य तृणानि प्राग्दण्डं स्थण्डिले निदधाति पृथिव्यास्त्वा नाभौ सादयामीति पृथिवी वान्नानां शमयित्री तयैवैतच्छमयाञ्चकार सोऽबिभेत्प्राश्नन्तं मा हिंसिष्यतीत्यग्नेष्ट्वास्येन प्राशना-

---

उपार्धम् । समीपभागम् (जयति) पुनाति—इत्यर्थः (प्रीणाति) संतोषयति (आत्मा) जीवात्मा (उपदधाति) उपकरोति (समष्टचै) सम् + अशूङ् व्याप्तौ—क्तिन् । सम्यक् प्राप्तये ।।

---

१. पू. सं. 'आविध्य' इति पाठः ।।   २. पू. सं. 'प्रतीऐत' इति पाठः ।।

३. पू. सं. 'प्रतिच्छेद' इति पाठः ।।   ४. पू. सं. 'व्यश्रंसन्त' इति पाठः ।।

५. पू. सं. 'करिष्यसि' इति पाठः ।। सम्पा० ।।

मीत्यब्रवीन्नह्यग्नेरास्यं किञ्चन हिनस्ति सोऽबिभेत् प्राशितं मा हिंसिष्यतीतीन्द्रस्य त्वा जठरे सादयामीत्यब्रवीन्नहीन्द्रस्य जठरं किञ्चन हिनस्ति वरुणस्योदर इति नहि वरुणस्योदरं किञ्चन हिनस्तीति ॥ २ ॥

कण्डिका २ ॥ प्रजापति का रुद्र को भागशून्य करना, प्राशित्र का वर्णन, भग सविता आदि का अङ्गभङ्ग होना और बृहस्पति वा ब्रह्मा का शान्त करना ॥

(प्रजापतिः वै रुद्रं यज्ञात् निरभजत्) प्रजापति [प्रजापालक जीवात्मा] ने रुद्र [गति वा ज्ञान देने वाले परमेश्वर] को यज्ञ [संगति दिये हुये शरीर] से भाग रहित कर दिया। (सः अकामयत मा इयम् आकूतिः समृद्धिः अस्मै, यः मा यज्ञात् निरमाक्षीत् इति) उस [रुद्र] ने इच्छा की—[मुझको] मेरा यह संकल्प और समृद्धि इस [प्रजापति] के लिये हैं, जिसने मुझे यज्ञ से क्रोध करके निकाल दिया है। (तत् सः यज्ञम् अभ्यायम्य आविध्यत् आविद्धं निरकृन्तत् तत् प्राशित्रम् अभवत्) तब उस [रुद्र] ने यज्ञ को पकड़ कर छेद कर दिया और छिदे हुये को काट डाला, वह [यज्ञ वा शरीर] प्राशित्र [खाने योग्य अन्न] हो गया। (तत् उदयकृत् भगाय तत् पर्य्यहरन्) तब उदयकृत् [उदय वा यज्ञ करने वाले प्रजापति] ने भग [सेवनीय धन वा ऐश्वर्य] को वह [प्राशित्र] लाकर दिया। (तत् प्रत्यैक्षत) उस [भग] ने उसे देखा। (तस्य चक्षुः परापतत् तस्मात् आहुः अन्धः वै भगः इति, अपि ह तं छेद्यं नेत् इच्छति) उसकी आंख गिर पड़ी इससे कहते हैं—भग अन्धा है—उसने नष्ट किये हुये और छिदे हुये को न ग्रहण किया। (तत् सवित्रे पर्यहरन्) वह सविता [लोक प्रेरक सूर्य] को उसने

२—(प्रजापतिः) प्रजापालकः। जीवात्मा (रुद्रम्) रु गतौ शब्दे च—क्विप् तुक् आगमः। मत्वर्थीयो रः, अथवा रा दाने—कः। रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा। स च मध्यस्थानदेवता—निरु० १० । ५ । वायुम्। प्राणगतिदातारं परमात्मानम् (यज्ञात्) संगतिकृतात् शरीरात् (निरभजत्) भागशून्यम् अकरोत् (आकूतिः) सङ्कल्पः (निरमाक्षीत्) मश रोषे—लुङ् दीर्घः। रोषेण बहिष्कृतवान् (अभ्यायम्य) परिगृह्य (आविध्यत्) आ+व्यध ताडने—लङ्। अच्छिदत् (आविद्धम्) आच्छिन्नम् (निरकृन्तत्) कृती छेदने—लङ्। सर्वथा छिन्नवान् (प्राशित्रम्) अशित्रादिभ्य इत्रोत्रौ (उ० ४ । १७३) अशूङ् व्याप्तौ -अश भोजने वा—इत्रः। भक्षणीयम्। अन्नम्। चरुम् (उदयकृत्) उत्पत्तिकर्ता। प्रजापतिः (भगाय) पुंसि संज्ञायां घः प्रायेण (पा० ३ । ३ । ११८) यद्वा। खनो घ च (पा० ३ । ३ । १२५) भज सेवायाम्—घः। भगः, धननाम—निघ० २ । १०। पदनाम—निघ० ५ । ६। सेवनीयाय। यशसे। ऐश्वर्याय (पर्य्यहरन्) पर्य्यहरत्। पर्य्यानीतवान् (प्रत्यैक्षत) प्रति ईक्ष दर्शने लङ्। प्रत्यक्षेण ईक्षितवान्। दृष्टवान् (नेत्) निषेधे (छेद्यम्) छिन्नम् (सवित्रे) लोकप्रेरकाय सूर्याय (पूष्णे) श्वन्नुक्षन्पूषन्० (उ० १ । १५९)

लाकर दिया। (तत् प्रत्यगृह्णात्) वह उस [सविता] ने ले लिया। (तस्य पाणी प्रचिच्छेद) उसके दोनों हाथ कट पड़े। (तस्मै हिरण्मयौ प्रत्यदधुः) उसके दोनों [हाथ] सोने के बने हुये उन्होंने लगा दिये। (तस्मात् हिरण्यपाणिः इति स्तुतः) इसलिये—वह सोने के हाथ वाला है—ऐसा स्तुति किया जाता है। (तत् पूष्णे पर्यहरन्) उसे पूषा [वृद्धि वा पुष्टि करने वाली पृथिवी] को उसने लाकर दिया। (तत् प्राश्नात्) वह उसने खाया। (तस्य दन्ताः परोप्यन्त) उसके दांत गिर पड़े। (तस्मात् आहुः अदन्तकः पूषा पिष्टभाजनः इति) इसलिये लोग कहते हैं—विना दांत वाला पूषा पिष्ट [पिसे हुये पिट्ठी आदि अन्न] के योग्य है। (तत् अङ्गिरसाय इध्माय पर्यहरन्) उसे आङ्गिरस [विद्वानों के हितकारक] इध्म [अग्नि प्रदीप्त करने वाले इन्धन] को उसने लाकर दिया। (तत् प्राश्नात्) उसे उसने खा लिया। (तस्य शिरो व्यपतत्) उसका सिर गिर पड़ा। (तं यज्ञे एव अकल्पयत्) उस [प्राशित्र] को यज्ञ में ही उसने समर्थ किया [पहुँचाया]। (सः एषः इध्मः पुरातनः ह समिधः) वही यह इध्म पहिले का समिध [काष्ठ] है। (तत् आङ्गिरसाय बर्हिषे पर्यहरन्) उसे आङ्गिरस [विद्वानों के हितकारक] बर्हि [आकाश वा जल] को उसने लाकर दिया। (तत् प्राश्नात्) वह उसने खा लिया। (तस्य अङ्गाः पर्वाणि व्यस्रंसन्त) उसके अङ्ग और जोड़ खिसक पड़े। (तं यज्ञे एव अकल्पयत्) उस [प्राशित्र] को यज्ञ में ही समर्थ किया [पहुंचाया]। (तत् एतत् बर्हिः पुरातनः ह प्रस्तरः) वह ही यह बर्हि पुरातन प्रस्तर [फैला हुआ पदार्थ वा पत्थर] है। (तत् आङ्गिरसाय बृहस्पतये पर्यहरन्) उसे आङ्गिरस [चारों वेद जानने वाले] बृहस्पति [बड़ी विद्याओं के स्वामी] को उसने लाकर दिया। (सः बृहस्पतिः अबिभेत्, इत्थं वाव मा आर्तिम् आक्ष्यति इति) वह बृहस्पति डरा—इस प्रकार से ही वह मुझे पीड़ा करेगा। (सः एतं मन्त्रम् अपश्यत् अब्रवीत्, सूर्यस्य चक्षुषा त्वा प्रतीक्षे इति)

पूष वृद्धौ अथवा पुष पुष्टौ—कनिन्। पूषा पृथिवीनाम—निघ० १। १। पदनाम—निघ० ५। ६ पृथिव्यै (परोप्यन्त) परा+डुवप छेदने बीजसन्ताने च—कर्मणि लङ्। छिन्ना अभवन् (दन्ताः) हसिमृग्रिण्वामिदमि० (उ० ३। ८६) दमु उपशमे दमने च—तन्। दशनाः (पिष्टभाजनः) पिष्ट+भाज पृथक्-करणे—ल्युट्। पिष्टस्य चूर्णितस्य पिष्टकस्य योग्यः (इध्माय) इषि युधीन्धिदसि० (उ० १। १४५) ञिइन्धी दीप्तौ—मक्। इध्मः पदनाम—निघ० ५। ६। इध्मः समिन्धनात्—निरु० ८। ४। अग्निसन्दीपनाय काष्ठाय (आङ्गिरसाय) अङ्गिरसे वेदज्ञात्रे हिताय (बर्हिषे) सर्वधातुभ्य इन् (उ० ४। ११८) बृहि वृद्धौ—इन् नलोपः। बर्हिः, अन्तरिक्षम्—निघ०—१। ३। उदकम्—निघ० १। १२। बर्हिः परिबर्हणात्—निरु० ८। ८। आकाशाय। जलाय (व्यस्रंसन्त) स्रंसु अधःपतने—लङ्। अधोऽपतन् (प्रस्तरः) विस्तृतः पाषाणः (बृहस्पतये) बृहतीनां विद्यानां पालकाय। ब्रह्मणे (आङ्गिरसाय) चतुर्वेदवेत्त्रे (आर्तिम्) पीडाम् (आक्ष्यति) समन्तात् करिष्यति (सूर्यस्य) सर्वप्रेरकस्य परमेश्वरस्य दत्तेन (चक्षुषा) दर्शनसामर्थ्येन

उसने इस मन्त्र को देखा [विचारा] और कहा—(सूर्यस्य ·········प्रतीक्षे) सूर्य [सर्वप्रेरक परमात्मा] के [दिये] चक्षु [दर्शन सामर्थ्य] से तुझको देखता हूं [यह ब्राह्मण वचन है] । (सूर्यस्य चक्षुः किञ्चन नहि हिनस्ति) सूर्य [परमात्मा] के दर्शन सामर्थ्य को कोई भी नहीं नष्ट करता है । (सः अबिभेत्, प्रतिगृह्णन्तं मा हिंसिष्यति इति) वह डरा—ग्रहण करते हुये मुझको यह नष्ट कर देगा । (त्वा देवस्य सवितुः प्रसवे अश्विनोः बाहुभ्यां पूष्णः हस्ताभ्यां प्रशिषा प्रसूतः प्रतिगृह्णामि इति अब्रवीत्) तुझको प्रकाशमान सविता [सर्वोत्पादक परमेश्वर] के बड़े ऐश्वर्य के बीच, दोनों अश्वियों [सब विद्याओं में व्याप्त माता पिता] के दोनों भुजाओं से और पूषा [पोषक आचार्य] के दोनों हाथों और शिक्षा से प्रेरणा किया हुआ मैं ग्रहण करता हूं—यह [यह मन्त्र कुछ भेद से अथर्व० १६ । ५१ । २ । और यजु० २ । ११ का है ।] वह बोला । (सवितृप्रसूतः एव एनं तत् देवताभिः प्रत्यगृह्णात्) सविता [परमात्मा] से प्रेरणा किये हुये उसने ही इस [प्राशित्र] को देवताओं के सहित ग्रहण किया । (तत् प्राक् तृणानि व्यूह्य स्थण्डिले दण्डं निदधाति, त्वा पृथिव्याः नाभौ सादयामि इति) तब पहिले तृणों को ठीक करके चौरस स्थान पर दण्डे को वह गाड़ता है—तुझको पृथिवी की नाभि में मैं स्थापित करता हूं [यजुर्वेद १ । ११ का भाग है] । (पृथिवी वा अन्नानां शमयित्री, तया एव एतत् शमयांचकार) और पृथिवी [सब का विस्तार करने वाला परमात्मा] ही अन्नों का शमन करने वाला है, उसके ही द्वारा इसको उसने शान्त किया । (सः अबिभेत् प्राश्नन्तं मा हिंसिष्यति इति) वह डरा—मुझ खाते हुये को यह मार डालेगा । (त्वा अग्नेः आस्येन प्राश्नामि इति अब्रवीत्) तुझको अग्नि [सर्व प्रकाशक परमेश्वर] के [दिये हुये] मुख से मैं खाता हूं—[यह मन्त्र यजु० २ । ११ का अन्तिम पाद] वह बोला । (अग्नेः आस्यं किंचन नहि हिनस्ति) अग्नि [परमात्मा] के [दिये हुये] मुख को कोई नहीं नष्ट करता है । (सः अबिभेत् प्राशितं मा हिंसिष्यति इति) वह डरा—खाया हुआ [प्राशित्र] मुझे मार डालेगा । (त्वा इन्द्रस्य जठरे सादयामि इति अब्रवीत्) तुझको इन्द्र के [परम ऐश्वर्यवान् परमेश्वर के दिये हुये] जठर [कोख] में रखता हूं—यह [ब्राह्मण वचन] वह बोला ।

(प्रतीक्षे) प्रत्यक्षं पश्यामि (हिनस्ति) नाशयति (देवस्य) प्रकाशमानस्य (सवितुः) सर्वोत्पादकस्य । परमेश्वरस्य (प्रसवे) प्रकृष्टैश्वर्य्ये (अश्विनोः) सकलविद्याव्याप्त्योर्मातापित्रोः (बाहुभ्याम्) भुजयोः सकाशात् (पूष्णः) पोषकस्य । आचार्य्यस्य (हस्ताभ्याम्) करयोः सकाशात् (प्रसूतः) प्रेरितः (प्रशिषा) शासु अनुशिष्टौ-क्विप् । प्रकृष्टशासनेन (प्रतिगृह्णामि) स्वीकरोमि (व्यूह्य) विविधं समूह्य (प्राक्) प्रथमम् (स्थण्डिले) मिथिलादयश्च (उ० १ । ५७) ष्ठल स्थाने--इलच्, नुक्, लस्य डः । यथार्थं समीकृते प्रदेशे (पृथिव्याः) भूमेः (नाभौ) नहो भश्च (उ० ४ । १२६) णह बन्धने—इञ्, हस्य भः । मध्यस्थाने (सादयामि) स्थापयामि (पृथिवी) प्रथेः षिवन्षवन्ष्वनः सम्प्रसारणं च (उ० १ । १५०) प्रथ प्रख्याते विस्तारे च—षिवन् । ङीष् । सर्वविस्तारकः परमेश्वरः (अग्नेः) भौतिकस्य पावकस्य

(इन्द्रस्य जठरं किञ्चन नहि हिनस्ति) इन्द्र [परमात्मा] के [दिये] जठर को कोई नहीं नष्ट करता है। (वरुणस्य उदरे इति) वरुण [सबसे श्रेष्ठ परमात्मा] के [दिये हुये] उदर में [तुझे मैं रखता हूँ—यह ब्राह्मण वचन उसने कहा]। (वरुणस्य उदरं किचन नहि हिनस्ति इति) वरुण [परमात्मा] के [दिये] उदर को कोई नहीं नष्ट करता है ॥ २ ॥

भावार्थः—यहाँ प्रजापति प्रजारूप शरीर के अवयवों का पालने वाला जीवात्मा है, रुद्र सर्वज्ञ सर्वकर्ता परमात्मा और यज्ञ परमाणुओं के संयोग से बना हुआ शरीर है॥ प्रजापति के रुद्र को यज्ञ से अलग करने पर भग, सविता, पूषा, इध्म और बर्हि, यह पाँचों तत्त्व अपना अपना कर्म करने में असमर्थ होते हैं। ज्ञानी पुरुष ही परमात्मा की सत्ता को सब के भीतर काम करता हुआ देखता है ॥ २ ॥

विशेषः १—इस कण्डिका में उस पौराणिक कथा का मूल सा भान होता है जिसमें दक्ष वा प्रजापति ने शिव वा रुद्र को भाग न दिया था। शिव की स्त्री सती उस यज्ञ में भस्म हो गयी, शिव के गणों ने यज्ञ को और दक्ष को विध्वंस कर दिया, उपस्थित देवता घायल हुये। फिर शिव का क्रोध विष्णु के बीच में पड़ने से शान्त हुआ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित दिये जाते हैं—

१—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आरभे—अथ० १६। ५१। २, भेद से यजु० २। ११ तथा २०। ३॥ [हे शूर !] (देवस्य) प्रकाशमान, (सवितुः) सर्वोत्पादक [परमेश्वर] के (प्रसवे) बड़े ऐश्वर्य के बीच, (अश्विनोः) सब विद्याओं में व्याप्त दोनों [माता पिता] के (बाहुभ्याम्) दोनों भुजाओं से और (पूष्णः) पोषक [आचार्य] के (हस्ताभ्याम्) दोनों हाथों से (प्रसूतः) प्रेरणा किया हुआ मैं (त्वा) तुझको (आरभे) ग्रहण करता हूं।

२- देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि--यजु० २। ११॥ [हे अन्न !] (देवस्य) हर्ष देने वाले (सवितुः) और सबके उत्पन्न करने वाले परमेश्वर के [उत्पन्न किये हुये] (प्रसवे) संसार में विद्यमान (त्वा) तुझ [भक्ष्य पदार्थ] को (अश्विनोः) प्राण और अपान के (बाहुभ्याम्) आकर्षण और धारण गुणों से तथा (पूष्णः) पुष्टिकारक समान वायु के (हस्ताभ्याम्) शोधन और शरीर के अङ्ग अङ्ग में पहुँचाने के गुण से (प्रतिगृह्णामि) अच्छे प्रकार ग्रहण करता हूं, (अग्नेः) प्रज्वलित अग्नि के बीच में पकाकर (त्वा) तुझ [भक्ष्य पदार्थ] को (आस्येन) अपने मुख से (प्र अश्नामि) भोजन करता हूं॥

पावकस्य परमेश्वरस्य (आस्येन) असु क्षेपणे—ण्यत्। मुखेन (प्राशितम्) प्रकर्षेण भक्षितम् (इन्द्रस्य) ईश्वरस्य दत्ते–इति शेषः (जठरे) कुक्षौ (वरुणस्य) वरणीयस्य। सर्वोत्कृष्टस्य (उदरे) उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च (उ० ५। १६) उत्+दृ विदारणे —अल् अच् वा, उत् इत्यस्य तलोपः। नाभिस्तनयोर्मध्यभागे॥

कण्डिका ३ ॥

अथो आहुर्ब्राह्मणस्योदर इत्यात्माऽस्यात्मनाऽऽत्मानं मे मा हिंसीः स्वाहेत्यन्नं वै सर्वेषां भूतानामात्मा तेनैवैतच्छमयाञ्चकार प्राशित्रमनुमन्त्रयते । योऽग्निर्नृमणा नाम ब्राह्मणेषु प्रविष्टः तस्मिन् म एतत् सुहुतमस्तु प्राशित्रं तन्मा मा हिंसीत् परमे व्योमन्निति तत्सर्वेण ब्रह्मणा प्राश्नात्तत एनं माहिनत्तस्माद्यो ब्रह्मिष्ठः स्यात्तं ब्रह्माणं कुर्वीत बृहस्पतिर्वै सर्वं ब्रह्म सर्वेण ह वा एतद् ब्रह्मणा यज्ञं दक्षिणत उद्यच्छतेऽप एव वा एतस्मात् प्राणाः क्रामन्ति य आविद्धं प्राश्नात्यद्भिर्मार्जयित्वा प्राणान् संस्पृशते वाङ् म आस्यं नित्यमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुपाह्वयते तदु हैक आहुरिन्द्राय पर्यहरन्निति ते देवा अब्रुवन्निन्द्रो वै देवानामोजिष्ठो वलिष्ठस्तस्मा एतत्परिहरन्तीति तत्तस्मै पर्यहरंस्तत्सद् ब्रह्मणा शमयाञ्चकार तस्मादाहुरिन्द्रो ब्रह्मेति यवमात्रं भवति यवमात्रं वै विषस्य न हिनस्ति यदधस्तादभिघारयति तस्मादधस्तात् प्रक्षरणं प्रजा अरुर्न हिनस्ति यदुपरिष्टादभिघारयति तस्मादुपरिष्टात् प्रक्षरणं प्रजा अरुर्न हिनस्ति यदुभयतोऽभिघारयत्युभयतोऽभिघारि प्रजा अरुर्घातुकं स्याद्यत्सम[1]याभिहरेदनभिविद्धं यज्ञस्याभिविध्येत् ॥ ३ ॥

कण्डिका ३ ॥ प्राशित्र [अन्न] का विधान ॥

(अथो आहुः, ब्राह्मणस्य उदरे + त्वासादयामि--क० २ इति । आत्मा असि आत्मना मे आत्मानं मा हिंसीः स्वाहा इति) फिर वे [ऋषि] कहते हैं --ब्राह्मण [ब्रह्मज्ञानी] के पेट में [तुझ प्राशित्र को रखता हूं—क० २, यह मन्त्र], हे प्राशित्र ! तू आत्मा [अन्न] है, तू आत्मा [अन्न के कुप्रयोग] से मेरे आत्मा [जीवात्मा] को मत सता, यह स्वाहा [सुन्दर वचन] है [और यह दो मन्त्र वे बोलते हैं] । (अन्नं वै सर्वेषां भूतानाम् आत्मा, तेन एव एतत् प्राशित्रं शमयांचकार अनुमन्त्रयते) अन्न ही सब प्राणियों का आत्मा [जीवन] है, उससे ही इस प्राशित्र [अन्न] को वह शान्त करता है और मन्त्र के अनुकूल करता है । (यः नृमणाः नाम अग्निः ब्राह्मणेषु प्रविष्टः, तस्मिन् मे एतत् प्राशित्रं सुहुतम् अस्तु, तत् मा परमे व्योमन् मा हिंसीत् इति) जो नृमणा [मनुष्यों के हित के लिये ज्ञान वाला] नाम अग्नि [जठराग्नि] ब्रह्मज्ञानियों में प्रविष्ट है, उस [अग्नि में मेरा यह प्राशित्र [अन्न] अच्छे प्रकार होम किया गया होवे, वह [अन्न] मुझको उत्तम विविध रक्षा स्थान में [रख कर] न मारे [वह इस ब्राह्मण वचन को पढ़ता है] । (तत् सर्वेण ब्रह्मणा प्राश्नात् ततः एनं मा अहिनत्) उसको

३--(अनुमन्त्रयते) मन्त्रेण अनुकूलं करोति (नृमणाः) नयतेर्डिच्च (उ० २ । १००) णीञ् प्रापणे--ऋः, डित् । गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च (उ० ४ । २२७) नृ + मनु अवबोधने--असिः । छन्दस्यृदवग्रहात् (पा० ८ । ४ । २६) इति णत्वम् । नृभ्यो मनुष्याणां हिताय बोधनं यस्य सः (परमे) उत्तमे (व्योमन्) नामन्सीमन्व्योमन्० (उ० ४ । १५१) वि + अव रक्षणे--मनिन् सप्तमी-

---

१. पू. सं. 'शमया' इति पाठः ॥ सम्पा० ॥

सम्पूर्ण ब्रह्मज्ञान से खावे, इसलिये इसको वह न मारे। (तस्मात् यः ब्रह्मिष्ठः स्यात् तं ब्रह्माणं कुर्वीत) इसलिये जो अत्यन्त ब्रह्मज्ञान वाला हो, उसको ब्रह्मा बनावे। (बृहस्पतिः वै सर्वं ब्रह्म) बृहस्पति [बड़ी विद्याओं का स्वामी] ही सम्पूर्ण ब्रह्म [ब्रह्मा] है। (एतत् सर्वेण ह वै ब्रह्मणा यज्ञं दक्षिणतः उद्यच्छते) इसलिये वह सम्पूर्ण ब्रह्मज्ञान के साथ यज्ञ को दक्षिण दिशा में बैठकर ऊंचा करता है। (एतस्मात् अपः एव वै प्राणाः क्रामन्ति) इसलिये जल को ही प्राण प्राप्त करते हैं। (यः आविद्धं प्राशनाति अद्भिः प्राणान् मार्जयित्वा संस्पृशते, मे नित्यं वाक् आस्यम् ऋतम्) जो पुरुष अच्छे छेदन किये हुये [प्राशित्र अन्न] को खाता है, वह जल से प्राणों को शुद्ध करके [इन्द्रिय] स्पर्श करता है--मेरे लिये नित्य वाणी, मुख और सत्य होवे। [यह वाक्य पढ़ता है। (प्राणाः वै अमृतम्, आपः प्राणान् एव यथास्थानम् उपाह्वयते) प्राण ही अमृत [जल] हैं, जल प्राणों [जीवन साधनों] को ही अपने अपने स्थान पर बुलाता है। (तत् उ ह एके आहुः, इन्द्राय पर्यहरन् इति) सो कोई कोई कहते हैं--इन्द्र [जीवात्मा] को वे [इन्द्रिय अन्न] लाकर देते हैं। (ते देवाः अब्रुवन् इन्द्रः वै देवानाम् ओजिष्ठः बलिष्ठः तस्मै एतत् परिहरन्ति इति तत् तस्मै पर्यहरन्) उन देवों [इन्द्रियों] ने कहा--इन्द्र [जीवात्मा] ही देवों [इन्द्रियों] में अति ओजस्वी [पराक्रमी] और अति बलवान् है, उसके लिये यह [अन्न] वे लाते हैं--इसलिये उसे उसके लिये वे लाये हैं। (तत् सत् ब्रह्मणा शमयांचकार) उस होते हुये को ब्रह्मज्ञान से उस [इन्द्र] ने शान्त किया। (तस्मात् आहुः इन्द्रः ब्रह्मा इति) इसलिये वह कहते हैं--इन्द्र [जीवात्मा] ब्रह्मा है। (यवमात्रं भवति यवमात्रं वै विषस्य न हिनस्ति) वह [इन्द्र] जौ के आकार वाला [परमाणु रूप] है, जौ के आकार वाला जल का नाश नहीं करता है। (यत् अधस्तात् अभिघारयति तस्मात् प्रक्षरणम् अधस्तात् प्रजाः अरुः न हिनस्ति) जो वह नीचे की ओर सींचता है, इसलिये बहाव नीचे की ओर प्रजाओं [इन्द्रियों] को मर्म में न नष्ट करता है। (यत् उपरिष्टात् अभिघारयति तस्मात् प्रक्षरणम् उपरिष्टात् प्रजाः अरुः न हिनस्ति) जो वह ऊपर की ओर सींचता है, इसलिये बहाव [रुधिर रूप जल] ऊपर की ओर प्रजाओं [इन्द्रियों] को मर्म में नहीं नष्ट करता है। (यत् उभयतः अभिघारयति उभयतः अभिघारि प्रजाः अरुर्घातुकं स्यात्) जो वह दोनों ओर से [आमने सामने

लुक्। व्योमन् व्यवने--निरु० ११। ४०। विविधरक्षास्थाने (ब्राह्मणा) ब्रह्मज्ञानेन (ब्रह्मिष्ठः) अतिशयेन ब्रह्मज्ञानवान् (दक्षिणत) दक्षिणस्यां दिशि स्थितः (उद्यच्छते) उत् + यम नियमने। उन्नयते (क्रामन्ति) गच्छन्ति। प्राप्नुवन्ति (मार्जयित्वा) शोधयित्वा (अमृतम्) उदकम्--निघ० १। १२। (आपः) जलम् (इन्द्राय) परमैश्वर्यवते। जीवात्मने (देवाः) इन्द्रियाणि (ओजिष्ठः) अतिशयेन ओजस्वी पराक्रमी (यवमात्रम्) अणुपरिमाणम् (विषस्य) उदकम्--निघ० १। १२। (अभिघारयति) घृ क्षरणदीप्त्योः--सर्वतः सिञ्चति प्रवहति (प्रक्षरणम्) प्रवहणम् (अरुः) अर्तिपृवपियजि० (उ० २। ११७) ऋ गतौ हिंसने च--उसिः। अरुषि। मर्मणि (अभिघारि) सर्वतः सेचकं जलम्

जल वा रुधिर को] सींचे, दोनों ओर से सींचने वाला [जल टकराकर] प्रजाओं [इन्द्रियों] को मर्मघाती होता है। (यत् समया अभिहरेत् अनभिविद्धं यज्ञस्य अभिविध्येत्) जो [उस जल को] पास से वह ले चले, बिना छिदा हुआ [बिना चूर्ण किया हुआ अन्न] यज्ञ [शरीर] का सर्वथा छेदन कर देवे ॥ ३ ॥

भावार्थ:—अन्न और जल सुप्रयोग से शरीरबल और आत्मबल बढ़ाते हैं, वे ही कुप्रयोग से उन्हें नष्ट कर देते हैं ॥ ३ ॥

कण्डिका ४ ॥

अग्रेण परिहरति तीर्थेनैव परिहरति वि वा एतद्यज्ञश्छिद्यते यत् प्राशित्रं परिहरति, यदाह ब्रह्मन् प्रस्थास्यामीति बृहस्पतिर्वै सर्वं ब्रह्म सर्वेण ह वा एतद् ब्रह्मणा यज्ञं दक्षिणतः सन्दधात्यथोऽत्र वा एतर्हि यज्ञः श्रितो यत्र ब्रह्मा तत्रैव यज्ञः श्रितस्तत एवैनमालभते यद्धस्तेन प्रमीयेद् वेपनःस्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्स्याद्यत्तूष्णीमासीदासम्प्रत्तो यज्ञः स्यात् प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्र ब्रह्मा तत्रैव यज्ञः श्रितस्तत एवैनं सम्प्रयच्छत्याग्नीध्र आदधात्यग्निमुखानेवर्तून् प्रीणात्यथोत्तरासामाहुतीनां प्रतिष्ठित्याऽथो समिद्वत्येव जुहोति परिधीन्त्सम्मार्ष्टि पुनात्येवैनां सकृत् सकृत् सम्मार्ष्टि पराङेव ह्येतर्हि यज्ञश्चतुः सम्पद्यतेऽथो चतुष्पादः पशव पशूनामाप्त्यै देव सवितरेतत्ते प्राहेत्याह प्रसूत्यै बृहस्पतिः ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि स माम्पाहि स मां पाहि स मां कर्मण्यं पाहीत्याह यज्ञाय च यजमानाय च पशूनामाप्त्यै ॥ ४ ॥

कण्डिका ४ ॥ यज्ञ के विघ्नों का नाश और यज्ञ के आरम्भ का विधान ॥

(अग्रेण परिहरति, तीर्थेन एव परिहरति एतत् यज्ञः वि वै छिद्यते) [जो कोई यज्ञ की] पूर्व भाग से निन्दा करता है, [अथवा] तीर्थ [शास्त्र विधान] से ही निन्दा करता है। इससे यज्ञ अवश्य ही छिन्न हो जाता है। (यत् प्राशित्रं परिहरति यत् आह ब्रह्मन् प्रस्थास्यामि इति) जो वह प्राशित्र [चरु, हव्य द्रव्य] को बुरा कहता है, [अथवा] जो कहता है—हे ब्रह्मन् ! मैं चला जाऊंगा। (बृहस्पतिः वै सर्वं ब्रह्म एतत् ह वै सर्वेण ब्रह्मणा यज्ञं दक्षिणतः सन्दधाति) बृहस्पति [सब विद्याओं का स्वामी] ही सब प्रकार ब्रह्म [ब्रह्मा] है, इसी से ही वह सम्पूर्ण ब्रह्मज्ञान से यज्ञ को

(अरुर्घातुकम्) मर्मनाशकम् (समया) सम्+इण् गतौ—अच्, टाप्, समीपे। (अनभिविद्धम्) अविच्छिन्नम्। प्राशित्रम् (अभिविध्येत्) अभिच्छेदनं कुर्यात् ॥

४—(अग्रेण) पूर्वभागेन (परिहरति) यज्ञं निन्दति (तीर्थेन) तरणसाधनेन। शास्त्रेण। यज्ञस्थानेन (एतत्) एतस्मात् (प्रस्थास्यामि) गमिष्यामि (ब्रह्मणा) ब्रह्मज्ञानेन (दक्षिणतः) दक्षिणस्यां दिशि स्थितः (संदधाति)

दक्षिण ओर बैठा हुआ सुधारता है। (अथो अत्र वै एतर्हि यज्ञः श्रितः, यत्र वै ब्रह्मा तत्र एव यज्ञः श्रितः ततः एव एनम् आलभते) फिर यहां ही अब यज्ञ ठहरा हुआ है, जहां ब्रह्मा है वहां ही यज्ञ ठहरा हुआ है, इसलिये ही इस [ब्रह्मा] को वह [यजमान] ग्रहण करता है। (यद् हस्तेन प्रमीयेत् वेपनः स्यात्, यत् शीर्ष्णा शीर्षक्तिमान् स्यात् यत् तूष्णीम् आसीद असम्प्रत्तः यज्ञः स्यात् प्रतिष्ठ इति एव ब्रूयात्) जो कोई हाथ से [यज्ञ] नष्ट करे, वह कांपने वाला होवे, जो सीस [शिर की टक्कर] से [यज्ञ नष्ट करे], वह शिर की पीड़ा वाला होवे, और जो चुपचाप बैठे, यज्ञ अरक्षित होवे, [इसलिये] चला जा—ऐसा ही वह [ब्रह्मा] कहे। (वाचि वै यज्ञः श्रितः, यत्र ब्रह्मा तत्र एव यज्ञः श्रितः ततः एव एनं सम्प्रयच्छति) वाणी में ही यज्ञ ठहरा हुआ है, जहां ब्रह्मा है वहां ही यज्ञ ठहरा हुआ है, इसलिये ही इस [यज्ञ] को वह [ब्रह्मा] यथावत् चलाता है। (आग्नीध्रे अग्निमुखान् आदधाति) आग्नीध्र [होतृगृह वा हवनकुण्ड] में अग्नि प्रधान मन्त्रों से वह अग्न्याधान करता है [जैसे यह चार मन्त्र—ओं भूर्भुवः स्वर्द्यौरिवभूम्ना पृथिवीव वरिम्णा। तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्याया दधे। १। यजु० ३। ४॥ ओम् उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत। २। यजु० १५। ५४॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्। ३। ऋ० १। १। १। स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये। ४। ऋ० १। १। ९। हवनमन्त्राः]। (ऋतून् एव प्रीणाति) वह ऋतुओं को ही प्रसन्न बनाता है [जल वायु शुद्ध करता है]। (अथ उत्तरासाम् आहुतीनाम् प्रतिष्ठित्या) और पीछे वाली आहुतियों की स्थापना से [भी ऋतुओं को शुद्ध करता है]। (अथो समिद्वत्या एव जुहोति) फिर समिध् शब्द वाली ऋचा से ही वह हवन करता है [जैसे यह चार मन्त्र—ओम्। समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन स्वाहा। इदमग्नये इदं न मम। १। यजु० ३। १। ओं। सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे स्वाहा—इदमग्नये जातवेदसे—इदं न मम। २। यजु० ३। २॥ ओं। तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य, स्वाहा। इदमग्नयेऽङ्गिरसे—इदं न मम। ३। यजु० ३। ३। ओम्। अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय,

---

सम्यग् धरति (एतर्हि) इदानीम् (आलभते) गृह्णाति (प्रमीयेत्) मीञ हिंसायाम्। नाशयेत् (वेपनः) कम्पकः (शीर्ष्णा) शिरःप्रहारेण (शीर्षक्तिमान्) शीर्ष+अञ्चु गतिपूजनयोः—क्तिन्, मतुप्। शीर्षं शिरः अञ्चति गच्छति व्याप्नोतीति शीर्षक्तिः शिरःपीडा तया युक्तः (आसीद) आ—असीदत्। आसीदेत् (असम्प्रत्तः) नञ्+सम्+प्र+डुदाञ् दाने—क्तः। दत्तो रक्षितः तत्प्रतिषेधः। असंरक्षितः (प्रतिष्ठ) गच्छ (सम्प्रयच्छति) संयोजयति (आग्नीध्रे) होतृगृहे (आदधाति) अग्न्याधानं करोति (अग्निमुखान्) अग्निप्रधानान् मन्त्रान् (प्रीणाति) प्रसादयति (ऋतून्) वसन्तादीन् (प्रतिष्ठित्या) स्थापनया (समिद्वत्या)

स्वाहा । इदमग्नये जातवेदसे—इदं न मम । ४ । हवनमन्त्राः] । (परिधीन् सम्मार्ष्टि पुनाति एव) वह परिधियों को स्वच्छ करता है और शोधता भी है । (एनान् सकृत् सकृत् सम्मार्ष्टि) वह इन [परिधियों] को एक एक वार स्वच्छ करता है [जैसे यह चार मन्त्र—ओम् । अदितेऽनुमन्यस्व ॥ १ ॥ ओम् । अनुमतेऽनुमन्यस्व ॥ २ ॥ ओम् । सरस्वत्यनुमन्यस्व ॥ ३ ॥ ओम् । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ४ ॥ यजु० ११ । ७ तथा ३० । १ । हवनमन्त्राः] । (पराङ् एव हि एतर्हि यज्ञः चतुः सम्पद्यते) उत्कर्ष को पाया हुआ ही अब यज्ञ चार वार बढ़ता है । (अथो चतुष्पादः पशवः, पशूनाम् आप्त्यै देव सवितः एतत् ते प्राह इति) फिर चार पांव वाले पशु हैं, पशुओं के लाभ के लिये—देव सवितः—यह [ऊपर लिखा मन्त्र] तुझ [ब्रह्मा] से वह [यजमान] बोलता है । (आह प्रसूत्यै बृहस्पतिः ब्रह्मा इति) वह कहता है—प्रेरणा [यज्ञ की बढ़ती] के लिये बृहस्पति ब्रह्मा है [बड़ी विद्याओं का स्वामी प्रधान ऋत्विज है । देव सवितः—इस मन्त्र में प्रसुव पद और प्रसूत्यै पद षू प्रेरणे धातु से बने हैं] । (आह सः हि ब्रह्मिष्ठः, सः यज्ञं पाहि, सः यज्ञपतिं पाहि, सः माम् पाहि, सः मां पाहि, सः मां कर्मण्यं पाहि इति यज्ञाय, यजमानाय च, पशूनाम् आप्त्यै च आह) वह [यजमान] कहता है—वह तू ही अतिशय ब्रह्मज्ञानी है, वह तू यज्ञ की रक्षा कर, वह तू यज्ञपति की रक्षा कर, वह तू मेरी रक्षा कर, वह तू मेरी रक्षा कर, वह तू मुझ कर्मकुशल की रक्षा कर,—वह यह यज्ञ के हित के लिये और यजमान के हित के लिये और पशुओं की प्राप्ति के लिये कहता है ॥ ४ ॥

भावार्थः—मनुष्यों को यज्ञ विधान पूर्वक करना चाहिये ॥ ४ ॥

कण्डिका ५ ॥

न वै पौर्णमास्यां नामावास्यायां दक्षिणा दीयन्ते य एष ओदनः पच्यते दक्षिणैषा दीयते यज्ञस्यर्ध्या इष्टी वा एतेन यद्यजतेऽथो वा एतेन पूर्त्ती य एष ओदनः पच्यत एष ह वा इष्टापूर्त्ती य एनं पचति ॥ ५ ॥

कण्डिका ५ ॥ पौर्णमासी और अमावस को दक्षिणा के स्थान में ओदन का दान ॥

(न वै पूर्णमास्यां न अमावास्यां दक्षिणाः दीयन्ते) न तो पौर्णमासी [इष्टि] में और न अमावस्या [इष्टि] में दक्षिणायें दी जाती है । (यः एषः ओदनः पच्यते, एषा दक्षिणा दीयते) जो यह ओदन [चावल] पकाया जाता है यह ही

समिध इति शब्देन युक्तया ऋचा (पराङ्) परा उत्कर्षे+अञ्चु गतिपूजनयोः—क्विन् । उत्कर्षं प्राप्तः (चतुः) चतुर्वारम् (चतुष्पादः) चतुष्पादयुक्ताः (आप्त्यै) प्राप्तये (प्रसूत्यै) प्रेरणायै । उन्नतये (कर्मण्यम्) कर्मकुशलम् ॥

५—(ऋध्यै) वृद्धये (इष्टी) इयाडियाजीकाराणामुपसंख्यानम् (वा० पा० ७ । १ । ३९) इति विभक्तेः ईकारः । इष्टम् । अग्निहोत्रवेदाध्ययनातिथ्यादि-

दक्षिणा दिया जाता है। (यत् यज्ञस्य ऋध्यै इष्टी वै एतेन अथो वै एतेन पूर्त्ती यजते) क्योंकि वह यज्ञ की बढ़ती के लिये इष्ट [अग्निहोत्र, वेदाध्ययन, आतिथ्य आदि कर्म] को ही इस [ओदन दान] से, और भी इससे पूर्त्त [बावड़ी, कूआ, तालाब, देवमन्दिर, अन्नदान आदि कर्म] को प्राप्त होता है। (यः एषः ओदनः पच्यते, एषः ह वै इष्टापूर्त्ती यः एनं पचति) यह जो ओदन [भात] पकाया जाता है, यह ही इष्ट और पूर्त्त [अग्निहोत्र वेदाध्ययन आदि और बावड़ी देवमन्दिर आदि कर्म का साधन उस यजमान के लिये] है जो इसको पकाता है ॥ ५ ॥

भावार्थः—पौर्णमासी और अमावस्या को दक्षिणा के स्थान में ओदन देने का यहां विशेष नियम विचारणीय है ॥ ५ ॥

कण्डिका ६ ॥

द्वया वै देवा यजमानस्य गृहमागच्छन्ति सोमपा अन्येऽसोमपा अन्ये हुतादोऽन्ये अहुतादोऽन्य एते वै देवा अहुतादो यद् ब्राह्मणा एतद्देवत्य ऋषयः पुरानीजान एते ह वा एतस्य प्रजायाः पशूनामीशते तेऽस्याप्रीता इषमूर्जमादायापक्रामन्ति यदन्वाहार्य्यमन्वाहरति तानेव तेन प्रीणाति दक्षिणतः सद्भ्यः परिहर्त्तवा आह दक्षिणावृतेनैव यज्ञेन यजत आहुतिभिरेव देवान् हुतादः प्रीणाति दक्षिणाभिर्मनुष्यदेवांस्तेऽस्मै प्रीता इषमूर्जं नियच्छन्ति ॥ ६ ॥

कण्डिका ६ ॥ यज्ञ में दो प्रकार के देवता आते हैं एक सोम या दूसरे असोमपा, अथवा एक हुताद और दूसरे अहुताद, उनका वर्णन ॥

(द्वयाः वै देवाः यजमानस्य गृहम् आगच्छन्ति अन्ये सोमपाः, अन्ये असोमपाः, अन्ये हुतादः अन्ये अहुतादः) दो प्रकार के ही देव यजमान के घर आते हैं, एक सोमपा [सोमरस पीने वाले] दूसरे असोपमा [सोमरस न पीने वाले], [अथवा] एक हुताद [अग्नि में चढ़े हुये पदार्थ खाने वाले जल वायु सूर्य] और दूसरे अहुताद [अग्नि में न चढ़े हुये पदार्थ अर्थात् शेष हव्य खाने वाले मनुष्य आदि]। (एते वै देवाः अहुतादः यत् ब्राह्मणाः) यह ही देव अहुताद [बचे हुये हव्य खाने वाले] हैं जो ब्राह्मण हैं। (एतद्देवत्यः ऋषयः पुरा अनीजानः) इस [सोम] को देवता जानने

कम् (यजते) संगच्छते (पूर्त्ती) पूर्ववत् ईकारः। पूर्त्तम्। वापीकूपतडागादिदेवतायतनान्नप्रदानादिकम् (इष्टापूर्त्ती) पूर्ववत् ईकारः। इष्टं च पूर्त्तं च इष्टापूर्त्ते। अर्थः पूर्ववत् ॥

६—(द्वयाः) दि—अयट्। द्विप्रकाराः। उभयाः (सोमपाः) सोमपानशीलाः (हुताद.) हुत + अद भक्षणे—क्विप्। हुतस्य आहुतया अग्नौ प्रक्षिप्तस्य हव्यस्य भक्षयितारः (अहुतादः) अहुतस्य अग्नौ अप्रक्षिप्तस्य शेषहव्यस्य भक्षयितारः (यत्) ये (एतद्देवत्यः) एतद्देवताकाः (ऋषयः) सन्मार्गदर्शकाः (पुरा) पूर्वम् (अनीजानः) अन् + जयतेः—कानच्, एकवचनं बहुवचनस्य।

वाले ऋषियों ने पहिले यज्ञ नहीं किया (?) । (एते ह वै एतस्य प्रजायाः पशूनाम् ईशते) यह ही [ब्रह्मज्ञानी] इस [यजमान] के सन्तान और पशुओं के स्वामी हैं। (ते अप्रीताः अस्य इषम् ऊर्जम् आदाय अपक्रामन्ति) वे अप्रसन्न होकर इसके अन्न और बल को लेकर चल देते हैं। (यत् अन्वाहार्य्यम् अन्वाहरति तान् एव तेन प्रीणाति) जब वह अन्वाहार्य्य [अमावस में बताये गये पितरों के मासिक श्राद्ध] को वह अनुकूल होकर खिलाता है, उनको ही उससे वह [यजमान] प्रसन्न करता है। (दक्षिणतः सद्भ्यः परिहर्तवै आह) दक्षिण ओर वर्त्तमान [असुरों] को [अन्वाहार्य्य] छोड़ देने के लिये वह कहता है ? (दक्षिणावृतेन एव यज्ञेन यजते) दक्षिणा से संयुक्त ही यज्ञ से [उन ब्रह्मज्ञानियों को] वह पूजता है। (आहुतिभिः एव हुतादः देवान् प्रीणाति, दक्षिणाभिः मनुष्यदेवान्) आहुतियों [अग्नि में चढ़ाये हुये पदार्थों] से ही हुताद [अग्नि में चढ़े हुये पदार्थ खाने वाले] देवों [जल, वायु, सूर्य] को प्रसन्न करता है और दक्षिणाओं से मनुष्य देवों [ब्रह्मज्ञानियों] को [प्रसन्न करता है]। (ते प्रीताः अस्मै इषम् ऊर्जं नियच्छन्ति) वे [दोनों प्रकार के देव] प्रसन्न होकर इस [यजमान] को अन्न और बल देते रहते हैं[1] ॥ ६ ॥

भावार्थः—यज्ञ द्वारा जल, वायु और अग्नि शुद्ध होने से शुद्ध अन्न उत्पन्न होता है और ऋत्विज् लोग दक्षिणा पाते हैं। उस सबसे यजमान का अन्न और बल बढ़ता है ॥ ६ ॥

कण्डिका ७ ॥

देवाश्च ह वा असुराश्चास्पर्द्धन्त, ते देवाः प्रजापतिमेवाभ्ययजन्तान्योऽन्यस्यासन्नसुरा अजुहवुस्ते देवा एतमोदनमपश्यंस्तं प्रजापतये भागमनुनिरवपंस्तं भागं पश्यन् प्रजापतिर्देवानुपावर्त्तत ततो देवा अभवन् परासुराः स य एवं विद्वानेतमोदनं पचति भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति प्रजापतिर्वै देवेभ्यो भागधेयानि व्यकल्पयत् सोऽ[2]मन्यत आत्मानमन्तरगादिति स एतमोदनमभक्तमपश्यत्तमात्मने भागन्निरवपत् प्रजापतेर्वा एष भागोऽपरिमितः स्यादपरिमितो हि प्रजापतिः प्रजापतेर्भागोस्यूर्जस्वान् वयस्वानक्षितोऽस्यक्षित्यै त्वा मामेक्षेष्ठाः। अमुत्रामुष्मिंल्लोक इह च प्राणापानौ मे पाहि समानव्यानौ मे

यज्ञम् अकृतवन्तः (अप्रीताः) अप्रसन्नाः (इषम्) अन्नम्—निघ० २ । ७ (ऊर्जम्) बलम् (आदाय) गृहीत्वा (अपक्रामन्ति) अपगच्छन्ति (अन्वाहार्य्यम्) अनु व्याप्तौ+आ समन्तात्+हृञ् हरणे—ण्यत्। अमावास्याविहितं पितॄणां मासिकश्राद्धम्। यागदक्षिणाम् (अन्वाहरति) अनुकूलतया आहारयति भोजनं कारयति यजमानः (दक्षिणतः) दक्षिणस्यां दिशि (सद्भ्यः) श्रेष्ठेभ्यः। वर्तमानेभ्यः (परिहर्तवै) तुमर्थे सेसेनसेअसेन्० (पा० ३ । ४ । ९) परि+हृञ् हरणे—तवैप्रत्ययः। परिहर्तुम् (दक्षिणावृतेन) दक्षिणया वेष्टितेन संयुक्तेन (मनुष्यदेवान्) मनुष्येषु देवान् विदुषः पुरुषान् (नियच्छन्ति) नितरां ददति ॥

---

१. कण्डिका का व्याख्यान अस्पष्ट है। पाठक भूमिका में अर्थ देखें ॥

२. पू. सं. "सोममन्वत" इति पाठः ॥ सम्पा० ॥

पाह्युदानरूपे मे पाह्यूर्गस्यूर्जं मे धेहि कुर्वतो मे मा क्षेष्ठाः । ददतो मे मोपदसः प्रजापतिमहन्त्वया समृक्षमृध्यासमिति प्रजापतिमेव समृक्षमृध्नोति य एवं वेद य एव वेद ॥ ७ ॥

कण्डिका ७ ॥ देवासुर संग्राम में प्रजापति द्वारा ओदन के विभाग से देवों की जीत ॥

(देवा च असुराः च ह वै अस्पर्धन्त) देव [इन्द्रियां] और असुर [विघ्न] लड़ने लगे। (ते देवाः प्रजापतिम् एव अभ्ययजन्त) उन देवताओं ने प्रजापति [जीवात्मा या पेट] को ही सब ओर से पूजा। (असुराः अन्योऽन्यस्य आसन् अजुहवुः) असुरों ने एक दूसरे के मुख में हवन किया। (ते देवाः एतम् ओदनम् अपश्यन् तं भागं प्रजापतये अनुनिरवपन्) उन देवों ने इस ओदन [सींचने वाले अन्न] को देखा और वह भाग प्रजापति को दे दिया। (तं भागं पश्यन् प्रजापतिः देवान् उपावर्तत) उस भाग को देखता हुआ प्रजापति देवताओं के पास वर्तमान हुआ। (ततः देवाः असुराः परा अभवन्) उससे देवताओं ने असुर हरा दिये। (यः एवं विद्वान् एतम् ओदनं पचति सः आत्मना भवति, अस्य अप्रियः भ्रातृव्यः परा भवति) जो ऐसा विद्वान् इस ओदन [सींचने वाले अन्न] को पचाता है वह आत्मबल के साथ होता है, उसका अप्रिय शत्रु हार जाता है। (प्रजापतिः वै देवेभ्यः भागधेयानि व्यकल्पयत्, सोऽमन्यत, आत्मानम् अन्तः अगात् इति) प्रजापति ने ही देवताओं को भाग अलग अलग कर दिये, उसने माना और आत्मबल को भीतर पाया। (सः एतम् ओदनम् अभक्तम् अपश्यत् तं भागम् आत्मने निरवपत्) उसने इस ओदन को बिना बँटा हुआ [सम्पूर्ण] देखा, उस भाग को अपने लिये रख दिया। (प्रजापतेः वै एषः भागः अपरिमितः स्यात् अपरिमितः हि प्रजापतिः) प्रजापति का ही यह भाग परिमाण रहित होवे, क्योंकि प्रजापति परिमाण रहित है। (प्रजापतेः ऊर्जस्वान् वयस्वान् भागः असि, अक्षितः असि, मे अक्षित्यै त्वा मा क्षेष्ठाः) [हे ओदन !] तू प्रजापति का बलवान् अन्नवान् भाग है, तू अक्षित [अनिष्ट] है, तू मेरे अनाश [सम्पूर्णता] के लिये अपने को मत नष्ट कर। (अमुत्र अमुष्मिन् लोके इह च मे प्राणापानौ पाहि, मे समानव्यानौ पाहि, मे उदानरूपे पाहि, ऊर्क् असि, मे ऊर्जं धेहि, मे कुर्वतः मा क्षेष्ठाः) वहाँ उस लोक में और

७—(देवाः) इन्द्रियाणि (असुराः) देवविरोधिनः। विघ्नाः (प्रजापतिम्) जीवात्मानम् (आसन्) आस्ये। मुखे (ओदनम्) सेचकम् अन्नम् (अनुनिरवपन्) निर्धारितवन्तः। दत्तवन्तः (उपावर्तत) उपेत्य वर्तमानोऽभवत् (परा-अभवन्) पराजितवन्तः (असुराः) असुरान् (आत्मना) आत्मबलेन (पराभवति) पराजितो वर्तते (भ्रातृव्यः) शत्रुः (व्यकल्पयत्) पृथक् पृथक् कृतवान् (सोमम्) अमृतम् (आत्मानम्) आत्मबलम् (अन्तः) मध्ये (अगात्) प्राप्तवान् (अभक्तम्) अकृतभागम् (अपरिमितः) परिमाणरहितः (ऊर्जस्वान्) बलवान् (वयस्वान्) अन्नवान्—निघ० २ । ७ (अक्षितः) अहिंसितः (अक्षित्यै) अनाशाय (त्वा) आत्मानम् (मे) मम। मह्यम् (मा क्षेष्ठाः) क्षि

यहाँ [दूर और समीप, अथवा उस जन्म और इस जन्म में] मेरे प्राण और अपान [भीतर और बाहर जाने वाले श्वास] की रक्षा कर, मेरे समान और व्यान [नाभि में घूमने वाले और शरीर में फैलने वाले वायु] की रक्षा कर, मेरे उदान [कण्ठस्थ वायु] और रूप की रक्षा कर, तू बल है मेरे लिये बल दे, मुझ कर्म करने वाले का मत नाश कर। (मे ददतः मा उपदसः, अहं त्वया समृक्षं प्रजापतिम् ऋध्यासम् इति) [हे ओदन !] मुझ दान करते हुये का मत नाश कर, मैं तेरे साथ यथावत् देखने वाले प्रजापति को बढ़ाऊं। (समृक्षं प्रजापतिम् एव ऋध्नोति यः एवं वेद, यः एवं वेद) वह यथावत् देखने वाले प्रजापति को ही बढ़ाता है, जो ऐसा जानता है, जो ऐसा जानता है ।। ७ ।।

भावार्थः—जैसे उदर अन्न खाकर सब इन्द्रियों को रस पहुँचाकर पुष्ट और सुखी करता है, वैसे ही प्रधान पुरुष कर लेकर प्रजा के हित में लगाकर उन्हें पुष्ट और सुखी करे ।। ७ ।।

कण्डिका ८ ।।

ये वा इह यज्ञैराभूवंस्तेषामेतानि ज्योतींषि यान्यमूनि नक्षत्राणि तन्नक्षत्राणां नक्षत्रत्वं यन्न क्षियन्ति दर्शपौर्णमासौ वै यज्ञस्यावसानदर्शौ ये वा अनिष्ट्वा दर्शपूर्णमासाभ्यां सोमेन यजन्ते तेषामेतानि ज्योतींषि यान्यमूनि नक्षत्राणि पतन्तीव तद्यथा ह वा इदमस्यष्टावसानेनेहावसास्यसि नेहावसास्यसीति नोऽनुद्यन्त एवं हैवैतेऽमुष्मान् लोकान् नो नुद्यन्ते त एते प्रच्यवन्ते ।। ८ ।।

कण्डिका ८ ।। दर्शपौर्णमास यज्ञ के साथ ही सोम यज्ञ करने और यज्ञ करने वालों की उच्च दशा का वर्णन ।।

(ये वै इह यज्ञैः आभूवन् तेषाम् एतानि ज्योतींषि यानि अमूनि नक्षत्राणि) जो लोग ही यहाँ यज्ञों के साथ सब ओर वर्तमान हुये हैं, उनके यह ज्योति हैं जो वे नक्षत्र [चलने वाले वा अनश्वर तारागण] हैं [अर्थात् तारागणों के समान उनके कार्य प्रकाशमान हैं]। (तत् नक्षत्राणां नक्षत्रत्वं यत् न क्षियन्ति) वह नक्षत्रों का नक्षत्रपन है कि वे नष्ट नहीं होते हैं। (दर्शपौर्णमासौ वै यज्ञस्य अवसानदर्शौ) अमावस्या और पूर्णमासी के यज्ञ ही यज्ञ की सीमा दिखाने वाले हैं [अर्थात् अमावस्या और पूर्णमासी से यज्ञ आरम्भ होकर अमावस्या और पूर्णमासी को पूरे होते हैं]। (ये वै दर्शपूर्णमासाभ्याम् अनिष्ट्वा

हिंसायाम्—लुङ्। आत्मनेपदम्। मा हिंसीः (ऊर्क्) बलम् (ऊर्जम्) बलम् (मा क्षेष्ठाः) नाशं मा कुरु (मा उपदसः) दसु उपक्षये उत्क्षेपे च—लुङ्। नाशं मा कुरु (समृक्षम्) स्नुव्रश्चिकृत्यृषिभ्यः कित् (उ० ३। ६६) ऋषी गतौ दर्शने च—सप्रत्ययः कित्। संगन्तारम्। सन्दर्शकम् (ऋध्यासम्) सम्यग्वर्ध्यासम् (ऋध्नोति) वर्धयति ।।

८ (आभूवन्) आ—अभूवन् (नक्षत्राणि) अमिनक्षियजि० (उ० ३। १०५) णक्ष गतौ—अत्रन्। गतिशीलाः। अनश्वराः वा तारागणः (क्षियन्ति) नश्यन्ति

सोमेन यजन्ते तेषाम् एतानि ज्योतींषि पतन्ति इव यानि अमूनि नक्षत्राणि) जो लोग ही अमावस्या और पूर्णमासी के साथ यज्ञ न करके सोम के साथ यज्ञ करते हैं, उनके यह तेज गिरते से हैं जो वे नक्षत्र हैं। (तत् यथा आह वै इदम् असि, अष्टावसानेन इह अवसास्यसि, न इह अवमास्यसि इति) सो जैसा यह कहता है—यही तू सत्ता वाला है, तू आठ [यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि इन आठ योगाङ्गों—योग दर्शन २ । २९] से समाप्त होने वाले विधान के साथ यहां [यज्ञ को] तू समाप्त करेगा, तू यहाँ नहीं समाप्त होगा। (एते ह एव एवम् अमुष्मान् लोकान् नो अनुद्यन्ते, नो अनुद्यन्ते ते एते प्रच्यवन्ते) यह ही लोग इस प्रकार उन लोकों को नहीं नष्ट करते हैं, नहीं नष्ट करते हैं, वे ही यह लोग आगे को चलते हैं ॥ ८ ॥

भावार्थः—जैसे दर्शपूर्णमासी से यज्ञ प्रारम्भ होकर दर्शपूर्णमासी पर समाप्त होने से सिद्ध होते हैं, वैसे ही दूसरे कार्य नियत समय पर आरम्भ होने और समाप्त होने से सिद्ध होते और यश देते हैं ॥ ८ ॥

कण्डिका ९ ॥

यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्ताँस्त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रेऽष्टाकपालान्निर्वपेत् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधति चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्पशवो वा एतेऽतिरिच्यन्ते तानेवाप्नोति तानवरुन्धेऽग्निर्वै मध्यमस्य दाता इन्द्रो वै ज्येष्ठस्य प्रदाता यदेवेदं क्षुद्रं पशूनां तद्विष्णोः शिपिविष्टं तदेवाप्नोति पशूनेवावरुन्धे ॥ ९ ॥

कण्डिका ९ ॥ चन्द्रमा के उदय होने के पीछे हवि देने का विधान ॥

(यस्य हविः निरुप्तं पुरस्तात् चन्द्रमाः अभ्युदियात्) जिस [यजमान] का हवि दिया गया होवे, [उससे] पहिले चन्द्रमा उदय होवे। (तान् तण्डुलान् त्रेधा विभजेत्) उन चावलों [चरु] को तीन प्रकार बाँटे। (ये मध्यमाः तान् अष्टाकपालान् दात्रे अग्नये निर्वपेत्) जो बीच वाले [चावल] हैं, उन आठ पात्रों में रक्खे हुओं को दान करने वाले अग्नि के लिये देवे। (ये स्थविष्ठाः तान् चरुं प्रदात्रे इन्द्राय

(अवसानदर्शी) समाप्तिदर्शकौ (असि) वर्तमानोऽसि (अष्टावसानेन) यमनियमाद्यष्टयोगाङ्गैः अवसानं समाप्तिर्यस्य तेन यज्ञेन (अवसास्यसि) षो अन्तकर्मणि—लट्। यज्ञं समाप्स्यसि, (अवसास्यसि) समाप्तो भविष्यसि (नो) निषेधे (अनुद्यन्ते) दो अवखण्डने—लट्, आत्मनेपदत्वम्। अनुदयन्ति। विनाशयन्ति (अमुष्मान्) अमून् (प्रच्यवन्ते) प्रकर्षेण गच्छन्ति—निघ० २ । १४ ॥

९ - (निरुप्तम्) प्रदत्तम् (अभ्युदियात्) सर्वत उद्गच्छेत् (विभजेत्) विभक्तान् कुर्यात् (अष्टाकपालान्) अष्टसु कपालेषु पात्रेषु संस्कृतान् (निर्वपेद्) विभागेन प्रदद्यात् (स्थविष्ठाः) स्थूल—इष्ठन्। अतिशयस्थूलाः (दधति) लेटि

दधति) जो अति मोटे हैं, उन चरु रूप को बहुत दान करने वाले इन्द्र [वायु] के लिये भरे। (ये क्षोदिष्ठाः तान् चरुं शिपिविष्टाय विष्णवे शृते) और जो अति सूक्ष्म हैं उन चरु रूप को प्रकाश में प्रविष्ट [व्याप्त] विष्णु [सूर्य] के लिये सेवे। (एते एव पशवः[1] अतिरिच्यन्ते तान् एव आप्नोति तान् एव अवरुन्धे) [इस कर्म से] यही पशु [सब जीव] बढ़ते हैं, वह उनको ही पाता है, उनकी रक्षा करता है (अग्निः वै मध्यमस्य दाता, इन्द्रः वै ज्येष्ठस्य प्रदाता) अग्नि ही मध्यम [बल] का देने वाला और इन्द्र [वायु] बहुत बड़े [बल] का देने वाला है। (यत् एव इदं क्षुद्रं पशूनां तत् विष्णोः शिपिविष्टं तत् एव आप्नोति पशून् एव अवरुन्धे) जो ही यह पशुओं में सूक्ष्म [कर्म] है, वह विष्णु [व्यापक सूर्य] का प्रकाश युक्त [कर्म] है, उसे ही वह पाता है और पशुओं [जीवों] की ही रक्षा करता है ॥ ९ ॥

भावार्थ :—यथायोग्य विभाग करने से यज्ञ सिद्ध होता है ॥ ९ ॥

कण्डिका १० ॥

या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वा [2]अमावास्या सा सिनीवाली योत्तरा सा कुहूश्चन्द्रमा एव धाता च विधाता च यत् पूर्णोऽन्यां वसत् पूर्णोऽन्यान्तद् मिथुनं यत् पश्यत्यन्यान्नान्यातन्मिथुनं यदमावास्यायाश्चन्द्रमा अधि-प्रजायते तन्मिथुनन्तस्मादेवास्मै मिथुनात् पशून् प्रजनयते ॥ १० ॥

कण्डिका १० ॥ पूर्व और उत्तर पौर्णमासी और अमावास्या का विचार ॥

(या पूर्वा पौर्णमासी सा अनुमतिः) जो पहिली पौर्णमासी [पूरे चन्द्रमावाली तिथि वा पूर्णिमा] है वह अनुमति [एक कलाहीन चन्द्रमा वाली शुक्ल चतुर्दशी युक्त पूर्णिमा] है। (या उत्तरा सा राका) जो पिछली [पौर्णमासी] है, वह राका [पूरे चन्द्रमा वाली तिथि पौर्णमासी] है। (या पूर्वा अमावास्या सा सिनीवाली) और वह जो पहिली अमावास्या [चन्द्र और सूर्य के एक साथ बसने की अर्थात् कृष्णपक्ष की अन्तिम तिथि] है, वह सिनीवाली [कृष्णपक्ष में चतुर्दशी सहित अमावास्या जिसमें चन्द्रमा

रूपम्। दध्यात् (क्षोदिष्ठाः) क्षुद्र —इष्ठन्। अतिशयेन क्षुद्राः (शिपिविष्टाय) सर्वधातुभ्य इन् (उ० ४ । ११८) शिञ् निशाने छेदने—इन् पुकागमः। विष्लृ व्याप्तौ—क्तः शिपिविष्टोऽस्मीति प्रतिपन्नरश्मि.। शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति—निरु० ५ । ८। शिपिविष्टः पदनाम—निघ० ४ । २ । संयतरश्मये। व्याप्तप्रकाशाय (शृते) आर्षरूपम्। श्रयते। सेवते (अतिरिच्यन्ते) अधिकाः भवन्ति (अवरुन्धे) रक्षति (शिपिविष्टम्) व्याप्तप्रकाशं रूपम् ॥

१० - (पौर्णमासी) पूर्णमासादण् (वा० पा० ४ । २ । ३५) पूर्णमास—अण्, ङीप्। पूर्णोमासश्चन्द्रोऽस्यां वर्तते सा तिथिः। या पूर्वा पौर्णमासी सानुमतीः, अनुमति-रनुमननात्—निरु० ११ । २९। पूर्णिमा (अनुमतिः) अनु + मन पूजायां ज्ञाने च—

---

१. कण्डिका में आये "वा" पद का अर्थ भाष्य में छूटा है ॥

२. पू. सं. 'सा' इत्यधिकः पाठः ॥ सम्पा० ॥

एक कला वाला हो] है । (या उत्तरा सा कुहूः) जो पिछली [अमावास्या] है वह कुहू [जिस तिथि में चन्द्रमा की कोई कला न दीख पड़े] है । (चन्द्रमाः एव धाता च विधाता च) चन्द्रमा ही [इन तिथियों का] धाता और विधाता [धारण करने वाला और बनाने वाला] है । (यत् पूर्णः अन्यां वसत्, पूर्णः अन्यां तत् मिथुनम्) जो पूर्ण [चन्द्रमा] एक [तिथि अनुमति, शुक्ल चतुर्दशी युक्त पूर्णिमा] में बसे, और जो दूसरी [राका, पूरे चन्द्रमा वाली तिथि] में [बसे], वह जोड़ा है । (यत् अन्यां पश्यति, न अन्यां, तद् मिथुनम्) जो वह [चन्द्रमा] एक [सिनीवाली, कृष्णपक्ष की एक कला वाली चतुर्दशी तिथि] में दीखे और दूसरी [कुहू अर्थात् कृष्णपक्ष की बिना चन्द्रमा वाली अमावास्या तिथि] में न [दीखे], वह जोड़ा है । (यत् अमावास्यायाः चन्द्रमाः अधिप्रजायते तत् मिथुनम्) जो अमावास्या से [कुहू अर्थात् चन्द्रमा की सब कलाओं रहित तिथि से प्रतिपदा को] चन्द्रमा दिखाई दे, वह जोड़ा है । (तस्मात् मिथुनात् एव अस्मै पशून् प्रजनयते) इस जोड़े से ही इस [मनुष्य] के लिए पशुओं [जीवों] को वह [परमेश्वर] उत्पन्न करता है ॥ १० ॥

भावार्थ :—विद्वान् लोग ज्योतिष शास्त्र से यज्ञ के लिये पौर्णमासी और अमावस के जोड़े को जानें, क्योंकि जोड़े से ही सृष्टि उत्पन्न होती है ॥ १० ॥

कण्डिका ११ ॥

न द्वे यजेत यत् पूर्वया सम्प्रति यजेतोत्तरया छं वषट् कुर्य्याद्यदुत्तरया सम्प्रति यजेत पूर्वया छं वषट् कुर्य्यान्नेष्टिर्भवति न यज्ञस्तदनुहोतामुख्यमुपगल्भो [1]जायते. एकामेव यजेत प्रगल्भो ह वै जायते न [2]दृत्यन्त द्वे यजेत, यज्ञमुखमेव पूर्वयालभते यजत उत्तरया देवता एवं पूर्वयाप्नोतीन्द्रियमुत्तरया देवलोकमेव पूर्वया-

---

क्तिन् । एककलाहीनचन्द्रवती शुक्लचतुर्दशीयुक्तपूर्णिमा तिथिः (राका) कृदाधारार्चिकलिभ्यः कः (उ० ३ । ४०) रा दाने—कः प्रत्ययः, टाप् । योत्तरा सा राका—निरु० ११ । २९ । राका रातेर्दानकर्मणः—निरु० ११ । ३० । सम्पूर्णचन्द्रा पौर्णमासी (अमावास्या) अमा+वस निवासे—ण्यत्, टाप् । अमा सह वसतः चन्द्रसूर्य्यौ यस्यां सा । कृष्णपक्षान्ततिथिः । अमावसी (सिनीवाली) इण्सिञ्जिदीङुष्यविभ्यो नक् (उ० ३ । २) षिञ् बन्धने—नक्, ङीप्, वल संवरणे यद्वा वल जीवने दाने च—अण् ङीप् । या पूर्वामावास्या सा सिनीवाली, सिनमन्नं भवति सिनाति भूतानि वालं पर्व वृणोतेस्तस्मिन्नन्नवती, वालिनीवा वाले नैवास्यामणुत्वाच्चन्द्रमाः सेवितव्यो भवतीति वा—निरु० ११ । ३१ । चतुर्दशीयुक्ताऽमावास्या । दृष्टचन्द्रकलायुक्तामावास्या । (कुहूः) मृगय्वादयश्च (उ० १ । ३७) कुह विस्मापने—कुः, ऊङ् । योत्तरा [अमावास्या] सा कुहूः—निरु० ११ । ३१ कुहूर्गूहतेः क्वाभूदिति वा क्व सती हूयत इति वा क्वाहुतं हविर्जुहोतीति वा—निरु० ११ । ३२ । नष्टचन्द्रकलाऽमावास्या (वसत्) लेटि रूपम् । वसेत् ॥

---

१. पू. सं. "अजायत" "पूर्वम्" इति पाठः ॥
२. ज. सं. अत्र 'अनादृत्य' इति पाठः ॥ सम्पा० ॥

ऽवरुन्धे मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनामुपैत्येषा ह वै सुमनानामेष्टिर्ये मध्ये याने पश्चाच्चन्द्रमा अभ्युदियादस्मा अस्मिन् लोक आर्ध्नुकं भवति ॥ ११ ॥

कण्डिका ११ ॥ दोनों पौर्णमासी और अमावस में से एक एक ही यज्ञ के आरम्भ और समाप्ति के लिये रहे ॥

(द्वे न यजेत) दो [तिथियां] में न यज्ञ करे। (यत् पूर्वया सम्प्रति यजेत उत्तरया छं वषट् कुर्यात्) जो पहिली [तिथि अनुमति--क० १०] से अब यज्ञ करे, पिछली [तिथि राका] से छं वषट् [शान्तिकरण और वषट्कार] करे। (यत् उत्तरया सम्प्रति यजेत पूर्वया छं वषट् कुर्यात्) जो पिछली [तिथि राका] से अब यज्ञ करे, पहिली [तिथि अनुमति] से छं वषट् [शान्तिकरण और वषट्कार] करे। (तत् अनु न इष्टिः भवति न यज्ञः) उसके पीछे न इष्टि होती है न यज्ञ। (होता मुख्यम् उपगल्भः जायते) होता [पीछे यज्ञ करने से] मुख्य करके निरुत्साही हो जाता है। (एकाम् एव यजेत, प्रगल्भः ह वै जायते) वह एक [तिथि] में ही यज्ञ करे, वह उत्साही ही होता है। (दृत्यन्त द्वे न यजेत) भयस्वभावी होकर दो [तिथियों] में न यज्ञ करे। (यजतः यज्ञमुखम् एव पूर्वया आलभते, उत्तरया देवताः) यजमान यज्ञमुख को ही पहिली [तिथि] से प्राप्त करता है और पिछली से देवताओं [दिव्यगुणों] को। (एवं पूर्वया इन्द्रियम् आप्नोति उत्तरया देवलोकम्) इस प्रकार पहिली [तिथि] से इन्द्रपन [परम ऐश्वर्य] और पिछली से देवलोक [विद्वानों का स्थान] पाता है। (एव पूर्वया मनुष्यलोकम् अवरुन्धे उत्तरया यज्ञक्रतूनां भूयसः उपैति) इस प्रकार पहिली [तिथि] से मनुष्यलोक [मननशीलों का स्थान] पाता है और पिछली से यज्ञ कर्मों के बीच बहुत से [पदार्थों को] पाता है। (एषा ह वै सुमनानामा इष्टिः) यह ही सुमन [सुबोधा] नाम वाली इष्टि है। (ये याने मध्ये पश्चात् चन्द्रमाः अभ्युदियात्, अस्मै अस्मिन् लोके आर्ध्नुकं भवति) जो यज्ञ प्रवृत्ति के मध्य होने पर

११—(सम्प्रति) इदानीम्। तत्कालम् (छं वषट्) शं पूर्वकं वषट्कारम् (तदनु) तत्पश्चात् (मुख्यम्) मुख्येन (उपगल्भः) उप हीने + गल्भ धाष्टर्ये प्रागल्भे च--अच्। निरुत्साही (प्रगल्भः) उत्साही (दृत्यन्त) दृणातेर्ह्रस्वः (उ० ४। १८४) दृ भये--तिप्रत्ययः। हसिमृग्रिण्वामिदमि० (उ० ३। ८६) अम गतौ--तन्। विभक्तिलोपः। भयस्वभावः (आलभते) गृह्णाति। स्वीकरोति (यजतः) भृमृदृशियजि० (उ० ३। ११०) यजतेः--अतच्। ऋत्विक्। यजमानः (इन्द्रियम्) इन्द्रत्वम्। ऐश्वर्य्यम्। धनम्--निघ० २। १० (देवलोकम्) विदुषां स्थानम् (एव) एवम् (मनुष्यलोकम्) मननशीलानां स्थानम् (भूयसः) बहु--ईयसुन्। बहुतरान् पदार्थान् (सुमनानामा) सु + मन ज्ञाने—अप्, टाप् + नामन्। सुबोधा इति नामयुक्ता (ये) यत् (मध्ये) यज्ञमध्ये (याने) गमने। यज्ञप्रवृत्तौ (अस्मै) यजमानाय (आर्ध्नुकम्) त्रसिगृधिधृषिक्षिपेः क्नुः (पा० ३। २। १४०) आ + ऋधु वृद्धौ—क्नुः स्वार्थे—कन्। प्रवर्धनम् ॥

पीछे चन्द्रमा उदय होवे, इस [यजमान] के लिये इस लोक में बहुत बढ़ती होती है ॥ ११ ॥

भावार्थः--यज्ञ का प्रारम्भ और समाप्ति यथाविधि होनी चाहिये ॥ ११ ॥

कण्डिका १२ ॥

अग्नावैष्णवमेकादशकपालं निर्वपेद् दर्शपौर्णमासावारिप्समाणोऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चारभत ऋद्ध्या ऋध्नोत्येवोभौ सहारम्भा-वित्याहुरुदिनु शृङ्गे श्रितो मुच्यत इति दर्शो वा एतयोः पूर्वः पौर्णमास उत्तरोऽथ यत् परस्तात्पौर्णमास आरभ्यते तद्यथा पूर्वं क्रियते तद्यत्पौर्णमासमारभमाणः सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावास्या वै सरस्वती पौर्णमासः सरस्वानित्युभावेवैतौ सहारभत ऋध्या ऋध्नोत्येव ॥ १२ ॥

कण्डिका १२ ॥ दर्शपौर्णमास यज्ञ पर अग्नि और विष्णु तथा सरस्वती और सरस्वान् को चरु ॥

(दर्शपौर्णमासौ आरिप्समाणः आग्नावैष्णवम् एकादशकपालं निर्वपेत्) अमावास्या और पूर्णमासी के यज्ञ को आरम्भ करना चाहने वाला पुरुष अग्नि और विष्णु देवता वाले [पार्थिव अग्नि और सूर्य की किरणों को शुद्ध करने वाले] ग्यारह पात्रों में धरे हुये [चरु] को होम करे । (अग्निः वै सर्वाः देवताः विष्णुः यज्ञः) [क्योंकि] अग्नि ही सब देवताओं [का रूप] है और विष्णु यज्ञ है । (देवताः च एव यज्ञं च आरभते, ऋध्या एव ऋध्नोति) वह देवताओं को ही और यज्ञ को आरम्भ करता है और समृद्धि के साथ बढ़ता है । (उभौ सहारम्भौ इति आहुः) दोनों [अग्नि और विष्णु] साथ साथ आरम्भ होने वाले होते हैं--ऐसा कहते हैं । (उदिनु, शृङ्गे श्रितः मुच्यते इति) [इसलिये] तू ऊँचा चल, दोनों सींगों का आश्रय लिये हुये [बैल विघ्न से] छुट जाता है । (एतयोः दर्शः वै पूर्वः पौर्णमासः उत्तरः) इन दोनों में अमावास्या यज्ञ पहिले और पूर्णमासी यज्ञ पीछे है । (अथ यत् परस्तात् पौर्णमासः आरभ्यते तत् यथा पूर्वं क्रियते) फिर जब पौर्णमास यज्ञ पीछे से आरम्भ किया जाता है, तब पहिले के समान [कर्म] किया जाता है । (तत् यत् पौर्णमासम् आरभमाणः द्वादशकपालं चरुं सरस्वत्यै सरस्वते निर्वपेत्) सो पौर्णमास यज्ञ आरम्भ करता हुआ पुरुष बारह पात्रों में धरे हुये चरु को सरस्वती [गतिशीला] के लिये और सरस्वान् [गतिशील] के लिये होमे । (अमावास्या वै सरस्वती, पौर्णमासः सरस्वान् इति उभौ एव एतौ

१२—(अग्नावैष्णवम्) अग्निविष्णुदेवताकम् । अग्निसूर्यदेवताकम् (निर्वपेत्) जुहुयात् (आरिप्समाणः) आ+रभ राभस्ये—सन्—शानच् । सनि मीमाघुरभलभ० (पा० ७ । ४ । ५४) सनि परतः इस् इत्यादेशः । आरब्धुमिच्छन् (ऋद्ध्या) सम्पत्त्या (ऋध्नोति) वर्धते (उदिनु) उत्+इण् गतौ—लोट्, आर्षरूपम् । उदिहि । उद्गच्छ (श्रितः) आश्रितः (मुच्यते) मुक्तो बन्धनशून्यो भवति (परस्तात्) पश्चात् (सरस्वत्यै) गतिशीलायै (सरस्वते) गतिशीलाय ॥

सह आरभते, ऋद्ध्या एव ऋद्ध्नोति) अमावास्या [इष्टि] सरस्वती और पौर्णमास [यज्ञ] सरस्वान् है, इसलिए इन दोनों को ही साथ साथ वह आरम्भ करता है और समृद्धि से ही वह बढ़ता है ॥ १२ ॥

भावार्थ :—मनुष्य दर्शेष्टि और पूर्णमास यज्ञ यथाविधि करके पदार्थों की शुद्धि से यथावत् लाभ उठावें ॥ १२ ॥

कण्डिका १३ ॥

अग्नये पथिकृतेऽष्टाकपालं निर्वपेद्यस्य प्रज्ञातेष्टिरिति पद्यते बहिष्पथं वा एष एति यस्य प्रज्ञातेष्टिरिति पद्यते. अग्निर्वै देवानां पथिकृत्तमेव भागधेयेनोपासरत्स एनं पन्थानमपिनयत्यनङ्गा दक्षिणा स हि पन्थानमभिव इति ॥ १३ ॥

कण्डिका १३ ॥ मार्गकर्ता अग्नि के लिए अष्टाकपाल चरु ॥

(पथिकृते अग्नये अष्टाकपालं निर्वपेत्, यस्य प्रज्ञाता इष्टिः पद्यते इति) मार्ग करने वाले अग्नि के लिए आठ पात्रों में धरे हुए [चरु] को वह पुरुष होमे, जिसकी अच्छे प्रकार जानी हुई इष्टि चले [प्रवृत्त हो]। (एषः वै बहिष्पथम् एति यस्य प्रज्ञाता इष्टिः पद्यते इति) वह ही बाहिर वाले मार्ग को पाता है जिसकी अच्छी प्रकार जानी हुई इष्टि चलती है । (अग्निः वै देवानां पथिकृत्, तम् एव भागधेयेन उपासरत्) अग्नि ही देवों का मार्ग करने वाला है, उसको ही भाग दान से वह [यजमान] प्राप्त करे । (सः एनं पन्थानम् अपिनयति) वह [अग्नि] इस [यजमान] को मार्ग से ही ले चलता है । (अनङ्गा दक्षिणा) बिना अङ्गों वाली [सम्पूर्ण] दक्षिणा [प्रतिष्ठा] दक्षिणा है ? [दक्षिणा के विषय में क० ५ भी देखो] । (सः हि पन्थानम् अभिवः इति) वह ही [यजमान] मार्ग को सब ओर से स्वीकार करता है ॥ १३ ॥

भावार्थ :—जैसे यज्ञ में अग्नि की स्थापना मुख्य कर्म है, वैसे ही शरीर में अग्नि वा बल की स्थिति आवश्यक है ॥ १३ ॥

कण्डिका १४ ॥

अग्नये व्रतपतयेऽष्टाकपालं निर्वपेद् य आहिताग्निः [1]सन् प्रवसेद् बहु वा एष व्रतमतिपातयति य आहिताग्निः सन् प्रवसति व्रत्येऽहनि स्त्रियं वोपैति मांसं वाश्नात्यग्निर्वै देवानां व्रतपतिरग्निमेतस्य व्रतमगात्तस्मादेतस्य व्रतमालम्भयते ॥१४॥

कण्डिका १४ ॥ व्रतपालक अग्नि के लिये अष्टाकपाल चरु, और व्रत में स्त्रीगमन और मांसभक्षण का निषेध ॥

(व्रतपतये अग्नये अष्टाकपालं निर्वपेत् यः आहिताग्निः सन् प्रवसेत्)

१३—(पथिकृते) मार्गकर्त्रे । मार्गदर्शकाय (प्रज्ञाता) प्रकर्षेण ज्ञाता (पद्यते) गच्छति । प्रवर्तते (भागधेयेन) भागदानेन (उपासरत्) उपगच्छति । प्राप्नोति (अनङ्गा) अङ्गरहिता । सम्पूर्णा (अभिवः) अभिवृणोति । स्वीकरोति ॥

---

१. पू. सं. 'सम्प्रवसेत्' इति पाठः ॥ सम्पा० ॥

व्रतपालक अग्नि के लिए आठ पात्रों में धरे हुए [चरु] को वह होमे, जो पुरुष [यज्ञ के लिए] अग्नि स्थापित किये हुये होकर विदेश में बसे । (एषः वै बहुव्रतम् अतिपातयति, यः आहिताग्निः सन् प्रवसति वा व्रत्ये अहनि स्त्रियम् उपैति वा मांसम् अश्नाति) वह पुरुष आहिताग्नि होते हुये भी बहुत व्रत को नष्ट कर देता है, जो अग्नि स्थापित किये हुये विदेश में वसे अथवा व्रत योग्य दिन में स्त्री के पास जावे अथवा मांस [रोचक वा उत्तेजक पदार्थ] खावे । (अग्निः वै देवानां व्रतपतिः, अग्निम् एतस्य व्रतम् अगात्) अग्नि ही देवों [विद्वानों] का व्रतपालक है, अग्नि को इस [यजमान] का व्रत प्राप्त होता है । (तस्मात् एतस्य व्रतम् आलम्भयते) इसलिये वह इस [अग्नि] के व्रत को स्पर्श करता है [स्वीकार करता है] ॥ १४ ॥

भावार्थ :— विदेश में बसता हुआ भी यज्ञ करता रहे और यज्ञ के दिनों में यजमान वह कर्म न करे जिससे श्रम वा काम वा क्रोध उत्पन्न होवे ॥ १४ ॥

कण्डिका १५ ॥

अग्नये व्रतभृतेऽष्टाकपालं निर्वपेद्य आहिताग्निरार्त्तिजमश्रु कुर्य्यादानीतो वा एष देवानां य आहिताग्निस्तस्मादेतेनाश्रु न कर्त्तव्यं न हि देवा अश्रु कुर्वन्त्यग्निर्वै देवानां व्रतभृदग्निमेतस्य व्रतमगात्तस्मादेतस्य व्रतमालम्भयते ॥ १५ ॥

कण्डिका १५ ॥ व्रतपोषक अग्नि के लिए अष्टाकपाल चरु ॥

(व्रतभृते अग्नये अष्टाकपालं निर्वपेत् यः आहिताग्निः आर्तिजम् अश्रु कुर्यात्) व्रतपोषक अग्नि के लिये आठ कपालों में धरे हुये [चरु] को वह पुरुष होमे, जो अग्नि स्थापित किये हुये होकर पीड़ा मे उत्पन्न आँसू को बहावे । (एषः वै देवानाम् आनीतः यः आहिताग्निः) वह पुरुष ही देवों [विद्वानों] का लाया हुआ है जो अग्नि स्थापित किये हुये है । (तस्मात् एतेन अश्रु न कर्तव्यं हि देवाः अश्रु न कुर्वन्ति) इसलिये यह [यजमान] आँसू न बहावे, क्योंकि देवता लोग आँसू नहीं वहाते हैं । (अग्निः वै देवानां व्रतभृत्, अग्निम् एतस्य व्रतम् अगात्) अग्नि ही देवों [विद्वानों] का व्रतपोषक है, अग्नि को इस [यजमान] का व्रत प्राप्त होता है । (तस्मात् एतस्य व्रतम् आलम्भयते) इस लिए वह इस [अग्नि] के व्रत को स्पर्श करता है [स्वीकार करता है] ॥ १५ ॥

१४—(व्रतपतये) व्रतपालकाय (आहिताग्निः) यज्ञाय स्थापिताग्निः (प्रवसेत्) विदेशे वासं कुर्यात् (अतिपातयति) विनाशयति (व्रत्ये) व्रतयोग्ये (मांसम्) मनेर्दीर्घश्च (उ० ३ । ६४) मन ज्ञाने—सप्रत्ययो दीर्घश्च । मांसं माननं वा मानसं वा मनोऽस्मिन्त्सीदतीति वा—निरु० ४ । ३ । रोचकं समुत्तेजकं वा पदार्थम् (अश्नाति) भक्षयति (अगात्) इण् गतौ—लुङ् । अगमत् । प्रापत् (आलम्भयते) स्पृशति । स्वीकरोति ॥

१५—(व्रतभृते) व्रतपोषकाय (आर्तिजम्) पीडाजनितम् (अश्रु) जत्वादयश्च (उ० ४ । १०२) अशूङ् व्याप्तौ—रुप्रत्ययः । अश्नुते व्याप्नोति नेत्रमदर्शनाय । नेत्रजलम् ॥

भावार्थ :—महाकष्ट होने पर भी मनुष्य यज्ञ करता रहे ॥ १५ ॥

विशेष :—इस कण्डिका का मिलान करो—ऐतरेय ब्राह्मण । ७ । ८ ॥

कण्डिका १६ ॥

ऐन्द्राग्नमुस्रमनुसृष्टमालभेत यस्य पिता पितामहः सोमं न पिबेदिन्द्रियेण वा एष वीर्य्येण व्यृध्यते यस्य पिता पितामहः सोमं न पिबति, यदैन्द्रं इन्द्र इन्द्रियेणैवैनं तद्वीर्य्येण समर्द्धयति देवताभिर्वा एष वीर्य्येण व्यृध्यते यस्य पिता पितामहः सोमं न पिबति, यदाग्नेयोऽग्निर्वै सर्वा देवताः सर्वाभिरेवैनन्तद् देवताभिः समर्द्धयत्यनुसृष्टो भवत्यनुसृष्ट इव ह्येतस्य सोमपीथो यस्य पिता पितामह सोमं न पिबति तस्मादेष एव तस्या देवतायाः पशूनां समृद्धः ॥ १६ ॥

कण्डिका १६ ॥ जिसके पिता पितामह ने सोमपान नहीं किया, वह सोमयाग करे ॥

(ऐन्द्राग्नम् अनुसृष्टम् उस्रम् आलभेत यस्य पिता पितामहः सोमं न पिबेत्) इन्द्र और अग्नि देवता वाले [बिजुली और अग्नि के स्वभाव वाले], छुटे हुये बैल को वह [यजमान] छूये, जिसका पिता और पितामह सोमरस न पीवे। (इन्द्रियेण वीर्येण वै एषः व्यृध्यते, यस्य पिता पितामहः सोमं न पिबति) इन्द्रिय [ऐश्वर्य] से और वीर्य [वीरत्व] से निश्चय करके वह नष्ट होता है, जिसका पिता [वा] पितामह सोमरस नहीं पीता है। (यत् तत् इन्द्रः ऐन्द्रम् एनम् इन्द्रियेण वीर्येण समर्धयति) क्योंकि उससे इन्द्र [परमेश्वर] इन्द्र देवता वाले इस [यजमान] को इन्द्रपन और वीरत्व के साथ बढ़ाता है। (देवताभिः वै एषः वीर्येण व्यृध्यते, यस्य पिता पितामहः सोमं न पिबति) देवताओं करके अवश्य यह [यजमान] वीर्य से नष्ट किया जाता है जिसका पिता [वा] पितामह सोमरस नहीं पीता है। (यत् तत् अग्निः वै सर्वाः देवताः आग्नेयः एनं सर्वाभिः एव देवताभिः समर्धयति) क्योंकि उससे अग्नि [परमेश्वर] सभी देवताओं रूप हो करके अग्नि देवता वाले इस [यजमान] को बढ़ाता है। (अनुसृष्टः भवति, अनुसृष्टः इव हि एतस्य सोमपीथः यस्य पिता पितामहः सोमं न पिबति) वह [यजमान श्रेष्ठों करके] छोड़ा गया होता है और उस [यजमान] का सोमपान यज्ञ भी [श्रेष्ठों करके] छोड़ा गया अवश्य होता है जिसके पिता [वा] पितामह [दादा] सोमरस नहीं पीता है। (तस्मात् एषः एव तस्याः देवतायाः पशूनां समृद्धः) इसलिये यह [यजमान] उस देवता के पशुओं [जीवों] में समृद्ध होता है ॥ १६ ॥

१६—(उस्रम्) स्फायितञ्चिवञ्चि० (उ० २ । १३) वस निवासे आच्छादने च—रक्। उस्रम्। वृषभम् (व्यृध्यते) ताड्यते। छिद्यते (आग्नेयः) आग्नेयम्। अग्निदेवताकम् (अनुसृष्टः) निर्मुक्तः (सोमपीथः) निशीथगोपीथावगथाः (उ० २ । ९) सोम+पा पाने—थक्। सोमपानम् ॥

भावार्थ :—विद्वान् लोग उस मनुष्य का आदर करते हैं, जो सोमपान कराकर अपने बड़े बूढ़ों को तृप्त करता है ॥ १६ ॥

कण्डिका १७ ॥

देवा वा ओषधीषु पक्वास्वजिमयुः स इन्द्रो वेदाग्निर्वा वेमाः प्रथम उज्जेष्यतीति सोऽब्रवीद्यतरो नौ पूर्व उज्जयात्तं नौ सहेति ता अग्निरुदजयत्तदिन्द्रो[1]ऽनूदजयत् स एष ऐन्द्राग्नः सन्नाग्नेन्द्र एका वै तर्हि यवस्य श्रुष्टिरासीदेका व्रीहेरेका माषस्यैका तिलस्य तद्विश्वेदेवा अब्रुवन् वयं वा एतत् प्रथयिष्यामो भागो नोऽस्त्विति तद्भूम एव वैश्वदेवोऽथो प्रथयत्येतेनैव पयसि स्याद्वैश्वदेवत्वाय वैश्वदेवं हि पयोऽथेमौ अब्रूतां न वा ऋृत आवाभ्यामेवैतद्यूयं प्रथयत मयि प्रतिष्ठितमसौ वृष्टचा पचति नैतदितोऽभ्युज्जेष्यतीति भागो नावस्त्विति ताभ्यां वा एष भागः क्रियत उज्जित्या एवाथो प्रतिष्ठित्या एव यो द्यावापृथिवीयः सौमीर्वा ओषधी सोम ओषधीनामधिराजो याश्च ग्राम्या याश्चारण्यास्तासामेष उद्धारो यच्छ्यामाको यच्छ्यामाकः सौम्यस्तमेव भागिनं कृणुते यदकृत्वाऽऽग्रयणं नवस्याश्नीयाद् देवानां भागं प्रतिक्लृप्तमद्यात्संवत्सराद्वा एतदधिप्रजायते यदाग्रयणं संवत्सरं वै ब्रह्मा तस्माद् ब्रह्मा पुरस्ताद्धोमसंस्थितहोमेष्वावपेतैकहायनो दक्षिणा स हि संवत्सरस्य प्रतिमा रेत एव ह्येषो प्रजातः प्रजात्यै ॥ १७ ॥

कण्डिका १७ ॥ ओषधियों [अन्न आदि पदार्थों] के पकने पर इन्द्र, अग्नि, विश्वे देवा और सोम के लिए चरु के विषय में कथा ॥

(देवाः वै ओषधीषु पक्वासु अजिमयुः) प्रसिद्ध है देवता ओषधियों के पकने पर जीमते हैं। (सः वेद इन्द्रः वा अग्निः वा इमाः प्रथमः उज्जेष्यति इति) वह [यजमान] जाने—कि इन्द्र अथवा अग्नि इन [ओषधियों] को पहिले जीतेगा। (सः अब्रवीत् यतरः नौ पूर्वः उज्जयात् तं नौ सह इति) वह [इन्द्र वा अग्नि] बोला—जो कोई हम दोनों में से पहिले जीते उसको हम दोनों में से [हे इन्द्र वा अग्नि] तू सह। (ताः अग्निः उदजयत् तत् इन्द्रः अनूदजयत्) उन [ओषधियों] को अग्नि ने जीता, उनको इन्द्र ने जीता। (सः एषः ऐन्द्राग्नः सन् आग्नेन्द्रः) सो यह [चरु] इन्द्र अग्नि का होता हुआ अग्नि और इन्द्र का है। (तर्हि वै एका श्रुष्टिः यवस्य आसीत्, एका व्रीहेः, एका माषस्य, एका तिलस्य) तब ही जौ का एक विभाग होता है, एक चावल का, एक उड़द का, एक तिल का। (तत् विश्वेदेवाः अब्रुवन् वयं वै एतत् प्रथयिष्यामः नः भागः अस्तु इति) तब विश्वेदेवा बोले—हम ही इस [यज्ञकर्म] को

१७—(अजिमयुः) जिमु अदने—लुङ्। जेमन्ति। भक्षयन्ति (सह) सहनं कुरु (श्रुष्टिः) श्रु गतौ श्रवणे च—क्तिन्, सुडागमश्च। प्रापणीया। आहुतिः। विभागः। श्रुष्टीति क्षिप्रनामाशु अष्टीति—निरु० ६। १२। (प्रथयि-

---

[1] १. पू. सं. 'नोदजयत' इति पाठः ॥ सम्पा० ॥

फैलावेंगे, हमारा भाग होवे । (तत् भूमः एव वैश्वदेवः) सो विद्यमान चरु ही विश्वेदेवों का है । (अथो एतेन एव पयसि प्रथयति, वैश्वदेवत्वाय वैश्वदेवं हि पयः स्यात्) फिर इससे ही अन्न में वह [यजमान] फैलता है, विश्वेदेवों के लिये विश्वेदेवों वाला अन्न होवे । (अथ इमौ अब्रूताम् आवाभ्याम् ऋते एतत् एव न वै) फिर यह दोनों [देवता इन्द्र और अग्नि] बोले—हम दोनों के विना यह [अन्न] नहीं होता । (यूयं प्रथयत मयि प्रतिष्ठितम् एतत् असौ वृष्टचा न पचति, इतः अभ्युज्जेष्यति इति, नौ भागः अस्तु इति) तुम प्रसिद्ध करते हो—मुझमें ठहरे हुये इस [अन्न] को वह [ईश्वर] वृष्टि से अब पकाता है, इससे वह [इन्द्र वा अग्नि] जीतेगा, इससे हम दोनों का भाग होवे । (ताभ्यां वै एषः भागः उज्जित्यै एव अथो प्रतिष्ठित्यै एव क्रियते यः द्यावापृथिवीयः) उन दोनों [इन्द्र और अग्नि] के लिये ही यह भाग जीत के लिये ही और प्रतिष्ठा के लिये ही किया जाता है, जो [भाग] सूर्य और पृथिवी वाला है । (सौमीः वै ओषधीः) सोम देवता वाली ही ओषधियां [अन्न, सोमलता आदि] हैं । (सोमः ओषधीनाम् अधिराजः याः च ग्राम्याः याः च आरण्याः) सोम ओषधियों का राजा है जो गांव में उपजने वाली और जो वन में उपजने वाली हैं । (तासाम् एषः उद्धारः यत् श्यामाकः) उन [ओषधियों] का यह उद्धार [उठाने का व्यवहार] है जो समा [अन्न विशेष का यज्ञ] है । (यत् श्यामाकः सौम्यः तम् एव भागिनं कृणुते) जो समा [छोटे कणों वाला अन्न सब ओषधियों का स्थानापन्न] सोम देवता वाला है, उस [सोम] को ही [उस समा का] भागी वह [यजमान] करता है । (यत् आग्रयणम् अकृत्वा नवस्य अश्नीयात्, देवानां प्रतिक्लृप्तं भागम् अद्यात्) जो वह [यजमान] अग्रयण [नवे अन्न का यज्ञ] न करके नवे [अन्न] का भोजन करे, वह देवताओं के प्रत्यक्ष उपस्थित भाग को खा लेवे । (संवत्सरात् वै एतत् अधिप्रजायते यत् आग्रयणम्) संवत्सर के आरम्भ से ही यह प्रकट होता है जो आग्रयण [नवे यज्ञ का अन्न है] । (संवत्सरं वै ब्रह्मा, तस्मात् ब्रह्मा पुरस्ताद्धोमसंस्थितहोमेषु आवपेत) संवत्सर ही ब्रह्मा [बड़ा हुआ] है, इसलिये ब्रह्मा [चारों वेद जानने वाला] पुरस्तात्—होम और संस्थित—होमों में [इन अन्नों को] होमे । (एकहायनः दक्षिणाः, सः हि सवत्सरस्य प्रतिमा रेतः एव हि एषः प्रजात्यै प्रजातः) एकहायन [एक वर्ष वाला यज्ञ] दक्षिणा [नाम

ष्यामः) विस्तारयिष्यामः (भूमः) इषियुधीन्धिदसिश्याधूसूभ्यो मक् (उ० १ । १४५) भू सत्तायाम्—मक् । विद्यमानपदार्थः । चरुः (पयसि) अन्ने—निघ० २ । ७ । (वैश्वदेवत्वाय) विश्वेभ्यो देवेभ्यः (ऋते) विना (न) सम्प्रति—निरु० ७ । २१ । (ग्राम्याः) ग्रामाद् यखञौ (पा० ४ । २ । ९४) ग्राम—यः । ग्रामे भवाः । (आरण्याः) अरण्याण्णो वक्तव्यः । (वा० पा० ४ । २ । १०४) अरण्य—णः । वनजाताः (उद्धारः) उत् + हृञ् हरणे—घञ् । उत्थापनम् (श्यामाकः) पिनाकादयश्च (उ० ४ । १५) श्यैङ् गतौ—आकः, मुगागमश्च । व्रीहिभेदः (आग्रयणम्) अग्र + अयन, पृषोदरादित्वाद् ह्रस्वदीर्घौ । नवशस्येष्टिः (नवस्य) नवीनान्नम् (प्रतिक्लृप्तम्) प्रस्तुतम् (सवत्सरम्) संवत्सरः (आवपेत) निर्वपेत । जुहुयात्

इष्टि] है, वह [यज्ञ] ही संवत्सर की मूर्ति है, वीर्य ही यह [यज्ञ] प्रजा की उत्पत्ति के लिये उत्पन्न हुआ है ॥ १७ ॥

भावार्थः—मनुष्य नवीन अन्न से यज्ञ करने से अपना बल वीर्य बढ़ाते हैं ॥ १७ ॥

विशेषः—बल और तेज ही इन्द्र और अग्नि हैं—कण्डिका २२ ॥

कण्डिका १८ ॥

अथ हैतदप्रतिरथमिन्द्रस्य बाहू स्थविरौ वृषाणावित्येतेन ह वा इन्द्रोऽसुरानप्रत्यजयदप्रति ह भवत्येतेन यजमानो भ्रातृव्यं जयति सङ्ग्रामे जुहुयादप्रति ह भवत्येतेन ह वै भरद्वाजः प्रतर्दनं समनह्यत् स राष्ट्रचभवद्य कामयेत राष्ट्री स्यादिति तमेतेन सन्नह्येद्राष्ट्री ह भवत्येतेन ह वा इन्द्रो विराजमभ्यजयद्दशैतान्वाह दशाक्षरा विराड् वैराजं वा एतेन यजमानो भ्रातृव्यं वृङ्क्ते तदु हैक एकादशान्वाहुरेकादशाक्षरा वै त्रिष्टुप् त्रैष्टुभो वज्रो वज्रेणैवैतद्रक्षांस्यपसेधति दक्षिणतो वै देवानां यज्ञं रक्षांस्यजिघांसंस्तान्यप्रतिरथेनापाघ्नत, तस्माद् ब्रह्मा अप्रतिरथं जपन्नेति। यद्ब्रह्मा अप्रतिरथं जपन्नेति, यज्ञस्याभिजित्यै रक्षसामपहत्यै रक्षसामपहत्यै ॥ १८ ॥

कण्डिका १८ ॥ अप्रतिरथ नाम सूक्त के प्रयोग की कथा ॥

[अप्रतिरथ सूक्त, युद्ध यात्रा का राग, अथर्ववेद काण्ड १९ में १३ वां सूक्त १ मन्त्र का है, उसमें युद्ध विद्या का वर्णन है।]

(अथ ह एतत् अप्रतिरथम् इन्द्रस्य बाहू स्थविरौ वृषाणौ इति) अब यह अप्रतिरथ सूक्त [युद्ध यात्रा का राग] है—[इन्द्रस्य बाहू ...] इन्द्र [परम ऐश्वर्यवान् सेनापति] के दोनों भुजायें पुष्ट और वीर्य युक्त हों......अथर्व० १९।१३।१। (एतेन ह वै इन्द्रः अप्रति असुरान् अजयत्) इस [सूक्त के प्रयोग] से ही इन्द्र ने वेरोक होकर वैरियों को जीता है। (एतेन यजमानः अप्रति ह भवति भ्रातृव्यं जयति) इस [युद्ध राग] से यजमान वेरोक ही होता है और वैरी को जीतता है। (सङ्ग्रामे जुहुयात्, अप्रति ह भवति) वह संग्राम में यज्ञ करे [सूक्त की शिक्षा के अनुसार युद्ध करे], वह वेरोक होता है। (एतेन ह वै भरद्वाजः प्रतर्दनं समनह्यत् स राष्ट्री

(एकहायनः) एकवर्षीयो यागः (दक्षिणा) दक्षिणानामेष्टिः (प्रतिमा) मूर्तिः (प्रजात्यै) प्रजननाय ॥

१८—(अप्रतिरथम्) प्रतिपक्षरहितयुद्धयात्रा—इत्येतन्नामकं सूक्तम्—अथर्व० १९।१३।१ (इन्द्रस्य) परमैश्वर्यवतः सेनापतेः (बाहू) भुजौ (स्थविरौ) अजिरशिशिरशिथिल० (उ० १।५३) ष्ठा गतिनिवृत्तौ—किरच् वुगागमः। स्थूलौ। पुष्टौ (वृषाणौ) वीर्ययुक्तौ (असुरान्) राक्षसान् (अप्रति) प्रतिपक्षरहितः (भरद्वाजः) भरत्—वाजः। भृञ् धारणपोषणयोः—शतृ + वज गतौ—घञ्। वाजः, अन्नम्—निघ० २।७। बलम्—निघ० २।९।

अभवत्) इस [सूक्त] से ही अवश्य भरद्वाज [अन्न वा बल वा विज्ञान के धारण करने वाले पुरुष इन्द्र] ने शस्त्रों को सजाया है, और वह राज्य वाला हुआ है। (यं कामयेत राष्ट्री स्यात् इति) वह [मनुष्य] जो पदार्थ चाहे, वह राजा होवे। (तम् एतेन सन्नह्येत्, राष्ट्री ह भवति) वह [ब्रह्मा] उस [यजमान] को इस [सूक्त] से संनद्ध करे, वह राजा होवे। (एतेन ह वै इन्द्रः विराजम् अभ्यजयत्) इससे ही इन्द्र ने विविध प्रकार राज्य जीता है। (दश एतान् उ आह, दशाक्षरा विराट्, यजमानः एतेन वै वैराजं भ्रातृव्यं वृङ्क्ते) वह इन दश [मन्त्रों] को ही बोलता है, दश अक्षर वाला विराट् छन्द है, यजमान इससे ही विविध राज में उत्पन्न वैरी को रोकता है। (तत् उ ह एके एकादश अनु आह, एकादशाक्षरा वै त्रिष्टुप्, त्रैष्टुभः वज्रः, वज्रेण एव एतत् रक्षांसि अपसेधति) फिर कोई कोई ग्यारह ही [मन्त्र] बोलते हैं, ग्यारह अक्षर वाला त्रिष्टुप् छन्द है, त्रिष्टुप् [तीन जोड़ अर्थात् बांस, सींग शल्य अथवा त्रिशूल] वाला वज्र है, वज्र से ही यह [इन्द्र सेनापति] राक्षसों को हटा देता है। (दक्षिणतः वै देवानां यज्ञम् रक्षांसि अजिघांसन्, तानि अप्रतिरथेन अपाघ्नत) दक्षिण ओर से [उपलक्षण से सब दिशाओं से] ही देवों के यज्ञ को राक्षस नष्ट करना चाहते हैं, उनको वह [सेनापति] अप्रतिरथ [बेरोक युद्ध यात्रा] से मार गिराता है। (तस्मात् ब्रह्मा अप्रतिरथं जपन् एति) इसलिये ब्रह्मा [चारों वेद जानने वाला] अप्रतिरथ सूक्त को जपता हुआ [विचारता हुआ] चलता है। (यत् ब्रह्मा अप्रतिरथ जपन् एति, यज्ञस्य अभिजित्यै रक्षसाम् अपहत्यै रक्षसाम् अपहत्यै) जो कि ब्रह्मा [चतुर्मुखी सेनापति] अप्रतिरथ सूक्त को जपता हुआ चलता है वह [यत्न] यज्ञ की पूरी जीत के लिये और राक्षसों के सर्वनाश के लिये, राक्षसों के सर्व नाश के लिये, होता है ॥ १८ ॥

भावार्थ :—मनुष्य वेदविहित कर्मों को पुरुषार्थ से करके विघ्नों को हटाकर आनन्द भोगें ॥ १८ ॥

विशेष :—प्रतीक वाला मन्त्र अर्थ सहित लिखा जाता है—

इन्द्रस्य बाहू स्थविरौ वृषाणौ चित्रा इमा वृषभौ पारयिष्णू। तौ योक्षे प्रथमो योग आगते याभ्यां जितमसुराणां स्वर्यत्। अथ० १९ । १३ । १, भेद से साम उ० ९ । ३ । ७ ॥ (इन्द्रस्य) इन्द्र [परम ऐश्वर्यवान् पुरुष सेनापति] के (इमौ)

वाजस्य अन्नस्य बलस्य विज्ञानस्य वा धारकः (प्रतर्दनम्) शस्त्रसमूहम् (समनह्यत्) सन्नद्धवान्। सज्जितवान् (राष्ट्री) राष्ट्र—इनिः। राज्यवान् (उ) अवधारणे (आह) कथयति (वैराजम्) विविधराज्ये भवम् (वृङ्क्ते) वृजी वर्जने। वर्जयति (अनु) निरन्तरम् (आहुः) कथयन्ति (त्रैष्टुभः) त्रिष्टुभ्—अण् स्वार्थे। त्रिष्टुप्,'''त्रिवृद् वज्रस्तस्य स्तोभतीति वा—निरु० ७ । १२। वेणुः शृङ्गम् शल्यम् इति त्रिसन्धियुक्तो वज्रः। त्रिशूलवान् (अपसेधति) अपगमयति। निवारयति (अजिघांसन्) हन हिंसागत्योः—सनि—लङ्। हन्तुं नाशयितुमैच्छन् (एति) गच्छति। प्रवर्तते (अपहत्यै) सर्वनाशाय॥

यह दोनों (बाहू) भुजायें (स्थविरौ) पुष्ट (वृषाणौ) वीर्ययुक्त, (चित्रा) अद्भुत (वृषभौ) श्रेष्ठ और (पारयिष्णू) पार लगने वाले होवें । (तौ) उन दोनों को (योगे) अवसर (आगते) आने पर (प्रथमः) मुखिया तू (योक्षे) काम में लाता है, (याभ्याम्) जिन दोनों से (असुराणाम्) असुरों [प्राण लेने वाले शत्रुओं] का (यत्) जो (स्वः) सुख है [वह] (जितम्) जीता जाता है । शेष मन्त्र २-११ भाष्य में देखो ।।

कण्डिका १९ ।।

अथातश्चातुर्मास्यानां चातुर्मास्यानां प्रयोगः फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत । मुखं वा एतत् संवत्सरस्य, यत् फाल्गुनी पौर्णमासी, मुखम् उत्तरे फाल्गुन्यौ, पुच्छं पूर्वे तद्यथाप्रवृत्तस्यान्तौ समेतौ स्याताम्, एवमेवैतत् संवत्सरस्यान्तौ समेतौ भवतः । तद्यत् फाल्गुन्यां पौर्णमास्यां चातुर्मास्यैर्यजते, मुखत एवैतत् संवत्सरं प्रयुङ्क्ते । अथो भैषज्ययज्ञा वा एते, यच्चातुर्मास्यानि । तस्मादृतुसन्धिषु प्रयुज्यन्ते, ऋतुसन्धिषु वै व्याधिर्जायते । तान्येतान्यष्टौ हवींषि भवन्ति, अष्टौ वै चतसृणां पौर्णमासीनां हवींषि भवन्ति चतसृणां वै पौर्णमासीनां वैश्वदेवं समासः । अथ यदग्निं मन्थन्ति, प्रजापतिर्वै वैश्वदेवं प्रजात्या एव । अथैनं दैवं गर्भं प्रजनयति । अथ यत् सप्तदश सामिधेन्यः, सप्तदशो वै प्रजापतिः, प्रजापतेराप्त्यै । अथ यत् सद्वन्तावाज्यभागावसिसन्तीति वै सद्वन्तौ भवतः । अथ यद्विराजौ संयाज्ये, अन्नं वै श्रीर्विराड्, अन्नाद्यस्य श्रियोऽवरुध्यै । अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि वाजिनन्नवमं, तन्नाक्षरीयां विराजमाप्नोति । अथो आहुर्दशनीं विराजमिति प्रयाजानुयाजा हवींष्याघारावाज्यभागाविति ।। १९ ।।

कण्डिका १९ ।। चातुर्मास यज्ञ फाल्गुनी पूर्णमासी से करने होते हैं ।।

(अथ अतः चातुर्मास्यानां चातुर्मास्यानां प्रयोगः) अब यहाँ से चार महीनों में होने वाले चातुर्मास्य यज्ञों का प्रयोग है । (फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत) फाल्गुन महीने की पूर्णमासी पर चातुर्मास्य यज्ञों का प्रयोग [अनुष्ठान] करे । (एतत् वै संवत्सरस्य मुखं यत् फाल्गुनी पूर्णमासी) यह ही संवत्सर [वर्ष] का मुख [आरम्भ] है, जो फल्गुनी पूर्णमासी है । (उत्तरे फाल्गुन्यौ मुखं, पूर्वे पुच्छम्) पिछली दोनों फाल्गुनी [अश्विनी आदि नक्षत्रों में बारहवाँ नक्षत्र जिसके उत्तर-दक्षिण और उत्तर में दो तारे हैं] मुख और पहिले दोनों [फल्गुनी अर्थात् अश्विनी आदि नक्षत्रों में दो तारों वाला ग्यारहवाँ नक्षत्र] पूंछ है । (तत् यथा प्रवृत्तस्य अन्तौ समेतौ स्याताम् एवम् एव एतत् संवत्सरस्य अन्तौ समेतौ भवतः) सो जैसे घूमते हुये पदार्थ के दोनों अन्त [अर्थात् अन्त और आदि] मिले हुये हों, वैसे ही इस संवत्सर के दोनों अन्त मिले होते हैं । (तत् यत् फाल्गुन्यां पौर्णमास्यां चातुर्मास्यैर्यजते, मुखतः एव एतत्

१९—(चातुर्मास्यानाम्) चतुर्मासेषु भवानाम् (मुखम्) आरम्भः (समेतौ) सम्+आ+इण् गतौ—क्तः । समागतौ । संगतौ (ऋतुसन्धिषु) ऋतूनां संगमेषु

सम्वत्सरं प्रयुङ्क्ते) सो जो फाल्गुनी पूर्णमासी पर चातुर्मास्यों से यज्ञ करता है, आरम्भ से ही वह संवत्सर का प्रयोग करता है । (अथो एते वै भैषज्ययज्ञाः, यत् चातुर्मास्यानि) फिर यह ही ओषधियज्ञ हैं, जो चातुर्मास्य यज्ञ हैं । (तस्मात् ऋतुसन्धिषु प्रयुज्यन्ते, ऋतुसन्धिषु वै व्याधिः जायते) इसलिये ऋतुओं के मेल पर उनका प्रयोग होता है, ऋतुओं के मेल पर ही रोग होता है ।

(तानि एतानि अष्टौ हवींषि भवन्ति, अष्टौ वै चतसृणां पौर्णमासीनां हवींषि भवन्ति, चतसृणां वै पौर्णमासीनां वैश्वदेवं समासः) सो यह आठ हवि होते हैं, आठ ही चारों पूर्णमासी के हवि होते हैं, चारों ही पूर्णमासी का वैश्वदेव हवि संग्रह है । (अथ यत् अग्निं मन्थन्ति, प्रजापतिः वै वैश्वदेवं प्रजात्यै एव) फिर जो अग्नि को मथते हैं, प्रजापति [नाम वाला सूर्य वा संवत्सर का यज्ञ] ही वैश्वदेव [सब देवताओं का हवि] सन्तान उत्पत्ति के लिये ही है । (अथ एनं दैवं गर्भं प्रजनयति) फिर [यजमान] के लिये दिव्य गर्भ वह [प्रजापति] उत्पन्न करता है । (अथ यत् सप्तदश सामिधेन्यः, सप्तदशः वै प्रजापतिः, प्रजापतेः आप्त्यै) फिर जो सत्रह सामिधेनी [अग्नि प्रज्वलन मन्त्र] हैं, सत्रह अवयव वाला [बारह महीने और पांच ऋतुयें जिसमें हैं, हेमन्त शिशिर का मेल है—ऐतरेय ब्राह्मण १ । १ ।] ही प्रजापति [संवत्सर] है, प्रजापति के तृप्ति के लिए यह है । (अथ यत् सद्वन्तौ आज्यभागौ असिसन्ति इति वै सद्वन्तौ भवतः) फिर जो श्रेष्ठ पदार्थ वाले दो आज्य भाग हवि को डालते हैं; वे ही दोनों श्रेष्ठ पदार्थ होते हैं । (अथ यत् विराजौ संयाज्ये, अन्नं श्रीः वै विराट्, अन्नाद्यस्य श्रियः अवरुध्यै) फिर जो दो विराट् छन्द संयाज्य [ऋचायें] हैं, अन्न और श्री [लक्ष्मी वा शोभा] ही विराट् है, भोजन योग्य अन्न और श्री की रक्षा के लिए यह है । (अथ यत् नव प्रयाजाः नव अनुयाजाः अष्टौ हवींषि नवमं वाजिनं, तत् न अक्षरीयां विराजम् आप्नोति) फिर जो नौ प्रयाज, नौ अनुयाज, आठ हवि और नवां वाजिन हवि है, उससे अब अविनाशिनी विराट् [अन्न और लक्ष्मी] वह पाता है । (अथो दशनीं विराजम् आहुः इति प्रयाजानुयाजा हवींषि आघारौ आज्यभागौ इति)

(व्याधिः) रोगः (वैश्वदेवम्) विश्वेषां देवानां हविः (समासः) सम्+असु क्षेपणे—घञ् । समाहारः । संग्रहः (मन्थन्ति) मन्थ विलोडने । विलोडयन्ति । (प्रजात्यै) सन्तानोत्पादनाय (दैवम्) दिव्यम् । मनोहरम् (सामिधेन्यः) समिधामाधाने षेण्यण् (वा० पा० ४ । ३ । १२०) समिध्—षेण्यण्, ङीष् । अग्नि-समिन्धनमन्त्राः । धाय्याः (सप्तदशः) सप्तदशावयवयुक्तः (प्रजापतिः) संवत्सरः (आप्त्यै) पर्य्याप्त्यै । तृप्तये (सद्वन्तौ) श्रेष्ठपदार्थयुक्तौ (असिसन्ति) आर्षप्रयोगः । असु क्षेपणे-स्वार्थे सन् । असिसिषन्ति । अस्यन्ति (अवरुध्यै) अव+रुधिर् आवरणे—क्तिन्, रक्षायै । (वाजिनम्) महेरिनण् (उ० २ । ५६) वज गतौ—इनण् । हविर्विशेषः (न) सम्प्रति—निरु० ७ । ३१ । (अक्षरीयाम्) अक्षर—छः । नाशशून्याम् (विराजम्) विविधैश्वर्य्यम् (दशनीम्) लेखकप्रमादः । दशमीम् । दशाक्षराम् ॥

फिर दश अक्षर वाले विराट् को कहते हैं, प्रयाज अनुयाजों हवियों और दोनों आघारावाज्य आहुतियों को [देते हैं] ॥ १६ ॥

भावार्थ:—फाल्गुन की पूर्णमासी पर वर्ष का आरम्भ और अन्त होता है, इससे चातुर्मास्य यज्ञ फाल्गुनी पूर्णमासी पर आरम्भ और समाप्त होता है ॥ १६ ॥

कण्डिका २० ॥

अथ यदग्नीषोमौ प्रथमं देवतानां यजति, अग्नीषोमौ वै देवानां मुखं, मुखत एव तत् देवान् प्रीणाति । १, २ । अथ यत् सवितारं यजति असौ वै सविता, योऽसौ तपति, एतमेव तेन प्रीणाति । ३ । अथ यत् सरस्वतीं, यजति, वाग् वै सरस्वती, वाचमेव तेन प्रीणाति । ४ । अथ यत् पूषणं यजति, असौ वै पूषा, योऽसौ तपति, एतमेव तेन प्रीणाति । ५ । अथ यन्मरुतः स्वतवसो यजति, घोरा वै मरुतः स्वतवसः, तानेव तेन प्रीणाति । ६ । अथ यद्विश्वान् देवान् यजति, एते वै विश्वे देवाः, यत् सर्वे देवाः, तानेव तेन प्रीणाति । ७ । अथ यद् द्यावापृथिव्यौ यजति, प्रतिष्ठे वै द्यावापृथिव्यौ, प्रतिष्ठित्या एव । ८ । अथ यद्वाजिनो यजति, पशवो वै वाजिनः, पशूनेव तेन प्रीणाति । ९ । अथो ऋतवो वै वाजिनः, ऋतूनेव तेन प्रीणाति । १० । अथो छन्दांसि वै वाजिनः, छन्दांस्येव तेन प्रीणाति । ११ । अथो देवाश्वा वै वाजिनः, अत्र देवाः साश्वा अभीष्टाः प्रीता भवन्ति । १२ । अथ यत्परस्तात् पौर्णमासेन यजते, तथा हास्य पूर्वपक्षे वैश्वदेवेनेष्टं भवति । १३, १४ ॥ २० ॥

कण्डिका २० ॥ अग्नि और सोम के साथ दूसरे देवताओं के यज्ञ ॥

(अथ यत् अग्नीषोमौ देवतानां प्रथमं यजति, अग्नीषोमौ वै देवानां मुखं, मुखतः एव तत् देवान् प्रीणाति) फिर जो अग्नि [तेज—क० २२] और सोम [ओषधियों के अधिराज—क० १७] के लिये देवताओं में पहिले वह यज्ञ करता है दोनों अग्नि और सोम ही देवताओं के मुख [के समान मुखिया] हैं, मुख से ही तब देवताओं को प्रसन्न करता है । १, २ । (अथ यत् सवितारं यजति असौ वै सविता, यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब सविता [प्रेरक सूर्य] के लिये यज्ञ करता है, वह ही सविता है, जो वह तपाता [प्रेरणा करता] है, इसको ही उससे वह तृप्त करता है । ३ । (अथ यत् सरस्वतीं यजति, वाक् वै सरस्वती, वाचम् एव तेन प्रीणाति) फिर जब सरस्वती के लिये यज्ञ करता है, वाणी ही सरस्वती [श्रेष्ठ विद्या वाली] है, वाणी को ही उससे वह तृप्त करता है । ४ । (अथ यत् पूषणं यजति, असौ वै पूषा यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब पूषा [पोषक सूर्य] के लिये यज्ञ करता है, वह ही पूषा है, जो वह तपाता है, इसको ही उससे वह

२०—(अग्नीषोमौ) अग्निं च सोमं च । अग्निस्तेजः क० २२ । सोम ओषधीनाम् अधिराजः—क० १७ (प्रीणाति) तर्पयति (सवितारम्) प्रेरकं

तृप्त करता है । ५ । (अथ यत् स्वतवसः मरुतः यजति, घोराः वै स्वतवसः मरुतः तान् एव तेन प्रीणाति) फिर जब आत्मबलधारी मरुतों [दोषनाशक पवनों वा दुष्टनाशक वीरों] के लिये वह यज्ञ करता है, भयानक ही आत्मबलधारी मरुत् देवता हैं, उनको ही उससे वह तृप्त करता है । ६ । (अथ यत् विश्वान् देवान् यजति, एते वै विश्वे देवाः, यत् सर्वे देवाः तान् एव तेन प्रीणाति) फिर जब विश्वदेवों के लिये वह यज्ञ करता है, यह ही विश्व देव हैं जो सब दिव्य पदार्थ हैं; उनको ही वह तृप्त करता है । ७ । (अथ यत् द्यावापृथिव्यौ यजति, प्रतिष्ठे वै द्यावापृथिव्यौ, प्रतिष्ठित्यै एव) फिर जब दोनों द्यावापृथिवी [प्रकाशमान और अप्रकाशमान लोकों] के लिये यज्ञ करता है, प्रतिष्ठा [गौरव रूप] ही द्यावापृथिवी है, प्रतिष्ठा के लिये ही [उन दोनों को] उससे वह तृप्त करता है । ८ । (अथ यत् वाजिनः यजति, पशवः वै वाजिनः, पशून् एव तेन प्रीणाति) फिर जब वाजियों [अन्न वालों वा बल वालों] के लिये यज्ञ करता है, पशु ही अन्न वाले वा बल वाले हैं, पशुओं को ही उससे वह तृप्त करता है । ९ । (अथो ऋतवः वै वाजिनः ऋतून् एव तेन प्रीणाति) फिर ऋतुयें ही अन्न वाले वा बल वाले हैं, ऋतुओं को ही उससे वह तृप्त करता है । १० । (अथो छन्दांसि वै वाजिनः, छन्दांसि एव तेन प्रीणाति) फिर छन्द [वेद मन्त्र] ही अन्न वाले वा बल वाले हैं, वेद मन्त्रों को ही उससे वह तृप्त करता है । ११ । (अथो देवाश्वाः वै वाजिनः, अत्र साश्वाः देवाः अभीष्टाः प्रीताः भवन्ति) फिर देव [विजय चाहने वाले वीर] और घोड़े ही अन्न वाले वा बल वाले हैं, यहां घोड़ों सहित देव [विजय चाहने वाले पुरुष] बड़े चाहने योग्य और प्रिय हैं । ११ । (अथ यत् परस्तात् पौर्णमासेन यजते, तथा ह अस्य पूर्वपक्षे वैश्वदेवेन इष्टं भवति) फिर जब पीछे से पौर्णमास यज्ञ के साथ वह यज्ञ करता है, उसी प्रकार ही उसका पहिले पखवाड़े में वैश्वदेव [सब देवताओं के लिये यज्ञ] से यज्ञ होता है । १३ । १४ ॥ २० ॥

भावार्थः—यज्ञ में देवताओं को आहुति देकर उनके गुणों को यथावत् जानना चाहिए ॥ २० ॥

कण्डिका २१ ॥

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत, ताः सृष्टा अप्रसूता वरुणस्य यवान् जक्षुः । ताः वरुणो वरुणपाशैः प्रत्यबध्नात्, ताः प्रजाः प्रजापतिं पितरमेत्योपावदन्, उप तं यज्ञक्रतुं जानीहि, येनेष्ट्वा वरुणमप्रीणात् । स प्रीतो वरुणो वरुण-

---

सूर्यम् (तपति) तापयति (पूषणम्) पोषकं सूर्यम् (मरुतः) मृग्रोरुतिः (उ० १ । ९४) मृङ् प्राणत्यागे—उतिः । अन्तर्गतणिच् । मारयन्ति दोषान् । दोषनाशकान् वायून् । दुष्टनाशकान् वीरान् (स्वतवसः) स्व+तु हिंसायां पूर्तौ च—असुन् । आत्मबलधारकान् (घोराः) भयानकाः (द्यावापृथिव्यौ) प्रकाशमानाप्रकाशमानलोकौ (प्रतिष्ठे) गौरवरूपे (प्रतिष्ठित्यै) गौरवाय (वाजिनः) अन्नयुक्तान् । बलयुक्तान् (छन्दांसि) वेदमन्त्राः (देवाश्वाः) देवाश्च अश्वाश्च (अभीष्टाः) वाञ्छिताः (परस्तात्) पश्चात् । (पूर्वपक्षे) पूर्वार्धमासे ॥

पाशेभ्यः सर्वस्मात्पाप्मनः सम्प्रमुच्यन्त इति । तत एतं प्रजा[1]पतिर्यज्ञक्रतुमपश्यत्, वरुणप्रघासं तमाहरत् तेनायजत, तेनेष्ट्वा वरुणमप्रीणात् । स प्रीतो वरुणो वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः प्रजाः प्रामुञ्चत् । प्र ह वा एतस्य प्रजा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनो मुच्यन्ते । य एवं वेद । अथ यदग्निं प्रणयन्ति, यमेवामुं वैश्वदेवे मन्थन्ति तमेव तत् प्रणयन्ति । यन्मथ्यते, तस्योक्तं ब्राह्मणम् । अथ यत् सप्तदश सामिधेन्यः, सद्वन्तावाज्यभागौ, विराजौ संयाज्ये, तेषामुक्तं ब्राह्मणम् । अथ यन्नव प्रयाजाः नवानुयाजाः, नवैतानि हवींषि समानानि त्वेव पञ्च सञ्चराणि हवींषि भवन्ति पौष्णान्तानि, तेषामुक्तं ब्राह्मणम् ॥ २१ ॥

कण्डिका २१ ॥ प्रजापति के प्रजायें उत्पन्न करने और वरुण को प्रसन्न करने की कथा ॥

(वैश्वदेवेन वै प्रजापतिः प्रजाः असृजत, ताः सृष्टाः अप्रसूताः वरुणस्य यवान् जक्षुः) वैश्वदेव [सब देवताओं के यज्ञ] से ही प्रजापति [प्रजापालक परमेश्वर वा सूर्य] ने प्रजाओं को उत्पन्न किया, उन उत्पन्न हुई ने सन्तानशून्य [बांझ] होकर वरुण [सूर्य वा जलेश] के जौंओं को खा लिया । (ताः वरुणः वरुणपाशैः प्रत्यबध्नात्) उनको वरुण ने वरुण [रोक] के जालों से बांध लिया । (ताः प्रजाः प्रजापतिं पितरम् एत्य उपावदन्) वे प्रजायें प्रजापति पिता के पास आकर कहने लगीं—(तं यज्ञक्रतुम् उप जानीहि येन इष्ट्वा वरुणम् अप्रीणात्) उस यज्ञ व्यवहार को तू विचार, जिससे यज्ञ करके वरुण को आपने प्रसन्न किया । (सः वरुणः प्रीतः वरुणपाशेभ्यः सर्वस्मात् पाप्मनः सम्प्रमुच्यन्ते[2] इति) वह वरुण प्रसन्न होकर वरुण के जालों से और सब पाप से [हमें] छुड़ा देवे । (ततः प्रजापतिः एतं यज्ञक्रतुम् अपश्यत्) तब प्रजापति ने इस यज्ञ व्यवहार को देखा । (तं वरुणप्रघासम् आहरत्, तेन अयजत, तेन इष्ट्वा वरुणम् अप्रीणात्) वह वरुण के लिये उस अन्न को लाया और उससे यज्ञ किया और उससे यज्ञ करके वरुण को प्रसन्न किया । (सः वरुणः प्रीतः वरुणपाशेभ्यः सर्वस्मात् च पाप्मनः प्रजाः प्रामुञ्चत्) उस वरुण ने प्रसन्न होकर वरुण के फन्दों से और सब पाप से प्रजाओं को मुक्त कर दिया । (एतस्य ह वै प्रजाः वरुणपाशेभ्यः सर्वस्मात् पाप्मनः च मुच्यन्ते, यः एवं वेद) उस पुरुष की प्रजायें वरुण के फन्दों से और सब पाप से छुट जाती हैं, जो ऐसा जानता है । (अथ यत् अग्निं प्रणयन्ति, यम् एव अमुं वैश्वदेवे

२१—(असृजत) उत्पादितवान् (अप्रसूताः) सन्तानशून्याः । बन्ध्याः (यवान्) अन्नविशेषान् (जक्षुः) अद भक्षणे—लिट् । भक्षितवत्यः (वरुणः) जलेशः । सूर्यः (उपावदन्) आदरेणाकथयन् (यज्ञक्रतुम्) यज्ञव्यवहारम् (उपजानीहि) विचारय (सम्प्रमुच्यन्ते) सम्प्रमुञ्चतु (वरुणप्रघासम्) वरुणाय

---

१. पू. सं. 'प्रजापतिम्' इति पाठः ॥

२. 'सम्प्रमुच्यन्ते' यह कर्मवाच्य का प्रयोग यहाँ असङ्गत है, पाठ भ्रष्ट प्रतीत होता है ॥सम्पा०॥

मन्थन्ति, तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं, उसको ही उससे आगे लाते हैं। (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है [क० १६]। (अथ यत् सप्तदश सामिधेन्यः, सद्वन्तौ आज्यभागौ, विराजौ संयाज्ये, तेषां ब्राह्मणम् उक्तम्) फिर जब सत्रह सामिधेनी [अग्नि प्रज्वलित करने की ऋचायें], श्रेष्ठ पदार्थों वाले दो आज्यभाग, दो विराट् छन्द, संयाज्या [नाम ऋचायें] हैं, उनका ब्राह्मण कहा गया है [क० १६]। (अथ यत् नव प्रयाजाः, नव अनुयाजाः, नव एतानि हवींषि समानानि तु एव, पञ्च सञ्चराणि पौष्णान्तानि हवींषि भवन्ति, तेषां ब्राह्मणम् उक्तम्) फिर जो नौ प्रयाज, नौ अनुयाज, और नौ यह समान हवि भी और पांच संचार हवि पूषा प्रकरण के अन्त तक है, उनका ब्राह्मण कहा गया है [क० २०] ॥ २१ ॥

भावार्थः—यज्ञों को यथाविधि करने से मनुष्य पापों से छूटते हैं ॥ २१ ॥

कण्डिका २२ ॥

अथ यदैन्द्राग्नो द्वादशकपालो भवति, बलं वै तेज इन्द्राग्नी, बलमेव तत्तेजसि प्रतिष्ठापयति। अथ यद्वारुण्यामिक्षा, इन्द्रो वै वरुणः, स उ वै पयोभाजनः, तस्माद् वारुण्यामिक्षा। अथ यन्मारुती पयस्या, अप्सु वै मरुतः श्रितः, आपो हि पयः। अथेन्द्रस्य वै मरुतः श्रितः, ऐन्द्रं पयः, तस्मान्मारुती पयस्या। अथ यत् काय एककपालः, प्रजापतिर्वै कः, प्रजापतेराप्त्यै। अथो सुखस्य वा एतन्नामधेयं कमिति, सुखमेव तदध्यात्मन्धत्ते। अथ यत् मिथुनौ गावौ ददाति, तत् प्रजात्यै; रूपमुक्थ्या वाजिनः। अथ यदप्सु वरुणं यजति, स्व एवैनन्तदायतने प्रीणाति। अथ यत्पुरस्तात् पौर्णमासेन यजते, तथा ह्यस्य पूर्वपक्षे वरुणप्रघासैरिष्टं भवति ॥ २२ ॥

कण्डिका २२ ॥ इन्द्र-अग्नि, वरुण आदि के लिये हवि ॥

(अथ यत् ऐन्द्राग्नः द्वादशकपालः भवति, बलं तेजः वै इन्द्राग्नी, बलम् एव तत् तेजसि प्रतिष्ठापयति) फिर जब इन्द्र—अग्नि देवता वाला बारह पात्र में रक्खा हुआ चरु होता है, बल और तेज ही दोनों इन्द्र और अग्नि हैं, बल को ही उससे तेज में स्थापित करता है। (अथ यत् वारुणी आमिक्षा, इन्द्रः वै वरुणः, सः उ वै पयोभाजनः, तस्मात् वारुणी आमिक्षा) फिर जब वारुणी [वरुण वा जल वाली

भोजनम् (एतस्य) तस्य पुरुषस्य (प्रणयन्ति) प्रकर्षेण प्राप्नुवन्ति (समानानि) तुल्यानि (सञ्चराणि) संचरणशीलानि (पौष्णान्तानि) पूषन्—अण् + अन्तानि। पूषाप्रकरणान्तानि ॥

२२—(द्वादशकपालः) द्वादशकपालेषु संस्कृतः पुरोडाशः (प्रतिष्ठापयति) धारयति (वारुणी) वरुण—अण् ङीप्। वरुणस्येयम् ऋचा। जलसम्ब-

ऋचा] आमिक्षा [सेचन समर्थ वा छाछ] है, इन्द्र ही वरुण है, यह ही जल बांटने वाला है, इसलिये वारुणी [वरुण देवता वाली ऋचा] आमिक्षा [सेचन समर्थ] है। (अथ यत् मारुती पयस्या, अप्सु वै मरुतः श्रितः आपः हि पयः) फिर जब मारुती [मरुत् अर्थात् पवन देवता वाली ऋचा] पयस्या [जल वाली वा दधि वाली] है, "आप्" अर्थात् जल में ही पवन देवता ठहरे हैं, आप् ही जल है। (अथ इन्द्रस्य वै मरुतः श्रितः, ऐन्द्रं पयः, तस्मात् मारुती पयस्या) फिर इन्द्र के ही आश्रित मरुत् [पवन देवता] हैं, इन्द्र देवता वाला जल है, इसलिये मारुती [अर्थात् पवन देवता वाली ऋचा] पयस्या [जल वाली वा दधि वाली] है। (अथ यत् कायः एककपालः प्रजापतिः वै कः प्रजापतेः आप्त्यै) फिर जब "काय" अर्थात् प्रजापति देवता वाला एक पात्र में रक्खा हुआ चरु होता है, प्रजापति ही "क" है, प्रजापति की प्राप्ति के लिये यह [चरु] है। (अथो सुखस्य वै कम् इति एतत् नामधेयं, सुखम् एव तत् अध्यात्मं धत्ते) फिर सुख का ही "क" यह नाम है, सुख को ही उससे आत्मा में धारण करता है। (अथ यत् मिथुनौ गावौ ददाति, तत् प्रजात्यै उक्थ्या वाजिनः रूपम्) फिर जब जोड़ा गाय बैल का वह दान करता है, यह सन्तान उत्पन्न करने के लिये हैं, उक्थ्या [प्रशंसनीया ऋचा] बलवान् का रूप है। (अथ यत् अप्सु वरुणं यजति, तत् एनं स्वे एव आयतने प्रीणाति) फिर जब जल में वरुण को पूजता है, तब इसको अपने ही घर में तृप्त करता है। (अथ यत् परस्तात् पौर्णमासेन यजते. तथा ह अस्य पूर्वपक्षे वरुणप्रघासैः इष्टं भवति) फिर जब पीछे से पौर्णमास यज्ञ के साथ वरुण का यज्ञ करता है, उसी प्रकार ही उसका पहिले पखवाड़े में वरुण के हवियों से यज्ञ होता है ॥ २२ ॥

भावार्थः—यज्ञीय पदार्थों के गुण जानकर यज्ञ करने से मनुष्यों में बल और पराक्रम बढ़ता है ॥ २२ ॥

कण्डिका २३ ॥

ऐन्द्रो वा एष यज्ञक्रतुः, यत् साकमेधाः, तद्यथा महाराजः पुरस्तात् सेनानीकानि व्यूह्याभयं पन्थानमन्वियात्, एवमेवैतत् पुरस्ताद् देवता यजन्ते, तद यथैवादः सोमस्य महाव्रतम्, एवमेवैतदिष्टिमहाव्रतम्। अथ यदग्निमनीकवन्तं प्रथमं देवतानां यजति, अग्निर्वै देवानां मुखं, मुखत एव तद्देवान् प्रीणाति। अथ यन्माध्यन्दिने मरुतः सान्तपनान् यजति, इन्द्रो वै मरुतः सान्तपनाः, ऐन्द्रं माध्यन्दिनं, तस्मादेनानिन्द्रेणोपसंहितान् यजति। अथ यत् सायं गृहमेधीयेन चरन्ति,

---

न्धिनी (आमिक्षा) स्नुव्रश्चि० (उ० ३ । ६६) आ + मिष सेचने हिंसायां च–सः, टाप्। सेचनसमर्था। दुग्धविकारः (पयोभाजनः) जलविभाजकः (मारुती) मरुत्सम्बन्धिनी ऋक् (पयस्या) पयस्—यत्। जलवती क्रिया (आमिक्षा) दुग्धविकारदध्यादि (ऐन्द्रम्) इन्द्रदेवताकम् (कायः) क–अण्, युगागमश्च। प्रजापतिदेवताकश्चरुः (आप्त्यै) लाभाय (अध्यात्मम्) आत्मनि (मिथुनौ) स्त्रीपुंसौ (गावौ) धेनुवृषभौ (प्रजात्यै) संतानोत्पादनाय (उक्थ्या) ऋक्। (वाजिनः) बलयुक्तस्य (वरुणप्रघासैः) वरुणचरुभिः (इष्टम्) यज्ञः ॥

पुष्टिकर्म वै गृहमेधीयः, सायम्पोषः पशूनां, तस्माद् सायं गृहमेधीयेन चरन्ति। अथ यच्छ्वोभूते गृहमेधीयस्य निष्कासमिश्रेण पूर्णद¹र्व्या चरन्ति, पूर्वेद्युः कर्मणैवैतत् प्रातः कर्मोपसन्तन्वन्ति। अथ यत् प्रातर्मरुतः क्रीडिनो य¹जन्ति, इन्द्रो वै मरुतः क्रीडिनः, तस्मादेनानिन्द्रेणोपसंहितान् यजति। अथ यदग्निं प्रणयन्ति, यमेवामुं वैश्वदेवे मन्थन्ति, तमेव तत् प्रणयन्ति, यन्मथ्यते तस्योक्तं ब्राह्मणम्। अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ, विराजौ संयाज्ये, तेषामुक्तं ब्राह्मणम्। अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि समानानि त्वेव षट् सञ्चराणि हवींषि भवन्त्यैन्द्राग्नान्तानि, तेषामुक्तं ब्राह्मणम्। अथ यन्महेन्द्रमन्ततो यजति, अन्तं वै श्रेष्ठी भजते तस्मादेनमन्ततो यजति अथ यद्वैश्वकर्मण एककपालः, असौ वै विश्वकर्मा, योऽसौ तपत्येतमेव तेन प्रीणाति अथ यदृषभञ्ज्ञां ददाति, ऐन्द्रो ह यज्ञक्रतुः ॥ २३ ॥

कण्डिका २३ ॥ इन्द्र, अग्नि और मरुत् देवताओं के लिए हवि ॥

(ऐन्द्रः वै एषः यज्ञक्रतुः, यत् साकमेधाः) इन्द्र [ऐश्वर्य] देवता वाला ही यह यज्ञ व्यवहार है, जो साकमेध [वल के लिए बुद्धि वाले यज्ञ] हैं। (तत् यथा महाराजः पुरस्तात् सेनानीकानि व्यूह्य अभयं पन्थानं अन्वियात्, एवम् एव एतत् पुरस्तात् देवताः यजन्ते) सो जिस प्रकार महाराजा पहिले से सेना के विभागों को व्यूह में करके निर्भय मार्ग चला जाता है, ऐसे ही इस [इन्द्र] को पहिले देवता पूजते हैं। (तत् यथा एव सोमस्य अदः महाव्रतम्, एवम् एव एतत् इष्टिमहाव्रतम्) सो जिस प्रकार ही सोम [यज्ञ] का वह महाव्रत है, वैसे ही यह इष्टि महाव्रत है। (अथ यत् अनीकवन्तम् अग्नि देवतानां प्रथमं यजति, अग्निः वै देवानां मुखं, मुखतः एव तत् देवान् प्रीणाति) फिर जो सेना [शिखा धूम आदि] वाले अग्नि को देवताओं में पहिले वह पूजता है, अग्नि ही देवताओं का मुख [प्रधान] है, मुख से ही उस [यज्ञ] से देवताओं को तृप्त करता है। (अथ यत् माध्यन्दिने सान्तपनान् मरुतः यजति, इन्द्रः वै सान्तपनाः मरुतः, ऐन्द्रं माध्यन्दिनं, तस्मात् एनान् इन्द्रेण उपसंहितान् यजति) फिर जब मध्याह्न में भली भांति तपाने वाले मरुत् [पवन वा किरण] देवताओं को वह यज्ञ करता है, इन्द्र [सूर्य] ही भलीभांति तपाने वाले मरुत् हैं, इन्द्र देवता वाला माध्यन्दिन [दोपहर का सवन] है, इसलिये इन [मरुतों] को इन्द्र के साथ-साथ यज्ञ करता है। (अथ यत् सायं गृहमेधीयेन चरन्ति, पुष्टिकर्म वै गृहमेधीयः, सायं पशूनां पोषः,

---

२३ - (साकमेधाः) शक्लृ शक्तौ—घञ्+मेधृ मेधायाम्—घञ्। शस्य सः। शाकाय शक्तये मेधा येषु ते यज्ञाः (सेनानीकानि) अनिहृषिभ्यां किच्च (उ० ४। १७) अन जीवने—ईकन् कित्। सेनाविभागान् (व्यूह्य) सैन्यसंन्निवेशेन स्थापयित्वा (अनीकवन्तम्) सेनावत् शिखाधूमादियुक्तम् (सान्तपनान्) सम्+तप तापे ऐश्वर्ये च—णिच्—ल्युट्। सन्तापकारकान् (उपसंहितान्) उप+सम्+

---

१. पू. सं० 'पूर्णा दर्व्या' 'यजति' इति पाठः ॥ सम्पा० ॥

तस्मात् सायं गृहमेधीयेन चरन्ति) फिर जब सायंकाल में गृहमेधीय [गृहस्थ के कर्तव्य धर्म] के साथ व्यवहार करते हैं, पुष्टिकारक कर्म ही गृहमेधीय है, सायंकाल में पशुओं का पोषण होता है, इसलिये सायंकाल में गृहमेधीय [गृहस्थ के कर्तव्य धर्म] से व्यवहार करते हैं। (अथ यत् श्वोभूते गृहमेधीयस्य निष्कासमिश्रेण पूर्णदर्व्या चरन्ति पूर्वेद्युः कर्मणा एव एतत् कर्म प्रातः उपसन्तन्वन्ति) फिर जब आगामी कल्य में हुये गृहमेधीय [गृहस्थ के कर्तव्य धर्म] के निकास और संयोग के साथ पूर्ण दर्वी [भोजन पात्र] के द्वारा व्यवहार करते हैं वीते हुये कल्य के कर्म से ही इस कर्म को प्रातःकाल विस्तृत करते हैं। (अथ यत् प्रातः क्रीडिनः मरुतः यजन्ति, इन्द्रः वै क्रीडिनः मरुतः तस्मात् एनान् इन्द्रेण उपसंहितान् यजति) फिर जब प्रातःकाल खिलाड़ी मरुत् देवताओं को यज्ञ करते हैं, इन्द्र ही खिलाड़ी मरुत् हैं, इसलिये इन [मरुतों] को इन्द्र के साथ-साथ यज्ञ करता है। (अथ यत् अग्निं प्रणयन्ति यम् एव अमुं वैश्वदेवे मन्थन्ति तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं, उसको ही उससे आगे लाते हैं। (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है। [क० १९, २१]। (अथ यत् सप्तदश सामिधेन्यः, सद्वन्तौ आज्यभागौ, विराजौ संयाज्ये, तेषां ब्राह्मणम् उक्तम्) फिर जब सत्रह सामिधेनी [अग्नि प्रज्वलित करने की ऋचायें], श्रेष्ठ पदार्थ वाले दो आज्यभाग, दो विराट् छन्द संयाज्या [नाम ऋचायें] हैं, उनका ब्राह्मण कहा गया है [क० १९, २१]। (अथ यत् नव प्रयाजाः नव अनुयाजाः, अष्टौ हवींषि समानानि तु एव, षट् सञ्चराणि ऐन्द्राग्नान्तानि हवींषि भवन्ति तेषां ब्राह्मणम् उक्तम्) फिर जो नौ प्रयाज, नौ अनुयाज, और आठ समान हवि भी और छह सञ्चार हवि इन्द्र और अग्नि के प्रकरण तक हैं उनका ब्राह्मण कहा गया है [क० २२]। (अथ यत् महेन्द्रम् अन्ततः यजति, अन्तं वै श्रेष्ठी भजते तस्मात् एनम् अन्ततः यजति) फिर जब महेन्द्र [परमेश्वर] को अन्त में यज्ञ करता है, अन्त को ही श्रेष्ठी [सेठ, बड़ा धनी] सेवता है, इसलिये इस [महेन्द्र] को अन्त में वह यज्ञ करता है। (अथ यत् वैश्वकर्मणः एककपालः, असौ वै विश्वकर्मा, यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब विश्वकर्म देवता वाला एक पात्र में धरा चरु होता है, वह ही विश्वकर्मा [सबका बनाने वाला ईश्वर] है जो वह तपाता है, इसको ही उस [यज्ञ] से तृप्त करता है। (अथ यत् ऋषभं गां ददाति, ऐन्द्रः ह यज्ञक्रतुः) फिर जब बैल और गाय [क० २२] को वह देता है, इन्द्र [तेज वा ऐश्वर्य] देवता वाला ही यह यज्ञ व्यवहार है ॥ २३ ॥

दधातेः—क्तः। संयुक्तान् (गृहमेधीयेन) गृहमेधिन्—छः। गृहस्थकर्तव्येन धर्मेण यज्ञेन (चरन्ति) व्यवहरन्ति (श्वोभूते) आगामिदिवसभूते (निष्कासमिश्रेण) निस्+कासृ शब्दे—घञ्+मिश्र योजने—अच्। निःसारेण सह संयोगेन (पूर्णदर्व्या) दॄ विदारणे—विन्। पूर्णचमसेन (पूर्वेद्युः) गतदिवसे (उपसन्तन्वन्ति) यथावत् विस्तारयन्ति (श्रेष्ठी) बहुधनी (भजते) सेवते (वैश्वकर्मणः) विश्वकर्मन्—अण्। विश्वकर्मदेवताकः (विश्वकर्मा) सर्वकर्ता। सूर्यः परमेश्वरः (ऋषभम्) वृषभम् (गाम्) धेनुम् ॥

भावार्थः—प्रातःसवन, माध्यन्दिन सवन और तृतीयसवन में देवताओं के गुण कर्म स्वभाव जानकर यज्ञ करना चाहिये ॥ २३ ॥

कण्डिका २४ ॥

अथ यदपराह्णे पितृयज्ञेन चरन्ति, अपराह्णभाजो वै पितरः तस्मादपराह्णे पितृयज्ञेन चरन्ति। तदाहुर्यदपरपक्षभाजो वै पितरः, कस्मादेनान् पूर्वपक्षे यजन्तीति। देवा वा एते पितरः, तस्मादेनान् पूर्वपक्षे यजन्तीति। अथ यदेकाᳬ सामिधेनीन्त्रिरन्वाह, सकृदु ह वै पितरः, तस्मादेकां सामिधेनीन्त्रिरन्वाह। अथ यद्यजमानस्यार्षेऽन्वाह, नेद्यजमानं प्रमृणजानीति। अथ यत् सोमम्पितृमन्तं पितॄन् सोमवतः पितॄन् बर्हिषदः पितॄनग्निष्वात्तानित्यावाहयन्ति, न हैके स्वं महिमानमावाहयन्ति, यजमानस्यैष महिमेति वदत आवाहयेदिति, त्वेव स्थितमग्नेर्ह्येष महिमा भवति, ओं स्वधेत्याश्रावयति, अस्तु स्वधेति प्रत्याश्रावयति, स्वधाकारो हि पितॄणाम्। अथ यत् प्रयाजानुयाजेभ्यो बर्हिष्मन्तावुद्धरति, प्रजा वै बर्हिः, नेत् प्रजां पितृषु दधातीति[1] ते वै षट् सम्पद्यन्ते, षड् वा ऋतवः, ऋतवः पितरः, पितॄणामाप्त्यै ॥ २४ ॥

कण्डिका २४ ॥ पितरों के लिये हवि ॥

(अथ यत् अपराह्णे पितृयज्ञेन चरन्ति) फिर जब तीसरे पहर [दिन के तीन भागों में से तीसरे भाग में] पितृयज्ञ [माता पिता आदि पालक ज्ञानियों के सत्कार] से वे व्यवहार करते हैं, (अपराह्णभाजः वै पितरः तस्मात् अपराह्णे पितृयज्ञेन चरन्ति) तीसरे पहर में भाग वाले ही पितर [पालनकर्ता ज्ञानी पुरुष] हैं, इसलिये तीसरे पहर में पितृयज्ञ से वे व्यवहार करते हैं। (तत् आहुः यत् अपरपक्षभाजः वै पितरः, कस्मात् एनान् पूर्वपक्षे यजन्ति इति) यह कहते हैं कि दूसरे पक्ष [श्रेणी वा पङ्क्ति] में भाग वाले ही पितर हैं, किसलिये इनको पहिले पक्ष [श्रेणी] में यज्ञ करते हैं। [उत्तर] (देवाः वै एते पितरः तस्मात् एनान् पूर्वपक्षे यजन्ति इति) देव [विजय चाहने वाले वीर] ही यह पितर लोग हैं, इसलिये इनको पहिले पक्ष में [पहिली श्रेणी में] यज्ञ करते हैं। (अथ यत् एकां सामिधेनीं त्रिः अन्वाह) फिर जो एक सामिधेनी [अग्नि प्रदीप्त करने की ऋचा] को तीन वार वह बोलता है। (सकृत् उ ह वै पितरः, तस्मात् एकां सामिधेनीं त्रिः अन्वाह) [उत्तर] उचित काम करने वाले ही निश्चय करके पितर [माता पिता आदि ज्ञानी पुरुष] हैं, इसलिये एक सामिधेनी को वह तीन वार [आदर के लिये] पढ़ता है। (अथ यत् यजमानस्य आर्षे अन्वाह) फिर जब यजमान के आर्ष

२४—(अपराह्णे) त्रिधाविभक्तदिनस्य तृतीयभागे (अपराह्णभाजः) अपराह्णहविर्भागिनः (अपरपक्षभाजः) द्वितीयश्रेणिभागिनः (पूर्वपक्षे) प्रथमश्रेण्याम् (अन्वाह) पठति (सकृत्) एकवारम् अथवा, समानं साधु, समानस्य

---

१. पू. सं. "दधाति" इति पाठः ॥ सम्पा० ॥

यज्ञ में [ऋषियों के लिये सत्कार में एक सामिधेनी ऋचा को तीन बार] पढ़ता है। (यजमानं नेत् प्रमृणजानीति) [उत्तर] वह यजमान को नहीं मारता है [अमर करता है]। (अथ यत् पितृमन्तं सोमं, सोमवतः पितॄन्, बर्हिषदः पितॄन्, अग्निष्वात्तान् पितॄन् आवाहयन्ति) फिर जब श्रेष्ठ माता पिता वाले सोम [प्रेरक पुरुष] को, सोम [बड़े ऐश्वर्य] वाले पितरों [माता पिता आदि ज्ञानियों] को, वृद्धिकारक व्यवहार में बैठने वाले पितरों को और अग्निष्वात्ता [अग्नि अर्थात् बिजुली सूर्य और अग्नि विद्या तथा शारीरिक और आत्मिक तेज ग्रहण करने वाले] पितरों को वे बुलाते हैं [अथर्व० १८। ४। ७१-७४ भी देखो]। (एके ह स्वं महिमानं न आवाहयन्ति यजमानस्य एव एषः महिमा इति वदतः आवाहयेत् इति, तु अग्नेः एव हि एषः महिमा स्थितं भवति) कोई कोई अपनी महिमा को नहीं बुलवाते हैं—यह यजमान की ही महिमा है—ऐसा कहते हुए पुरुषों को वह बुलवावे, किन्तु अग्नि [विद्वान् पुरुष] की ही यह महिमा स्थित होती है। (ओं स्वधा इति आश्रावयति, स्वधा अस्तु इति प्रत्याश्रावयति, स्वधाकारः हि पितॄणाम्) ओम् स्वधा [यह अन्न वा जल] है—ऐसा वह बोलता है, स्वधा होवे—ऐसा वह उत्तर में बोलता है, स्वधाकार [अन्न वा जल का व्यवहार] ही पितरों के लिये है। (अथ यत् प्रयाजानुयाजेभ्यः बर्हिष्मन्तौ उद्धरति, प्रजा वै बर्हिः प्रजां पितृषु नेत् दधाति इति) फिर जब प्रयाज अनुयाज यज्ञों के लिये दो बर्हि [वृद्धिकारक व्यवहार वा कुश] वाले मन्त्रों को वह बोलता है, प्रजा ही बर्हि [कुश घास के समान वृद्धिकारक] है, प्रजा को पितरों में वह नहीं धारण करता है [अर्थात् प्रजा से पितरों का अधिक आदर करता है]। (ते वै षट् सम्पद्यन्ते, षट् वै ऋतवः, ऋतवः पितरः, पितॄणाम् आप्त्यै)

सः+करोतेः—क्विप्। तुगागमः विभक्तिलोपः। साधुकर्माणः। उचितकर्मकर्तारः (आर्षे) ऋषिनिमित्ते (नेत्) निषेधे (प्रमृणजा[1]नीति) पारयतेरजिः (उ० १। १३६) प्र+मृण हिंसायाम्—अजिः। प्रमृणज्-क्विप्। नामधातोः-शप् श्ना इति द्वौ विकरणौ। प्रकर्षेण मृणति हिनस्ति (सोमम्) प्रेरकपुरुषम् (पितृमन्तम्) प्रशस्तमातापितृभ्यां युक्तम् (पितॄन्) मातापित्रादिपालकज्ञानिनः (सोमवतः) परमैश्वर्ययुक्तान् (बर्हिषदः) बर्हिषि वृद्धिकरे व्यवहारे सदनशीलान् (अग्निष्वात्तान्) अग्नि+सु+आङ्+ददातेः—क्तः। अग्निः सूर्यविद्युदग्निविद्या शारीरिकात्मिकतेजो वा आत्तं गृहीतं यैस्तान् (एके) केचित् (वदतः) कथयतः (स्थितम्) स्थितः (स्वधा) अन्नम्—निघ० २। ७। उदकम्—निघ० १। १२। (आश्रावयति) उच्चारयति (प्रत्याश्रावयति) अङ्गीकरोति (बर्हिष्मन्तौ) वृद्धिकरव्यवहारयुक्तौ मन्त्रौ (ते) पितरः ॥

---

१ शब्दों की इस प्रकार असाधारण सिद्धि का उदाहरण मिलना अत्यन्त दुर्लभ है। बार २ व्याकरण के नियमों की उपेक्षा करने के बाद भी यह शब्द भली प्रकार सिद्ध नहीं हो सका है। वास्तव में तो बाहुलक से श्नम् विकरणयुक्त मृज् धातु के लोट् लकार उत्तम पुरुष एकवचन का "प्रमृणजानि" प्रयोग समीचीन जान पड़ता है ॥ सम्पा० ॥

वे [पितर लोग यज्ञ में] छह ही सम्पन्न किये जाते हैं, छह ही ऋतुयें हैं, ऋतुओं [के समान वृद्धिकारक] पितर हैं, पितरों की तृप्ति के लिये [यह यज्ञ है] ॥ २४ ॥

भावार्थः—यज्ञ में पितर लोगों का यथावत् सत्कार करने से यजमान की महिमा बढ़ती है ॥ २४ ॥

कण्डिका २५ ॥

अथ यज्जीवनवन्तावाज्यभागौ भवतः, यजमानमेव तज्जीवयतः । अथ यदेकैकस्य हविषस्तिस्रस्तिस्रो याज्या भवन्ति, ह्वयत्येवैनां प्रथमया, द्वितीयया गमयति, प्रैव तृतीयया यच्छति । अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति, अथो दक्षिणासंस्थो वै पितृयज्ञः, तमेवैतदुदक्सꣳस्थं कुर्वन्ति । अथ यदग्निं कव्यवाहनमन्ततो यजति, एतत् स्विष्टकृतो वै पितरः, तस्मादग्निं कव्यवाहनमन्ततो यजति । अथ यदिडामुपहूयावघ्राय न प्राश्नन्ति, पशवो वा इडा, नेत्पशून् प्रमृणजानीति । अथ यत् सूक्तवाके यजमानस्याशिषोऽन्वाह, नेद्यजमानं प्रमृणजानीति । अथ यत् पत्नीन्न संयाजयन्ति, नेत्पत्नीं प्रमृणजानीति । अथ यत् पवित्रवति मार्जयन्ते, शान्तिर्वै भेषजमापः, शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते । अथ यदध्वर्य्युः पितृभ्यो निपृणाति, जीवानेव तत् पितॄननु मनुष्याः पितरोऽनुप्रवहन्ति । अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति । अथो दक्षिणासंस्थो वै पितृयज्ञः तमेवैतदुदक्संस्थं कुर्वन्ति । अथ यत् प्राञ्चोऽभ्युत्क्रम्यादित्यमुपतिष्ठन्ते देवलोको वा आदित्यः, पितृलोकः पितरः, देवलोकमेवैनं पितृलोकादुपसङ्क्रामन्तीति । अथ यद्दक्षिणाञ्चोऽभ्युत्क्रम्याग्नीनुपतिष्ठन्ते, प्रीत्यैव तद्देवेष्वन्ततोद्ध्वं चरन्ति । अथ यदुदञ्चोऽभ्युत्क्रम्य त्र्यम्बकैर्यजन्ते, रुद्रमेव तत् स्वस्याꣳ दिशि प्रीणन्ति । अथो देवयज्ञमेवैनं पितृयज्ञेन व्यावर्त्तयन्ति । अथो दक्षिणासꣳस्थो वै पितृयज्ञः, तमेवैतदुदक्सꣳस्थं कुर्वन्ति । अथ यदन्तत आदित्येष्टया यजति इयं वा अदितिरस्यामेवैनमन्ततः प्रतिष्ठापयति । अथ यत्परस्तात् पौर्णमासेन यजते, तथाहास्य पूर्वपक्षे साकमेधैरिष्टं भवति ॥ २५ ॥

कण्डिका २५ ॥ पितृयज्ञ के साथ देवयज्ञ आदि का विधान ॥

(अथ यत् जीवनवन्तौ आज्यभागौ भवतः, यजमानम् एव तत् जीवयतः) फिर जब दो जीवन साधन वाले आज्यभाग [घृत की आहुति वाले मन्त्र] होते हैं, यजमान को ही वे दोनों जीवन देते हैं। (अथ यत् एकैकस्य हविषः तिस्रः तिस्रः याज्याः भवन्ति, एनान् एव प्रथमया ह्वयति, द्वितीयया गमयति, तृतीयया एव प्रयच्छति) फिर जब एक एक हवि की तीन तीन याज्या [ऋचायें] होती हैं, पहिली से ही इन [पितरों] को वह बुलाता है, दूसरी से वह चलाता है और तीसरी से ही वह

२५—(जीवनवन्तौ) जीवनसाधनयुक्तौ (हविषः) ग्राह्यपदार्थस्य। अन्नस्य (ह्वयति) आह्वयति (एनान्) पितॄन् (गमयति) प्रापयति (प्रयच्छति)

दान करता है। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रक्खा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रक्खा हुआ करते हैं। (अथ यत् कव्यवाहनम् अग्निम् अन्ततः यजति, एतत् स्विष्टकृतः वै पितरः, तस्मात् कव्यवाहनम् अग्निम् अन्ततः यजति) फिर जब कव्यवाहन [विद्वानों को हितकारक पदार्थ पहुंचाने वाले] अग्नि [तेजस्वी पुरुष] का सत्कार करता है, इससे सुन्दर इष्ट व्यवहार करने वाले ही पितर लोग होते हैं, इसलिये कव्यवाहन [विद्वानों को हितकारक पदार्थ पहुँचाने वाले] अग्नि [तेजस्वी पुरुष] का सत्कार करते हैं। (अथ यत् इडाम् उपहूय अवघ्राय न प्राश्नन्ति, पशवः वै इडाः पशून् नेत् प्रमृणजानीति) फिर जब अन्न को मंगा कर और सूंघ कर वे अब खाते हैं, पशु [सब जीव] ही अन्न [अन्न के आश्रित] हैं, पशुओं [जीवों] को वह नहीं मारता है। (अथ यत् सूक्तवाके यजमानस्य आशिषः अन्वाह, यजमानं नेत् प्रमृणजानीति) फिर जब सूक्तवाक [सुन्दर कहे हुये वाक्य वाले यज्ञ] में यजमान के आशीर्वादों को वह पढ़ता है, यजमान को वह नहीं मारता है। (अथ यत् पत्नीं न सयाजयन्ति, पत्नीं नेत् प्रमृणजानीति) फिर जब [यजमान की] पत्नी से अब वह यज्ञ कराते हैं, पत्नी को वह नहीं मारता है [सुरक्षित करता है]। (अथ यत् पवित्रवति मार्जयन्ते, शान्तिः वै भेषजम् आपः, शान्तिः एव एषां भेषजम् अन्ततः यज्ञे क्रियते) फिर जब जल वाले [पात्र] में शुद्ध करते हैं, शान्ति ही औषध जल है, शान्ति ही इनकी औषधि अन्त में यज्ञ में की जाती है। (अथ यत् अध्वर्युः पितृभ्यो निपृणाति, तत् मनुष्याः पितरः पितॄन् अनु जीवान् एव अनुप्रवहन्ति) फिर जब अध्वर्यु पितरों [पालक विद्वानों] को परिपूर्ण करता है, मननशील और पालनकर्ता पुरुष तब पितरों के पीछे-पीछे जीवों को चलाते रहते हैं। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक

ददाति (व्यावर्त्तयन्ति) वर्त्तमानं कुर्वन्ति (दक्षिणासंस्थः) दक्षिणस्यां दिशि सम्यक् स्थितः (उदक्संस्थम्) उत्तरस्यां दिशि सम्यक् स्थितम् (अग्निम्) विद्वांसं पुरुषम् (कव्यवाहनम्) कवि–यत्। कव्यपुरीषपुरीष्येषु ञ्युट् (पा० ३। २। ६५) कव्य + वहेर्ञ्युट्। कविर्मेधाविनाम—निघ० ३। १५। कविभ्यो मेधाविभ्यो हितपदार्थानां प्रापकम् (इडाम्) अन्नम्—निघ० २। ७। (पशवः) जीवाः (प्रमृणजानीति) क० २४। प्रकर्षेण मृणति हिनस्ति (आशिषः) आशीर्वादान् (न) सम्प्रति (पवित्रवति) उदकनाम—निघ० १। १२। (मार्जयन्ते) शोधयन्ति (पितृभ्यः) पितॄन् (निपृणाति) पॄ पालनपूरणयोः—लट्। नितरां पालयति पूरयति वा (अनु) अनुसृत्य (प्राञ्चः) पूर्वदिक्स्थाः पुरुषाः (अभ्युत्क्रम्य) अभित उत्थाय (आदित्यम्) आदीप्यमानं सूर्य्यम् (उपतिष्ठन्ते) सेवन्ते (उपसङ्क्रामन्ति) उपसंगत्य गच्छन्ति प्राप्नुवन्ति (दक्षिणाञ्चः) दक्षिणदिक्स्थाः (उदञ्चः) उत्तरदिक्स्थाः (त्र्यम्बकैः) त्रि + अम्ब गतौ—

विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रक्खा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रक्खा हुआ करते हैं। (अथ यत् प्राञ्चः अभ्युत्क्रम्य आदित्यम् उपतिष्ठन्ते, देवलोकः वै आदित्यः, पितृलोकः पितरः, एनम् एव देवलोकं पितृलोकात् उपसङ्क्रामन्ति इति) फिर जब पूर्ववाले पुरुष उठ करके सूर्य को सेवते हैं, देवलोक [विद्वानों का स्थान] ही सूर्य [समान] है, पितृलोक [पितरों का स्थान] पितर [पालन करने वाले पदार्थ] हैं, इस देव लोक को ही पितृलोक से चलकर अच्छे प्रकार प्राप्त करते हैं। (अथ यत् दक्षिणाञ्चः उत्क्रम्य अग्नीन् उपतिष्ठन्ते प्रीत्या एव तत् देवेषु अन्ततः ऊर्ध्वं चरन्ति) फिर जब दक्षिण दिशा वाले उठकर अग्नियों को सेवते हैं, प्रीति के साथ ही तब विद्वानों के बीच अन्त में वे ऊंचे चलते हैं। (अथ यत् उदञ्चः अभ्युत्क्रम्य त्रैयम्बकैः यजन्ते, रुद्रम् एव तत् स्वस्यां दिशि प्रीणन्ति) फिर जब उत्तर वाले पुरुष उठकर त्रैयम्बक [अर्थात् त्र्यम्बक, तीनों कालों और तीनों लोकों में नेत्र वाले परमेश्वर] को देवता रखते हुये हवियों से वे पूजते हैं, रुद्र [दुष्टों को रुलाने वाले परमात्मा] को ही तब अपनी दिशा में वे प्रसन्न करते हैं। (अथो एनं देवयज्ञम् एव पितृयज्ञेन व्यावर्त्तयन्ति) फिर इस देवयज्ञ [विद्वानों के सत्कार] को ही पितृयज्ञ [पितरों माता पिता आदि पालक विद्वानों के सत्कार] के साथ वर्त्तमान करते हैं। (अथो दक्षिणासंस्थः वै पितृयज्ञः, तम् एव एतत् उदक्संस्थं कुर्वन्ति) फिर दक्षिण दिशा में रखा हुआ ही पितृयज्ञ है, उसको ही इससे उत्तर दिशा में रखा हुआ करते हैं। (अथ यत् अन्ततः आदित्येष्टया यजति, इयं वै अदितिः, अस्याम् एव एनम् अन्ततः प्रतिष्ठापयति) फिर जब अन्त में अदिति देवता वाली इष्टि से वह यज्ञ करता है, यह [पृथिवी] ही अदिति [अदीन देवमाता, दिव्य पदार्थों को उत्पन्न करने वाली] है, इस [पृथिवी] पर ही इस [यजमान] को अन्त में वह प्रतिष्ठित करता है। (अथ यत् परस्तात् पौर्णमासेन यजते, तथा ह अस्य पूर्वपक्षे साकमेधैः इष्टं भवति) फिर जब पीछे से पौर्णमास यज्ञ के साथ वह यज्ञ करता है, उसी प्रकार ही उसका पहिले पखवाड़े में साकमेधों [क० २३ बल के लिये बुद्धि वाले यज्ञों] से यज्ञ होता है॥ २५॥

भावार्थः---जैसे यज्ञ में यज्ञदेवताओं के लिये यज्ञपदार्थ एक स्थान से दूसरे ऊंचे स्थान को लाये जाते हैं, वैसे ही मनुष्य एक पद से दूसरे उच्च पद को चढ़ते जावें॥ २५॥

ण्वुल्। तन्वादीनां छन्दसि बहुलम् (वा० पा० ६। ४। ७७) इति इयङ्। त्रिषु कालेषु लोकेषु च अम्बकं नेत्रं यस्य स त्र्यम्बकः त्रियम्बकः। ततः अण्। त्रियम्बकदेवताकैः (आदित्येष्टया) अदिति—ण्यः। अदितिदेवताकयेष्टया (इयम्) दृश्यमाना पृथिवी (अदितिः) अदीना देवमाता—निरु० ४। २२। दिव्य-पदार्थानां जनयित्री (साकमेधैः) क० २३। शाकाय बलाय मेधा येषु तैर्यज्ञैः॥

कण्डिका २६ ॥

त्रयोदशं वा एतं मासमाप्नोति, यच्छुनासीर्य्येण यजते, एतावान्वै संवत्सरः, यावानेष त्रयोदशो मासः। अथ यदग्निं प्रणयन्ति, यमेवामुं वैश्वदेवे मन्थन्ति, तमेव तत् प्रणयन्ति, यन्मथ्यते, तस्योक्तं ब्राह्मणं, यद्यु न मथ्यते पौर्णमासमेव तन्त्रं भवति, प्रतिष्ठा वै पौर्णमासं, प्रतिष्ठित्या एव। अथ यद्वायुं यजति, प्राणो वै वायुः प्राणमेव तेन प्रीणाति। अथ यच्छुनासीरं यजति, संवत्सरो वै शुनासी[1]रः, संवत्सरमेव तेन प्रीणाति। अथ यत्सूर्य्यं यजति, असौ वै सूर्य्यः, योऽसौ तपति, एतमेव तेन प्रीणाति। अथ यच्छ्वेता दक्षिणा ददाति, एतस्यैव तद्रूपं क्रियते। अथ यत् प्रायश्चित्तप्रतिनिधिं कुर्वन्ति, स्वस्त्ययनमेव तत् कुर्वन्ति, यज्ञस्यैव शान्तिर्यजमानस्य भैषज्याय। तैर्वा एतैश्चातुर्मास्यैर्देवाः सर्वान् कामानाप्नुवन्, सर्वा इष्टीः सर्वममृतत्वम्। स वा एष प्रजापति[2]श्चतुर्विंशः, यच्चातुर्मास्यानि, तस्य मुखमेव वैश्वदेवं, बाहू वरुणप्रघासाः प्राणोऽपानो व्यान इत्येतास्तिस्र इष्टयः, आत्मा महाहविः, प्रतिष्ठा शुनासीरं स वा एष प्रजापतिरेव संवत्सरः, यच्चातुर्मास्यानि, सर्वं वै प्रजापतिः, सर्वं चातुर्मास्यानि, तत्सर्वेणैव सर्वमाप्नोति य एवं वेद यश्चैवं विद्वांश्चातुर्मास्यैर्यजते चातुर्मास्यैर्यजते ॥ २६ ॥

इति अथर्ववेदस्य गोपथब्राह्मणोत्तरभागे प्रथमः प्रपाठकः समाप्तः ॥

कण्डिका २६ ॥ तेरहवें महीने और शुनासीर यज्ञ के साथ अग्नि, वायु, सूर्य, संवत्सर और चातुर्मास्यों का वर्णन ॥

(त्रयोदशं वै एतं मासम् आप्नोति, यत् शुनासीर्य्येण यजते) तेरहवें ही इस महीने को वह [यजमान] प्राप्त होता है जो शुनासीर [इन्द्र, वायु वा सूर्य—आगे देखो] देवता वाले हवि से यज्ञ करता है। (एतावान् वै संवत्सरः, यावान् एषः त्रयोदशः मासः) इतना ही संवत्सर [यज्ञ] है जितना [जहां तक] यह तेरहवां महीना है। (अथ यत् अग्निं प्रणयन्ति, यम् एव अमुं वैश्वदेवे मन्थन्ति तम् एव तत् प्रणयन्ति) फिर जब अग्नि को आगे लाते हैं, जिस उस [अग्नि] को ही वैश्वदेव यज्ञ में मथते हैं उसको ही उससे आगे लाते हैं, (यत् मथ्यते, तस्य ब्राह्मणम् उक्तम्) जो वह [अग्नि] मथा जाता है, उसका ब्राह्मण कहा गया है [क० २१]। (यदि उ न मथ्यते पौर्णमासम् एव तन्त्रं भवति) जो वह [अग्नि] अब नहीं मथा जाता है, पौर्णमास यज्ञ ही प्रधान होता है, (पौर्णमासं वै प्रतिष्ठा, प्रतिष्ठित्यै एव) पौर्णमास

२६—(शुनासीर्य्येण) द्यावापृथिवीशुनासीरमरुत्त्व० (पा० ४ । २ । ३२) शुनासीर—यत्। शुनासीरदेवताकेन यज्ञेन (तन्त्रम्) तनु विस्तारे—ष्ट्रन्। तत्रि कुटुम्बधारणे—घञ् वा। कुटुम्बकृत्यम्। प्रधानम् (प्रतिष्ठा) यज्ञसमाप्तिः।

---

१. जर्मनसंस्करणे सर्वत्र "शुनासीर" इत्येव पाठः ॥
२. अत्र ज. सं. "संवत्सरः" इत्यधिकः पाठः ॥ सम्पा० ॥

यज्ञ ही प्रतिष्ठा [यज्ञ की समाप्ति का व्रत] है, वह प्रतिष्ठा [कीर्ति] के लिये ही है। (अथ यत् वायुं यजन्ति, प्राणः वै वायुः, प्राणम् एव तेन प्रीणाति) फिर जब वायु को यज्ञ करता है, प्राण ही वायु है, प्राण को ही उससे वह तृप्त करता है। (अथ यत् शुनासीरं यजति, संवत्सरः वै शुनासीरः, संवत्सरम् एव तेन प्रीणाति) फिर जब शुनासीर [सुन्दर बड़ी वीर अग्रगामी सेना वाले सेनापति इन्द्र] को वह यज्ञ करता है, संवत्सर ही शुनासीर [बड़े सेनापति के समान] है, संवत्सर को ही उससे वह तृप्त करता है। (अथ यत् सूर्यं यजति, असौ वै सूर्यः, यः असौ तपति, एतम् एव तेन प्रीणाति) फिर जब सूर्य को यज्ञ करता है, वही सूर्य है जो वह तपाता है, इसको ही उससे वह तृप्त करता है। (अथ यत् शेताः दक्षिणाः ददाति, एतस्य एव तत् रूपं क्रियते) फिर जब शेता [सूक्ष्म कर्म करने वाला यजमान] दक्षिणायें देता है, इस [यजमान] का ही वह रूप किया जाता है। (अथ यत् प्रायश्चित्तप्रतिनिधिं कुर्वन्ति, स्वस्त्ययनम् एव तत् कुर्वन्ति) फिर जब प्रायश्चित [पापशोधन] रूप प्रतिनिधि यज्ञ करते हैं, स्वस्त्ययन [स्वस्तिवाचन] ही तब वे करते हैं, (यज्ञस्य एव शान्तिः यजमानस्य भैषज्याय) यज्ञ की ही शान्ति यजमान की ओषधि के लिये है। (तैः वै एतैः चातुर्मास्यैः देवाः सर्वान् कामान् सर्वाः इष्टीः सर्वम् अमृतत्वम् आप्नुवन्) उन ही इन चातुर्मास्य यज्ञों से देवताओं ने सब कामनाओं, [अर्थात्] सब इष्टियों [सत्क्रियाओं] और सब अमरपन को पाया है। (सः वै एषः प्रजापतिः चतुर्विंशः, यत् चातुर्मास्यानि) वह ही यह प्रजापति चौबीस अवयव [अर्धमास] वाला है, जो चातुर्मास्य यज्ञ हैं, (तस्य मुखम् एव वैश्वदेवम्, बाहू वरुणप्रघासाः, प्राणः अपानः व्यानः इति एताः तिस्रः इष्टयः, आत्मा महाहविः प्रतिष्ठा शुनासीरम्) उस [प्रजापति] का मुख ही वैश्वदेव यज्ञ है, दोनों भुजायें श्रेष्ठ अन्न हैं, प्राण, अपान, व्यान यह तीन इष्टियां [यज्ञ] हैं, आत्मा महाहवि है, प्रतिष्ठा [ठहराव वा आश्रय] शुनासीर [इन्द्र का हवि] है। (सः वै एषः प्रजापतिः एव संवत्सरः, यत् चातुर्मास्यानि) वह ही यह प्रजापति ही संवत्सर है जो चातुर्मास्य हैं। (सर्वं वै प्रजापतिः, सर्वं चातुर्मास्यानि, तत् सर्वेण एव सर्वम् आप्नोति, यः एवं वेद यः च एवं विद्वान् चातुर्मास्यैः यजते चातुर्मास्यैः यजते) सब ही प्रजापति है, सब ही चातुर्मास्य हैं, इस लिये सबके साथ ही वह सब पाता है, जो ऐसा जानता है और जो ऐसा विद्वान् चातुर्मास्य यज्ञों से यज्ञ करता है, चातुर्मास्य यज्ञों से यज्ञ करता है ॥ २६ ॥

स्थितिः । आश्रयः (सुनासीरः, शुनासीरः) कृशॄपृकटिपटिशौटिभ्य ईरन् (उ० ४ । ३०) सु + णासृ शब्दे—ईरन्, सस्य शः विकल्पेन । सुष्ठु नासीरम् अग्रसैन्यं यस्य सः । सेनापतिरिन्द्रः । शुनासीरौ शुनो वायुः शु एत्यन्तरिक्षे सीरः आदित्यः सरणात्—निरु० ९ । ४० (शेता) शिञ् निशाने—तृच् । सूक्ष्मकर्मा । यजमानः (प्रायश्चित्त-प्रतिनिधिम्) पापशोधनप्रतिनिधिरूपं यज्ञम् (इष्टीः) यजेः—क्तिन् । सत्क्रियाः (वरुणप्रघासाः) श्रेष्ठान्नानि ॥

भावार्थः—देश और काल का विचार करके संसार के पदार्थों से उपकार लेकर मनुष्य उन्नति करें ॥ २६ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाड़ाधिष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित-क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे प्रथमः प्रपाठकः समाप्तः ॥

अयं प्रपाठकः प्रयागनगरे कार्तिकमासे शुक्लपक्षे द्वादश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—भाद्रकृष्णा ८ संवत् १९८१ वि० ता० २२ अगस्त सन् १९२४ ई० ॥

अथ द्वितीयः प्रपाठकः ।

कण्डिका १ ॥

ओम् । माꣳसीयन्ति वा आहिताग्नेरग्नयः, त एनमेवाग्रेऽभिध्यायन्ति यजमानं, य एतमैन्द्राग्नं पशुं षष्ठे षष्ठे मासे आलभते, तेनैवेन्द्राग्निभ्यां ग्रसितमात्मानं निरवदयत । आयुष्काम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानावेवात्मनि धत्तो, आयुष्मान् भवति । प्रजाकाम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानौ प्रजा अनु प्रजायन्ते, प्रजावान् भवति । पशुकाम आलभेत, प्राणापानौ वा इन्द्राग्नी, प्राणापानौ पशवोऽनु प्रजायन्ते, पशुमान् भवति । यामं शुकं हरितमालभेत शठं वायःकामः, एता नाम यः[1] पितृलोके स्यामित्येतेन ह वै यमोऽमुष्मिंल्लोक आर्ध्नोत्, पितृलोक एवार्ध्नोति । त्वाष्ट्रं वडवमालभेत प्रजाकामः, प्रजापतिर्वै प्रजाः सिसृक्षमाणः स द्वितीयं मिथुनमन्वाविन्दत्, स त्वाष्ट्रं वडवमपश्यत्, त्वष्टा हि रूपाणां प्रजनयिता, तेन प्रजा असृजन्, तेन मिथुनमविन्दत् । प्रजावान् मिथुनवान् भवति, य एवं वेद, यश्चैवं विद्वानेतमालभते, योनीन् वा एष काम्यान् पशूनालभते, योनीष्ट्वैन्द्राग्नेन काम्यं पशुमालभन्त इष्ट्वालम्भः समृध्यै ॥ १ ॥

---

१. "वा यः कामयेत अनामयः" इति पाठान्तरम् ॥ सम्पा० ॥

कण्डिका १ ॥ इन्द्र—अग्नि अर्थात् प्राण और अपान के लिये यज्ञ के लाभ ॥

(ओम् । आहिताग्नेः अग्नयः वै मांसीयन्ति) अग्नि स्थापित करने वाले की [यजमान को आहवनीय आदि] अग्नियाँ मननसाधक [बुद्धिवर्धक फल, बादाम अखरोट आदि हव्य] पदार्थों को चाहती हैं । (ते एनम् एव यजमानम् अग्रे अभिध्यायन्ति, यः एतम् ऐन्द्राग्नं पशुं षष्ठे षष्ठे मासे आलभते) वे [याजक लोग] इस ही यजमान को पहिले अच्छे प्रकार ध्यान में करते हैं, जो इस इन्द्र—अग्नि [प्राण अपान] देवता वाले पशु [जीव] को छठे छठे महीने अच्छे प्रकार प्राप्त होता है । (तेन एव इन्द्राग्निभ्यां ग्रसितम् आत्मानम् निरवदयत) इस कारण से ही इन्द्र और अग्नि [प्राण और अपान] से खाये गये आत्मा की वह निन्दा करता है । (आयुष्कामः आलभेत, प्राणापानौ वै इन्द्राग्नी, प्राणापानौ एव आत्मनि धत्तः, आयुष्मान् भवति) आयु [जीवन] चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को छठे छठे महीने] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, दोनों प्राण और अपान ही आत्मा को पुष्ट करते हैं, वह [यजमान] बड़ी आयु वाला होता है । (प्रजाकामः आलभेत, प्राणापानौ वै इन्द्राग्नी प्राणापानौ अनु प्रजाः प्रजायन्ते, प्रजावान् भवति) प्रजायें चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को···] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, दोनों प्राण और अपान के साथ साथ प्रजायें उत्पन्न होती हैं, वह उत्तम प्रजाओं वाला होता है । (पशुकामः आलभेत, प्राणापानौ वै इन्द्राग्नी, प्राणापानौ अनु पशवः प्रजायन्ते, पशुमान् भवति) पशुओं [जीवों] को चाहने वाला पुरुष [प्राण और अपान देवता वाले जीव को···] अच्छे प्रकार प्राप्त करे, दोनों प्राण और अपान ही इन्द्र और अग्नि हैं, प्राण और अपान के साथ साथ पशु उत्पन्न होते हैं, वह उत्तम पशु वाला होता है । (अयः[1]-कामः यामं शुकं शठं हरितं वा आलभेत, एता नाम यः पितृलोके स्याम् इति एतेन

१—(मांसीयन्ति) मनेर्दीर्घश्च (उ० ३ । ६४) मन ज्ञाने—सप्रत्ययो दीर्घश्च । मांसं माननं वा मानसं वा मनोऽस्मिन्त्सीदतीति वा—निरु० ४ । ३ । सुप आत्मनः क्यच् (पा० ३ । १ । ८) मांस—क्यच् । मांसानि मननसाधकान् बुद्धिवर्धकान् पदार्थान् फल—बादाम—अक्षोटादीन् इच्छन्ति होमकरणाय (आहिताग्नेः) स्थापित-ग्निकस्य यजमानस्य (अग्नयः) आहवनीयादयः (अभिध्यायन्ति) सर्वतश्चिन्त-यन्ति (आ) समन्तात् (लभते) प्राप्नोति (ग्रसितम्) भक्षितम् (निरवदयत) निर्वादः, अपवादः । अपवादयति तिरस्करोति (आत्मनि) आत्मानम् (धत्तः) पोषयतः (यामम्) यम—अण् । यमो यच्छतीति सतः—निरु० १० । १९ । मध्यस्थानो वायुः । वायुदेवताकम् (शुकम्) शुक गतौ—कः । पक्षिविशेषम् (हरितम्) हसृरुहियुषिभ्य इतिः (उ० १ । ९७) हृञ् हरणे—इतिः । अश्वम् ।

---

१. पृ. ३०४ की टि. में प्रदर्शित पाठभेदानुसार 'यामं शुकं हरितमालभेत शठं वा, यः कामयेत अनामयः······' यह अन्वय अर्थसङ्गत है ॥ सम्पा० ॥

ह वै यमः अमुष्मिन् लोके आर्ध्नोत्, पितृलोके एव आर्ध्नोति) सुवर्ण चाहने वाला पुरुष यम [वायु] देवता वाले शुक [सुग्गा पक्षी] और शठ [प्रशंसनीय] घोड़े को अच्छे प्रकार प्राप्त करे, मैं चलने वाला [पुरुषार्थी] प्रसिद्ध हूं, जो पितृलोक [माता पिता आदि पालक विद्वानों की सभा] में रहूं—इस [मन्त्र] से ही यम [संयमी, जितेन्द्रिय पुरुष] उस लोक [दूर देश] में समृद्ध होता है, वह पितृलोक में ही समृद्ध होता है। (प्रजाकामः त्वाष्ट्रं वडवम् आलभेत) प्रजायें चाहने वाला पुरुष त्वष्टा [सूक्ष्मकर्ता परमात्मा] देवता वाले, बल पहुंचाने वाले पराक्रम को अच्छे प्रकार प्राप्त होवे। (प्रजाः सिसृक्षमाणः सः प्रजापतिः वै द्वितीयं मिथुनम् अन्वाविन्दत्) प्रजाओं को उत्पन्न करने की इच्छा करते हुए उस प्रजापति ने दूसरे जोड़े को प्राप्त किया। (सः त्वाष्ट्रं वडवम् अपश्यत्, त्वष्टा हि रूपाणां प्रजनयिता, तेन प्रजाः असृजत, तेन मिथुनम् अविन्दत्) उसने त्वष्टा देवता वाले, बल पहुँचाने वाले पराक्रम को देखा, त्वष्टा [सूक्ष्म बनाने वाला परमात्मा] ही रूपों को उत्पन्न करने वाला है, उससे प्रजायें उत्पन्न हुए, उससे उसने जोड़े को पाया। (प्रजावान् मिथुनवान् भवति, यः एवं वेद यः च एव विद्वान् एतम् आलभते) वह उत्तम प्रजाओं वाला और उत्तम मिथुन [जोड़ों पुत्र पुत्रियों] वाला होता है, जो ऐसा जानता है, और जो ऐसा विद्वान् इस [यज्ञ] को अच्छे प्रकार प्राप्त होता है। (एषः वै काम्यान् योनीन् पशून् आलभते, ऐन्द्राग्नेन तु काम्यं योनिः[1] पशुम् आलभन्ते इष्ट्वा आलम्भः मृध्यै) वह ही पुरुष चाहने योग्य योनियों [घरों] और पशुओं को अच्छे प्रकार प्राप्त होता है, और इन्द्र और अग्नि [प्राण और अपान] देवता वाले यज्ञ से चाहने योग्य घर और पशु को वे अच्छे प्रकार प्राप्त होते हैं और यज्ञ करके [उनका] आरम्भ [उद्यम] समृद्धि के लिये होता है ॥ १ ॥

भावार्थ :—मनुष्य को योग्य है कि सुग्गे के समान अन्तरिक्षगामी और अश्व के समान भूगामी होकर न्यून से न्यून छठे छठे महीने यज्ञ करके अपनी अनेक प्रकार की उन्नति की जाँच करके उचित व्यवहार करे ॥ १ ॥

कण्डिका २ ॥

पञ्चधा वै देवा व्युदक्रामन्[2], अग्निर्वसुभिः, सोमो रुद्रैः, इन्द्रो मरुद्भिः, वरुण आदित्यैः, बृहस्पतिर्विश्वैर्देवैः। ते देवा अब्रुवन्, असुरेभ्यो वा इदं भ्रातृव्येभ्यो

(शठम्) शठ हिंसायां श्लाघायां च - अच्। श्लाघ्यम् (वा) चार्थे (अयःकामः) सर्वधातुभ्योऽसुन् (उ० ४। १८९) इण् गतौ—असुन्। अयः, हिरण्यनाम—निघ० १। २। सुवर्णेच्छुकः (एता) इण् गतौ—तृच्। गमनशीलः (यमः) संयमी पुरुषः (आर्ध्नोत्) समृद्धो भवति (त्वाष्ट्रम्) त्वष्टा तनूकर्ता परमात्मा। त्वष्टृदेवताकम् (वडवम्) वल+वा गतौ—कः। बलप्रापकं पराक्रमम् (सिसृक्षमाणः) स्रष्टुमिच्छन् (मिथुनवान्) पुत्रपुत्रीवान् (योनीन्) गृहनाम—निघ० ३। ४। (योनिः) योनिम्। गृहम् (तु) समुच्चये (आलम्भः) आरम्भः। उद्यमः ॥

---

१. 'योनिः इष्ट्वा' इस पदच्छेद के अनुसार कण्डिका का पाठ योनिरिष्ट्वा होना चाहिये ॥
२. पू. सं. व्युत्क्रामन् इति पाठः ॥ सम्पा० ॥

रुध्याम, यन्मिथो विप्रिया:[1] स्मः, या न इमाः प्रियास्तन्वस्ताः समवद्यामहा इति। ताः समवाद्यन्त, ताभ्यः सन्निर्ऋच्छात्, यो नः प्रथमोऽन्योऽन्यस्मै द्रुह्यादिति। यत्तन्वः समवाद्यन्त, तत् तानूनप्तृस्य तानूनप्त्रत्वम्[2]। ततो देवा अभवन् परासुराः। तस्माद्यस्तानूनप्तणां[3] प्रथमो द्रुह्यति, स आर्त्तिमार्च्छति। यत्तानूनप्त्रं समवद्यति, भ्रातृव्याभिभूत्यै भवति, आत्मना परास्याप्रियो भ्रातृव्यो भवति ।। २ ।।

कण्डिका २ ।। देवताओं ने पांच प्रकार से चढ़ाई करके असुरों को जीता ।।

(पंचधा वै देवाः व्युदक्रामन् अग्निः वसुभिः, सोमः रुद्रैः, इन्द्रः मरुद्भिः, वरुणः आदित्यैः, बृहस्पतिः विश्वैः देवैः) पाँच प्रकार से ही देवताओं [विजय चाहने वाले पुरुषों] ने चढ़ाई की—अग्नि [प्रतापी पुरुष] ने वसुओं [निवास कराने वाले पुरुषों] के साथ, सोम [प्रेरक पुरुष] ने रुद्रों [दुष्टों के रुलाने वाले वीरों] के साथ, इन्द्र [परम ऐश्वर्य वाले पुरुष] ने मरुतों [शत्रुओं के मारने वाले वीरों] के साथ, वरुण [वैरियों को घेरने वाले पुरुष] ने आदित्यों [अखण्ड व्रतधारी शूरों] के साथ और बृहस्पति [बड़े बड़े सेना के रक्षक पुरुष] ने विश्वदेवों [सब दिव्य पदार्थों] के साथ। (ते देवाः अब्रुवन्, असुरेभ्यः भ्रातृव्येभ्यः वै इदं रुध्याम, यत् मिथः विप्रियाः स्मः, नः याः इमाः प्रियाः तन्वः ताः समवद्यामहै इति) वे देवता बोले—असुर शत्रुओं से अवश्य इस [राज्य] को हम रोकें [बचावें] जिससे हम आपस में विशेष प्रिय हों, हमारे जो यह प्यारे शरीर [शरीर के समान सेना वाले] हैं, उनको हम बलवान् करें। (ताः समवाद्यन्त, ताभ्यः सन्[4]निर्ऋच्छात्, यः नः प्रथमः अन्योन्यस्मै द्रुह्यात् इति) उन [शरीरों] को उन्होंने बलवान् किया [और कहा] उन [शरीरों] से वह सर्वथा निर्बल हो जावे, जो हमारा प्रधान होकर आपस में अनिष्ट चीते। (यत् तन्वः समवाद्यन्त, तत् तानून-

---

२—(पञ्चधा) पञ्चप्रकारेण (देवाः) विजिगीषवः (व्युदक्रामन्) अध्यारुहन् (अग्निः) प्रतापी पुरुषः (वसुभिः) निवासयितृभिः (सोमः) प्रेरकः सेनापतिः (रुद्रैः) दुष्टरोदकैः शूरैः (इन्द्रः) परमैश्वर्य्यवान् (मरुद्भिः) शत्रुमारकवीरैः (वरुणः) आच्छादकः (आदित्यैः) अखण्डव्रतिवीरैः (बृहस्पतिः) बृहतां सैन्यानां पालकः (विश्वैः) सर्वैः (देवैः) दिव्यपदार्थैः (इदम्) राज्यम् (रुध्याम) रुन्ध्याम (तन्वः) शरीराणि (समवद्यामहै) सम्+अव+दो अवखण्डने इत्यस्य रूपम्। अवदानं पराक्रमः। सम्यक् पराक्रमयाम। पराक्रमयुक्ताः करवाम। (सन्निर्ऋच्छात्) सम्+निर्+ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु—लेट्। सर्वथा निर्बलो भवेत् (द्रुह्यात्) अनिष्टं चिन्तयेत् (तानूनप्त्रस्य) नप्तृनेष्टृत्वष्टृ० (उ० २ । ९५) तनू + न + पत्लृ गतौ—तृच्, नञः प्रकृतिभावः, अत् इति शब्दलोपः,

---

१. पू. सं. 'विप्रियास्मः' इति पाठः ।। २. पू. सं. तानूनप्तृत्वमिति पाठः ।।

३. अत्र तानूनप्त्राणामिति शुद्धः पाठः भवितव्यः ।।

४. यहाँ सः निर्ऋच्छात् पाठ संगत प्रतीत होता है ।। सम्पा० ।।

प्तुस्य तानूनप्त्रत्वम्) जो उन्होंने तनू [शरीरों] को बलवान् किया, वह तनूनप्ता [शरीरों के रक्षक] का तानूनप्त्रत्व [शरीरों का रक्षकपन] है। (ततः देवाः असुराः पराअभवन्) उससे देवताओं ने असुरों को हरा दिया। (तस्मात् यः तानूनप्तॄणां प्रथमः द्रुह्यति, सः आर्तिम् आर्च्छति) इसलिये जो शरीर रक्षकों का प्रधान अनिष्ट चीतता है, वह सब ओर से पीड़ा पाता है। (यत् तानूनप्त्रं समवद्यति भ्रातृव्याभिभूत्यै भवति. आत्मना अस्य अप्रियः भ्रातृव्यः परा भवति) जो पुरुष शरीरों के रक्षक वीर को बलवान् करता है, वह शत्रुओं के हराने के लिये समर्थ होता है, और आत्मबल से उसका कुप्रिय शत्रु हार जाता है ॥ २ ॥

भावार्थ :—मनुष्य शारीरिक आत्मिक और सामाजिक पुष्टि से सेना की यथावत् व्यूहरचना करके शत्रुओं को हरावे और ध्यान रक्खें कि उनका प्रधान सेनापति सर्वथा उनका शुभचिन्तक होवे ॥ २ ॥

विशेषः—इस कण्डिका को अथ० १६ । १३ । १—११ से मिलाओ, उसका एक मन्त्र यहाँ दिया जाता है—

इन्द्र एषा नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ॥ अथ० १९ । १३ । ९, ऋग्० १० । १०३ । ८, यजु० १७ । ४० साम उ० ९ । ३ । ३ । (इन्द्रः) इन्द्र [महाप्रतापी मुख्य सेनापति] (एषाम्) इन [वीरों] का (नेता) नेता [होवे], (बृहस्पतिः) बृहस्पति [बड़े अधिकारों वाला सेनानायक] (दक्षिणा) दाहिनी ओर और (यज्ञः) पूजनीय (सोमः) सोम [प्रेरक, उत्साहक सेनाधिकारी] (पुरः) आगे (एतु) चले। (मरुतः) मरुद्गण [शूरवीर पुरुष] (अभिभञ्जतीनाम्) कुचल डालती हुयी, (जयन्तीनाम्) विजयिनी (देवसेनानाम्) विजय चाहने वालों की सेनाओं के (मध्ये) बीच में (यन्तु) चलें ॥

कण्डिका ३ ॥

पञ्चकृत्वोऽवद्यति, पाङ्क्तो यज्ञः, पञ्चधा हि ते ताः समवाद्यन्त । आपतये त्वा गृह्णामीत्याह, प्राणो वा आपतिः, प्राणमेव तेन प्रीणाति । परिपतये त्वेत्याह मनो वै परिपतिः मन एव तेन प्रीणाति । तनूनप्त्र इत्याह, तन्वो हि ते ताः समवाद्यन्त । शाक्वरायेत्याह, शक्तꣳ हि ते ताः समवाद्यन्त । शक्मन ओजिष्ठायेत्याह, ओजिष्ठं हि ते तदात्मनः समवाद्यन्त । अनाधृष्टमित्याह, अनाधृष्टं ह्येतत् । अनाधृष्यमित्याह, अनाधृष्यं ह्येतत् । देवानामोज इत्याह, देवानाꣳ ह्येतदोजः । अभिशस्तिपा इत्याह, अभिशस्तिपा ह्येतत् । अनभिशस्तेऽन्यमित्याह, अनभिशस्तेनꣳ

स्वार्थे–अण् । तनूनप्तुः । शरीरस्य न पातयितुः । देहरक्षकस्य (तानूनप्त्रत्वम्) शरीररक्षकत्वम् (असुराः) असुरान् (प्रथमः) प्रधानः (आर्तिम्) पीडाम् (आर्च्छति) आ + ऋच्छ गतौ । समन्तात् प्राप्नोति (तानूनप्त्रम्) तनूनप्तारम् (समवद्यति) सम्यक् पराक्रमिणं करोति ॥

ह्येतदनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्प[1]तिः । अञ्जसा सत्यमुपगेषं[1] स्विते मा धा इत्याह, यथा यजुरेवैतत् ।। ३ ।।

कण्डिका ३ ।। यजुर्वेद के मन्त्र के आश्रय से यज्ञ कर्म ।।

(पंचकृत्वः अवद्यति, पाङ्क्तः यज्ञः, पंचधा हि ते ताः समवाद्यन्त) पाँच प्रकार से वह [यजमान] पराक्रमी होता है, पाँच प्रकार से प्रकाशित यज्ञ है, पाँच प्रकार से ही उन [देवताओं] ने उन [शरीरों] को समर्थ किया है [ऊपर क० २ देखो]। (आपतये त्वा गृह्णामि इति आह, प्राणः वै आपतिः, प्राणम् एव तेन प्रीणाति) धनादि प्राप्ति के लिये तुझे मैं ग्रहण करता हूं—यह [यजुर्वेद मन्त्र भाग] वह कहता है, प्राण ही अच्छे प्रकार प्रयत्न है, प्राण को ही उससे वह [यजमान] तृप्त करता है। (परिपतये त्वा इति आह, मनः वै परिपतिः, मनः एव तेन प्रीणाति) सब ओर से ऐश्वर्य्य के लिये तुझे [मैं ग्रहण करता हूं—यह भाग] वह कहता है, मन ही सब ओर से ऐश्वर्य है, मन ही को उससे वह तृप्त करता है। (तनूनप्त्रे इति आह, ते हि ताः तन्वः समवाद्यन्त) तनूनप्ता [शरीर को न गिराने वाले] के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, उन [देवताओं] ने उन शरीरों को समर्थ किया है। (शाक्वराय इति आह, शक्तं हि ते ताः समवाद्यन्त) सामर्थ्य के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, समर्थ ही वह [मन] है, उन्होंने उन [शरीरों] को समर्थ किया है। (शक्मने ओजिष्ठाय इति आह, तत् ओजिष्ठं हि ते आत्मनः समवाद्यन्त) समर्थ महाबली पुरुष के लिये [तुझे ग्रहण करता हूं—यह भाग] वह बोलता है, उससे महाबली को ही उन्होंने अपने से समर्थ किया है। (अनाधृष्टम् इति आह, अनाधृष्टं हि एतत्) अपमान नहीं किया गया [बल है—यह भाग] वह बोलता है, अपमान नहीं किया गया ही यह [ब्रह्म बल] है। (अनाधृष्यम् इति आह, अनाधृष्यं हि एतत्) आगे को अपमान के अयोग्य [बल है—यह भाग] वह बोलता है, आगे को अपमान के अयोग्य ही यह [ब्रह्म

३—(पाङ्क्तः) गो० पू० ४ । २४ । पङ्क्ति—अण् । पङ्क्त्या पञ्चप्रकारेण प्रकाशितः (आपतये) सर्वधातुभ्य इन् (उ० ४ । ११८) आ+पत्लृ गतौ ऐश्वर्य्ये च—इन् । आगमाय । धनादिप्राप्तये (परिपतये) पत्यते, ऐश्वर्यकर्मा—निघ० २ । २१ । परि+पत ऐश्वर्ये—इन् । सर्वत ऐश्वर्याय (तनूनप्त्रे) क० २ । शरीरस्य न पातयित्रे (शाक्वराय) कॄगॄशॄवृञ्चतिभ्यः ष्वरच् (उ० २ । १२१) शक्लृ शक्तौ—ष्वरच् । शक्वरः शक्तिमान् । ततो भावे—अण् । शक्तिमत्त्वाय । सामर्थ्याय (शक्तम्) समर्थम् (शक्मने) अशिशकिभ्यां छन्दसि (उ० ४ । १४७) शक्लृ शक्तौ—मनिन् । समर्थाय पुरुषाय (ओजिष्ठाय) बलवत्तमाय (अनाधृष्टम्) अतिरस्कृतम् (अनाधृष्यम्) अतिरस्करणीयम् (देवानाम्) विदुषाम् (ओजः) बलम् (अभिशस्तिपाः) अभिशस्तेर्हिंसनात् पाता रक्षिता (अनभिशस्तेन्यम्) अनभिशस्ते+णीञ् प्रापणे—

---

१. अस्यां कण्डिकायाम् पू० सं० 'आयतये', 'आयतिः', 'तपस्तपस्यति', 'उपगेषाम्' इति पाठास्तत्रास्माभिः मन्त्रानुसारिणः संशोधिताः ।। सम्पा० ।।

बल] है। (देवानाम् ओजः इति आह, देवानां हि एतत् ओजः) विद्वानों का बल [तू है—यह भाग] वह बोलता है, विद्वानों का ही यह [ब्रह्म] बल है। (अभिशस्तिपाः इति आह, अभिशस्तिपाः हि एतत्) हिंसा से बचाने वाला [तू है—यह भाग] वह बोलता है, हिंसा से बचाने वाला ही यह [ब्रह्म] है। (अनभिशस्तेन्यम् इति आह, अनभिशस्तेनं हि एतत्, दीक्षापतिः मे दीक्षाम् अनुमन्यताम्, तपः अनु तपस्पतिः) अहिंसित कर्म में ले जाने वाला [तू है—यह मन्त्र भाग] वह बोलता है, अहिंसित कर्म में ले जाने वाला ही यह [ब्रह्म] है, दीक्षापति [ब्रह्मा] मेरी दीक्षा को स्वीकार करे और तप का पति मेरे तप को स्वीकार करे। (अञ्जसा सत्यम् उपगेषं स्विते मा धाः यथा एतत् यजुः एव) तेज के साथ वा सहज से सत्य [यथार्थ व्यवहार] को मैं आदर से खोजता रहूं, अच्छे चले हुए मार्ग में मुझे धारण कर, यह [मन्त्र भाग] वह बोलता है, जैसा यह ही यजुर्वेद [का मन्त्र] है ॥ ३ ॥

भावार्थः—मनुष्य अपने कर्तव्य की सिद्धि के लिये उसके सूक्ष्म अवयवों को गम्भीरता से विचार लेवें ॥ ३ ॥

विशेषः—इस कण्डिका में यजुर्वेद अध्याय ५ मन्त्र ५ के प्रतीक कुछ भेद से दिये हैं, वह मन्त्र अर्थ सहित दिया जाता है जिससे पद और आशय मिलाने में सुगमता होवे। (आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वन ओजिष्ठाय। अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳस्विते मा धाः) [हे परमेश्वर !] (त्वा) तुझको (आपतये) सब प्रकार पाने के लिये, (परिपतये) सब ओर से ऐश्वर्य के लिये, (तनूनप्त्रे शाक्वराय) शरीर को न गिराने वाले सामर्थ्य के लिये और (ओजिष्ठाय शक्वने) अत्यन्त पराक्रमी समर्थ पुरुष के हित के लिये (गृह्णामि) ग्रहण करता हूं। (अभिशस्तिपाः) हिंसा से बचाने वाला तू (देवानाम्) विद्वानों का (अनाधृष्टम्) अपमान नहीं किया गया, (अनाधृष्यम्)

क्विप्। आर्षं पुंस्त्वम्, द्वितीया प्रथमार्थे। अनभिशस्तेनी। अनभिशस्ते अहिंसिते व्यवहारे प्रापकम् (अनभिशस्तेनम्) अनभिशस्ते + नयतेः— डः। अहिंसिते कर्मणि प्रापकम् (अञ्जसा) अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—असुन्। कान्त्या। ज्ञानेन। सहजेन (सत्यम्) यथार्थव्यवहारम् (उप) आदरेण (गेषम्[१]) गेषृ अन्वेषणे—विधिलिङ्। आर्षं परस्मैपदत्वम्। अहं गेषेय। अन्वेषणेन प्राप्नुयाम् (स्विते) सु + इण् गतौ—क्तः। सुगते मार्गे (मा) माम् (धाः) धेहि ॥

---

१. दुरूहेयं व्युत्पत्तिः "उपगेषम्" शब्दस्य। वस्तुतस्तु आशिषि लिङि लुङि वा रूपमेतत्। तथा च लिङि—कै गै शब्दे इति धातोः आशिषि लिङि, छन्दस्युभयथा (पा० ३। ४। ११७) इति सार्वधातुकत्वाद् अङ्। आतो लोप इटि च (पा० ६। ४। ६४) इत्याकारस्य लोपे ऽङोऽकारात् यासुटः अतो येयः (पा० ७। २। ८०) इतीयादेशः, आर्धधातुकत्वात् सलोपाभावः, लोपो व्योर्वलि (पा० ६। १। ६६) इति यलोपः।

लुङि विस्तरभिया अत्र न प्रदर्श्यते द्र० यजु० वि० भा० भू० पृ० ४३३ ॥ सम्पा० ॥

आगे को नहीं अपमान योग्य, (अनभिशस्ति) हिंसा के अयोग्य (अनभिशस्तेन्यम्) अहिंसित कर्म में ले चलने वाला (ओजः असि) बल है। (स्विते) सुन्दर चले हुए [मार्ग] में (मा धाः) मुझे तू धारण कर। (अञ्जसा) तेज के साथ वा सहज से (सत्यम् उपगेषम्) सत्य को मैं खोजता रहूं ॥ ३ ॥

कण्डिका ४ ॥

घृतं वै देवा वज्रं कृत्वा सोममघ्नन्। स्रुचौ बाहू, तस्मात् स्रुचौ सौमीमाहुतिं नासाते। अवधीयेत सोमः, तस्मात् स्रुचौ चाज्यं चान्तिकमाहार्षीत्। अन्तिकमिव खलु वा अस्यैतत् प्रचरन्ति, यत्तानूनप्त्रेण प्रचरन्ति। अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद इत्याह, यदेवास्यापवायते यन्मीयते, तदेवास्यैतेनाप्याययन्ति। आ तुभ्यमिन्द्रः प्यायतामात्वमिन्द्राय प्यायस्वेत्याह, उभावेवेन्द्रश्च सोमं चाप्याययन्ति। आप्याययास्मान्त्सखीन् सन्या मेधया प्रजया धनेनेत्याह. ऋत्विजो वा एतस्य सखायः, तानेवास्यैतेनाप्याययन्ति। स्वस्ति ते देव सोम सुत्यामुदृचमशीयेत्याह, आशिषमेवैतामाशास्ते, प्र वा एतस्माल्लोकाच्च्यवन्ते, ये सोममाप्याययन्ति। अन्तरिक्षदेवत्यो हि सोमः आप्यायत एष्टा राय एष्टा वामानि प्रेषे भगाय ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति, द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिंल्लोके प्रतितिष्ठति प्रतितिष्ठति ॥ ४ ॥

कण्डिका ४ ॥ सोम यज्ञ में त्रुटि की यजुर्वेद मन्त्र से पूर्ति ॥

(देवाः वै घृतं वज्रं कृत्वा सोमम् अघ्नन्) देवों [ऋत्विजों] ने घृत [घी वा प्रकाश] को वज्र बनाकर सोम [ओषधिराज] को पीड़ित किया। (स्रुचौ बाहू, तस्मात् स्रुचौ सौमीम् आहुतिं न आसाते) दोनों स्रुचा [घृतपात्र] दो भुजायें हैं, इसलिये दोनों स्रुचायें सोम देवता वाली आहुति को नहीं छोड़ते। (सोमः अवधीयेत, तस्मात् स्रुचौ च आज्यं च अन्तिकम् आहार्षीत्) सोम ध्यान में किया जावे, इसलिये दोनों स्रुचाओं और घी को समीप में वह [यजमान] लावे। (अन्तिकम् इव खलु वै अस्य एतत् प्रचरन्ति, यत् तानूनप्त्रेण प्रचरन्ति) समीप रक्खे हुये के समान ही इस [सोम] के लिये यह [कर्म] वे करते हैं, जो तनूनप्ता देवता वाले [शरीर को न गिराने वाले चरु] से वे करते हैं। (देव सोम ते अंशुः—अंशुः एकधनविदे इन्द्राय आप्यायताम्—

४—(अघ्नन्) अपीडयन् (आसाते) अस्यतः। क्षिपतः (अवधीयेत) अव+दधातेः कर्मणि—विधिलिङ्। अवधाने ध्याने क्रियेत (अन्तिकम्) समीपम्। समीपस्थम् (आहार्षीत्) आहरेत्। आनयेत् (तानूनप्त्रेण) तनूनप्तृदेवताकेन चरुणा (अंशुरंशुः) मृगय्वादयश्च (उ० १। ३७) अंश विभाजने—कुः[1]। अवयवोऽवयवः। अङ्गमङ्गम् (देव) दिव्यगुणयुक्त। (सोम) हे ऐश्वर्यवन् पुरुष औषध वा (आ) समन्तात् (प्यायताम्) वर्धताम् (इन्द्राय) परमैश्वर्यवते

१. अत्र नित्यवीप्सयोः (पा० ८। १। ४) इत्यनेन "अंशुः" शब्दस्य द्विर्वचनम् ॥ सम्पा० ॥

इति आह, यत् एव अस्य अपवायते, यत् मीयते, तत् एव अस्य एतेन आप्याययन्ति) हे दिव्यगुण वाले सोम ! तेरा अंश अंश एक धर्म से धन पाने वाले इन्द्र [बड़े ऐश्वर्य्य वाले पुरुष] के लिये सब ओर से बढ़े--यह [यजुर्वेद मन्त्र भाग] वह कहता है, जो कुछ भी इस [सोम] का सूख जाता है, जो कुछ मुरझा जाता है, इससे उसको ही इस [प्रयत्न] से वे अच्छे प्रकार बढ़ाते हैं । (इन्द्रः तुभ्यम् आ प्यायताम्, त्वम् इन्द्राय आप्यायस्व इति आह, उभौ एवं इन्द्रं च सोमं च आप्याययन्ति) इन्द्र तेरे लिये भले प्रकार बढ़े, तू इन्द्र के लिये भले प्रकार बढ़--यह [मन्त्र भाग] वह बोलता है, दोनों ही इन्द्र और सोम को वे भले प्रकार बढ़ाते हैं । (अस्मान् सखीन् सन्या मेधया प्रजया धनेन आप्यायय इति आह, ऋत्विजः वै एतस्य सखायः, अस्य तान् एतान् एव आप्याययन्ति) हम मित्रों के दान से, निश्चल बुद्धि से, प्रजा से और धन से तू भले प्रकार बढ़ा--यह [मन्त्र भाग वह बोलता है], ऋत्विज् लोग ही इस [सोम] के मित्र हैं, इसके उन उनको ही वे भले प्रकार बढ़ाते हैं । (देव सोम ते स्वस्ति, सुत्याम् उदृचम् अशीय इति आह, एताम् आशिषम् एव आशास्ते, एतस्मात् लोकात् वै प्रच्यवन्ते, ये सोमम् आ प्याययन्ति) हे दिव्य गुण वाले सोम ! तेरे लिये मंगल हो, सोम निचोड़ने की क्रिया और समाप्ति सूचक ऋचा को मैं प्राप्त होऊं—यह [मन्त्र भाग] वह बोलता है, इस आशीर्वाद को ही वह कहता है, इस लोक में ही वे अच्छे प्रकार चलते हैं, जो सोम को भले प्रकार बढ़ाते हैं । (अन्तरिक्षदेवत्यः हि सोमः आप्यायते, एष्टाः रायः एष्टा वामानि प्रइषे भगाय, ऋतवादिभ्यः ऋतम् नमः, दिवे पृथिव्यै नमः इति, द्यावापृथिवीभ्याम् एव नमस्कृत्य अस्मिन् लोके प्रतितिष्ठति प्रतितिष्ठति) अन्तरिक्ष [मध्य में दिखाई देते हुये] लोक देवता वाला ही सोम [ओषधिराज] भले

पुरुषाय (एकधनविदे) एकेन धर्मेण धनं विन्दति लभते यः, तस्मै (अपवायते) ओवै शोषणे यद्वा वा गतिगन्धनयोः—कर्मणि लट् । शुष्यते (मीयते) मीञ् हिंसायाम्–कर्मणि लट् । हिंस्यते । नाश्यते (प्याययन्ति) वर्धयन्ति (प्यायस्व) वर्धस्व (सन्या) हृपिषिरुहि० (उ० ४ । ११९) षण् दाने—इन् । दानेन (सन्न्या) सम्+णीञ् प्रापणे—क्विप् । सम्यक् नेत्र्या (स्वस्ति) कल्याणम् (सुत्याम्) सोमाभिषवक्रियाम् (उदृचम्) उत्तमां समाप्तिसूचिकाम् ऋचम् (अशीय) प्राप्नुयाम् (आशिषम्) आङ्—शास आशीर्वादे—क्विप् । मङ्गलप्रार्थनाम् (आशास्ते) आशीर्वादं कथयति (प्र) प्रकर्षेण (एतस्मात् लोकात्) एतस्मिन् लोके (च्यवन्ते) गच्छन्ति–निघ० २ । १४ । (एष्टाः) सर्वत इष्टाः । अभीष्टाः । अभीष्टानि वा (वामानि) अर्तिस्तुसुहु० (उ० १ । १४०) वा गतौ--मन् । वामस्य वननीयस्य—निरु० ४ । २६ । शोभनानि वस्तूनि (प्र) प्रकर्षेण (इषे) अन्नाय (भगाय) ऐश्वर्याय (ऋतम्) सत्यव्यवहारम् (ऋतवादिभ्यः) सत्यकथनशीलेभ्यः (नमः) अन्नम्–निघ० २ । ७ (दिवे) प्रकाशमानाय परमात्मने (नमः) सत्कारः (पृथिव्यै) विस्तृताय परमेश्वराय (द्यावापृथिवीभ्याम्) प्रकाशभूमिहितार्थम् (नमस्कृत्य) आदृत्य परमात्मानम् ॥

प्रकार बढ़ता है, अभीष्ट धन और अभीष्ट सुन्दर पदार्थ अन्न के लिये और ऐश्वर्य के लिये भले प्रकार हों, सत्यवादियों के लिये सत्य व्यवहार और अन्न हो, प्रकाशमान विस्तृत परमेश्वर के लिये नमस्कार [आदर क्रिया] होवे—यह [मन्त्र भाग वह कहता है], प्रकाश और भूमि के हित के लिये ही [परमात्मा को] नमस्कार करके इस लोक में वह प्रतिष्ठा पाता है, प्रतिष्ठा पाता है [अवश्य ही बड़ाई पाता है] ॥ ४ ॥

भावार्थः—मनुष्यों को चाहिये कि ओषधियों के अंश अंश का गुण जानें और उनसे ठीक ठीक उपयोग लेकर धन प्राप्त करके सुखी रहें ॥ ४ ॥

विशेषः १—इस कण्डिका में भी कं० ३ के समान यजुर्वेद अध्याय ५ मन्त्र ७ के प्रतीक कुछ भेद से दिये हैं, वह मन्त्र अर्थ सहित दिया जाता है, जिससे पद और आशय मिलाने में सुगमता होवे। (अꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे। आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व आ प्याययास्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय। एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम् ॥ य० ५। ७) (देव) हे दिव्य गुण वाले (सोम) ऐश्वर्यवान् पुरुष वा औषध ! (ते) तेरा (अंशुः—अंशुः) अङ्ग अङ्ग (एकधनविदे) एक धर्म से धन पाने वाले (इन्द्राय) बड़े ऐश्वर्य वाले पुरुष के लिये (आ प्यायताम्) अच्छे प्रकार बढ़े, (तुभ्यम्) तेरे लिये (इन्द्रः) बड़े ऐश्वर्य वाला पुरुष (आ प्यायताम्) अच्छे प्रकार बढ़े, (त्वम्) तू (इन्द्राय) बड़े ऐश्वर्य वाले के लिये (आ प्यायस्व) भले प्रकार बढ़। (अस्मान् सखीन्) हम मित्रों को (सन्न्या) ठीक ठीक ले चलने वाली (मेधया) धारणावती बुद्धि से (आ प्यायय) तू भले प्रकार बढ़ा। (देव) हे दिव्य गुण वाले (सोम) प्रेरक पुरुष (ते स्वस्ति) तेरे लिये कल्याण हो। (सुत्याम्) तत्त्व निचोड़ने की क्रिया को (अशीय) मैं प्राप्त होऊं। (आ—इष्टा रायः) अनेक अभीष्ट धन [होवें], (ऋतवादिभ्यः) सत्यवादी पुरुषों को (इषे) अन्न के लिये और (भगाय) ऐश्वर्य के लिए (द्यावापृथिवीभ्याम्) प्रकाश और भूमि से (ऋतम्) सत्यज्ञान और (नमः) अन्न वा सत्कार (प्र) अच्छे प्रकार [होवे] ॥

विशेषः २—इस कण्डिका को ऐतरेय ब्राह्मण १। २६ से मिलाओ ॥

विशेषः ३—निम्नलिखित शब्द शोधे गये हैं—

अशुद्ध	शुद्ध	प्रमाण
आस्यैतत्	अस्यैतत्	सायण भाष्य ऐ० ब्रा० १। २६
अंशुरꣳसृष्टे	अꣳशुरꣳशुष्टे	यजुर्वेद ५। ७ और ऐ० ब्रा०
आत्ममिन्द्राय	आ त्वमिन्द्राय	१। २६
सन्या	सन्या सन्न्या	वेद में दोनों पाठ हैं

कण्डिका ५ ॥

मख इत्येतद् यज्ञनामधेयं, छिद्रप्रतिषेधसामर्थ्यात्। छिद्रं खमित्युक्तं, तस्य मेति प्रतिषेधः, मा यज्ञं छिद्रं करिष्यतीति। छिद्रो हि यज्ञो भिन्न इवोदधिर्विस्रवति। तद्वै खलु छिद्रं भवति, ऋत्विग्यजमानविमानाद्वापि वैषां व्यपेक्षया मन्त्र-

कल्पब्राह्मणानामप्रयोगाद् यथोक्तानां वा दक्षिणानामप्रदानाद्धीनाद्वातिरिक्ताद्वोत्पाताद् भूतेषु प्रायश्चित्तव्यतिक्रमादिति। इत्येतद्वै सर्वं ब्रह्मण्यर्पितं ब्रह्मैव विद्वान् यद् भृग्वङ्गिरोवित् सम्यगधीयानश्चरितब्रह्मचर्योऽन्यूनातिरिक्ताङ्गः अप्रमत्तो यज्ञ रक्षति, तस्य प्रमादाद्यदि वाप्यसान्निध्याद्यथा भिन्ना नौरगाधे महत्युदके सम्प्लवेत्, मत्स्यकच्छपशिशुमारनक्रमकरपुण्डरीकजषरजसपिशाचानां भागधेयं भवति, एवमादीनां चान्येषां विनष्टोपजीविनाम्। एवं खल्वपि यज्ञश्छिन्नभिन्नोऽपध्वस्त उत्पाताद्भुतो बहुलोऽथर्वभिरसंस्कृतोऽसुरगन्धर्वयक्षराक्षसपिशाचानां भागधेयं भवति, एवमादीनां चान्येषां विनष्टोपजीविनाम्। तदपि श्लोकाः,

छिन्नभिन्नोपध्वस्तो विश्रुतो बहुधा मखः।
इष्टापूर्त्तद्रविणं गृह्ययजमानस्यावापतत्॥ १॥

ऋत्विजां च विनाशाय राज्ञो जनपदस्य च।
संवत्सरत्रिरिष्टं तद् यत्र यज्ञो विरिष्यते॥ २॥

दक्षिणाप्रवणीभूतो यज्ञो दक्षिणतः स्मृतः।
हीनाङ्गो रक्षसाम्भागो ब्रह्मवेदादसंस्कृतः॥ ३॥

चतुष्पात् सकलो यज्ञश्चातुर्होत्रविनिर्मितः।
चतुर्विधैः स्थितो मन्त्रैर्ऋत्विग्भिर्वेदपारगैः॥ ४॥

प्रायश्चित्तैरनुध्यानैरनुज्ञानानुमन्त्रणैः।
होमैश्च यज्ञविभ्रंशं सर्वं ब्रह्मा प्रपूरयेत्॥ इति। ५॥

तस्माद् यजमानो भृग्वङ्गिरोविदमेव तत्र ब्रह्माणं वृणीयात्। स हि यज्ञन्तारयतीति ब्राह्मणम्॥ ५॥

कण्डिका ५॥ यज्ञ में दोषों को ब्रह्मा ही ठीक कर सकता है॥

(मखः इति एतत् यज्ञनामधेयम्, छिद्रप्रतिषेधसामर्थ्यात्) मख यह यज्ञ का नाम है, [क्योंकि उसमें] छिद्र [दोष] के निषेध का सामर्थ्य है। (खम् इति छिद्रम् उक्तम्, तस्य प्रतिषेधः मा इति, यज्ञं छिद्रं मा करिष्यति इति) ख—यह शब्द छिद्र कहा जाता है, उसका निषेध–मा यह पद है, यज्ञ को वह [ब्रह्मा] छिद्र वाला [दूषित] न करेगा, यह [तात्पर्य] है। (छिद्रः यज्ञः हि भिन्नः उदधिः इव विस्रवति) क्योंकि छिद्र वाला यज्ञ फूटे हुये जलाशय के समान बह जाता है। (तत् वै खलु छिद्रं भवति, ऋत्विग्यजमानविमानात् वा एषां व्यपेक्षया अपि वा, मन्त्रकल्पब्राह्मणानाम्

५—(मखः) मख गतौ—घः, यद्वा मा निषेधे + खनु विदारणे—डः, ह्रस्वत्वम्। अच्छिद्रः। यज्ञः (छिद्रम्) छिद्र—अर्शआद्यच्। छिद्रयुक्तम्। दूषितम् (उदधिः) जलाशयः (विमानात्) अपमानात् (व्यपेक्षया) अनिच्छया (कल्पः) कर्मपद्धतिः। संस्कारविधिः (उत्पातात्) भूकम्पाद्युपद्रवात् (अप्रमत्तः) प्रमा·

अप्रयोगात्, यथोक्तानां दक्षिणानां वा अप्रदानात्, हीनात् वा अतिरिक्तात् वा, भूतेषु उत्पातात्, प्रायश्चित्तव्यतिक्रमात् इति) वह ही निश्चय करके छिद्र [दूषण] होता है— ऋत्विजों और यजमान के अपमान से, अथवा इनकी अनपेक्षा से, अथवा मन्त्र, कल्प [कर्मपद्धति, संस्कारविधि] और ब्राह्मणों [ब्राह्मण ग्रन्थों में कहे विधानों] के प्रयोग न करने से, अथवा यथोक्त दक्षिणाओं के न देने से, अथवा न्यून वा अधिक [देने] से, अथवा प्राणियों पर उत्पात [भूकम्प आदि उपद्रव] से, अथवा प्रायश्चित्त के उल्लंघन से। (इति एतत् वै सर्वं ब्रह्मणि अर्पितम्) यह सब [विघ्नों की रोक] ही ब्रह्मा पर निर्भर है। (विद्वान् ब्रह्मा एव, यत् भृग्वङ्गिरोवित् सम्यक् अधीयानः, चरितब्रह्मचर्यः अन्यूनातिरिक्ताङ्गः, अप्रमत्तः, यज्ञं रक्षति) विद्वान् ब्रह्मा ही, जो भृगु अङ्गिराओं [परिपक्व ज्ञानों चारों वेदों] का जानने वाला, यथाविधि पढ़ा हुआ, ब्रह्मचर्य किये हुये, न्यून वा अधिक अङ्ग न रखने वाला [अङ्ग भङ्ग], न चूकने वाला है, यज्ञ की रक्षा करता है। (तस्य प्रमादात् यदि वा अपि असान्निध्यात्, यथा भिन्ना नौः अगाधे महति उदके संप्लवेत्, मत्स्य-कच्छप-शिशुमार-नक्र-मकर-पुण्डरीक-जषर-जसपिशाचानां भागधेयं भवति, एवमादीनाम् अन्येषां विनष्टोपजीविनां च) उस [ब्रह्मा] की भूल से अथवा समीप न रहने से, जैसे टूटी नाव अथाह बड़े जल में डूब जाती है, और मच्छ, कच्छ, शिशुमार, नाके, मगर, पुण्डरीक, जषर, जस, पिशाचों [मांसाहारियों] का भाग हो जाती है, इसी प्रकार दूसरे अपने आश्रितों के नष्ट करने वालों का [भाग होती है]। (एवं खलु अपि छिन्नभिन्नः अपध्वस्तः उत्पाताद्भुतः बहुलः, अथर्वभिः असंस्कृतः यज्ञः असुरगन्धर्वयक्षराक्षसपिशाचानां भागधेयं भवति, एवमादीनाम् अन्येषां विनष्टोपजीविनां च) इसी प्रकार निश्चय करके टूटा फूटा, नष्ट हुआ, उत्पात [भूकम्पादि उपद्रव] से आश्चर्य युक्त किया हुआ, बहुत दोष ग्रहण करने वाला, अथर्वों [चारों वेदों के निश्चल ज्ञानों] से न संस्कार किया हुआ यज्ञ असुर, गन्धर्व, यक्ष, राक्षस, पिशाचों [मांसाहारियों] का भाग होता है, और इसी प्रकार के दूसरे अपने आश्रितों के नष्ट करने वालों का [भाग होता है]। (तत् अपि श्लोकाः) उस विषय में ही श्लोक हैं॥

दरहितः (असान्निध्यात्) नञ्+सन्निधि—ष्यञ्। अनैकट्यात् (सम्प्लवेत्) निमज्जेत् (पुण्डरीकः) फर्फरीकादयश्च (उ० ४।२०) पुडि मर्दने—ईकन् प्रत्ययान्तो निपातितः। जलजन्तुविशेषः (जषरः) ऋच्छेररः (उ० ३।१३१) जष हिंसायाम्—अरः, हिंस्रजलजन्तुः (जसः) जष हिंसायाम्—घः। झषः। हिंसकमत्स्यभेदः (विनष्टोपजीविनाम्) विनष्टाश्रितानाम् (उत्पाताद्भुतः) उपद्रवविस्मितः (बहुलः) बहु+ला आदाने—कः। बहुदोषग्राहकः (अपतत्) पतति। अधोगच्छति (संवत्सरविरिष्टम्) संवत्सरयज्ञाद् विनष्टं कर्म (दक्षिणतः) दक्ष वृद्धौ—इनन्, स्वार्थे तसिल्। वृद्धिमान् (चातुर्हौत्रविनिर्मितः) चतुर्होतृ—अण् स्वार्थे, अनुशतिकादीनां च (पा० ७।३।२०) उभयपदवृद्धिः। चतुर्होतृभिर्विरचितः (अनुमन्त्रणैः) अनुकूलविचारैः (विभ्रंशम्) भ्रंशु अधःपतने—घञ्। विनाशम् (वृणीयात्) स्वीकुर्यात्॥

(बहुधा विश्रुतः मखः छिन्नभिन्नः अपध्वस्तः यजमानस्य इष्टापूर्तद्रविणम् अवगृह्य अपतत् । १ ।) बहुत प्रकार से विख्यात यज्ञ छिन्न भिन्न और नष्ट होकर यजमान के इष्ट [अग्निहोत्र वेदाध्ययन आतिथ्य आदि] और पूर्त [बावड़ी कुआं देवमन्दिर आदि] के बल को छीन कर गिर जाता है ॥ १ ॥

(संवत्सरविरिष्टं तत् ऋत्विजां च राज्ञः जनपदस्य च विनाशाय यत्र यज्ञः विरिष्यते । २ ।) संवत्सर यज्ञ से नष्ट किया हुआ कर्म वहां पर ऋत्विजों के और राजा और राज्य के विनाश के लियें [होता है], जहां यज्ञ नष्ट किया जाता है ॥ २ ॥

(दक्षिणाप्रवणीभूतः यज्ञः दक्षिणतः स्मृतः, ब्रह्मवेदात् असंस्कृतः हीनाङ्गः रक्षसां भागः । ३ ।) दक्षिणाओं से विस्तारित यज्ञ वृद्धि वाला कहा गया है, ब्रह्मवेद [ईश्वर ज्ञान] से नहीं संस्कार किया हुआ, अङ्गों से हीन [यज्ञ] राक्षसों [उपद्रवी जीवों] का भाग होता है ॥ ३ ॥

(चातुर्होत्रविनिर्मितः, चतुर्विधैः मन्त्रैः, वेदपारगैः ऋत्विग्भिः स्थितः सकलः यज्ञः चतुष्पात् । ४ ।) चारों होताओं [होता, अध्वर्यु, उद्गाता, और ब्रह्मा] से रचा गया, चार प्रकार वाले मन्त्रों और वेदों के पार पाने वाले ऋत्विजों के साथ ठहरा हुआ सम्पूर्ण यज्ञ चार पांव वाला होता है ॥ ४ ॥

(प्रायश्चित्तैः अनुध्यानैः अनुज्ञानानुमन्त्रणैः होमैः च सर्वं यज्ञविभ्रंशं ब्रह्मा प्रपूरयेत् इति । ५ ।) प्रायश्चित्तों [पापशोधन उपायों], अनुकूल ध्यानों, अनुज्ञानों [अनुकूल आज्ञाओं] के अनुमन्त्रण [अनुकूलसम्मतिदान] से और होमों से सब यज्ञ के दोष को ब्रह्मा पूरा करे ॥ ५ ॥

(तस्मात् यजमानः भृग्वङ्गिरोविदम् एव तत्र ब्रह्माणं वृणीयात्) इसलिये यजमान भृगु अङ्गिराओं [परिपक्व ज्ञान वाले चार वेद] को जानने वाले को ही वहां [यज्ञ में] ब्रह्मा चुने । (सः हि यज्ञं तारयति इति ब्राह्मणम्) वह ही यज्ञ को तार देता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ ५ ॥

भावार्थः—जहां पर सब ऋत्विज् लोग चतुर होते हैं और विशेष करके ब्रह्मा चतुर्वेदी, ब्रह्मचारी, और सब विधान जानने वाला होता है, वह यज्ञ निर्विघ्न सिद्ध होकर सब राजा और प्रजा को सुख देता है ॥ ५ ॥

विशेषः- इस कण्डिका को गो० पू० २ । २४ से मिलाओ ॥

कण्डिका ६ ॥

यज्ञो वै देवेभ्य उदक्रामत्, न वोहमन्नं भविष्यामीति । नेति देवा अब्रुवन्, अन्नमेव नो भविष्यसीति । तं देवा विमेथिरे । स एभ्यो विहतः न प्रबभूव । ते होचुर्देवाः, न वै न इत्थं विहतः अलं भविष्यति हन्तेमꣳ सम्भरामेति[1] । तं सꣳजभ्रुः । तं सम्भृत्योचुरश्विनौ, इमं भिषज्यतमिति । अश्विनौ वै देवानां भिष-

---

१. सम्भरामीति पू. सं. पाठः ॥ सम्पा० ॥

जावश्विनावध्वर्यू, तस्मादध्वर्यू घर्मं सम्भरतस्तं सम्भृत्योचतुः, ब्रह्मन् घर्मेण प्रचरिष्यामः, होतर्घर्ममभिष्टुहि. उद्गातः सामानि गायेति । प्रचरत घर्ममित्यनुजानाति । ब्रह्मप्रसूता हि प्रचरन्ति, ब्रह्म हेदं प्रसवानामीशे, सवितृप्रसूततायै घर्मं तपामि, ब्रह्म जज्ञानमियम्पित्र्या राष्ट्रचेत्वग्र इति । घर्मं ताप्यमानमुपासीत, शस्त्रवदर्धर्चश आहावप्रतिगरवर्जं रूपसमृद्धाभिः । एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धम् । यत् कर्म क्रियमाणमृग्यजुर्वाभिवदति, स्वस्ति तस्य यज्ञस्य पारमश्नुते य एवं वेद । वेदमिथुनं वा एतत् यद् घर्मः. तस्मादन्तर्धाय[1] प्रचरन्त्यन्तर्हिता वै मिथुनं चरन्तीति । १ । तदेतदेव मिथुनमित्याचक्षते । २ । तस्य यो घर्मः तच्छिश्नं, यौ शफौ, तावाण्ड्यौ, य उपयमनी[2], ते श्रोणिकपाले, यत्पयः, तद्रेतः, तदग्नौ देवयोन्यां रेतो ब्रह्ममयं धत्ते प्रजन[3]नाय । ३ । सोऽग्निर्देवयोनिर्ऋङ्मयो यजुर्मयः साममयो ब्रह्ममयोऽमृतमय आहुतिमयः सर्वेन्द्रियः सम्पन्नो यजमान ऊर्ध्वः स्वर्गं लोकमेति । ४ । तदाहुः. न प्रथमयज्ञे प्रवर्ग्यं कुर्वीत, अनुपनामका ह वा एनमुत्तरे यज्ञक्रतवो भवन्तीति । कामन्तु योऽनूचानः श्रोत्रियः स्यात्, तस्य प्रवृञ्ज्यात् आत्मा वै स यज्ञस्येति विज्ञायते, अपशिरसा ह वा एष यज्ञेन यजते, योऽप्रवर्ग्येण यजते । शिरो ह वा एतद्यज्ञस्य, यद् प्रवर्ग्यः । तस्मात् प्रवर्ग्यवतैव याजयेन्नाप्रवर्ग्येण । तदप्येषाभ्यनूक्ता, चत्वारि शृङ्गेति ॥ ६ ॥

कण्डिका ६ ॥ यज्ञ, घर्म और प्रवर्ग्य का वर्णन ॥

(यज्ञः वै देवेभ्यः उदक्रामत् अहं वः अन्नं न भविष्यामि इति) यज्ञ देवताओं से निकल भागा—मैं तुम्हारा अन्न नहीं होऊंगा । (न इति देवाः अब्रुवन्, नः अन्नम् एव भविष्यसि इति) यह नहीं–देवता बोले–तू हमारा अन्न ही होगा। (तं देवाः विमेथिरे) उसको देवताओं ने मारा । (सः विहतः एभ्यः न प्रबभूव) वह मारा हुआ इनके लिये [अन्न बनने को] न समर्थ हुआ । (ते देवाः ह ऊचुः, इत्थं विहतः नः वै अलं न भविष्यति, हन्त इमं सम्भराम इति) वे देवता बोले—इस प्रकार से मारा हुआ यह हमारे लिये पर्य्याप्त न होगा, अच्छा ! इसे हम मिलकर धारण करें । तं संजभ्रुः) उसे उन्होंने मिलकर पकड़ा । (तं संभृत्य ऊचुः अश्विनौ इमं भिषज्यतम् इति) उसे मिलकर धारण करके वे बोले—हे दोनों अश्वियो ! इसकी औषध करो । (अश्विनौ वै देवानां भिषजौ अश्विनौ अध्वर्यू तस्मात् अध्वर्यू घर्मं सम्भरतः) दोनों अश्वी [प्राण और अपान] ही देवों [इन्द्रियों] के दो वैद्य

६—(उदक्रामत्) उत्क्रान्तवान् (विमेथिरे) विविध हिंसितवन्तः (विहतः) विविधं ताडितः (अलम्) पर्य्याप्तम् (सम्भराम) ऐ० ब्रा० १ । १८ । सम्यग् धराम । पोषयाम । (संजभ्रुः) हस्य भः । सजह्रुः । एकीभूय गृहीतवन्तः (ऊचुः)—

१. पू. सं. "अन्तर्धा हि" इति पाठः ॥ २. पू. सं. 'उपयमनीके' इति पाठः ॥

३. बृहदारण्यक ६ । २ । १३ तथा छान्दोग्य ५ । ८ । १-२ में वर्णित यज्ञ की विभिन्न उपमाओं के अनुरूप यहाँ भी विभिन्न रूपक वर्णित हुए हैं ॥ सम्पा० ॥

हैं, दो अश्वी दो अध्वर्यु [के समान] हैं, इसलिये दो अध्वर्यु घर्म [यज्ञ वा पात्र विशेष] को यथावत् धारण करते हैं। (तं सम्भृत्य ऊचतुः, ब्रह्मन् घर्मेण प्रचरिष्यामः, होतः घर्मम् अभिष्टुहि, उद्गातः सामानि गाय इति) उस [यज्ञ] को यथावत् धारण करके वे दोनों [अध्वर्यु] बोले—हे ब्रह्मन्! [ब्रह्मा] घर्म से हम कार्य करेंगे, हे होता घर्म की तू स्तुति कर, [इतने को ऐ० ब्रा० १ । १८ से मिलाओ], हे उद्गाता! तू साममन्त्रों को गा। (घर्मं प्रचरत इति अनुजानाति) घर्म को तुम सब काम में लाओ—यह वह [ब्रह्मा] आज्ञा देता है। (ब्रह्मप्रसूताः हि प्रचरन्ति, इदं ब्रह्म ह प्रसवानाम् ईशे, सवितृप्रसूततायै घर्मं तपामि, जज्ञानं ब्रह्म, इयं पित्र्या राष्ट्री अग्रे एतु इति) क्योंकि ब्रह्मा से प्रेरित [ऋत्विग् लोग] कार्य करते हैं—यह ब्रह्म [परमात्मा] ही उत्पन्न पदार्थों का ईश्वर है, सविता [सर्वप्रेरक परमात्मा] से प्रेरणा के लिये घर्म [यज्ञपात्र] को तपाता हूं, [इन दो प्रतीकों को अथर्व० ५ । २४ । १ से मिलाओ], विद्यमान ब्रह्म, और यह पिता [जगत् पिता परमेश्वर] से आयी हुई राजराजेश्वरी [वेदवाणी] हमारे आगे आवे [यह दोनों प्रतीक अथर्व० ४ । १ । १ तथा २ के हैं]। (ताप्यमानं घर्मं रूपसमृद्धाभिः शस्त्रवत् अर्धर्चशः आहावप्रतिगरवर्जं उपासीत) तपाते हुये घर्म को रूप [प्रयोजनीय आशय] से सम्पन्न, स्तुति वाली आधी-आधी ऋचाओं से झगड़ा और प्रत्युत्तर छोड़ कर वह [यजमान] सेवे। (एतत् वै यज्ञस्य समृद्धं, यत् रूपसमृद्धम्, यत् क्रियमाणं कर्म ऋग् यजुः वा अभिवदति) यह ही यज्ञ की सम्पन्नता [सिद्धि] है जो रूप [प्रयोजनीय आशय] की सम्पन्नता है—[अर्थात्] जिस किये जाते हुये कर्म को ऋचा वा मन्त्र बताता है। (स्वस्ति तस्य यज्ञस्य पारम् अश्नुते यः एवं वेद) कल्याण के साथ उस यज्ञ का पार वह पाता है, जो ऐसा जानता है॥

(वेदमिथुनं वै एतत् यत् घर्मः, तस्मात् अन्तर्धाय प्रचरन्ति, अन्तर्हिताः वै मिथुनं चरन्ति इति) यह वेदोक्त मिथुन व्यापार ही है जो यह घर्म है, इसलिये गुप्त हो कर ही इसको वे सेवते हैं, गुप्त होकर ही मिथुन व्यापार लोग करते हैं। १। (तत् एतत् एव मिथुनम् इति आचक्षते) वह ही यह मिथुन व्यापार है—ऐसा लोग कहते हैं। २। (तस्य यः घर्मः तत् शिश्नं, यौ शफौ तौ आण्ड्यौ, ये उपयमनी ते श्रोणिकपाले, यत् पयः तत् रेतः, तत् अग्नौ देवयोन्यां ब्रह्ममयं रेतः प्रजनाय धत्ते)

ऐ० ब्रा० १ । १८ (सम्भरतः)—ऐ० ब्रा० १ । १८ (प्रचरिष्यामः) अनुष्ठास्यामः (अनुजानाति) आज्ञापयति (ब्रह्मप्रसूताः) ब्रह्मणा चतुर्वेदविदा प्रेरिताः (प्रसवानाम्) उत्पन्नपदार्थानाम् (ईशे) तलोपः। ईष्टे। ईश्वरोऽस्ति (घर्मम्) पात्रविशेषं यज्ञं वा (जज्ञानम्) जनी प्रादुर्भावे—शानच् शपः श्लौ सति रूपम्[1]। जायमानम्। दृश्यमानम्। (पित्र्या) पितुर्यच्च (पा० ४ । ३ । ७९) पितृ—यत्, टाप्। पितृसकाशादागता। पैतृका (राष्ट्री) राजृ दीप्तौ ऐश्वर्ये च—ष्ट्रन्, ङीष्। राष्ट्री, ईश्वरनाम—निघ० २ । २२। राज्ञी। ईश्वरी। सर्वनियन्त्री (एतु) गच्छतु (अग्रे) अभिमुखम् (उपासीत) उप +

---

१. शप् को श्लु बाहुलक नियम से हुआ है॥ सम्पा०॥

उस [यज्ञ] का जो घर्म [पात्र विशेष] है वह शिश्न [पुरुष लिङ्ग] है, जो दो शफ [उष्ण पदार्थ लेने के लिये काठ के शस्त्र विशेष] हैं वे दो आण्ड [अण्डकोश] हैं, जो दो उपयमनी [दर्वी वा डोई] हैं वे दो श्रोणिकपाल [कटिमध्य के दो खण्ड] हैं, जो दूध है वह वीर्य है, इसलिये अग्नि देवयोनि [दिव्य पदार्थों की उत्पत्ति स्थान] में ब्रह्ममय वीर्य को गर्भाधान के लिये वह [यजमान] धारण करता है। ३। (सः अग्निः देवयोनिः ऋङ्मयः, यजुर्मयः, साममयः, ब्रह्ममयः, अमृतमयः, आहुतिमयः, सर्वेन्द्रियः, सम्पन्नः यजमानः ऊर्ध्वः स्वर्गं लोकम् एति) वह अग्नि देवयोनि [समान] ऋग्वेद युक्त, यजुर्वेद युक्त, सामवेद युक्त, ब्रह्मवेद [अथर्ववेद] युक्त, अमृत [मोक्ष सुख] युक्त, आहुति [दान और ग्रहण व्यापार] युक्त, सब इन्द्रियों वाला और संपत्ति वाला यजमान ऊंचा होकर स्वर्ग लोक पाता है। ४। [इन चार वाक्यों को ऐ० ब्रा० १। २२ से मिलाओ]॥

(तत् आहुः प्रथमयज्ञे प्रवर्ग्यं न कुर्वीत, अनुपनामकाः ह वै उत्तरे यज्ञक्रतवः एनं भवन्ति इति) लोग यह कहते हैं—प्रथम यज्ञ में प्रवर्ग्य [यज्ञ] को न करे, उपनाम विना ही पिछले यज्ञ कर्म इस [प्रवर्ग्य] को प्राप्त होते हैं। (कामं तु यः अनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यात्, सः वै यज्ञस्य आत्मा इति विज्ञायते) ऐसा ही हो किन्तु जो अनूचान [अङ्ग उपाङ्गों सहित वेद पढ़ा हुआ], और श्रोत्रिय [वेद विहित धर्म जानने वाला] हो उसके समर्थ होने से [प्रवर्ग्य करे,] वह ही यज्ञ का आत्मा है यह जाना गया है। (अपशिरसा यज्ञेन ह वै एषः यजते, यः अप्रवर्ग्येण यजते) बिना शिर वाले यज्ञ से ही वह यज्ञ करता है, जो प्रवर्ग्य के बिना यज्ञ करता है। (यज्ञस्य एतत् ह वै शिरः यत् प्रवर्ग्यः) यज्ञ का यह ही शिर है जो प्रवर्ग्य है। (तस्मात् प्रवर्ग्यवता एव याजयेत्, न अप्रवर्ग्येण) इसलिये प्रवर्ग्यवान् [यजमान] से ही यज्ञ करावे, अप्रवर्ग्य वाले से न [यज्ञ करावे]। (तत् अपि एषा अभ्यनूक्ता, चत्वारि शृङ्गा इति) इसलिये यह [ऋचा] पढ़ी जाती है—चत्वारि शृङ्गा..... [देखो गो० पू० २। १७]॥ ६॥

भावार्थः—यज्ञ में यज्ञ विभागों को ठीक ठीक करने से यजमान स्वर्गलोक पाता है॥ ६॥

विशेषः १—यह शब्द शुद्ध किये गये हैं—इच्छन्=इत्थं, ऐ० ब्रा० १। १८, राष्ट्रेत्व=राष्ट्र्‌येत्व, अथर्व० ४। १। २॥

आस उपवेशने—विधिलिङ्। उपचरेत् (आहावप्रतिगरवर्जम्) युद्धं प्रतिकूलशब्दं च वर्जयित्वा (अन्तर्धाय) अन्तर्—दधातेः—ल्यप्। तिरोभूय (शफौ) शमु उपशमे—अच्, मस्य फः। उष्णपदार्थग्रहणाय काष्ठनिर्मितशस्त्रभेदौ (आण्ड्यौ) स्वार्थे—ष्यञ्। अण्डकोशौ (उपयमनी) दर्वीद्वयम् (श्रोणिकपाले) श्रोणिद्वय-मध्यगतमस्थिद्वयम् (देवयोन्याम्) देवानामुत्पत्तिस्थाने (सम्पन्नः) सम्पत्तिवान् (अनुपनामकाः) उपनामरहिताः (भवन्ति) प्राप्नुवन्ति (कामम्) अनुमतौ (प्रवृञ्ज्यात्) प्र+वृजी वृजि वर्जने—क्यप्। वृजनं बलं—निघ० २। ९। सामर्थ्यात् (अपशिरसा) विगतमस्तकेन॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित नीचे लिखे जाते हैं—

१—सविता प्रसवानामधिपतिः स मावतु । अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।। अथ० ५ । २४ । १ । (सविता) सबका उत्पन्न करने वाला वा सम्पूर्ण ऐश्वर्य वाला जगदीश्वर (प्रसवानाम्) उत्पन्न पदार्थों वा अच्छे अच्छे ऐश्वर्यों का (अधिपतिः) अधिष्ठाता है, (सः) वह (मा) मुझे (अवतु) बचावे, (अस्मिन्) इस (ब्रह्मणि) बड़े वेदज्ञान में, (अस्मिन् कर्मणि) इस कर्तव्य कर्म में, (अस्यां पुरोधायाम्) इस पुरोहित पदवी में, (अस्यां प्रतिष्ठायाम्) इस प्रतिष्ठा वा सत्क्रिया में, (अस्यां चित्याम्) इस चेतना में, (अस्याम् आकूत्याम्) इस संकल्प वा उत्साह में (अस्याम् आशिषि) इस अनुशासन में, और (अस्यां देवहूत्याम्) इस विद्वानों के बुलावे में (स्वाहा) यह आशीर्वाद हो ।।

२—ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ।। अथ० ४ । १ । १, यजु० १३ । ३ । साम० पू० ४ । ३ । ९ ।। (वेनः) प्रकाशमान वा मेधावी परमेश्वर ने (पुरस्तात्) पहले काल में (प्रथमम्) प्रख्यात (जज्ञानम्) उपस्थित रहने वाले (ब्रह्म) वृद्धि के कारण अन्न को और (सुरुचः) बड़े रुचिर लोकों को (सीमतः) सीमाओं वा छोरों से (वि आवः) फैलाया है । (सः) उसने (बुध्न्याः) अन्तरिक्ष में वर्तमान (उपमाः) [परस्पर आकर्षण से] तुलना करने वाले (विष्ठाः) विशेष विशेष स्थानों, अर्थात् (अस्य) इस (सतः) विद्यमान [स्थूल] के (च) और (असतः) अविद्यमान [सूक्ष्म जगत्] के (योनिम्) घर को (च) निश्चय करके (वि वः) खोला है ।।

३—इयं पित्र्या राष्ट्र्येत्वग्रे प्रथमाय जनुषे भुवनेष्ठाः । तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्तु प्रथमाय धास्यवे ।। अथ० ४ । १ । २ ।। (पित्र्या) पिता [जगत्पिता परमेश्वर] से आई हुयी, (भुवनेष्ठाः) सब जगत् में ठहरी हुई (इयम्) यह (राष्ट्री) राजराजेश्वरी शक्ति [वेदवाणी] (प्रथमाय) सबसे उत्तम (जनुषे) जन्म के लिये (अग्रे) हमारे आगे (एतु) आवे, [अर्थात्] (तस्मै) उस (प्रथमाय) सबसे ऊपर विराजमान (धास्यवे) संसार का धारण पोषण चाहने वाले परमात्मा के लिये (एतम्) इस (सुरुचम्) बड़े रुचिर (ह्वारम्) अनिष्ट को झुका देने वाले (अह्यम्) प्राप्ति योग्य, वा प्रतिदिन वर्तमान (घर्मम्) यज्ञ को (श्रीणन्तु) सब लोग परिपक्व करें ।।

कण्डिका ७ ।।

देवाश्च ह वा ऋषयश्चासुरैः संयत्ता आसन् । तेषामसुराणामिमाः पुरः प्रत्यभिजिता आसन्, अयस्मयी पृथिवी, रजतान्तरिक्षं, हरिणी द्यौः । ते देवाः सङ्घातं सङ्घातं पराजयन्त । ते विदुः, अनायतना हि वै श्यः[1] स्मः, तस्माद्

---

१. "श्यः" इति पाठो न सार्वत्रिकः ।। सम्पा० ।।

पराजयामहा इति त एताः पुरः प्रत्यकुर्वत, हविर्धानन्दिव आग्नीध्रमन्तरिक्षात्सदः पृथिव्याः । ते देवा अब्रुवन्, उपसदमुपायाम, उपसदा वै महापुरञ्जयन्तीति । त एभ्यो लोकेभ्यो निरघ्नन्, एकयामुष्माल्लोकादेकयान्तरिक्षादेकया पृथिव्याः । तस्मादाहुः, उपसदा वै महापुरञ्जयन्तीति । त एभ्यो लोकेभ्यो निर्हता ऋतून् प्राविशन् । ते षडुपायन्, तानुपसद्भिरेवर्तुभ्यो निरघ्नन्, द्वाभ्याममुष्माल्लोकाद् द्वाभ्यामन्तरिक्षाद् द्वाभ्यां पृथिव्याः । ते ऋतुभ्यो निर्हताः संवत्सरं प्राविशन् । ते द्वादशोपायन्, तानुपसद्भिरेव संवत्सरान्निरघ्नन्, चतसृभिरमुष्माल्लोकाच्चतसृभिरन्तरिक्षाच्चतसृभिः पृथिव्याः । ते संवत्सरान्[1] निर्हता अहोरात्रे प्राविशन्, ते यत्सायमुपायन्, तेनैतान् रात्र्या अनुदन्त, यत् प्रातः, तेनाह्नः । तस्माद् गौः सायम्प्रातःस्तनमाप्यायते । प्रातःसायन्तनन्तानुपसद्भिरेवैभ्यो लोकेभ्यो नुदमाना आयन्, ततो देवा अभवन् परासुराः । सर्वेभ्य एवैभ्यो लोकेभ्यो भ्रातृव्यन्नुदमान एति, य एवं विद्वानुपसदमुपैति ॥ ७ ॥

कण्डिका ७ ॥ देवासुर सङ्ग्राम में उपसद् यज्ञ द्वारा देवताओं की विजय ॥

(देवाः च ऋषयः च ह वै असुरैः संयत्ताः आसन्) देव [विद्वान्] और ऋषि [सन्मार्गदर्शक लोग] असुरों [राक्षसों वा विघ्नों] करके वशीभूत हुये । (तेषाम् असुराणाम् इमाः पुरः प्रत्यभिजिताः आसन्, अयस्मयी पृथिवी, रजता अन्तरिक्षं, हरिणी द्यौः) उन असुरों करके यह नगरियां [देवताओं से] लड़कर जीती हुयी थीं—गति [वा सुवर्ण] वाली [नगरी] पृथिवी, सब लोकों वाली [नगरी] अन्तरिक्ष और प्रकाश वाली [नगरी] सूर्यलोक । (ते देवाः सङ्घातं सङ्घातं पराजयन्त) वे देवता टोली टोली करके हराये गये । (ते विदुः, अनायतनाः हि वै शयः स्मः, तस्मात् पराजयामहै इति त एताः पुरः प्रत्यकुर्वत, हविर्धानं दिवः, आग्नीध्रम् अन्तरिक्षात्, सदः पृथिव्याः) उन्होंने विचारा—घरों के बिना हम सोते हुये हैं, इसलिये [असुरों को]

७—(देवाः) विद्वांसः (ऋषयः) सन्मार्गदर्शकाः (असुरैः) असेरुरन् (उ० १ । ४२) असु क्षेपणे—उरन् । शुभगुणस्य क्षेपणशीलैः । राक्षसैः । विघ्नैः । (संयत्ताः) सम् + यती प्रयत्ने—क्तः । आयत्ताः वशीभूताः (पुरः) नगराणि । दुर्गाणि (अयस्मयी) सर्वधातुभ्योऽसुन् (उ० ४ । १८९) इण् गतौ—असुन् । अयः, हिरण्यनाम—निघ० १ । २ । सुवर्णमयी । गतिमती (रजता) । पृषिरञ्जिभ्यां कित् (उ० ३ । १११) रञ्ज रागे—अतच्, ततः अर्शआद्यच् टाप् । लोका रजांस्युच्यन्ते—निरु० ४ । १९ । रज एव रजत, सर्वलोकमयी नगरी (हरिणी) श्यास्त्याहृञविभ्य इनच् (उ० २ । ४६) हृञ् हरणे—इनच्, ङीप् । मत्वर्थीयलोपः । हिरण्यमयी । प्रकाशमयी (द्यौः) सूर्यलोकः (सङ्घातम्) समूहम् (अनायतनाः) आश्रयरहिताः (शयः) शीङ् स्वप्ने—क्विप् । शयिताः । निद्रिताः (प्रत्यकुर्वत) प्रतिकूलाः कृतवन्तः (हविर्धानम्) हविषः अन्नस्य यज्ञस्थानविशेषम् (सदः) सदनस्थानम्

---

१. पू. सं. 'संवत्सरा' इति पाठः ॥ सम्पा० ॥

हम हरावें--सो उन्होंने यह नगर बनाये, हविर्धान [अन्न स्थान] सूर्य से, आग्नीध्र [यज्ञ में अग्नि जलाने का स्थान] अन्तरिक्ष से और सद [बैठने का स्थान] पृथिवी से। (ते देवाः अब्रुवन्, उपसदम् उपायाम, उपसदा वै महापुरं जयन्ति इति) वे देवता बोले—उपसद् [यज्ञ विशेष वा पास पास पहुंचने की क्रिया] को हम करें, उपसद् से ही बड़े नगर को लोग जीतते हैं। (ते एभ्यः लोकेभ्यः निरघ्नन्, एकया अमुष्मात् लोकात् एकया अन्तरिक्षात्, एकया पृथिव्याः) उन्होंने [असुरों को] इन लोकों से मार निकाला, एक [उपसद्] द्वारा उस [सूर्य] लोक से, एक के द्वारा अन्तरिक्ष से और एक के द्वारा पृथिवी से। (तस्मात् आहुः, उपसदा वै महापुरं जयन्ति इति) इसलिये कहते हैं—उपसद् द्वारा ही बड़े नगर को लोग जीतते हैं। (ते एभ्यः लोकेभ्यः निर्हताः ऋतून् प्राविशन्) वे [असुर] इन लोकों से निकाले गये होकर ऋतुओं में प्रविष्ट हुये। (ते षट् उपायन् तान् उपसद्भिः एव ऋतुभ्यः निरघ्नन्, द्वाभ्याम् अमुष्मात् लोकात् द्वाभ्याम् अन्तरिक्षात् द्वाभ्यां पृथिव्याः) उन [देवताओं] ने छह [उपसदों] को प्राप्त किया, उन [असुरों] को उपसदों द्वारा ऋतुओं से निकाल दिया--दो [उपसद्] द्वारा उस लोक से, दो के द्वारा अन्तरिक्ष से और दो के द्वारा पृथिवी से [अर्थात् दो दो महीने वाले छह ऋतुओं के लिये छह उपसद् किये]। (ते ऋतुभ्यः निर्हताः संवत्सरं प्राविशन्) वे [असुर] ऋतुओं से निकाले गये होकर संवत्सर में प्रविष्ट हुये। (ते द्वादश उपायन् तान् उपसद्भिः एव संवत्सरात् निरघ्नन्, चतसृभिः अमुष्मात् लोकात्, चतसृभिः अन्तरिक्षात्, चतसृभिः पृथिव्याः) उन [देवताओं] ने बारह [उपसदों] को प्राप्त किया, उन [असुरों] को उपसदों द्वारा ही संवत्सर से निकाल दिया—चार [उपसदों] द्वारा उस लोक से, चार के द्वारा अन्तरिक्ष से और चार के द्वारा पृथिवी से [चातुर्मास्य यज्ञ के लेखे से चार चार का ग्रहण किया है]। (ते संवत्सरात् निर्हताः अहोरात्रे प्राविशन्) वे [असुर] संवत्सर से निकाले गये होकर दिन रात्रि में प्रविष्ट हुये। (ते यत् सायम् उपायन् तेन एनान् रात्र्याः अनुदन्त, यत् प्रातः, तेन अह्नः) उन [देवताओं] ने जो सायंकाल [के उपसद्] को प्राप्त किया, उस [कर्म] से इन [असुरों] को रात्रि से निकाल दिया, जो प्रातःकाल [उपसद् किया], उसके द्वारा दिन से [उन्हें निकाल दिया]। (तस्मात् गौः सायम्प्रातः स्तनम् आप्यायते) इसलिये गौ सायंकाल और प्रातःकाल पिन्हाती है [अर्थात् यह दोनों काल अधिक स्वास्थ्यकारक हैं]। (प्रातः सायन्तनम् तान् उपसद्भिः एव एभ्यः लोकेभ्यः नुदमानाः आयन्) प्रातःकाल और सायंकाल उन [असुरों] को उपसदों [पास बैठने वा उपासना आदि क्रियाओं] के द्वारा ही इन लोकों से निकालने वाले वे [देवता] हुये हैं। (ततः देवाः असुराः परा अभवन्) इसी से देवताओं ने असुरों को हराया। (सर्वेभ्यः एव एभ्यः

(उपसदम्) उप + षद्लृ विशरणगतिहिंसनेषु—क्विप्। समीपोपवेशनक्रियाम्। यज्ञविशेषम् (उपायाम) उप + आङ् + या गतौ--लोट्। अनुतिष्ठाम (निरघ्नन्) निःसारितवन्तः (उपायन्) उप + इण् गतौ–लङ्। सम्पादितवन्तः (आप्यायते) वर्धते दुग्धेन (सायन्तनम्) सायंचिरंप्राह्णे० (पा० ४ । ३ । २३) स्वार्थे ट्यु तुट् च। सायङ्काले (नुदमानाः) प्रेरयन्तः (उपैति) अनुतिष्ठति ॥

लोकेभ्यः भ्रातृव्यं नुदमानः एति, यः एवं विद्वान् उपसदम् उपैति) इन सभी लोकों से बैरी को निकालता हुआ वह चलता है जो ऐसा विद्वान् होकर उपसद् [पास बैठने वा उपासना करने की क्रिया] को प्राप्त होता है ॥ ७ ॥

भावार्थः—इस कण्डिका में असुर शब्द से भूकम्प, तारापतन आदि उत्पातों और विघ्नों की ओर संकेत है, जिनका बुरा प्रभाव स्थानों और समय पर होता है। बुद्धिमान् लोग ऐसे विघ्नों से बचने के लिये समय समय पर और सायं प्रातः परस्पर विचार करके उपाय करें ॥ ७ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० १।२३ से मिलाओ।

विशेषः २—इस कण्डिका का कुछ आधार यजुर्वेद अ० ५। म० ८ जान पड़ता है, वह अर्थ सहित यहाँ दिया जाता है। (या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा। या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा। या ते अग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ॥) (अग्ने) हे अग्नि ! [तेजस्वी परमेश्वर] (या ते) जो तेरा (अयःशया) सुवर्ण आदिकों में वर्त्तमान (तनूः) विस्तृत शरीर (वर्षिष्ठा) अत्यन्त बड़ा और (गह्वरेष्ठा) गहरे आभ्यन्तर में ठहरा हुआ है, [उसने] (स्वाहा) उत्तम वेदवाणी से (उग्रं वचः) भयंकर वचन को [संसार में] (अप अवधीत्) नष्ट किया है, (त्वेषं वचः) भड़कीले वचन को (अप अवधीत्) नष्ट किया है। (अग्ने) हे अग्नि ! [तेजस्वी परमेश्वर] (या ते) जो तेरा (रजःशया) लोकों में वर्तमान (तनूः) विस्तृत शरीर...... नष्ट किया है। (अग्ने) हे अग्नि ! (या ते) जो तेरा (हरिशया) मनुष्य आदि में वर्तमान (तनूः) विस्तृत शरीर (वर्षिष्ठा) अत्यन्त बड़ा और (गह्वरेष्ठा) गहरे आभ्यन्तर में ठहरा हुआ है, [उसने] (स्वाहा) उत्तम वेदवाणी से (उग्रं वचः) भयंकर वचन को [संसार में] (अप अवधीत्) नष्ट किया है, (त्वेषं वचः) भड़कीले वचन को (अप अवधीत्) नष्ट किया है ॥

कण्डिका ८ ॥

न द्वादशाग्निष्टोमस्योपसदः स्युः, अशान्ता निर्मृज्युः[1] न[2] तिस्रोऽहीनस्य, उपरिष्टाद्यज्ञक्रतुर्गरीयानभिषीदेत्, यथा गुरुर्भारो ग्रीवा निः[3]श्रीणीयादार्त्तिमार्छेत्[4]। द्वादशाहीनस्य कुर्य्यात्, प्रत्यु तथैव सयत्वाय[5]। तिस्रोऽग्निष्टोमस्योपसदः स्युः, शान्ताग्निर्मार्गाय। ते देवा असुर्य्यान् इमांल्लोकानान्ववैतुमाधृष्णुवन्। तानग्निना मुखेनान्ववायन्, यदग्निमनुष्टुपसदां प्रतीकानि भवन्ति। यथा क्षेत्रपतिः क्षेत्रेऽन्ववनयन्ति एवमेवैतदग्निना मुखेनेमांल्लोकानभिनयन्तो यन्ति। यो ह वै देवान् साध्यान् वेद, सिद्ध्यत्यस्मै। इमे वाव लोकाः, यत्साध्याः देवाः। स य एवमेतान्

१. पू. सं. 'निर्मृज्येरन्' इति पाठः ॥ २. पू. सं. 'न' इति पाठः नास्ति ॥
३. पू. सं. निःश्रोणीयात् इति पाठः ॥ ४. पू. सं. 'आर्छेत्' इति पाठः ॥
५. भ्रष्टोऽयं पाठः प्रतीयते ॥ सम्पा० ॥

साध्यान्वेद, सिद्ध्यत्यस्मै सिद्ध्यत्यमुष्मै । सिद्ध्यत्यस्माल्लोकात्, य एवं विद्वानुपसदमुपैति ॥ ८ ॥

कण्डिका ८ ॥ उपसद् यज्ञों का अधिक वर्णन ॥

(अग्निष्टोमस्य द्वादश उपसदः न स्युः) *अग्निष्टोम[1] [जो एक दिन में प्रधान-सुत्या याग द्वारा निष्पन्न होता है] में बारह उपसत् नहीं करनी चाहिये, [क्योंकि अधिक होने से] (अशान्ताः निर्मृज्युः) अशान्त होकर बह जाती हैं। (अहीनस्य न तिस्रः) अहीन याग [जो द्विरात्रादि एकादशरात्रपर्यन्त अग्निष्टोम से अधिक दिनों में किया जाता है] में तीन [उपसद्] नहीं [करनी चाहिये, किन्तु बारह उपसद् ही करनी चाहिये, क्योंकि अग्निष्टोम से] (उपरिष्टात् गरीयान् यज्ञक्रतुः अभिषीदेत्, यथा गुरुः भारः ग्रीवाः निःश्रीणीयात् आर्तिम् आर्च्छेत्) ऊपर का [अहीनरूप] गुरुतर यज्ञक्रतु [अपने अनुरूप उपसद् याग के बिना सर्वतोमुख रीति से] क्षीण हो जायेगा, जिस प्रकार [अल्प बल वाली तीन उपसद् रूप] ग्रीवा में रखा हुआ अधिक भार [अहीन रूप अनेक दिन साध्य यज्ञ कार्य] ग्रीवा को निश्चयेन तोड़ देगा [जिसके कारण यजमान को] रोगादि कष्ट होगा[1]। * (अहीनस्य द्वादश कुर्यात् प्रत्यु तथा एव सयत्वाय) अहीन यज्ञ के बारह [उपसद्] करे, प्रत्यक्ष में वैसा ही समान प्रयत्न के लिये [होता है] । (अग्निष्टोमस्य तिस्रः उपसदः स्युः, शान्ताग्निः मार्गाय) अग्निष्टोम यज्ञ के तीन उपसद् हों, शान्त अग्नि मार्ग के लिये है। (ते देवाः असुर्य्यान् इमान् लोकान् आन्ववैतुम् आधृष्णुवन्) वे देवता लोग असुरों के इन लोकों पर चढ़ाई करने को साहसी हुये। (तान् मुखेन अग्निना आन्ववायन् यत् अग्निम् अनुष्टुपसदां प्रतीकानि भवन्ति) उन [लोकों] पर मुखिया अग्नि के द्वारा वे चढ़ गये,

---

८—(न) निषेधे (निर्मृज्युः) मृजूष् शोधने—विधिलिङ् । निर्वहेयुः (अहीनस्य) अह्नः खः क्रतौ (वा० पा० ४ । २ । ४२) अहन्—खप्रत्ययः समूहे । अह्नष्टखोरेव (पा० ६ । ४ । १४५) टिलोपः खप्रत्यये । अथवा, ओहाक् त्यागे—क्तः, नञ्समासः । न ह्येषु किञ्चन हीयते—गो० उ० ५ । १५ । अहर्गणसाध्ययज्ञम् । सम्पूर्णाङ्गयज्ञम् (गरीयान्) गुरु—ईयसुन् । गुरुतरः (अभिषीदेत्) विशीर्णो भवेत् (निःश्रीणीयात्) श्रीञ् हिंसायाम् । हिंसनम् कुर्यात् (आर्तिम्) पीडाम् (आर्च्छेत्) आ + ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु विधिलिङ् । सन्दीपयेत् (प्रत्यु) प्रत्यक्षेणैव (सयत्वाय) अशूप्रुषिलटिकणि० (उ० १ । १५१) समान + यती प्रयत्ने—क्वन्, तुक् च । समानप्रयत्नत्वाय (असुर्य्यान्) असुर—यत् । असुर-सम्बन्धिनः (आन्ववैतुम्) आ + अनु + अव + इण् गतौ—तुमुन् । समन्तात् प्राप्तुम् (आधृष्णुवन्) आ + अधृष्णुवन् । सर्वतो धृष्टाः साहसिनः अभवन्

---

१. अग्निष्टोमस्य से आर्त्तिमार्च्छेत् तक की कण्डिका का पुष्पाङ्कित भाष्य हमारा है। पूर्व स० में कई भ्रष्ट पाठ एवं 'न' का पाठ (द्र० पृ० ३२३ टि० २) च्युत होने से भाष्यकार का अर्थ असङ्गत हो गया था ॥ सम्पा० ॥

क्योंकि अग्नि को निरन्तर उन्नति पाने वाले यज्ञों के अवयव प्राप्त होते हैं । (यथा क्षेत्रपतिः क्षेत्रे अन्ववनयन्ति, एवम् एव एतत् मुखेन अग्निना इमान् लोकान् अभिनयन्तः यन्ति) जैसे किसान खेत में [अन्न आदि] निरन्तर पाते हैं, वैसे ही यह लोग मुखिया अग्नि के द्वारा इन लोकों को सब ओर से पाते हुये चलते हैं । (यः ह वै साध्यान् देवान् वेद, अस्मै सिध्यति) जो ही पुरुष साध्य [साधनीय श्रेष्ठ कर्मों को साधने वाले] देवों [विजयी पुरुषों] को जानता है, उसके लिये सिद्धि होती है । (इमे वाव लोकाः, यत् साध्याः देवाः) यह ही वे लोक [जन वा भुवन] हैं, जो साध्य देव हैं । (सः यः एवम् एतान् साध्यान् वेद, अस्मै सिध्यति, अमुष्मै सिध्यति) जो कोई इस प्रकार इन साध्यों [श्रेष्ठ कर्मों के साधने वालों] को जानता है, वह इस [समीप वाले पुरुष] के लिये सिद्धि पाता है और उस [दूर वाले पुरुष] के लिये सिद्धि पाता है । (अस्मात् लोकात् सिध्यति, यः एवं विद्वान् उपसदम् उपैति) वह इस लोक से सिद्धि पाता है, जो ऐसा जानकर पुरुष उपसद् यज्ञ को प्राप्त होता है ॥ ८ ॥

भावार्थः--अग्निष्टोम यज्ञ और अहीन यज्ञ के उपसदों को यथावत् करने से यजमान को यथावत् सिद्धि होती है ॥ ८ ॥

कण्डिका ९ ॥

अथ यत्राह, अध्वर्युरग्नीद्देवपत्नीर्व्याचक्ष्व, सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति । तदपरेण गार्हपत्यं प्राङ्मुखस्तिष्ठन्ननवानन्नाग्नीध्रो देवपत्नीर्व्याचष्टे, पृथिव्यग्नेः पत्नी, वाग् वातस्य पत्नी, सेनेन्द्रस्य पत्नी, धेना बृहस्पतेः पत्नी, पथ्या पूष्णः पत्नी गायत्री वसूनां पत्नी, त्रिष्टुप् रुद्राणां पत्नी, जगत्यादित्यानां पत्नी, अनुष्टुप् मित्रस्य पत्नी, विराड् वरुणस्य पत्नी, पङ्क्तिर्विष्णोः पत्नी, दीक्षा सोमस्य राज्ञः पत्नीति । अति भ्रातृव्यानारोहति, नैनं भ्रातृव्या आरोहन्ति उपरि भ्रातृव्यानारोहति, य एवं विद्वानग्नीध्रो देवपत्नीर्व्याचष्टे ॥ ९ ॥

कण्डिका ९ ॥ आग्नीध्र द्वारा देवपत्नियों का वर्णन ॥

(अथ यत्र आह, अग्नीत् अध्वर्युः देवपत्नीः व्याचक्ष्व, सुब्रह्मण्य सुब्रह्मण्याम् आह्वय इति) फिर जहां वह [ब्रह्मा] कहता है—हे अग्नीध्र [अग्नि प्रकाशक] अध्वर्यु

(अन्ववायन्) अनु+अव+आयन् । निरन्तरं प्राप्तवन्तः (अनुष्टुपसदाम्) अनु+ष्टुप समुच्छ्राये--कः+षद्लृ गतौ--क्विप् । उन्नतिप्राप्तानां यज्ञानाम् (प्रतीकानि) अवयवाः (भवन्ति) प्राप्नुवन्ति (साध्यान्) साध्यं येषामस्तीति, साध्य--अर्शआद्यच् । साधनवतः । परोपकारकान् साधून् (देवान्) विजिगीषून् (लोकाः) जनाः । भुवनानि (सिध्यति) साधयति । सिद्धिं प्राप्नोति (अस्मै) समीपस्थाय पुरुषाय (अमुष्मै) दूरस्थाय पुरुषाय ॥

९—(अग्नीत्) अग्नि + ञिइन्धी दीप्तौ–क्विप् । अग्निप्रज्वलयिता । ऋत्विक् (व्याचक्ष्व) चक्षिङ् व्यक्तायां वाचि दर्शने च । विविधं कथय पश्य वा (सुब्रह्म-

तू देवपत्नियों की व्याख्या कर, हे सुब्रह्मण्य ! [अच्छे प्रकार वेद में चतुर] सुब्रह्मण्या को बुला। (तत् अपरेण गार्हपत्यं प्राङ्मुखः तिष्ठन् अनवान् आग्नीध्रः न देवपत्नीः व्याचष्टे) वहां दूसरे [सुब्रह्मण्य] के साथ गार्हपत्य अग्नि से पूर्व मुख बैठा हुआ सावधान आग्नीध्र [अग्नि प्रकाशक अध्वर्यु] अब देवपत्नियों की व्याख्या करता है—(पृथिवी अग्नेः पत्नी) पृथिवी अग्नि [तेजस्वी पुरुष] की पत्नी [पालनशक्ति] है, (वाक् वातस्य पत्नी) वाणी वात [वायु समान वेग वाले पुरुष] की पत्नी है, (सेना इन्द्रस्य पत्नी) सेना [सेनादल] इन्द्र [परम ऐश्वर्यवान् पुरुष] की पत्नी है, (धेना बृहस्पतेः पत्नी) धेना [पीने योग्य अर्थात् स्वीकार करने योग्य नीति] बृहस्पति [बड़ी विद्याओं के स्वामी] की पत्नी है, (पथ्या पूष्णः पत्नी) पथ्या [शास्त्रीय मार्ग बताने वाली विद्या] पूषा [पोषण करने वाले पुरुष] की पत्नी है, (गायत्री वसूनां पत्नी) गायत्री [गाने योग्य विद्या] वसुओं [निवास कराने वाले पुरुषों] की पत्नी है, (त्रिष्टुप् रुद्राणां पत्नी) त्रिष्टुप् [तीन कर्म, उपासना और ज्ञान से पूजी गई विद्या] रुद्रों [दुष्टों के रुलाने वाले शूरों] की पत्नी है (जगती आदित्यानां पत्नी) जगती [प्राप्ति योग्य विद्या] आदित्यों [अखण्डव्रती विद्वानों] की पत्नी है, (अनुष्टुप् मित्रस्य पत्नी) अनुष्टुप् [निरन्तर स्तुति योग्य विद्या] मित्र [सर्वहितकारक पुरुष] की पत्नी है, (विराट् वरुणस्य पत्नी) विराट् [विविध ऐश्वर्य वाली विद्या] वरुण [चुनने योग्य पुरुष] की पत्नी है, (पङ्क्तिः विष्णोः पत्नी) पङ्क्ति [विस्तृत विद्या] विष्णु [कामों में व्यापक पुरुष] की पत्नी है, (दीक्षा सोमस्य राज्ञः पत्नी) दीक्षा [नियम पालन प्रतिज्ञा] सोम राजा [प्रेरक प्रतापी पुरुष] की पत्नी [पालन शक्ति] है [मिलान करो—अथ० ८। ९। १४]। (भ्रातृव्यान् अति आरोहति. एनं भ्रातृव्याः न आरोहन्ति, उपरि भ्रातृव्यान् आरोहति, यः एवं विद्वान् अग्नीध्रः देवपत्नीः व्याचष्टे) वह बैरियों को लांघकर चढ़ाई करता है, इस पर बैरी लोग नहीं चढ़ाई करते हैं, वह ऊपर होकर बैरियों पर चढ़ाई

ण्य) साध्वर्थे यत्। हे सुष्ठुवेदज्ञाने साधो (अनवान्) अन जीवने—अच्। प्राणवान्। सावधानः (न) सम्प्रति (आग्नीध्रः) अग्नि+ञिइन्धी दीप्तौ—रक्। अग्निप्रदीपकः। ऋत्विक् (पत्नी) पत्युर्नो यज्ञसंयोगे (पा० ४। १। ३३) पतिशब्दस्य इकारस्य नकारः, ङीप्। पालयित्री शक्तिः (धेना) धेट इच्च (उ० ३। ११) धेट् पाने—नः, टाप्। वाक्—निघ० १। ११ (पथ्या) धर्मपथ्यर्थन्यायादनपेते (पा० ४। ४। ९२) पथिन्—यत्। शास्त्रीयमार्गवती वेदवाणी (गायत्री) गै गाने—अत्रन्—ङीष्। गायत्री गायतेः स्तुतिकर्मणः—निरु० ७। १२। गानयोग्या (त्रिष्टुप्) त्रि+ष्टुभ पूजायाम्—क्विप्। स्तोभतिरर्चतिकर्मा—निघ० ३। १४। त्रिभिः कर्मोपासनाज्ञानैः पूजिता (जगती) गम्लृ गतौ—अति, ङीप्। जगती गोनाम—निघ० २। ११। गम्यमाना प्राप्तव्या (अनुष्टुप्) अनु+ष्टुभ पूजायाम्—क्विप्। वाक्—निघ० १। ११। निरन्तरस्तुत्या (विराट्) विविधेश्वरी (पङ्क्तिः) पचि विस्तारे—क्तिन्। विस्तृता (सोमस्य) प्रेरकस्य (राज्ञः) ऐश्वर्य्ययुक्तस्य (अति) अतीत्य। उल्लङ्घ्य (न) निषेधे॥

करता है, जो ऐसा जानकर अग्नीध्र [अग्नि प्रदीप्त करने वाला पुरुष] देवपत्नियों को व्याख्या करता है ॥ ९ ॥

भावार्थ:—विविध विद्याओं में चतुर पुरुष विविध विद्या वाले पुरुषों के मेल से शत्रुओं को जीतकर संसार में कीर्ति पाता है ॥ ९ ॥

विशेष:—सङ्केतित मन्त्र अर्थ सहित दिया जाता है—

अग्नीषोमावदधुर्या तुरीयासीद् यज्ञस्य पक्षावृषयः कल्पयन्तः। गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कीं यजमानाय स्वराभरन्तीम्। अथ० ८। ९। १४॥ (यज्ञस्य) यज्ञ [रसों के संयोग वियोग] के (पक्षौ) ग्रहण करने वाले (अग्नीषोमौ) सूर्य और चन्द्रमा [के समान] (ऋषयः) ऋषि लोगों ने, (या) जो [वेदवाणी] (तुरीया) वेगवती वा ब्रह्म की [जो सत्त्व रज और तम तीन गुणों से परे चौथा है] (आसीत्) थी, (यजमानाय) यजमान के लिये (स्वः) मोक्ष सुख (आभरन्तीम्) भर देने वाली [उस] (गायत्रीम्) गाने योग्य, (त्रिष्टुभम्) [कर्म, उपासना और ज्ञान इन] तीन से पूजी गयी (जगतीम्) प्राप्ति योग्य, (बृहदर्कीम्) बड़े सत्कार वाली (अनुष्टुभम्) निरन्तर स्तुति योग्य [विराट् वा वेदवाणी] को (कल्पयन्तः) समर्थन करते हुये (अदधुः) धारण किया है ॥

कण्डिका १० ॥

यथा वै रथ एकैकमरमभिप्रतितिष्ठन् वर्त्तते, एवं यज्ञ एकैकां तन्वमभि-[2] प्रतितिष्ठन्नेति। पुरा प्रचरितोराग्नीध्रीये होतव्या एतद्ध वा उवाच वासिष्ठः सात्यहव्यः, अस्कन्नः[1] सोम इत्युक्ते मा सूर्क्षत प्रचरत प्रातर्वावाद्याहं सोमं संस्थापयामीति। नास्य सोम स्कन्दति, य एवं विद्वान्त्सोमं पिबति, स ह स्म वै आसन्द्यामासीनः सक्तुभिरुपमथ्य सोमं पिबति, अहं वाव सर्वतो यज्ञं वेद, य एतान् वेद, न मामेष हिंसिष्यतीति। नैनं सोमपीथोऽनपेयो हिनस्ति, य एवं विद्वान्त्सोमं पिबति। तं ह स्म यदाहुः, कस्मात्त्वमिदमासन्द्यामासीनः सक्तुभिरुपमथ्य सोमं पिबसीति। देवतास्वेव यज्ञं प्रतिष्ठापयामीति अब्रवीद् ब्राह्मणः। यस्यैवं विदुषो यस्यैवं विद्वान् यज्ञार्तान् यज्ञे प्रायश्चित्तं जुहोति, देवतास्वेव यज्ञं प्रतिष्ठापयति। यज्ञार्त्ति प्रतिजुहुयात्, संयोनित्वाय। त्रयस्त्रिंशद्वै यज्ञस्य तन्व इति, एकान्नत्रिंशत् स्तोमभागाः, त्रीणि सवनानि, यज्ञश्चतुर्थः, स्तोमभागैरेवैतत् स्तोमभागान् प्रति प्रयुङ्क्ते, सवनैः सवनानि, यज्ञेन यज्ञं, सर्वा ह वा अस्य यज्ञस्य तन्वः प्रयुक्ता भवन्ति, सर्वा आप्ताः सर्वा अवरुद्धा देवस्य सवितुः प्रसवे बृहस्पतये स्तुतेति। यद्यद्वै सविता देवेभ्यः प्रासुवत् तेनार्ध्नुवन्, सवितृप्रसूता एव स्तु[3]वन्ति

---

१. पू. सं. अस्कन् इति पाठः, अर्थसङ्गत्याऽत्र संशोधितः। तुलना कार्या श० ब्रा० १। ४। ५। १।, यजु० २। ८॥ २. पू. सं. 'वसैह' इति पाठः॥

३. अतीव व्यत्यस्तोऽत्र पाठोऽस्माभिः संशोधितः॥ सम्पा०॥

ऋध्नुवन्ति, ऋध्यन्ते ह वा अस्य स्तोमाः, यज्ञ ऋध्यते, यजमान ऋध्यते, प्रजाया ऋध्यते, पशुभ्य ऋध्यते, ब्रह्मणे यस्यैवं विद्वान् ब्रह्मा भवति ॥ १० ॥

कण्डिका १० ॥ यज्ञ में सोमपान की महिमा ॥

(यथा वै रथः एकैकम् अरम् अभिप्रतितिष्ठन् वर्तते, एवं यज्ञः एकैकां तन्वम् अभिप्रतितिष्ठन् एति) जैसे रथ [रथ का पहिया] एक एक अरे [दण्डे] में जुटा हुआ घूमता है, वैसे ही यज्ञ एक एक अंग में जुटा हुआ चलता है । (पुरा प्रचरितोः आग्नीध्रीये होतव्याः. एतत् ह वै वासिष्ठः सात्यहव्यः उवाच) पहिले प्रचार के लिये आग्नीध्र [अग्नि मण्डप] में हवन होने चाहियें—यह ही अवश्य वशिष्ठ गोत्र में उत्पन्न सात्यहव्य [सत्यहव्य अर्थात् सत्य ग्रहण करने वाले के पुत्र, मुनि विशेष] ने कहा है । (सोमः अस्कन्नः, इति उक्ते मा सूर्क्षत, प्रचरत, प्रातः अद्य वाव अहं सोमं संस्थापयामि इति) सोम न सूखा हुआ [हरा भरा] है—ऐसे कहे जाने पर, मत अनादर करो, सेवा करो, प्रातः काल आज ही मैं सोम को स्थापित करता हूं [ऐसा यजमान कहता है] । (अस्य सोमः न स्कन्दति यः एवं विद्वान् सोमं पिबति) उसका सोमरस नहीं सूखता है, जो ऐसा विद्वान् होकर सोम रस पीता है, (सः ह स्म वै आसन्द्याम् आसीनः सक्तुभिः उपमथ्य सोमं पिबति) वह ही पुरुष आसन्दी [सिंहासन] पर बैठा हुआ सक्तुओं [अन्न] के साथ मथकर सोम पीता है । (अहं वाव सर्वतः यज्ञं वेद, यः एतान् वेद, न माम् एषः हिंसिष्यति इति) मैं निश्चय करके सब प्रकार यज्ञ [देवपूजा, संगतिकरण और दान] को जानता हूं, जो मैं इन [व्यवहारों] को जानता हूं उस मुझको यह [सोम] नहीं मारेगा [यह यजमान कहता है] । (अनपेयः सोमपीथः एनं न हिनस्ति यः एवं विद्वान् सोमं पिबति) सब प्रकार पीने योग्य सोमरस पान उसको नहीं मारता है, जो ऐसा विद्वान् सोमरस पीता है ॥

१०—(रथः) रथचक्रः (अरम्) ऋ गतौ—अच् । चक्रस्य नाभिनेम्योर्मध्यस्थं काष्ठम् (तन्वम्) देहम् । अङ्गम् (प्रचरितोः) भावलक्षणे स्थेण्कृञ्वदिचरि० (पा० ३ । ४ । १६) प्र+चर गतौ—तोसुन् । प्रचरितुम् । प्रचरणाय (आग्नीध्रीये) गो० पू० १ । २३ । स्वार्थे—छः । होतुर्गृहे (वासिष्ठः) वसिष्ठगोत्रोत्पन्नः (सात्यहव्यः) सत्यं हव्यं ग्राह्यं यस्य स सत्यहव्यः । सत्यहव्यस्य पुत्रः । मुनिविशेषः (अस्कन्नः) अ+स्कन्दिर् गतिशोषणयोः—क्तः । ततो नञ्समासः । अशुष्कः । सुपुष्टः (सूर्क्षत) सूर्क्ष आदरानादरयोः—लोट् । अनादरं कुरुत (स्कन्दति) शुष्यते (आसन्द्याम्) आसम् आसनं ददातीति आसन्दी, आसु उपवेशने—क्विप्+दधातेः—डः, ङीप् । सिंहासने (सोमपीथः) निशीथगोपीथावगथाः (उ० २ । ९) पा पाने रक्षणे वा—थक् । सोमरसपाने (अनपेयः) नास्ति अपेयः । सर्वतः पानयोग्यः (यज्ञार्तान्) यज्ञपीडितान् (प्रतिजुहुयात्) प्रत्यक्षेण

(तं ह स्म यत् आहुः, कस्मात् त्वम् इदम् आसन्द्याम् आसीनः सक्तुभिः उपमथ्य सोमं पिबसि इति) उससे जो कहते हैं—किसलिये तू अब सिंहासन पर बैठा हुआ सत्तुओं के साथ मथकर सोमरस पीता है । (देवतासु एव यज्ञं प्रतिष्ठापयामि इति ब्राह्मणः अब्रवीत्) देवताओं में ही यज्ञ को स्थापित करता हूं—यह ब्राह्मण [ब्रह्मा] कहता है । (यस्य यस्य एवं विदुषः यज्ञे एवं विद्वान् यज्ञार्तान् प्रायश्चित्तं जुहोति, देवतासु एव यज्ञं प्रतिष्ठापयति) जिस जिस ऐसे विद्वान् के यज्ञ में ऐसा विद्वान् [ब्रह्मा] यज्ञ में पीड़ित पुरुषों के लिये प्रायश्चित्त हवन करता है, वह देवताओं में ही यज्ञ को स्थापित करता है । (यज्ञार्तिं सयोनित्वाय प्रतिजुहुयात्) यज्ञार्ति [यज्ञ पीड़ा वा प्रायश्चित्त] को समान घर प्राप्ति के लिये मनुष्य करता रहे । (त्रयस्त्रिंशत् वै यज्ञस्य तन्वः इति, एकान्नत्रिंशत् स्तोमभागाः, त्रीणि सवनानि, यज्ञः चतुर्थः) तैंतीस [८ वसु, ११ रुद्र, १२ आदित्य, १ वाणी, १ स्वर—गो० ब्रा० उ० २ । १३ यह ३३ देवता] ही यज्ञ के अङ्ग हैं—उनतीस स्तोम भाग [?], तीन [प्रातःसवन माध्यन्दिन सवन तृतीय सवन—गो० पू० ४ । ७] सवन हैं, और यज्ञ चौथा है । (स्तोमभागैः एव एतत् स्तोमभागान् प्रतिप्रयुङ्क्ते, सवनैः सवनानि, यज्ञेन यज्ञम्) यह [ब्रह्मा] स्तोमभागों के साथ स्तोमभागों को प्रयोग में लाता है, सवनों के साथ सवनों को, यज्ञ के साथ यज्ञ को । (सर्वाः ह वै अस्य यज्ञस्य तन्वः प्रयुक्ताः भवन्ति, सर्वाः आप्ताः सर्वाः अवरुद्धाः देवस्य सवितुः प्रसवे बृहस्पतये स्तुत इति) सब ही इसके यज्ञ के अङ्ग प्रयोग में लाये जाते हैं, सब ही प्राप्त किये हुये, सब रक्षा किये हुये—[देवस्य सवितुः प्रसवे] सबके प्रकाशक और उत्पादक परमेश्वर के उत्पन्न किये संसार में [देखो यजु० १ । १०] और [बृहस्पतये स्तुत] सब विद्याओं के स्वामी परमात्मा के लिये स्तुति करो, [इन दो को वह पढ़ता है] । (यत् यत् वै सविता देवेभ्यः प्रासुवत् तेन आर्ध्नुवन् सवितृप्रसूताः एव स्तुवन्ति ऋध्नुवन्ति) जो जो ही सविता [सर्वजनक परमात्मा] ने विद्वानों के लिये प्रेरणा की है, उससे वे बढ़े हैं, परमात्मा से प्रेरणा किये हुये ही वे स्तुति करते हैं और बढ़ते हैं । (अस्य वै स्तोमाः ऋध्यन्ते, यज्ञः ऋध्यते, यजमानः ऋध्यते, प्रजायै ऋध्यते, पशुभ्यः ऋध्यते, ब्रह्मणे, यस्य एवं विद्वान् ब्रह्मा भवति) उस पुरुष के स्तोम [स्तुति योग्य व्यवहार] बढ़ते हैं, यज्ञ बढ़ता है [श्रीमान् होता है], यजमान बढ़ता है, प्रजा के लिये बढ़ता है, पशुओं के लिये बढ़ता है, और अन्न वा धन के लिये [बढ़ता है] जिसका ऐसा विद्वान् [जानकार] ब्रह्मा होता है ॥ १० ॥

जुहुयात् (सयोनित्वाय) समानगृहत्वाय (त्रयस्त्रिंशत्) वसुरुद्रादित्यवाक्-स्वरास्त्रयस्त्रिंशद् देवाः—गो० ब्रा० उ० २ । १३ (एकान्नत्रिंशत्) एकादिश्चैकस्य-चादुक् (पा० ६ । ३ । ७६) एक+न+त्रिंशत्, एकस्य अदुगागमः, दस्य नः । एकोनत्रिंशत् (आप्ताः) प्राप्ताः (अवरुद्धाः) रक्षिताः (ऋध्नुवन्ति) प्रवृद्धाः भवन्ति (ऋध्यन्ते) वर्धन्ते (ब्रह्मणे) ब्रह्म, अन्ननाम—निघ० २ । ७ । धननाम—निघ० २ । १० । अन्नाय । धनाय ॥

भावार्थः—यजमान ब्रह्मा की सम्मति से यज्ञ के सब अङ्गों को यथाविधि पूरा करके संसार में समृद्ध होवे ॥ १० ॥

विशेषः—सङ्केतित मन्त्र अर्थ सहित लिखा जाता है—

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि—यजु० १ । १० [हे यज्ञ] (देवस्य) सब जगत् के प्रकाशक, (सवितुः) सब जगत् के उत्पादक परमेश्वर के (प्रसवे) उत्पन्न किये हुये संसार में (अश्विनोः) सूर्य और चन्द्रमा के (बाहुभ्याम्) बल और वीर्य से तथा (पूष्णः) पुष्टि करने वाले प्राण के (हस्ताभ्याम्) ग्रहण और त्याग से (अग्नये) अग्नि विद्या की सिद्धि के लिये (जुष्टम्) सेवा किये गये (त्वा) तुझको (गृह्णामि) स्वीकार करता हूं । (अग्नीषोमाभ्याम्) अग्नि और जल की विद्या करके (जुष्टम्) सेवा किये [तुझ] को (गृह्णामि) स्वीकार करता हूं ॥

कण्डिका ११ ॥

देवाश्च ह वा असुराश्चास्पर्द्धन्त, ते देवाः समावदेवा यज्ञे कुर्वाणा आसन्, यदेव देवा अकुर्वत, तदसुरा अकुर्वत, ते न व्यावृत्तमगच्छन् । ते देवा अब्रुवन्, नयतेमं यज्ञं तिर उपर्य्यसुरेभ्यस्तमस्यामहै इति । तमेताभिराच्छाद्योदक्रा[1]मन्, यजूंषि यज्ञे समिधः स्वाहेति । तन्तिर उपर्य्यसुरेभ्यो यज्ञमतन्वत, तमेषां यज्ञमसुराणाम् न्ववायन्, ततो न देवा अभवन्, परासुराः । स य एवं विद्वांस्तिर उपर्य्यसुरेभ्यो यज्ञं तनुते, भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति । एतैरेव जुहुयात्स वृतयज्ञे चतुर्भिश्चतुर्भिरन्वाख्यायं[2] पुरस्तात् प्रातरनुवाकस्य जुहुयात्, एतावान् वै यज्ञः यावानेष यज्ञस्तं वृङ्क्ते, स यज्ञो भवति, अयज्ञ इतरः । एतैरेव जुहुयात्, पुरस्ताद् द्वादशाहस्य । एष ह वै प्रत्यक्षं द्वादशाहः, तमेव आलभ्य एतैरेव जुहुयात्, पुरस्ताद् दीक्षायाः । एषा ह वै प्रत्यक्षं दीक्षा, तामेवालभ्यैतैरेवातिथ्यमभिमृशेत्, यज्ञेन यज्ञमयजन्त देवा इति ॥ ११ ॥

कण्डिका ११ ॥ देवताओं ने यज्ञ द्वारा असुरों पर विजय पाया ॥

(देवाः च ह वै असुराः च अस्पर्धन्त) देवता [विद्वान् लोग] और असुर [अविद्वान्] लड़ने लगे । (ते समौ अदेवाः देवाः यज्ञे कुर्वाणाः आसन् यत् एव देवाः अकुर्वत, तत् असुराः अकुर्वत, ते न व्यावृतम् अगच्छन्) वे समान विजय चाहने वाले असुर एवं देवता यज्ञ में कर्म करते हुये थे, जो ही [यज्ञ कर्म] देवता करते थे, वह [यज्ञ कर्म] असुर करते थे, उससे वे [असुर] रुकावट को प्राप्त न हुये । (ते देवाः अब्रुवन्, इमं यज्ञं तिरः नयत असुरेभ्यः, उपरि तम् अस्यामहै इति) वे देवता [आपस में] बोले—इस

---

१ —(देवाः) विद्वांसः (असुराः) अविद्वांसः (व्यावृतम्) निवारणम् (तिरः) तिरोधाय । आच्छाद्य (उपरि) उपरि सन्तः (अस्यामहै) असु क्षेपणे—

---

१. पू. सं. 'उदक्रामन्ति' इति पाठः ॥ २. पू. सं. "अन्वाख्यानं" इति पाठः ॥ सम्पा० ॥

यज्ञ को असुरों से छिपाकर चलाओ, हम उनके ऊपर होकर [उनको] गिरावें। (तम् आच्छाद्य एताभिः उदक्रामन्, यजूंषि यज्ञे समिधः स्वाहा इति) उस [यज्ञ] को छिपाकर इन [ऋचाओं] से उन्होंने चढ़ाई की—(यजूंषि) पूजनीय कर्मों और (समिधः) विद्या आदि प्रकाश क्रियाओं को (यज्ञे) संगति व्यवहार में (स्वाहा) उत्तम वाणी से......[अथर्व० ५। २६ के १२ मन्त्रों की यह प्रतीक है]। (तं यज्ञं तिरः असुरेभ्यः उपरि अतन्वत, एषाम् असुराणां तं यज्ञं नु अवायन् ततः देवाः न परा अभवन्, असुराः) उस [अपने] यज्ञ को छिपाकर असुरों से ऊपर होकर उन्होंने विस्तृत किया, और इन असुरों के उस यज्ञ को निःसन्देह सुखा दिया, उससे देवता न हारे और असुर [हार गये]। (सः यः एवं विद्वान् असुरेभ्यः उपरि यज्ञं तिरः तनुते, अस्य अप्रियः भ्रातृव्यः आत्मना पराभवति भवति) जो कोई ऐसा विद्वान् असुरों से ऊपर होकर यज्ञ को छिपाकर [गुप्त रीति से विचार कर] विस्तृत करता है, उसका कुप्रिय वैरी आत्मबल से हार जाता है, हार जाता है। (सः एतैः एव जुहुयात् वृतयज्ञे चतुर्भिः चतुर्भिः अन्वाख्याय प्रातरनुवाकस्य पुरस्तात् जुहुयात्) वह इन [बारह मन्त्रों] से ही यज्ञ करे और स्वीकार किये हुये यज्ञ में चार चार [मन्त्रों] से व्याख्यान करके प्रातरनुवाक यज्ञ के पहिले यज्ञ करे। (एतावान् वै यज्ञः, यावान् एषः यज्ञः तं वृङ्क्ते सः यज्ञः भवति इतरः अयज्ञः) इतना ही यज्ञ है जितना यह यज्ञ उस [शत्रु] को रोकता है, वह यज्ञ होता है और दूसरा [असुरों का] कुयज्ञ। (एतैः एव द्वादशाहस्य पुरस्तात् जुहुयात्) इन ही [बारह] से द्वादशाह [बारह दिन वाले यज्ञ] के पहिले यज्ञ करे। (एषः ह वै प्रत्यक्षं द्वादशाहः तम् एव आलभ्य एतैः एव दीक्षायाः पुरस्तात् जुहुयात्) यह ही प्रत्यक्ष द्वादशाह [बारह दिन वाला यज्ञ] है, उसको ही प्राप्त होकर इन [बारह मन्त्रों] से ही दीक्षा [नियम व्रत धारण] के पहिले यज्ञ करे। (एषा ह वै प्रत्यक्षं दीक्षा, ताम् एव आलभ्य एतैः एव आतिथ्यम् अभिमृशेत्, यज्ञेन यज्ञम् अयजन्त देवाः इति) यह ही प्रत्यक्ष दीक्षा है, उस [दीक्षा] को ही प्राप्त होकर इन [आगे के पांच मन्त्रों] से आतिथ्य [अतिथि सत्कार] को विचारे—(देवाः) विद्वानों ने (यज्ञेन) अपने पूजनीय कर्म से (यज्ञम्) पूजनीय परमात्मा को (अयजन्त) पूजा है......[अथर्व० ७। ५ के पांच मन्त्रों की यह प्रतीक है]॥ ११॥

भावार्थः—जो नीतिकुशल मनुष्य अपने कर्त्तव्यों को शत्रुओं से गुप्त रखकर करते रहते हैं, वे युद्ध में जीत पाते हैं॥ ११॥

विशेषः—प्रतीक वाले मन्त्रों में से एक एक मन्त्र अर्थ सहित दिया जाता है, शेष वेद में देखो।

लेट्। अस्याम, क्षिपाम (एताभिः) वक्ष्यमाणाभिः ऋग्भिः (नु) अवधारणे (अवायन्) ओवै शोषणे—लङ्। शोषितवन्तः। नाशितवन्तः (अन्वाख्याय) आख्यानं व्याख्यानमनुसृत्य (वृङ्क्ते) वृजी वर्जने। वर्जयति (आलभ्य) प्राप्य। (आतिथ्यम्) अतिथिसत्कारम् (अभिमृशेत्) विचारयेत्॥

१—यजूंषि यज्ञे समिधः स्वाहाग्निः प्रविद्वानिह वो युनक्तु ॥ अथ० ५ । २६ । १ । (प्रविद्वान्) बड़ा विद्वान् (अग्निः) तेजस्वी पुरुष (इह) यहां (यज्ञे) संगति में (यजूंषि) पूजनीय कर्मों और (समिधः) विद्यादि प्रकाश क्रियाओं को (वः) तुम्हारे लिये (स्वाहा) उत्तम वाणी से (युनक्तु) उपयुक्त करे ॥

२—यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ अथ० ७ । ५ । १ । यह मन्त्र ऋग्वेद में है—१ । १६४ । ५०, १० । ९० । १६, यजु० ३१ । १६, ऋग्वेदादि भाष्य-भूमिका पृष्ठ १२९ और निरुक्त १२ । ४१ में भी है । (देवाः) विद्वानों ने (यज्ञेन) अपने पूजनीय कर्म से (यज्ञम्) पूजनीय परमात्मा को (अयजन्त) पूजा है, (तानि) वे [उनके] (धर्म्माणि) धारण योग्य ब्रह्मचर्य आदि धर्म (प्रथमानि) मुख्य, प्रथम कर्तव्य (आसन्) थे । (ते) उन (महिमानः) महापुरुषों ने (ह) ही (नाकम्) दुःख रहित परमेश्वर को (सचन्त) पाया है, (यत्र) जिस परमेश्वर में रहकर (पूर्वे) पहिले बड़े बड़े (साध्याः) साधनीय श्रेष्ठ कर्मों के साधने वाले लोग (देवाः) देवता अर्थात् विजयी (सन्ति) होते हैं ॥

कण्डिका १२ ॥

यत्र विजानाति, ब्रह्मन्त्सोमोऽस्कन्न[1]इति । तमेतयालभ्याभिमन्त्रयते, अभूद्देवः सविता वन्द्योऽनूनः इदानीमह्न उपवाच्यो नृभिः, वि यो रत्ना भजति मानवेभ्यः श्रेष्ठन्नो अत्र द्रविणं यथा दधदिति । ये अग्नयो अप्स्वन्तरिति सप्तभिरभिजुहोति । यदेवास्यावस्कन्नं भवति, तदेवास्यैतदग्नौ स्वगाकरोति । अग्निर्हि सुकृतीनां हविषां प्रतिष्ठा । अथ विसृप्य वैप्रुषान् होमान् जुह्वति, द्रप्सश्चस्कन्देति । या एवास्याभिषूयमाणस्य विप्रुषः स्कन्दन्ति, अंशुर्वा ता एवास्यैतदाहवनीये स्वगाकरोति । आहवनीयो ह्याहुतीनां प्रतिष्ठा । यस्ते द्रप्स स्कन्दतीति, स्तोको वै द्रप्सः । यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थादिति, बाहुभिरभिच्युतोऽशुंरधिषवणाभ्यामधिस्कन्दति[2] । अध्वर्य्योर्वा परि[3]यः पवित्रात्तन्ते जुहोमि मनसा वषट्कृतमिति, तद्यथा, वषट्कृतं स्वाहाकृतं हुतमेवं भवति ॥ १२ ॥

कण्डिका १२ ॥ सोम यज्ञ का वर्णन ॥

(यत्र विजानाति, ब्रह्मन् सोमः अस्कन्नः इति) जहां [यज्ञ में] वह [यजमान] जान लेवे [वह कहे]—हे ब्रह्मन् [ब्रह्मा] सोम [अमृतरस] न गिर जावे । (तम् एतया आलभ्य अभिमन्त्रयते) उस [सोम] को इस [पूर्वोक्त ब्राह्मण

१२—(ब्रह्मन्) हे चतुर्वेदवित् (अस्कन्नः) अनधःपतितो भवेत् ।

---

१. " पू. सं. अस्कन् इति पाठः ॥ २. पू. सं. "स्कन्दन्ति" इति पाठः ॥
३. पू. सं. "पर्यः" इत्यासीत् । अस्माभिः मन्त्रस्य प्रतीकानुसारी पाठः "परि यः" इति संशोधितः ॥ सम्पा० ॥

ऋचा] से प्राप्त करके मन्त्र कहे, (देवः सविता वन्द्यः अभूत्, अनूनः इदानीं नृभिः अह्नः उपवाच्यः) प्रकाशमान लोकप्रेरक सूर्य [के समान परमात्मा] वन्दना योग्य है, वह न्यूनता रहित [सूर्य] अब मनुष्यों करके दिन का नाम है [इस ब्राह्मण मन्त्र से], (यः रत्ना मानवेभ्यः यथा विभजति, श्रेष्ठं द्रविणं नः अत्र दधत् इति) जो [परमात्मा] रत्नों को मनुष्यों के लिये जैसे बांटता है, [वैसे ही] हमारे लिये यहां श्रेष्ठ धन देवे यह ब्राह्मण मन्त्र बोले । (ये अग्नयः अप्सु अन्तः इति सप्तभिः अभिजुहोति) जो अग्नियां [ईश्वर के तेज] जल के भीतर हैं [अथ० ३ । २१ । १—७]—इन सात [मन्त्रों] से वह यज्ञ करे । (यत् एव अस्य अवस्कन्नं भवति तत् एतत् एव अस्य अग्नौ स्वगाकरोति) जो ही इस [सोम रस] का अङ्ग जाना गया होता है, वह यह ही इसका [अङ्ग] अग्नि में गमन करता है । (हि अग्निः सुकृतीनां हविषां प्रतिष्ठा) क्योंकि अग्नि पुण्य कर्मों की और ग्रहण करने योग्य व्यवहारों की प्रतिष्ठा [ठहरने का ठिकाना] है । (अथ विसृप्य वैप्रुषान् होमान् जुह्वति, द्रप्सः चस्कन्द इति) फिर सरककर विविध पूर्तियुक्त ग्राह्यव्यवहारों को वे [यज्ञ करने वाले] ग्रहण करते हैं—हर्षकारी परमात्मा व्यापक है [अथर्व० १८ । ४ । २८ । यह मन्त्र पढ़कर], (याः एव अस्य अभिषूयमाणस्य विप्रुषः स्कन्दन्ति, अंशुः वा, ताः एव अस्य एतत् आहवनीये स्वगाकरोति) जो ही इस निचोड़े जाते हुए [सोम] की विविध पूर्ति क्रियायें अथवा अंश व्यापक हैं, वे ही इसके अब आहवनीय [अग्नि] में गमन करते हैं, (हि आहवनीयः आहुतीनां प्रतिष्ठा) क्योंकि आहवनीय [अग्नि] आहुतियों [देने लेने की क्रियाओं] की प्रतिष्ठा [ठहरने का स्थान] है । (यः ते द्रप्सः स्कन्दति इति, स्तोकः वै द्रप्सः) जो तेरा हर्षकारी व्यवहार व्यापक है [यजु० ७ । २६—यह मन्त्र पढ़ता है]—प्रसन्न करने वाला सूक्ष्म विषय ही हर्ष व्यवहार है । (यः ते अंशुः बाहुच्युतः धिषणायाः उपस्थात्

(देवः) प्रकाशमानः (सविता) लोकप्रेरकः सूर्य इव परमात्मा (अनूनः) न्यूनतारहितः । परिपूर्णः (उपवाच्यः) प्रतिपाद्यः (वि भजति) विभज्य ददाति (द्रविणम्) धनम् (अग्नयः) ईश्वरतेजांसि (अप्सु) जलेषु (अवस्कन्नम्) अवगतम् । ज्ञातम् (स्वगाकरोति) स्वग, स्वगि सर्पणे—अच् । सुखप्रियादानुलोम्ये (पा० ५ । ४ । ६३) स्वगशब्दात् कृञो योगे—डाच् बाहुलकात् आनुलोम्ये । स्वगं सर्पणं व्यापनं करोति (सुकृतीनाम्) पुण्यकर्मणाम् (हविषाम्) ग्राह्यव्यवहाराणाम् (प्रतिष्ठा) स्थितिस्थानम् (वैप्रुषान्) विप्रुष्—अण् । विविधपूर्तियुक्तान् (होमान्) ग्राह्यव्यवहारान् (जुह्वति) गृह्णन्ति (द्रप्सः) वृतृवदिवचि० (उ० ३ । ६२) दृप हर्षमोहनयोः—सप्रत्ययः । हर्षकारी परमात्मा (चस्कन्द) स्कन्दिर् गतिशोषणयोः—लिट् । स्कन्दति । गच्छति । व्याप्नोति (विप्रुषः) वि+प्रुष स्नेहनसेचनपूरणेषु—क्विप् । विविधपूर्तयः (स्कन्दन्ति) व्याप्नुवन्ति (अंशुः) विभागः (स्वगाकरोति) स्वगाकुर्वन्ति । व्यापनं कुर्वन्ति (आहुतीनाम्) दानादानक्रियाणाम् (स्तोकः) ष्टुच प्रसादे दीप्तौ च—घञ् । प्रसन्नकरः । दीप्यमानः । सूक्ष्मविषयः (धिषणायाः) धृषेर्धिष च संज्ञायाम्

इति, बाहुभिः अभिच्युतः अंशुः अधिषवणाभ्याम् अधिस्कन्दति) जो तेरा अंश [हमारे] भुजाओं पर गिरा हुआ प्रकाश वा भूमि की गोद से व्यापक है [उसी मन्त्र का भाग भेद से]--बाहुओं द्वारा प्राप्त हुआ अंश दोनों [अमृत के] निचोड़ स्थानों [प्रकाश और भूमि] से ऊपर व्यापक होता है। (अध्वर्योः वा पवित्रात् परि यः ते मनसा वषट्कृतं तं जुहोमि इति) और जो यज्ञ करने वाले के शुद्ध व्यवहार से चारों ओर तेरी प्राप्ति के लिये मनन के साथ प्राप्त किये हुये उसको मैं ग्रहण करता हूँ--[यह बोलता है]। (तद् यथा वषट्कृतम्, एवं स्वाहाकृतं हुतं भवति) सो जैसे वषट्कृत [प्राप्त किया हुआ कर्म] होता है, उसी प्रकार स्वाहाकृत [सत्यवाणी से किया हुआ] यज्ञ होता है ॥ १२ ॥

भावार्थः जैसे ऋत्विज् लोग सोम यज्ञ को विधानपूर्वक करते हैं, वैसे ही सब मनुष्य अपने कर्तव्य को विचारपूर्वक करें ॥ १२ ॥

विशेषः—प्रतीक वाले मन्त्रों में से एक एक अर्थ सहित लिखे जाते हैं; शेष मन्त्र वेद में देखें--

१--ये अग्नयो अप्स्वन्तर्ये वृत्रे ये पुरुषे ये अश्मसु। य आविवेशोषधीर्यो वनस्पतींस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्। अथ० ३ । २१ । १ । (ये) जो (अग्नयः) अग्नियें [ईश्वर के तेज] (अप्सु अन्तः) जल के भीतर (ये) जो (वृत्रे) मेघ में (ये) जो (पुरुषे) पुरुष [मनुष्य शरीर] में और (ये) जो (अश्मसु) शिलाओं में हैं। (यः) जिस [अग्नि] ने (ओषधीः) औषधियों [अन्न सोमलता आदि] में और (यः) जिसने (वनस्पतीन्) वनस्पतियों [वृक्ष आदि] में (आविवेश) प्रवेश किया है, (तेभ्यः) उन (अग्निभ्यः) अग्नियों [ईश्वर तेजों] को (एतत्) यह (हुतम्) दान [आत्मसमर्पण] (अस्तु) होवे ॥

(तत् आहुः, यत् द्वयोः देवतयोः इन्द्राग्न्योः स्तुवते इति, अथ कस्मात् भूयिष्ठः देवताः उक्थे शस्यन्ते इति) फिर लोग कहते हैं--जब दो देवताओं इन्द्र और अग्नि [मन और वाणी, क० ११] की स्तुति करते हैं, फिर किस लिये बहुत से देवता उक्थ [स्तोत्र] में स्तुति किये जाते हैं। (अन्तः वै आग्निमारुतम्, अन्तः उक्थानि, अन्तः आश्विनम्, अन्तेषु कनीयसीषु देवतासु स्तुवते इति) अन्त ही अग्नि और मरुत् देवता वाला स्तोत्र है, अन्त उक्थ हैं, अन्त दोनों अश्वियों का स्तोत्र है, अन्तों [स्तोत्रों के अन्तों] में छोटे-छोटे देवताओं की स्तुति करते हैं। (अथ कस्मात् भूयिष्ठः देवताः उक्थे शस्यन्ते इति) फिर किस लिये बहुत से देवता उक्थ में स्तुति किये जाते हैं। [शंका समाधान] (द्वे द्वे उक्थमुखे भवतः, तत् यत् द्वे, द्वे) दो दो उक्थमुख [उक्थ के आरम्भ के स्तोत्र] होते हैं, इस लिये जो दो हैं, [वे] दो [देवता] हैं ॥ १३ ॥

भावार्थः--कण्डिका ११ का विशेष वर्णन है ॥ १३ ॥

विशेषः--मिलाओ कण्डिका ११ से ॥

कण्डिका १४ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवति। ऐन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति। ऐन्द्रावैष्णवमच्छावाकस्योक्थं भवति। द्वे संशस्यंस्त ऐन्द्रं च वारुणञ्चैकमैन्द्रावारुणं भवति। द्वे संशस्यंस्त ऐन्द्रं च बार्हस्पत्यञ्चैकमैन्द्राबार्हस्पत्यं भवति। द्वे संशस्यंस्त ऐन्द्रं च वैष्णवञ्चैकमैन्द्रावैष्णवं भवति। द्वे द्वे उक्थमुखे भवतः, तद्यद् द्वे द्वे ॥ १४ ॥

कण्डिका १४ ॥ तीन ऋत्विजों के अलग अलग उक्थ और दो दो देवता वाले उक्थ हैं ॥

(अथ यत् मैत्रावरुणस्य ऐन्द्रावारुणम् उक्थं भवति) फिर जो मैत्रावरुण [ऋत्विज्] का इन्द्र और वरुण [मन और प्राण—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उस का वर्णन]। (ब्राह्मणाच्छंसिनः ऐन्द्राबार्हस्पत्यम् उक्थं भवति) ब्राह्मणाच्छंसी [ऋत्विज्] का इन्द्र और बृहस्पति [मन और आँख] देवता वाला उक्थ होता है, (अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) और अच्छावाक [ऋत्विज्] का

१३--(आहुः) कथयन्ति (स्तुवते) स्तुवन्ति। स्तुतिं कुर्वन्ति (भूयिष्ठः) बहु—इष्ठन्। पुंस्त्वमेकवचनत्वं चार्षम्। भूयिष्ठाः। बहुतमाः (आश्विनम्) अश्विनोरिदम् अण् अश्विदेवताकं स्तोत्रम् (कनीयसीषु) युवाल्पयोः कनन्यतरस्याम् (पा० ५। ३। ६४) अल्प--ईयसुन्, ङीप् कन् इत्यादेशः अल्पतरासु ॥

१४—(संशस्यम्) संशस्ये। स्तोतव्ये (स्तः) भवतः ॥

इन्द्र और विष्णु [मन और कान] देवता वाला उक्थ होता है। (द्वे ऐन्द्रं च वारुणं च संशस्यं स्तः, एकम् ऐन्द्रावारुणं भवति) [इस लिये] इन्द्र और वरुण [मन और प्राण] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और वरुण देवता वाला उक्थ होता है, (द्वे ऐन्द्रं च बार्हस्पत्यं च संशस्यं स्तः, एकम् ऐन्द्राबार्हस्पत्यं भवति) दो इन्द्र और बृहस्पति [मन और आंख] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और बृहस्पति [मन और आँख] देवता वाला [उक्थ] होता है, (द्वे ऐन्द्रं च वैष्णवं च संशस्यं स्तः, एकम् ऐन्द्रावैष्णवं भवति) दो इन्द्र और विष्णु [मन और कान] देवता वाले [स्तोत्र] स्तुति योग्य हैं, एक इन्द्र और विष्णु [मन और कान] देवता वाला [उक्थ] होता है। (द्वे द्वे उक्थमुखे भवतः, तत् यत् द्वे द्वे) दो उक्थमुख [उक्थ के आरम्भ के स्तोत्र] होते हैं, इस लिये जो दो हैं, [वे] दो [देवता] हैं ॥१४॥

भावार्थः—कण्डिका ११ का विशेष वर्णन है ॥ १४ ॥

विशेषः—मिलाओ कण्डिका ११ ॥

कण्डिका १५ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवति। इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतावित्यृचाभ्यनूक्तम्। मद्वद्धि तृतीयसवनम्। एह्यू षु ब्रवाणि त आग्निरगामि भारत इति मैत्रावरुणस्य स्तोत्रियानुरूपौ। चर्षणीधृतं मघवान-मुक्थ्यमित्युक्थमुखम्। तस्योपरिष्टाद् ब्राह्मणम्। अस्तभ्नाद् द्यामसुरो विश्ववेदा इति वारुणं सांशंसिकम्। अहञ्चेति वरुणोऽब्रवीद्देवतयोः संशंसायानतिशंसाय। इन्द्रावरुणा युवमध्वराय न इति पर्य्यास ऐन्द्रावारुणे। ऐन्द्रावारुणमस्यैतन्नित्य-मुक्थम्। तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति। द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव। अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै सैकपादिनी भवति। एकपादिन्या होता परिदधाति। यत्र होतुर्होत्रकाणां युञ्जन्ति, तत् समृद्धन्तद्वै खल्वा वां राजानावध्वरे ववृत्यामिति। एवमेव केवलपर्य्यासं कुर्य्यात्। केवलसूक्तं केवलसूक्तमेवोत्तरयोर्भवति। इन्द्रावरुणा मधुमत्तमस्येति यजति। एते एव तद् देवते यथाभागं प्रीणाति, वषट्कृत्यानुवषट्करोति। प्रत्येवाभि-मृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति ॥ १५ ॥

कण्डिका १५ ॥ एकाह यज्ञ के तृतीयसवन के उक्थ में मैत्रावरुण ऋत्विज् के मन्त्र ॥

(अथ यत् मैत्रावरुणस्य ऐन्द्रावारुणम् उक्थं भवति) फिर जो मैत्रावरुण [ऋत्विज्] का इन्द्र और वरुण [मन और प्राण क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्रावरुणा सुतपौ इमं सुतं सोमं पिबतं मद्यं धृतव्रतौ—इति ऋचा अभ्यनूक्तम्) इन्द्रावरुणा सुतपौ··· ·····१—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीयसवन

१५—(मद्वत्) मदी हर्षे क्विप्, मतुप्। हर्षयुक्तम्। मदशब्दयुक्तम् (आ

है। (एहि उ षु ब्रवाणि ते, आग्निरगामि भारतः—इति मैत्रावरुणस्य स्तोत्रियानुरूपौ) एहि उ षु ब्रवाणि ते......२—आ अग्निः अगामि भारतः......३—यह दो मन्त्र मैत्रावरुण के स्तोत्रिय और अनुरूप हैं। (चर्षणीधृत मघवानम् उक्थ्यम्......इति उक्थमुखम्) चर्षणीधृतं मघवानम् उक्थ्यम्......४—यह मन्त्र [मैत्रावरुण का] उक्थमुख है। (तस्य उपरिष्टात् ब्राह्मणम्) उसके उपरान्त ब्राह्मण है। (अस्तभ्नाद् द्याम् असुरः विश्ववेदाः, इति वरुणं सांशंसिकम्) अस्तभ्नाद् द्याम् असुरः विश्ववेदाः......५—यह मन्त्र वरुण देवता वाला सांशंसिक [यथार्थ प्रशंसायुक्त उक्थ] है। (अहं च इति वरुणः अब्रवीत् देवतयोः संशंसाय अनतिशंसाय) और मैं—यह वरुण ने कहा [क० ११], वह दो देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो। (इन्द्रावरुणा युवम् अध्वराय नः...... इति ऐन्द्रावारुणे पर्य्यासः) इन्द्रावरुणा युवम् अध्वराय नः......६—यह मन्त्र इन्द्र और वरुण वाले [उक्थ] में पर्य्यास [अन्त] है। (अस्य ऐन्द्रावारुणम् एतत् नित्यम् उक्थम्) इस [मैत्रावरुण ऋत्विज्] का इन्द्र और वरुण देवता वाला यह नित्य उक्थ है। (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन देवताओं ने दो दो होकर विजय के लिये ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै सा एकपादिनी भवति) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़] की उत्पत्ति के लिए वह [स्तुति वा ऋचा] एक पाद वाली होती है। (एकपादिन्या होता परिदधाति) एक पाद वाली [ऋचा] से होता परिधानीया इष्टि करता है। (यत्र होतुः होत्रकाणां युञ्जन्ति, तत् समृद्धम्) जहां होता के होत्रक लोगों [सहायक ऋत्विजों] का वे योग करते हैं, वह समृद्ध [सफल] होता है। (तत् वै खलु—आ वां राजानौ अध्वरे ववृत्याम् इति) वह ही यह मन्त्र है—आ वां राजानौ अध्वरे ववृत्याम्......७—(एवम् एव केवलपर्यासं कुर्यात्) इस प्रकार से

इहि) आगच्छ (ब्रवाणि) कथयानि (ते) तुभ्यम् (आ) समन्तात् (अग्निः) अग्निरिव तेजस्वी पुरुषः (अगामि) गम्यते (भारतः) भृमृदृशियजि० (उ० ३ । ११०) भृञ् भरणे—अतच् । प्रज्ञादिभ्यश्च (पा० ५ । ४ । ३८) स्वार्थे—अण् । भारताः, ऋत्विजः—निघ० ३ । १८ । भर्ता । पोषकः (चर्षणीधृतम्) मनुष्याणां धर्तारम् (मघवानम्) बहुधनयुक्तम् (उक्थ्यम्) प्रशंसनीयम् (अस्तभ्नात्) स्थापितवान् (द्याम्) सूर्यलोकम् (असुरः) असुरिति प्रज्ञानाम–निरु० १० । ३४ । रो मत्वर्थीयः । प्रज्ञावान् (विश्ववेदाः) वेदो धनम्—निघ० २ । १० । सर्वधनः (सांशंसिकम्) संशंस—ठक् । सम्यक् प्रशंसायुक्तमुक्थम् (संशंसाय) प्रशंसनाय (अनतिशंसाय) अत्युक्तिरहिताय प्रशंसनाय । यथावत् प्रशंसनाय (द्वन्द्वम्) द्वन्द्वं रहस्यमर्यादावचन० (पा० ८ । १ । १५) द्वि द्वि. पूर्वपदस्य इकारस्य अम्, उत्तरस्य इकारस्य अत्वम् । द्वे द्वे (मिथुनम्) मिथृ वधे मेधायां च–उनन् । ज्ञानम् । युगलम् (एकपादिनी) एकपादयुक्ता ऋक् (परिदधाति) परिधानीयां यजति (वाम्)

ही केवलपर्यास [एक देवता के स्तोत्र वाला अन्तिम उक्थ] करे। (केवलसूक्तं केवलसूक्तम् एव उत्तरयोः भवति) केवलसूक्त, केवलसूक्त [एक देवता की स्तुति वाला सूक्त] ही पिछले दो [देवताओं] का होता है। (इन्द्रावरुणा मधुमत्तमस्य······इति यजति) इन्द्रावरुणा मधुमत्तमस्य ······८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति, वषट्कृत्य अनुवषट्करोति) इन ही दो देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति विना यज्ञ [यजमान को] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते हैं। देखो क० ३] ॥ १५ ॥

भावार्थः—योग्य पुरुष योग्य देवता की स्तुति योग्य विचारों से करे ॥ १५ ॥

विशेषः—नीचे शुद्धि पत्र देखो ॥

अशुद्ध	शुद्ध	प्रमाण
एत्यू	एह्यू	वेदमन्त्र
ता अग्नि	त आग्नि	,,
मघवानमुक्थम्	मघवानमुक्थ्यम्	,,
अस्तभ्नाद्याम्	अस्तभ्नाद् द्याम्	,,
नित्युक्थम्	नित्यमुक्थम्	कण्डिका १६, १७
राजानामध्वरे	राजानावध्वरे	वेदमन्त्र
ऽववृत्याम्	ववृत्याम्	,,

विशेषः—२—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं।

१—इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतौ······॥ यह मन्त्र आ चुका है, गो० ब्रा० उ० २ । २२, विशेषः ३ ॥

२—एह्यू षु ब्रवाणि ते······ ॥ आ चुका है—गो० ब्रा० उ० ४ । ११, विशेषः ॥

३—आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः—ऋ० ६ । १६ । १९ ॥ (दिवोदासस्य) प्रकाश के देने वाले का (भारतः) पोषण करने वाला, (वृत्रहा) शत्रुओं को मारने वाला, (पुरुचेतनः) बहुत चेतना वाला, (सत्पतिः) सत्पुरुषों का पालने वाला (अग्निः) अग्नि [के समान तेजस्वी पुरुष] (आ अगामि) सब ओर से प्राप्त किया जाता है ॥

४—चर्षणीधृतं मघवानमुक्थ्य १ मिन्द्रं गिरो बृहतीरभ्यनूषत । वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे—ऋ० ३ । ५१ । १, सा० पू० ४ । ९ । ५ ॥ (बृहतीः) बड़े विषय वाली (गिरः) [विद्वानों की] वाणियाँ (चर्षणीधृतम्) मनुष्यों के धारण

युवाम् (राजानौ) ऐश्वर्यवन्तौ (अध्वरे) हिंसारहितयागे (आ ववृत्याम्) आवर्तयामि । आह्वयामि ॥

करने वाले, (मघवानम्) बहुत धन वाले, (उक्थ्यम्) प्रशंसा योग्य, (वावृधानम्) बढ़ते हुये, (पुरुहूतम्) बहुत पुकारे गये (अमर्त्यम्) अमर, (सुवृक्तिभिः) सुन्दर ग्रहण योग्य क्रियाओं से (जरमाणम्) स्तुति किये जाते हुये (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य्य वाले राजा] की (दिवेदिवे) दिन दिन (अभि) सब ओर से (अनूषत) बड़ाई करें ॥

५--अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः । आसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि--ऋ० ८ । ४२ । १ ॥ (असुरः) बुद्धिमान्, (विश्ववेदाः) सम्पूर्ण धन वाले परमात्मा ने (द्याम्) सूर्य लोक को (अस्तभ्नात्) थांभा है, और (पृथिव्याः) पृथिवी की (वरिमाणम्) चौड़ाई को (अमिमीत) नापा है । (सम्राट्) सम्राट् [वह राजराजेश्वर परमात्मा] (विश्वा) सब (भुवनानि) भुवनों में (आ असीदत्) आकर बैठा है, (तानि इत्) वे ही (विश्वा) सब (वरुणस्य) वरुण [स्वीकार करने योग्य परमेश्वर] के (व्रतानि) कर्म हैं ॥

६--इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः--ऋ० ७ । ८२ । १ ॥ (इन्द्रावरुणा) हे इन्द्र और वरुण ! [बड़े ऐश्वर्य वाले राजा और स्वीकार करने योग्य मन्त्री] (युवम्) तुम दोनों (अध्वराय) हिंसा रहित यज्ञ के लिये (नः) हमारी (विशे) प्रजा को और (जनाय) कुटुम्बियों को (महि) बड़ा (शर्म) स्थान (यच्छतम्) दो (यः) जो [शत्रु] (दीर्घप्रयज्युम्) बड़े यज्ञ करने वाले पुरुष को (अति) उल्लंघन करके (वनुष्यति) मारे, [उसको और] (दूढ्यः) दुर्बुद्धियों को (पृतनासु) संग्रामों में (वयं जयेम) हम जीतें ॥

७--आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः । प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति--ऋ० ७ । ८४ । १ ॥ (राजानौ) हे राजाओ (इन्द्रावरुणा) इन्द्र और वरुण ! [बड़े ऐश्वर्य वाले राजा और स्वीकार करने योग्य मन्त्री] (वाम् तुम दोनों को (अध्वरे) हिंसारहित यज्ञ में (हव्येभिः) देने और लेने योग्य पदार्थों और (नमोभिः) सत्कारों से (आ ववृत्याम्) मैं लौटाऊँ । (बाह्वोः) [हमारी] दोनों भुजाओं में (दधाना) रक्खी हुई (घृताची) घृत पहुँचाने वाली [चमची] (त्मना) अपने आप (विषुरूपा) नानाविध स्वभाव वाले (वाम्) तुम दोनों को (परि) सब ओर से (प्र जिगाति) पहुँच जाती है ।

८--इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् । इदं वामन्धः परिषिक्तमासद्यास्मिन् बर्हिषि मादयेथाम्--अथर्व० ७ । ५८ । २, ऋ० ६ । ६८ । ११ ॥ (वृषणा) हे बलिष्ठ ! (इन्द्रावरुणा) बिजुली और वायु [के समान राजा और प्रजाजनो] तुम (मधुमत्तमस्य) अत्यन्त ज्ञानयुक्त, (वृष्णः) बल करने वाले (सोमस्य) ऐश्वर्य की (आ वृषेथाम्) भले प्रकार वर्षा करो । (वाम्) तुम दोनों का (इदम्) यह (परिषिक्तम्) सब प्रकार सींचा हुआ (अन्धः) अन्न है, (अस्मिन्) इस (बर्हिषि) वृद्धि कर्म में (आसद्य) बैठ कर (मादयेथाम्) आनन्दित करो ॥

कण्डिका १६ ॥

अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू इत्यृचाभ्यनूक्तं मद्वद्धि तृतीयसवनम् । वयमु त्वामपूर्व्य यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन स्तोत्रियानुरूपौ । प्र मंहिष्ठाय बृहते बृहद्रय इत्युक्थमुखम् । ऐन्द्रं जागतं, जागताः पशवः, पशूनामाप्त्यं । जागतमु वै तृतीयसवनं तृतीयसवनस्य रूपम् । उदप्रुतो न वयो रक्षमाणा इति बार्हस्पत्यं सांशसिकम् । अहञ्चेति बृहस्पतिरब्रवीत्, देवतयोः संशंसायानतिशंसाय । अच्छाम इन्द्रं मतयः स्वर्विद इति पर्यास ऐन्द्राबार्हस्पत्ये । ऐन्द्राबार्हस्पत्यमस्यैतन्नित्य-मुक्थम् । तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति । द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव, अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै । बृहस्प-तिर्नः परि पातु पश्चादित्यैन्द्राबार्हस्पत्या परिदधाति । इन्द्राबृहस्पत्योरेव यज्ञं प्रतिष्ठापयति, उतोत्तरस्मादधरादघायोरिन्द्रः पुरस्तादुत मध्यतो नः सखा सखि-भ्यो वरिवः कृणोत्विति । सर्वाभ्य एव दिग्भ्य आशिषमाशास्ते, नार्त्वीयं कामं कामयते । सोऽस्मै कामः समृध्यते, य एवं वेद, यश्चैवं विद्वान् ब्राह्मणाच्छंस्येतया परिदधाति । बृहस्पते युवमिन्द्रश्च वस्व इति यजति । एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट् करोति प्रत्येवाभिमृशन्ते नाप्याययन्ति न ह्यनाराशं-साः सीदन्ति ॥ १६ ॥

कण्डिका १६ ॥ एकाह यज्ञ के तृतीय सवन के उक्थ में ब्राह्मणाच्छंसी ऋत्विज् के मन्त्र ॥

(अथ यत् ब्राह्मणाच्छंसिनः ऐन्द्राबार्हस्पत्यम् उक्थं भवति) फिर जो ब्राह्मणाच्छंसी [ऋत्विज्] का इन्द्र और बृहस्पति [मन और आँख—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्रश्च सोमं पिबतं बृहस्पते अस्मिन् यज्ञे मन्दसाना वृषण्वसू ···इति ऋचा अभ्यनूक्तम्) इन्द्रः च सोमं पिबतं··· १—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है। (वयमु त्वामपूर्व्य, यो नः इदमिदं पुरा—इति ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपौ) वयम् उ त्वाम् अपूर्व्य······२, और, यः न इदमिदं पुरा······३—यह दो मन्त्र ब्राह्मणाच्छंसी के स्तोत्रिय और अनुरूप हैं। (प्र मंहिष्ठाय बृहते बृहद्रये······इति उक्थमुखम्) प्र मंहिष्ठाय बृहते बृहद्रये······

१६—(बृहस्पते) हे बृहत्या वेदवाण्या रक्षक विद्वन् (मन्दसाना) मदि आमोदस्तु-तिदीप्त्यादिषु—असानच् । आमोदयितारौ (वृषण्वसू) यौ वृष्णो बलवतो वीरान् वासयतस्तौ (अपूर्व्य) स्वार्थे-यत् नास्ति पूर्वः श्रेष्ठो यस्मात् स अपूर्वः, अपूर्व्यः । हे अनुपम (इदमिदम्) बहुनिर्दिष्टम् (पुरा) अग्रे (मंहिष्ठाय) मंहतेर्दानकर्मा—निघ० ३ । २० । महि वृद्धौ दाने च—तृच्, मंहितृ—इष्ठन्, तृलोपः । दातृतमाय (बृहते) गुणैर्महते (बृहद्रये) रै शब्दस्य ऐकारस्य एकारः । प्रभूतधनाय (जागतम्) जगत्

४—यह मन्त्र [ब्राह्मणाच्छंसी का] उक्थमुख है । (ऐन्द्रं जागतं, जागताः पशवः, पशूनाम् आप्त्यै) इन्द्र देवता वाला [स्तोत्र] जगत् का हितकारी है, जगत् के हितकारी पशु हैं, पशुओं की प्राप्ति के लिये [यह स्तोत्र है] । (जागतम् उ वै तृतीयसवनं तृतीयसवनस्य रूपम्) जगत् का हितकारी ही तीसरा सवन है [और पूर्वोक्त कर्म] तृतीय सवन का रूप है । (उदप्रुतो न वयो रक्षमाणाः······इति बार्हस्पत्यं सांशंसिकम्) उदप्रुतः न वयः रक्षमाणाः······५—यह मन्त्र बृहस्पति देवता वाला सांशंसिक [यथार्थ प्रशंसायुक्त उक्थ] है । (अहं च इति बृहस्पतिः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह बृहस्पति ने कहा [क० ११], वह दो देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति विना प्रशंसा हो । (अच्छा म इन्द्रं मतयः स्वर्विदः······इति ऐन्द्राबार्हस्पत्ये पर्यासः) अच्छा मे इन्द्रं मतयः स्वर्विदः···१··· ६—यह मन्त्र इन्द्र और बृहस्पति वाले [उक्थ] में पर्यास [अन्त] है । (अस्य ऐन्द्राबार्हस्पत्यम् एतत् नित्यम् उक्थम्) इस [ब्राह्मणाच्छंसी ऋत्विज्] का इन्द्र और बृहस्पति देवता वाला यह नित्य उक्थ है । (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है । (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन देवताओं ने दो दो होकर विजय के लिए ही विजय पाया है । (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़] की उत्पत्ति के लिये है । (बृहस्पतिर्नः परि पातु पश्चात्··· इति ऐन्द्राबार्हस्पत्या परिदधाति) बृहस्पतिः नः परि पातु पश्चात्······७—इस इन्द्र और बृहस्पति वाली [ऋचा] से वह परिधानीया इष्टि करता है । (इन्द्राबृहस्पत्योः एव यज्ञं प्रतिष्ठापयति) इन्द्र और बृहस्पति के ही यज्ञ को वह स्थापित करता है । (उत उत्तरस्मात् अधरात् अघायोः इन्द्रः पुरस्तात् उत मध्यतः नः सखा सखिभ्यः वरिवः कृणोतु इति) उत उत्तरस्माद्······ यह [पूर्वोक्त मन्त्र ७ के तीन पाद बोले जाते हैं] (सर्वाभ्यः एव दिग्भ्यः आशिषम् आशास्ते, अर्वाचीयं कामं न कामयते) सब ही दिशाओं से वह आशीर्वाद चाहता है और निन्दा योग्य कामना नहीं चाहता । (सः कामः अस्मै समृध्यते, यः एवं वेद, यः च एवं विद्वान् ब्राह्मणाच्छंसी एतया परिदधाति) वह काम [कामना योग्य पदार्थ] उस के लिये समृद्ध [सफल] होता है, जो ऐसा जानता है, और ऐसा

अण् । जगते हिताय (उदप्रुतः) प्रुङ् गतौ—क्विप् । उदकं प्राप्ताः (न) यथा (वयः) पक्षिणः (रक्षमाणाः) आत्मानं पालयन्तः (अच्छ) सुष्ठु (मे) मम (मतयः) बुद्धयः (स्वर्विदः) सुखस्य लम्भयित्र्यः (बृहस्पतिः) बृहतां शूराणां रक्षकः सेनापतिः (नः) अस्मान् (परि) सर्वतः (पातु) रक्षतु (ऐन्द्राबार्हस्पत्या) विभक्तेर्लुक् । ऐन्द्राबार्हस्पत्यया ऋचा (उत) अपि च (उत्तरस्मात्) ऊर्ध्वलोकात् (अधरात्) अधस्तनलोकात् (अघायोः) पापेच्छुकात् । दुराचारिणः (पुरस्तात्) अग्रे (नः) अस्मभ्यम् (सखा) सुहृद् (सखिभ्यः) मित्राणां हिताय (वरिवः) वृञ् वरणे यङ्लुकि—ऋतश्च (पा० ७ । ४ । ९२) अभ्यासस्य

विद्वान् ब्राह्मणाच्छंसी [ऋत्विज्] इस [स्तुति] से परिधानीया इष्टि करता है। (बृहस्पते युवम् इन्द्रश्च वस्वः……इति यजति) बृहस्पते युवम् इन्द्रः च वस्वः··८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दोनों देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति विना यज्ञ [यजमान को] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते हैं। देखो क० ३] ॥ १६ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १६ ॥

विशेष : १—(वृहद्रथ) के स्थान पर (वृहद्रय) वेदमन्त्र से शुद्ध किया है ॥

विशेषः २--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१--इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू। आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम्--अथर्व० २० । १३ । १, ऋग्० ४ । ५० । १० ॥ (बृहस्पते) हे वृहस्पति ! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र ! [अत्यन्त ऐश्वर्य वाले राजन्] (मन्दसाना) आनन्द देने वाले, (वृषण्वसू) बलवान् वीरों के निवास कराने वाले तुम दोनों (सोमम्) सोम [उत्तम ओषधियों के रस] को (अस्मिन्) इस (यज्ञे) यज्ञ [राजपालन व्यवहार] में (पिबतम्) पीओ। (स्वाभुवः) अच्छे प्रकार सब ओर होने वाले (इन्दवः) ऐश्वर्य (वाम्) तुम दोनों में (आ विशन्तु) प्रवेश करें, (अस्मे) हम को (सर्ववीरम्) सबको वीर बनाने वाला (रयिम्) धन (नि) नियम पूर्वक (यच्छतम्) तुम दोनों दो ॥

२--वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः। वाजे चित्रं हवामहे – अथर्व २० । १४ । १, ऋग्० ८ । २१ । १, साम० पू० ५ । २ । १० ॥ (अपूर्व्य) हे अनुपम ! [राजन्] (कत् चित्) कुछ भी (स्थूरम्) स्थिर वस्तु (न) नहीं (भरन्तः) रखते हुये, (अवस्यवः) रक्षा चाहने वाले (वयम्) हम (वाजे) संग्राम के बीच (चित्रम्) विचित्र स्वभाव वाले (त्वाम्) तुझ को (उ) ही (हवामहे) बुलाते हैं ॥

३--यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे। सखाय इन्द्रमूतये—अथर्व० २० । १४ । ३, ऋग्० ८ । २१ । ९, साम० उ० ५ । २ । २ ॥ (यः) जो [पराक्रमी] (नः) हमारे लिये (इदमिदम्) इस--इस (वस्यः) उत्तम वस्तु

रिगागमः, वरिवो धननाम--निघ० २ । १० । वरणीयं धनम् (कृणोतु) करोतु (अर्त्वीयम्) भृमृशीङ्० (उ० १ । ७) ऋत जुगुप्सायाम्--उप्रत्ययः। अतु--छः। निन्दायोग्यम् (युवम्) युवाम् (वस्वः) वसुनः। धनस्य। अन्यत् पूर्ववत् क० १५ ॥

को (पुरा) पहिले (प्र) अच्छे प्रकार (आनिनाय) लाया है, (तम् उ) उस ही (इन्द्रम्) इन्द्र [महाप्रतापी वीर] को, (सखायः) हे मित्रो ! (वः) तुम्हारी (ऊतये) रक्षा के लिये (स्तुषे) मैं सराहता हूं ॥

४--प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे। अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम्-अथर्व० २०। १५। १, ऋग्० १। ५७। १॥ (मंहिष्ठाय) अत्यन्त दानी, (बृहते) महागुणी, (बृहद्रये) महाधनी, (सत्यशुष्माय) सच्चे बलवान् [सभाध्यक्ष] के लिये (तवसे) बल पाने को (मतिम्) बुद्धि (प्र) उत्तम रीति से (भरे) मैं धारण करता हूँ (प्रवणे) ढालू स्थान में (अपाम् इव) जलों के [प्रवाह के] समान, (यस्य) जिस [सभाध्यक्ष] का (दुर्धरम्) बेरोक (विश्वायु) सब को जीवन देने वाला (राधः) धन (शवसे) बल के लिये (अपावृतम्) फैला हुआ है ॥

५--उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्--अथर्व २०। १६। १, ऋग्० १०। ६८। १॥ (उदप्रुतः) जल को प्राप्त हुये, (रक्षमाणाः) अपनी रक्षा करते हुये (वयः न) पक्षियों के समान, (वावदतः) वार वार गरजते हुये (अभ्रियस्य) बादल के (घोषाः इव) शब्दों के समान (गिरिभ्रजः) पहाड़ों से गिरते हुये, (मदन्तः) तृप्त करते हुये (ऊर्मयः न) जल के प्रवाहों के समान, (अर्काः) पूजनीय पण्डितों ने (बृहस्पतिम्) बृहस्पति [बड़ी वेदवाणी के रक्षक महाविद्वान्] को (अभि) सब ओर से (अनावन्) सराहा है ॥

६--अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत। परिष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये--अथर्व० २०। १७। १, ऋग्० १०। ४३। १॥ (स्वर्विदः) सुख पहुँचाने वाली, (सध्रीचीः) आपस में मिली हुई, (उशतीः) कामना करती हुई, (विश्वाः) सब (मे) मेरी (मतयः) बुद्धियों ने (इन्द्रम्) इन्द्र [महाप्रतापी राजा] को (अच्छ) अच्छे प्रकार से (अनूषत) सराहा है और (ऊतये) रक्षा के लिये [ऐसे, उसे] (परिष्वजन्ते) सब ओर से घेरती हैं, (यथा) जैसे (जनयः) पत्नियाँ (पतिम्) [अपने अपने] पति को और (न) जैसे (शुन्ध्युम्) शुद्ध आचार वाले (मघवानम्) महाधनी (मर्यम्) मनुष्य को [लोग घेरते हैं] ॥

७--बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु--अथर्व० २०। १७। ११, ऋग्० १०। ४३। ११॥ (बृहस्पतिः) बृहस्पति [बड़े शूरों का रक्षक सेनापति] (नः) हमें (पश्चात्) पीछे से, (उत्तरस्मात्) ऊपर से (उत) और (अधरात्) नीचे से (अघायोः) बुरा चीतने वाले शत्रु से (परि पातु) सब प्रकार बचावे। (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला राजा] (पुरस्तात्) आगे से (उत) और (मध्यतः) मध्य से (नः) हमारे लिये (वरिवः) सेवनीय धन (कृणोतु) करे, (सखा) [जैसे] मित्र (सखिभ्यः) मित्रों के लिये [धन करता है] ॥

८—बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः——अथर्व० २०। १७। १२, ऋ० ७। ९७। १०॥ (बृहस्पते) हे बृहस्पति! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र! [महाप्रतापी राजन्] (युवम्) तुम दोनों (दिव्यस्य) आकाश के (उत) और (पार्थिवस्य) पृथिवी के (वस्वः) धन के (ईशाथे) स्वामी हो। (स्तुवते) स्तुति करते हुये (कीरये) विद्वान् को (रयिम्) धन को (चित्) अवश्य (धत्तम्) तुम दोनों दो, [हे वीरो!] (यूयम्) तुम सब (स्वस्तिभिः) सुखों के साथ (सदा) सदा (नः) हमें (पात) रक्षित रक्खो॥

कण्डिका १७॥

अथ यदैन्द्रावैष्णवमच्छावाकस्योक्थं भवति इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधानेत्यृचाभ्यनूक्तम्। मद्वद्धि तृतीयसवनम्। अधा हीन्द्र गिर्वण इयन्त इन्द्र गिर्वण इत्यच्छावाकस्य स्तोत्रियानुरूपौ। ऋतुर्जनित्री तस्या अपस्परीत्युक्थमुखम्। तस्योक्तं ब्राह्मणं, नूमर्तो दयते सनिष्यन्निति वैष्णवं सांशंसिकम्। अहञ्चेति विष्णुरब्रवीत्, देवतयोः संशंसायानतिशंसाय। सं वां कर्मणा समिषा हिनोमीति पर्य्यास ऐन्द्रावैष्णवे। ऐन्द्रावैष्णवमस्यैतन्नित्यमुक्थम्। तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति। द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव। अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या उभा जिग्यथुर्न पराजयेथे इत्यैन्द्रावैष्णव्यर्चा परिदधाति, इन्द्राविष्णोरेव यज्ञं प्रतिष्ठापयति। इन्द्राविष्णू पिबतं मध्वो अस्येति यजति। एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट्करोति। प्रत्येत्याभिमृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति॥ १७॥

कण्डिका १७॥ एकाह यज्ञ के तृतीयसवन के उक्थ में अच्छावाक ऋत्विज् के मन्त्र॥

(अथ यत् अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) फिर जो अच्छावाक [अच्छे बोलने वाले ऋत्विज्] का इन्द्र और विष्णु [मन और कान——क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना······इति ऋचा अभ्यनूक्तम्) इन्द्राविष्णू मदपती ··· १——इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है। (अधा हीन्द्र गिर्वणः इयं त इन्द्र गिर्वणः···इति अच्छावाकस्य स्तोत्रियानुरूपौ) अधा हि इन्द्र गिर्वणः··· २——और, इयं ते इन्द्र

१७——(इन्द्राविष्णू) वायुविद्युताविव सभासेनेशौ (मदपती) आनन्दस्य पालकौ (मदानाम्) आनन्दानाम् (सोमम्) ऐश्वर्यम् (आ यातम्) आगच्छतम् (द्रविणो) द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति सिद्धम्। द्रविणा द्रविणानि धनानि उ अपि (दधाना) दधानौ। धरन्तौ (अध) अद्य। सम्प्रति (हि) एव (गिर्वणः) स्तुतिभिः सेवनीय (ऋतुः) वर्षाकालः (जनित्री)

गिर्वणः······३—यह दो मन्त्र अच्छावाक के स्तोत्रिय और अनुरूप हैं। (ऋतुर्जनित्री तस्या अपस्परि······इति उक्थमुखम्) ऋतुः जनित्री तस्याः अपः परि······४—यह मन्त्र [अच्छावाक का] उक्थमुख है। (तस्य उक्तं ब्राह्मणम्) उसका ब्राह्मण कहा गया है। (नू मर्तो दयते सनिष्यन्······इति वैष्णवं सांशंसिकम्) नु मर्त्तः दयते सनिष्यन्······५—यह मन्त्र विष्णु देवता वाला सांशंसिक [यथार्थ प्रशंसा युक्त उक्थ] है। (अहं च इति विष्णुः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह विष्णु ने कहा [क० ११], वह देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति विना प्रशंसा हो। (सं वां कर्मणा समिषा हिनोमि······, इति ऐन्द्रावैष्णवे पर्य्यासः) सं वां कर्मणा······६—यह मन्त्र इन्द्र और विष्णु वाले [उक्थ] में पर्यास [अन्त] है। (अस्य ऐन्द्रावैष्णवम् एतत् नित्यम् उक्थम्) इस [अच्छावाक] का इन्द्र और विष्णु देवता वाला यह नित्य उक्थ है। (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन सब देवताओं ने दो दो होकर विजय के लिये ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़ा] की उत्पत्ति के लिये है। (उभा जिग्यथुर्न पराजयेथे······इतिऐन्द्रावैष्णव्या ऋचा परिदधाति) उभा जिग्यथुः न······७—इस इन्द्र और विष्णु वाली ऋचा से वह परिधानीया इष्टि करता है। (इन्द्राविष्णोः एव यज्ञं प्रतिष्ठापयति) इन्द्र और विष्णु के यज्ञ को वह स्थापित करता है। (इन्द्राविष्णू पिबतं मध्वो अस्य······इति यजति) इन्द्राविष्णू पिबतम्······८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दो देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्यायन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति

जनयित्री। जननी (अपः) जलानि (परि) सर्वतः (नु) शीघ्रम् (मर्त्तः) मनुष्यः (दयते) धनमादत्ते (सनिष्यन्) सर्वधातुभ्यः इन् (उ० ४। ११८) षणु दाने—इन्। सुप आत्मनः क्यच् (पा० ३। १। ८) सनि—क्यच्, लालसायां सुगागमः, ततः शतृ।[1] दातव्यधनमिच्छन् (सम्) सम्यक् (वाम्) युवाम् (कर्मणा) ईप्सिततमेन व्यापारेण (इषा) अन्नेन (हिनोमि) वर्धयामि (उभा) उभौ। इन्द्राविष्णू (जिग्यथुः) लिटि रूपम्। युवां जितवन्तौ शत्रून् (न) निषेधे (पराजयेथे) पराजयं प्राप्नुथः (मध्वः) मधुरस्य। अन्यत् पूर्ववत्॥

---

१. रूपसिद्धि की प्रक्रिया के इतने लम्बे व्यायाम की अपेक्षा लृडन्त सन् धातु से 'लृटः सद्वा' के नियम के अनुसार शतृ प्रत्यय होकर प्रथमा के एकवचन में 'सनिष्यन्' बनाना अधिक श्रेयस्कर है॥ सम्पा०॥

बिना यज्ञ [यजमान का] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते है । देखो क० ३] ॥ १७ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १७ ॥

विशेषः १—(मदयती) के स्थान पर (मदपती) और (अपसस्परि) के स्थान पर (अपस्परि) वेद मन्त्र से शोधा है ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना । सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः—ऋग्० ६ । ६९ । ३ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [वायु और बिजुली के समान सभापति और सेनापति] (मदानाम्) आनन्दों के बीच (मदपती) आनन्द के पालने वाले और (द्रविणो) धनों के भी (दधाना) धारण करने वाले तुम दोनों (सोमम्) ऐश्वर्य को (आ यातम्) प्राप्त होओ । (मतीनाम्) मनुष्यों के (शस्यमानासः) बोले हुये (स्तोमासः) स्तोम [स्तुति व्यवहार] (अक्तुभिः) तेजों और (उक्थैः) वेद स्तोत्रों के साथ (वाम्) तुम दोनों को (सं सम् अञ्जन्तु) बहुत अच्छे प्रकार प्रकट करें ।

२—अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे । उदेव यन्त उदभिः—अथर्व० २० । १०० । १, ऋ० ८ । ९८ । ७, [सायण भाष्य ८७] साम० उ० १ । १ । तृच २३ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (अध हि) अब ही (त्वा) तुझे (महः) अपनी बड़ी (कामान्) कामनाओं को, (उदा) जल [जल की बाढ़] के पीछे (उदभिः) दूसरे जलों की बाढ़ों के साथ (यन्तः इव) चलते हुये पुरुषों के समान हमने (उप) आदर से (ससृज्महे) समर्पण किया है ॥

३—इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि—ऋ० ८ । १३ । ४ ॥ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (ते) तेरे लिये (सुन्वतः) तत्त्वरस निचोड़ने वाले पुरुष की (इयम्) यह (रातिः) दान क्रिया (क्षरति) बहती है, (मन्दानः) हर्ष करता हुआ तू (अस्य बर्हिषः) इस वृद्धि कारक व्यवहार का (वि) विशेष करके (राजसि) राजा है ॥

४—ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते । तदाहना अभवत् पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम्—ऋ० २ । १३ । १ ॥ (ऋतुः) ऋतु [वर्षाकाल] (जनित्री) [प्रत्येक पदार्थ की] जननी है, (तस्याः परि) उस [जननी] से (जातः) उत्पन्न होकर वह [पदार्थ] (मक्षु) शीघ्र (अपः) जलों में (आ अविशत्) सब प्रकार से प्रवेश करता है, (यासु) जिन [जलों] में (वर्धते) वह बढ़ता है । (तत्) इससे वह [पदार्थ] (आहनाः) पाने योग्य (अभवत्) होता है, और (पयः) रस की (पिप्युषी) बढ़ाने वाली [वह जननी ऋतु होती है] । (तत्)

तव (अंशोः) अंशु [ओषधि के डांठल] का (पीयूषम्) पीने योग्य रस (प्रथमम्) मुख्य करके (उक्थ्यम्) प्रशंसनीय [अथवा उक्थ नामक यज्ञ के योग्य] होता है ॥

५—नू मर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत् । प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमा विवासात्—ऋग्० ७ । १०० । १ ॥ (सनिष्यन्) भक्ति चाहता हुआ (मर्तः) वह मनुष्य (नु) शीघ्र (दयते) [मनोरथ] पाता है, (यः) जो (उरुगायाय) बहुत गाने योग्य (विष्णवे) विष्णु [व्यापक परमात्मा] को (दाशत्) देवे [आत्मदान करे] और (यः) जो (सत्राचा) सत्य को प्राप्त हुये (मनसा) मन से (एतावन्तम्) इतने बड़े (नर्यम्) नरों के हितकारी [विष्णु] को (प्र यजाते) अच्छे प्रकार पूजे और (आविवासात्) सब ओर से सेवे ॥

६—सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता—ऋ० ६ । ६९ । १ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [सूर्य और बिजुली के समान सभापति और सेनापति] (वाम्) तुम दोनों को (अस्य) इस (अपसः पारे) कर्म के पार में (कर्मणा) अत्यन्त चाहे हुये व्यापार और (इषा) अन्न से (सं सं हिनोमि) मैं बढ़ाता हूं, (यज्ञम्) यज्ञ [संगति करण व्यवहार] को (जुषेथाम्) सेवो (च) और (नः) हमको (अरिष्टैः) बेरोक (पथिभिः) मार्गों से (पारयन्ता) पार करते हुये तुम दोनों (द्रविणम्) धन वा यश (धत्तम्) दो ॥

७—उभा जिग्यथुर्न परा जयेथे न पराजिग्ये कतरश्च नैनयोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्—अथर्व० ७ । ४४ । १, ऋ० ६ । ६९ । ८ ॥ (विष्णो) हे विष्णु ! [बिजुली के समान व्याप्त होने वाले सभापति] (च) और (इन्द्रः) हे इन्द्र ! [वायु के समान ऐश्वर्यवान् सेनापति] (उभा) तुम दोनों ने [शत्रुओं को] (जिग्यथुः) जीता है, और तुम दोनों (न) कभी नहीं (परा जयेथे) हारते हो, (एनयोः) इन [तुम] दोनों में से (कतरः चन) कोई भी (न) नहीं (परा जिग्ये) हारा है । (यत्) जब (अपस्पृधेथाम्) तुम दोनों ललकारे हो (तत्) तब (सहस्रम्) असंख्य [शत्रु सेना दल] को (त्रेधा) तीन विधि पर [ऊंचे, नीचे और मध्य स्थान में] (वि) बिविध प्रकार से (ऐरयेथाम्) तुम दोनों ने निकाल दिया है ॥

८—इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् । आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे—ऋग्० ६ । ६९ । ७ ॥ (दस्रा) हे दुःखनाशक (इन्द्राविष्णू) इन्द्र और विष्णु ! [वायु और बिजुली के समान अध्यापक और उपदेशक] तुम दोनों (अस्य) इस (मध्वः) मधुर (सोमस्य) सोम [ओषधियों के रस] का (पिबतम्) पान करो और (जठरम्) पेट को (आ पृणेथाम्) अच्छे प्रकार भरो । (वाम्) तुम दोनों को (मदिराणि) आनन्द देने वाले (अन्धांसि) अन्न (अग्मन्) प्राप्त हुये हैं, (मे) मेरे (ब्रह्माणि) स्तोत्रों और (हवम्) पुकार को (उप शृणुतम्) तुम दोनों समीप से सुनो ॥

कण्डिका १८ ॥

अथाध्वर्य्यो शꣳशꣳसावोमिति स्तोत्रियायानुरूपायोक्थमुखाय परिधानीयाया इति चतुश्चतुराह्वयन्ते। चतस्रो वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते। अथो चतुष्पादः पशवः, पशूनामाप्त्यै। अथो चतुष्पर्वाणो हि तृतीयसवने होत्रकाः तस्माच्चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति। जागतं हि तृतीयसवनम्। अथ हैतत् त्रैष्टुभान्यप्रतिभूतमिव हि प्रातःसवने मरुत्वतीये तृतीयसवने च होत्रकाणां शस्त्रम्। धीतरसं वा एतत्सवनं, यत्तृतीयसवनम्। अथ हैतदधीतरसं शुक्रियं छन्दः, यत् त्रिष्टुभा यातयामसवनस्यैव तत् सरसतायै। सर्वे समवतीभिः परिदधति, तद्यत्समवतीभिः परिदधति। अन्तो वै पर्य्यासोऽन्त उदर्कोऽन्तः, सजाया उ ह वा अवेनायान्तेनैवान्तं परिदधति। सर्वे मद्वतीभिर्यजन्ति। तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवतीभिः पीतवतीभिरूपाभिर्यजन्ति। यद्यज्ञेऽभिरूपं तत्समृद्धम्। सर्वेऽनुवषट् कुर्वन्ति, स्विष्टकृत्त्वा अनुवषट्कारो नेत् स्विष्टकृतमन्तरयामेति। असौ वै लोकस्तृतीयसवनं, तस्य पञ्च दिशः, पञ्चोक्थानि तृतीयसवनस्य। स एतैः पञ्चभिरुक्थैः एताः पञ्च दिश आप्नोति। तद्यदेषां लोकानां रूपं, या मात्रा। तेन रूपेण तया मात्रयेमांल्लोकानृध्नोतीमांल्लोकानृध्नोतीति ॥ १८ ॥

कण्डिका १८ ॥ एकाह यज्ञ के तृतीयसवन में (शंशंसावोम्) इस मन्त्र को चार चार बार बोलें ॥

(अथ अध्वर्य्यो शंशंसावोम् इति, स्तोत्रियाय अनुरूपाय उक्थमुखाय परिधानीयायै इति चतुः चतुः आह्वयन्ते) फिर (अध्वर्य्यो शंशंसाव ओम्) हे अध्वर्यो ! हम दोनों स्तुति करें, हां—इस मन्त्र से स्तोत्रिय [स्तुति योग्य व्यवहार] के लिये, अनुरूप [विषय की अनुकूलता] के लिये, उक्थमुख [यज्ञ की मुख्यता] के लिये और परिधानीया [समाप्ति क्रिया] के लिये—इस प्रकार चार-चार बार वे बोलते हैं। (चतस्रः वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते) चार ही दिशायें हैं, दिशाओं में उससे वे [याजक] प्रतिष्ठा पाते हैं। (अथो चतुष्पादः पशवः पशूनाम् आप्त्यै) फिर चार पांव वाले पशु होते हैं, पशुओं की प्राप्ति के लिये [यह यज्ञ] है। (अथो तृतीयसवने चतुष्पर्वाणः हि होत्रकाः) फिर तृतीयसवन में चार अङ्ग वाले ही सहायक होता लोग होते हैं। (तस्मात् चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति) इसलिये चार बार वे सब त्रिष्टुप् [कर्म उपासना ज्ञान के सहारे वाले अथवा त्रिष्टुप्] छन्दों वाले स्तोत्रों से जगत् के हितकारी कर्म वे बोलते हैं। (जागतं हि तृतीयसवनम्) जगत् का हितकारी ही तीसरा सवन है। (अथ ह एतत् त्रैष्टुभानि प्रातःसवने मरुत्वतीये तृतीयसवने च

१८—(शंशंसाव) पूर्वाक्षरस्य द्वित्वमार्षम्—गो० उ० ३। १०, १६ तथा ४। ४। शंसाव। आवाम् शंसनं स्तोत्रं करवाव (ओम्) अनुमतौ (त्रैष्टुभम्) त्रैष्टुभानि। त्रिष्टुप्छन्दोयुक्तानि। कर्मोपासनाज्ञानयुक्तानि (जागतानि)

होत्रकाणाम् अप्रतिभूतम् इव हि शस्त्रम्) फिर यह ही त्रिष्टुप् छन्द वाले स्तोत्र प्रातःसवन में, मरुत्वतीय [माध्यन्दिन सवन] में और तीसरे सवन में सहायक होता लोगों का अप्रतिभूत [प्रतिभू अर्थात् स्थानी बिना] ही शस्त्र [स्तोत्र] हैं [अर्थात् त्रिष्टुप् तीनों सवनों में अवश्य बोला जाता है]। (धीतरसं वै एतद् सवनम्, यद् तृतीयसवनम्) पी चुके हुये रस वाला ही यह सवन है, जो तीसरा सवन है [तीसरे सवन से पहिले सोमरस पी लिया जाता है फिर किस लिये तीसरा सवन है—इस प्रश्न का समाधान इस प्रकार है]। (अथ ह एतद् अधीतरसं शुक्रियं छन्दः, यद् त्रिष्टुभा यातयामसवनस्य एव तद् सरसतायै) फिर यह बिना पी चुके हुये रस वाला, वीर्यवान् छन्द [स्तोत्र] है, जो त्रिष्टुप् [तीनों सवनों में ठहरने वाले छन्द] के साथ बीते हुये योग्य समय वाले सवन के रसीलेपन के लिये है [देखो–ऐतरेय ब्रा० ६ । १२]। (सर्वं समवतीभिः परिदधति, यद् तद् समवतीभिः परिदधति) वे सब समवती ऋचाओं से [सम शब्द वाली ऋचाओं से जैसे—समं ज्योतिः सूर्येण......अथर्व० ४ । १८ । १, इत्यादि मन्त्रों से] समाप्त करते हैं, क्योंकि वहां समवती ऋचाओं से वे समाप्त करते हैं। (अन्तः वै पर्यासः, अन्तः उदर्कः, अन्तः सजायाः उ ह वै अवेनाय अन्तेन एव अन्तं परिदधति=परिदधाति) अन्त ही पर्यास [विराम] है, अन्त ही उदर्क [अवसान वा विच्छेद अर्थात् रोक] है, अन्त ही संगति के रक्षक के लिये अन्त के साथ ही अन्त को समाप्त करता है। [एक एक विषय पर रुककर दूसरे को आरम्भ करके समाप्त किया जाता है]। (सर्वे मद्वतीभिः यजन्ति, यद् तद् मद्वतीभिः यजन्ति) वे सब मद्वती [मद शब्द वाली] ऋचाओं से यज्ञ करते हैं [याज्या ऋचा बोलते हैं], क्योंकि वहां मद्वती ऋचा से वे यज्ञ करते हैं। (सर्वे सुतवतीभिः पीतवतीभिः अभिरूपाभिः यजन्ति) वे सब सुतवती [सुत शब्द वाली] ऋचाओं से, पीतवती [पीत शब्द वाली] ऋचाओं से और अभिरूप [विषय के अनुकूल] ऋचाओं से यज्ञ करते हैं। [मद्वती, सुतवती और पीतवती ऋचाओं के लिये देखो ऋग्० १ । १६ । ८ । और बहुवचन शब्द होने से ब्राह्मण में समस्त इस नौ ऋचा वाले सूक्त का ग्रहण अभीष्ट है। अभिरूप शब्द से यह प्रयोजन है कि अभीष्ट देवता की स्तुति में उस देवता के सूचक पद आ जावें]। (यद् यज्ञे अभिरूपं, तद् समृद्धम्) जो यज्ञ में विषय के अनुकूल कर्म है, वह समृद्ध है। (सर्वे स्विष्टकृत्वा अनुवषट् कुर्वन्ति) सब स्विष्टकृत् मन्त्र [यदस्य कर्मणोऽत्यरीरिच....... देखो--गो० उ० ३ । १] पढ़कर अनुवषट् [समाप्ति सूचक पद] पढ़ते हैं। (अनुवषट्कारः स्विष्टकृतं नेद् अन्तरयाम इति) अनुवषट्कार स्विष्टकृत् मन्त्र को कभी भी बीच [व्यवधान] से नहीं लेता [स्विष्टकृत् के पीछे ही अनुवषट् होता है]। (असौ वै लोकः तृतीयसवनम्)

जगतीछन्दोयुक्तानि। जगते हितानि (अप्रतिभूतम्) प्रतिभूरहितम्। स्थानिना रहितम् (धीतरसम्) धेट् पाने--क्तः। पीतसारम् (अधीतरसम्) अपीतसारम्। सर्वरसोपेतम् (शुक्रियम्) शुक्र—घन्। वीर्ययुक्तम्। (यातयामसवनस्य) गतयोग्यकालसवनस्य (सरसतायै) सरसत्वाय (सजायाः) षञ्ज सङ्गे--कः, टाप्। सङ्गतेः (अवेनाय) श्यास्त्याहृञविभ्य इनच् (उ० २ । ४६) अव रक्षणादो

वह ही [सूर्य] लोक तीसरा सवन है । (तस्य पञ्च दिशः, तृतीयसवनस्य पञ्च उक्थानि) उस [सूर्य लोक] की पांच दिशायें [पूर्व, दक्षिण, पश्चिम, उत्तर और एक ऊपर नीचे की दिशा] हैं और तीसरे सवन के पांच उक्थ [समवती, मद्वती, सुतवती, पीतवती और अभिरूपा ऋचाओं वाले स्तोत्र] हैं । (सः एतैः पञ्चभिः उक्थैः, एताः पञ्चदिशः आप्नोति) वह [यजमान] इन पांच प्रकार वाले स्तोत्रों से इन पांच दिशाओं को पाता है । (तत् यत् एषां लोकानां रूपं या मात्रा) क्योंकि वह इन लोकों का रूप [आकार] है जो मात्रा [परिमाण] है । (तेन रूपेण तया मात्रया इमान् लोकान् ऋध्नोति, इमान् लोकान् ऋध्नोति इति) उस ही रूप [आकार] से और उस मात्रा [परिमाण] से इन लोकों को वह समृद्ध करता है, इन लोकों को वह समृद्ध करता है [अवश्य समृद्ध करता है] ॥ १८ ॥

भावार्थः—मनुष्यों को योग्य है कि देश और काल का विचार करके कार्य करें जिससे उन्हें सफलता प्राप्त हो ॥ १८ ॥

विशेषः १—(शस्त्रं) के स्थान पर (शस्त्रं) ठीक है, और (सरस्वतायै) के स्थान पर (सरसतायै) ऐ० ब्रा० ६ । १२ से शुद्ध किया है ॥

विशेषः २—इस कण्डिका को प्रातःसवन में गो० उ० ३ । १६ और माध्यन्दिन सवन में उ० ४ । ४ से मिलाओ और वहां पर ही प्रयोजनीय मन्त्र हैं ॥

कण्डिका १९ ॥

तदाहुः, किं षोडशिनः षोडशित्वं षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्षरैरादत्ते, द्वे वा अक्षरे अतिरिच्येते, षोडशिनोऽनुष्टुभमभिसम्पन्नस्य । वाचो वा एतौ स्तनौ, सत्यानृते वाव ते, अवत्यैनं सत्यम् नैनमनृतं हिनस्ति, य एवं वेद ॥ १९ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणस्य चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

कण्डिका १९ ॥ एकाह यज्ञ में षोडशी शब्द की व्याख्या ॥

(तत् आहुः, षोडशिनः किं षोडशित्वम्) वे कहते हैं—षोडशी [सोलह अङ्ग वाले यज्ञ] का क्या षोडशित्व [सोलहपन] है ? [इस का समाधान] (षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिः अक्षरैः आदत्ते) सोलह स्तोत्रों और सोलह शस्त्रों को [आधे आधे अनुष्टुप् छन्द के] सोलह अक्षरों से वह [अध्वर्यु] ग्रहण करता है । (अनुष्टुभम् अभिसम्पन्नस्य षोडशिनः द्वे अक्षरे वै अतिरिच्येते) अनुष्टुप् रखने वाले षोडशी [स्तोत्र] के दो दो अक्षर बढ़ जाते हैं [आधे अनुष्टुप् के १६ अक्षरों के आदि और अन्त में ओम् शब्द बोलने से १८ अक्षर होते हैं—इस का समाधान] ।

—इनच् = एनच् । अविनाय । रक्षकाय (अन्तरयाम) गो० उ० ३ । १६ । अन्तर्याति । अन्तरेण गच्छति । अन्यद् गतम्—गो० उ० ३ । १६ ॥

१९—(आदत्ते) गृह्णाति (अतिरिच्येते) अधिके भवतः (अभिसम्प-

(वाचः वै एतौ स्तनौ, ते वाव सत्यानृते) वाणी के [स्त्रीलिङ्ग होने से] यह दोनों स्तन [कुच वा चूची] हैं जो ही सत्य और झूठ हैं । (सत्यम् एनम् अवति अनृतम् एनं न हिनस्ति, यः एव वेद) सत्य उसकी रक्षा करता है और झूठ उसको नहीं सताता है जो ऐसा जानता है ॥ १६ ॥

भावार्थ :—मनुष्य को उन्नति के लिये सत्य का ग्रहण और असत्य का त्याग करना चाहिये ॥ १६ ॥

विशेष: १—एकाह यज्ञ समाप्त हुआ ॥

विशेष: २ - इस कण्डिका को मिलाओ—ऐ० ब्रा० ४ । १ ॥

विशेष: ३—(ते वा) के स्थान पर (द्वे वा) ऐ० ब्रा० से शुद्ध किया है ॥

इति श्रीमद्राजाधिराज-प्रथितमहागुणमहिम-*श्रीसयाजीराव गायकवाडाधिष्ठित*-बड़ोदेपुरीगत-श्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदास त्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे चतुर्थः प्रपाठकः समाप्तः ॥

अथ प्रपाठकः प्रयागनगरे माघमासे शुक्लचतुर्दश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ॥

मुद्रितम्—आश्विनशुक्ला ४ संवत् १९८१ वि० ता० २ अक्टूबर सन् १९२४ ई० ॥

अथ पञ्चमः प्रपाठकः ॥

कण्डिका १ ॥

ओम् । अहर्वै देवा आश्रयन्त रात्रीमसुराः । तेऽसुराः समावद्वीर्य्या एवासन्, नो व्यावर्त्तन्त । सोऽब्रवीत् इन्द्रः, कश्चाहं चेमानसुरान् रात्रीमन्ववैष्यामहा इति । स देवेषु न प्रत्यविन्दत्, अबिभयू रात्रेस्तमसः । मृत्योस्तम इव हि रात्रिः, मृत्युर्वै तमः, तस्माद्धाप्येतर्हि भूयानिव नक्तम् । स यावन्मात्रमिवाप[1]क्रम्य बिभेति, तं वै छन्दांस्येवान्ववायन् । तद्यच्छन्दांस्येवान्ववायन्, तस्मादिन्द्रश्च छन्दांसि च रात्रिं वहन्ति, न निविच्छस्यते न पुरोरुङ् न धाय्या नान्या देवता । इन्द्रश्च होत्र छन्दांसि च रात्रिं वहन्ति तान्वै पर्य्यायैः पर्य्यायमनुदन्त । यत् पर्य्यायैः पर्य्यायमनुदन्त, तस्मात् पर्य्यायाः, तत् पर्य्यायाणां पर्य्यायत्वम् । तान्वै प्रथमैरेव पर्य्यायैः पूर्वरात्रादनुदन्त, मध्यमैर्मध्यरात्रादुत्तमैरपररात्रात् । अपिशर्वर्या अपिस्मसीत्य-

न्नस्य) अभिप्राप्तस्य (स्तनौ) स्तन मेघशब्दे—अच् । स्त्रीणाम् अङ्गभेदौ (सत्यानृते) सत्यं यथार्थवदनं च अनृतं मिथ्यावदनं च (अवति) रक्षति (हिनस्ति) दुःखयति ॥

१. पू. सं. "आप्रक्रम्य" इति पाठः ॥ सम्पा० ॥

ब्रुवन् । तद्यदपिशर्वर्या अपिस्मसीत्यब्रुवन्, तदपिशर्वराणामपिशर्वरत्वम् । शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति ह स्माह । एतानि ह वा इन्द्रं रात्र्यास्तमसो मृत्योरभिपत्यावारयन्, तदपिशर्वराणामपिशर्वरत्वम् ॥ १ ॥

कण्डिका १ ॥ आख्यायिका-अतिरात्र यज्ञ में से इन्द्र और छन्दों ने तीन पर्य्यायों में असुरों को निकाल दिया ॥

(ओम्) ओम् [हे परमेश्वर] । (देवाः वै अहः आश्रयन्त, असुराः रात्रीम्) देवताओं ने दिन [प्रकाश वा ज्ञान] का आश्रय लिया और असुरों ने रात्रि [अन्धकार वा अज्ञान] का । (ते असुराः समावद्वीर्याः एव आसन् नो व्यावर्तन्त) वे असुर [देवताओं के] तुल्य पराक्रमी निश्चय करके थे, [इसलिये] वे न हटे । (सः इन्द्रः अब्रवीत् कः च अहं च इमान् असुरान् रात्रीम् अनु अवैष्यामहै इति) वह इन्द्र बोला—कौन और मैं [हम दोनों] इन असुरों को रात्रि में ढूंढ़कर निकाल दें । (सः देवेषु न प्रत्यविन्दत्, रात्रेः तमसः अबिभयुः) उसने देवताओं में ढूंढ़कर [किसी को भी] न पाया, वे रात्रि के अन्धकार से डर गये । (मृत्योः तमः इव हि रात्रिः, मृत्युः वै तमः) मृत्यु के अन्धकार के समान ही रात्रि है, मृत्यु [के समान] ही अन्धकार है । (तस्मात् ह अपि एतर्हि नक्तं भूयान् इव सः यावन्मात्रम् इव अपक्रम्य बिभेति) इसलिये ही अब भी रात्रि में अधिकतर वह [प्रत्येक मनुष्य] थोड़ा भी बाहर जाकर डरता है । (छन्दांसि एव तं वै अनु अवायन्) छन्द [आह्लादक गायत्री आदि] ही उस [इन्द्र] के साथ साथ चले । (तत् यत् छन्दांसि एव अनु अवायन्, तस्मात् इन्द्रः च छन्दांसि च रात्रिं वहन्ति, न निवित् शस्यते न पुरोरुक् न धाय्या, न अन्या देवता) सो जो छन्द ही साथ साथ चले, इसलिये इन्द्र और छन्द रात्रि [अतिरात्र यज्ञ] को चलाते हैं, न निवित् [निश्चित विद्या स्तुति विशेष] बोली जाती है, न पुरोरुक् [आगे से प्रसन्न करने वाली स्तुति विशेष] न धाय्या [धारण करने योग्य, सामिधेनी ऋचा] न दूसरा देवता । (इन्द्रः च हि एव छन्दांसि च रात्रिं वहन्ति, तान् वै पर्य्यायैः पर्य्यायम् अनुदन्त) इन्द्र और छन्दों ने ही रात्रि [अतिरात्र यज्ञ] को चलाया, उन्होंने उन [असुरों] को ही पर्य्यायों [क्रम क्रम से] घेरकर निकाल दिया । (यत् पर्य्यायैः पर्य्यायम् अनुदन्त, तस्मात् पर्य्यायाः तत् पर्य्यायाणां पर्य्यायत्वम्)

१—(आश्रयन्त) आ-अश्रयन्त । आश्रितवन्तः । सेवितवन्तः (समावद्वीर्याः) पूर्वपदस्य दीर्घत्वं मतुपो योजनं चार्षम् । समवीर्याः । तुल्यपराक्रमाः (नो) निषेधे (व्यावर्तन्त) वि+आ+वृतु वर्तने—लङ् । निवृत्ता अभवन् (अनु) अनुगम्य (अवैष्यामहै) अव+आ+इष गतौ—लोट् । निःसारयाम (प्रत्यविन्दत) प्रतीक्ष्य प्राप्तवान् (अबिभयुः) भीताः अभवन् (तमसः) अन्धकारात् (एतर्हि) इदानीम् (भूयान्) बहुतरः (यावन्मात्रम्) यत्किंचिद् (इव) एव । अपि (छन्दांसि) गायत्र्यादीनि छन्दांसि (अन्ववायन्) अनु+अव+इण् गतौ—लङ् । अनुगम्य प्राप्ताः (रात्रिम्) रात्रिभवमतिरात्रयज्ञम् (वहन्ति)

जो पर्यायों से घेरकर [उनको] उन्होंने निकाला, इसलिये वे पर्य्याय [घूमकर आने वाले] हैं, वह ही पर्य्यायों का पर्य्यायपन है। (तान् वै प्रथमैः एव पर्य्यायैः पूर्वरात्रात् अनुदन्त, मध्यमैः मध्यरात्रात्, उत्तमैः अपररात्रात्) उन [असुरों] को उन्होंने पहिले पर्य्यायों [घूमकर आने के व्यवहारों] के द्वारा रात्रि के पहिले भाग से निकाला, मध्यमों के द्वारा मध्यरात्रि से और पिछलों के द्वारा पिछली रात्रि से। (अपिशर्वर्याः अपिस्मसि—इति अब्रुवन्) वे [छन्द] बोले—निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं। (तत् यत् अपिशर्वर्याः अपिस्मसि इति अब्रुवन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) जो उन [छन्दों] ने कहा—निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है। (शर्वराणि खलु ह वै अस्य एतानि छन्दांसि इति ह स्म आह) [निश्चय करके असुरों के] नाश करने वाले इस [यज्ञ] के यह छन्द हैं—यह वह [ऋषि] कहता है। (एतानि ह वै इन्द्रं रात्र्याः मृत्योः तमसः अभिपत्य अवारयन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) इन [छन्दों] ने ही इन्द्र को रात्रि के मृत्यु [के समान] अन्धकार से निकाल कर स्वीकार किया, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है ॥ १ ॥

भावार्थः—मनुष्यों को चाहिये कि सदा सावधान रह कर पर्यायों अर्थात् पहरुओं द्वारा परस्पर रक्षा करें जिससे निशाचर चोर डाकू आदि कष्ट न देवें ॥ १ ॥

विशेषः—इस कण्डिका को मिलाओ—ऐ० ब्रा० ४। ५॥

कण्डिका २ ॥

प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमान्येव पदानि पुनराददते। यदेवैषां मनोरथा आसन्, तदेवैषान्तेनाददते। मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमान्येव पदानि पुनराददते। यदेवैषामश्वा गाव आसन्, तदेवैषां तेनाददते। उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमान्येव पदानि पुनराददते। यदेवैषां वासो हिरण्यं मणिरध्या-

---

निर्वहन्ति (निवित्) सत्सूद्विषद्रुहदुहयुजविद० (पा० ३। २। ६१) नि+विद ज्ञाने-क्विप्। निवित्, वाङ्नाम—निघ० १। ११। निश्चितविद्या। स्तुतिविशेषः (पुरोरुक्) पुरः+रुच दीप्तावभिप्रीतौ च—क्विप्। स्तुतिविशेषः (धाय्या) पाय्यसान्नाय्यनिकाय्यधाय्या० (पा० ३। १। १२९) दधातेर्ण्यत्। अग्निज्वालनार्था ऋक्। सामिधेनी (पर्य्यायैः) परि+इण् गतौ—घञ्। अनुक्रमैः (पर्य्यायम्) पर्य्याय—णमुल्। परीत्य (अनुदन्त) निःसारितवन्तः (पूर्वरात्रात्) रात्रिप्रथमभागात् (अपिशर्वर्याः) कृगॄशॄवृञ्चतिभ्यः ष्वरच् (उ० २। १२१) शॄ हिंसायाम्—ष्वरच्, ङीष्। निश्चयेन रात्रेः सकाशात् (अपिस्मसि) अपिस्मः। निश्चयेन तिष्ठामः (अपिशर्वराणाम्) निश्चयेन असुरादिनाशकानाम् (शर्वराणि) असुरनाशकानि (अभिपत्य) उद्धृत्य (अवारयन्) स्वीकृतवन्तः ॥

त्ममासीत्, तदेवैषां तेनाददते । आ द्विषतो वसु दत्ते, निरेवैनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते, य एवं वेद ॥ २ ॥

कण्डिका २ ॥ अतिरात्र यज्ञ के तीन पर्य्यायों में तीन प्रकार से स्तुति ॥

(प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमानि एव पदानि पुनः आददते) पहिले पर्य्यायों में वे [ऋत्विज्] स्तुति करते हैं, [मन्त्रों के] पहिले ही पदों को वे दो बार लेते हैं [बोलते हैं] । (यत् एव एषां मनोरथाः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के मनोरथ होते हैं, उनके उन [मनोरथों] को उसके द्वारा वे ले लेते हैं । (मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमानि एव पदानि पुनः आददते) मध्य वाले पर्य्यायों में वे स्तुति करते हैं, [मन्त्रों के] मध्य वाले ही पदों को वे दो बार लेते हैं । (यत् एव एषाम् अश्वाः गावः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के घोड़े और गौयें हैं उनके उनको ही वे उस के द्वारा ले लेते हैं । (उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमानि एव पदानि पुनः आददते) पिछले पर्यायों में वे स्तुति करते हैं, [मन्त्रों के] पिछले ही पदों को वे दो बार लेते हैं । (यत् एव एषां वासः हिरण्यं मणिः अध्यात्मम् आसीत्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] का वस्त्र, सुवर्ण, और मणि शरीर पर वर्तमान है, उनका उसको ही उसके द्वारा वह ले लेते हैं । (द्विषतः वसु आदत्ते, एनम् एभ्यः सर्वेभ्यः लोकेभ्यः एव निर् नुदते, यः एवं वेद) वह [मनुष्य] शत्रु का धन ले लेता है और इस [शत्रु] को इन सब लोकों से निकाल देता है, जो ऐसा विद्वान् है ॥ २ ॥

भावार्थः—नीति निपुण पुरुष सावधानी से शत्रुओं को अनेक प्रकार से आधीन करें ॥ २ ॥

विशेष :—इस कण्डिका को मिलाओ—ऐ० ब्रा० ४ । ६ ॥

कण्डिका ३ ॥

पवमानवदहरित्याहुः, न रात्रिः पवमानवती, कथमुभे पवमानवती भवतः, केन ते समावद्भाजौ भवत इति । यदेवेन्द्राय मद्वने सुतमिदं वसो सुतमन्ध इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेनोभे पवमानवती भवतः, तेन ते समावद्भाजौ भवतः । पञ्चदशस्तोत्रमहरित्याहुः, न रात्रिः पञ्चदशस्तोत्रा, कथमुभे पञ्चदशस्तोत्रे भवतः, केन ते समावद्भाजौ भवत इति । द्वादशस्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः सन्धिना राथन्तरेणाश्विना

२—(स्तुवते) स्तुवन्ति (पुनः) द्विवारम् (आददते) गृह्णन्ति (मनोरथाः) इच्छाव्यवहाराः (एषाम्) असुराणाम् (आसन्) सन्ति (अध्यात्मम्) आत्मानं शरीरमधिकृत्य वर्तमानम् । शरीरे अवस्थितम् (आसीत्) अस्ति (द्विषतः) शत्रोः (आदत्ते) गृह्णाति ॥

यः स्तुवते, तेन रात्रिः पञ्चदशस्तोत्रा, तेनोभे पञ्चदशस्तोत्रे भवतः, तेन ते समावद्भाजो भवतः । परिमितं स्तुवन्त्यपरिमितमनुशंसन्ति, परिमितं भूतमपरिमितं भव्यमपरिमितान्येवावरुन्ध्यादित्यतिशंसन्ति । स्तोममति वै प्रजास्यात्मानमति पशवः । तद्यदेवास्यात्या[1]त्मानन्तदेवास्यैतेनाप्याययन्ति । अथो द्वयं वा इदं सर्वं स्नेहश्चैव तत्तेजश्च । अथ तदहोरात्राभ्यामाप्तं[2] स्नेहतेजसोराप्त्यै । गायत्रीं स्तोत्रियानुरूपं शंसन्ति, तेजो वै गायत्री, तमः पाप्मा, रात्रिस्तेन तेजसा तमः पाप्मानन्तरन्ति पुनरादाय[3], शंसन्ति । एवं हि सामगाः स्तुवते, यथास्तुतमनुशस्तं भवति । न हि तत् स्तुतं यन्नानुशस्तम् । तदाहुः, अथ कस्मादुत्तमात् प्रतीहारादाहूय साम्ना शस्त्रमुपसन्तन्वन्तीति ॥ ३ ॥

कण्डिका ३ ॥ अतिरात्र यज्ञ में पवमान आदि स्तोत्रों का विचार ॥

(पवमानवत् अहः इति आहुः, रात्रिः पवमानवती न, कथम् उभे पवमानवती भवतः, केन ते समावद्भाजौ भवतः इति) वे [ब्रह्मवादी] कहते हैं दिन [यज्ञ] पवमान स्तोत्र वाला है, और रात्रि [यज्ञ] पवमान स्तोत्र वाली नहीं है, कैसे दोनों [दिन और रात] पवमान स्तोत्र वाले होते हैं और किस कारण से वे दोनों एक से भाग वाले होते हैं । [इसका समाधान] (इन्द्राय मद्वने सुतम्, इदं वसो सुतमन्धः, इदं हि अन्वोजसा सुतम् इति—यत् एव स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेन उभे पवमानवती भवतः, तेन ते समावद्भाजौ भवतः) इन्द्राय मद्वने सुतम्‥‥‥ऋ० ८ । ९२ । १९, [सायणभाष्य ८१] । साम० उ० २ । ७ । ४ । इदं वसो सुतम् अन्धः‥‥‥ऋ० ८ । २ । १, सा० पू० २ । ३ । १०, इदं हि अनु ओजसा सुतम्‥‥‥ऋ० ३ । ५१ । १०, सा० पू० २ । ८ । १, इन [तीन मन्त्रों] से वे [उद्गाता लोग] स्तोत्र पढ़ते हैं और [होता लोग] शस्त्र पढ़ते हैं, इससे रात्रि पवमान स्तोत्र वाली है [क्योंकि तीनों मन्त्रों में सुत—निचोड़ा गया सोम—शब्द पवमानवाची है], इस से दोनों पवमान स्तोत्र वाले हैं, इस कारण से वे दोनों एकसे भाग वाले हैं ॥

अहरहः शंसति) फिर इन ही आश्विन [अश्वि देवता वाले] सूक्तों के दो दो [स्तोत्र] हैं, एक एक समाहाव [आवाहन स्तोत्र] को दिन दिन वह बोलता है। (अश्विनौ वै देवानां भिषजौ, तस्मात् आश्विनानि सूक्तानि शंसन्ति) दोनों अश्वी [दिन रात] ही विद्वानों के दो वैद्य हैं, इसलिये अश्वियों के सूक्तों को वे बोलते हैं। (तत् अश्विभ्यां प्रददुः, इदं भिषज्यतम् इति) वह [यज्ञकर्म दोनों अश्वियों को उन्होंने दिया--इसकी तुम दोनों ओषधि करो। (क्षेत्रवत्यः परिधानीयाः भवन्ति) क्षेत्रवती [क्षेत्र शब्द वाली ऋचायें जैसे—शं नो देवः सविता········ अथर्व १९। १०। १०] परिधानीया [अन्तिम इष्टि] होती हैं। (यत्र हतः तत् प्रजाः अशनायन्तीः पिपासन्तीः संरुद्धाः स्थिता आसन्) जहां वह [यज्ञ] मारा गया [परिधानीय स्तोत्र ठीक न हुआ], वहां प्रजायें भूख की मारी और प्यास की मारी रुकी हुई स्थित होती हैं। (ताः दीनाः एताभिः यथाक्षेत्रं पाययाञ्चकार तर्पयाञ्चकार) उन दीन [दुखिया प्रजाओं] को इन [परिधानीया ऋचाओं] से खेत के अनुसार उस [यजमान] ने जलपान कराया और तृप्त किया। (अथो इयं वै पृथिवी क्षेत्रम्, अस्याम् अदीनायाम् अन्ततः प्रतिष्ठास्यामहै इति) फिर यह ही पृथिवी खेत है, इस अदीना [बलवती और उपजाऊ पृथिवी] पर अन्त में [पुरुषार्थ के पीछे] हम प्रतिष्ठा पावेंगे। (त्रिष्टुभः याज्याः भवन्ति) त्रिष्टुप् [तीन कर्म, उपासना, ज्ञान के सहारे वाली, वा त्रिष्टुप् छन्द वाली स्तुतियां] याज्या [यज्ञ करने योग्य] होती है। (यत्र हतः, तत् प्रजाः अशनायन्तीः पिपासन्तीः संरुद्धाः स्थिताः बभूवुः) जहां वह [यज्ञ] मारा गया है [याज्या स्तोत्र ठीक नहीं होते], वहां प्रजायें भूख की मारी, प्यास की मारी और रुकी हुई स्थित होती हैं। (ताः ह एव एनाः एताभिः यथौकसं व्यवसाययाञ्चकार) उन ही इन [प्रजाओं] को इन [याज्या स्तुतियों] से घर घर के अनुसार उस [यजमान] ने उद्यमी बनाया। (तस्मात् एताः याज्याः भवन्ति, तस्मात् एताः याज्याः भवन्ति) इसलिये यह [प्रजायें] याज्या [पूजने योग्य] होती हैं इसलिये यह [प्रजायें] याज्या [पूजनीया] होती हैं ॥ १० ॥

भावार्थः—विचारशील पुरुष ही अपनी प्रजाओं अर्थात् सन्तानों और अन्य लोगों को उत्तम उत्तम उपायों द्वारा भूख प्यास से बचाकर सुखी रखते हैं ॥ १० ॥

विशेषः--सङ्केतित मन्त्र अर्थ सहित दिये जाते हैं।

१--आश्विन सूक्त--इमा उ वां दिविष्टय······। देखो गो० उ० ५। ३। विशेषः ४।

२--क्षेत्रवती ऋचा--शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः। शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः—अथर्व०

आवाहनमन्त्रयुक्तम् (क्षेत्रवत्यः) क्षेत्रपदयुक्ताः (अशनायन्तीः) अशन-क्यच् शतृ, ङीप्। अशनायन्त्यः। बुभुक्षिताः (पिपासन्तीः) पिपासन्त्यः। पिपासिताः (दीनाः) दुःखिताः (पाययाञ्चकार) जलपानं कारितवान् (तर्पयाञ्चकार) तर्पितवान् (अदीनायाम्) बलवत्याम्। शस्योत्पादिकायाम् (प्रतिष्ठास्यामहै) प्रतिष्ठिताः भविष्यामः (व्यवसाययाञ्चकार) व्यवसायमुद्योगं कारितवान् ॥

१६ । १० । १० ॥ (देवः) प्रकाशमान (सविता) लोकों का चलाने वाला सूर्य (त्रायमाणः) रक्षा करता हुआ (नः)हमें (शम्) सुखदायक हो, (विभातीः) जगमगाती हुयी (उषसः) प्रभात वेलायें (नः) हमें (शम्) सुखदायक (भवन्तु) हों। (पर्जन्यः) सींचने वाला मेघ (नः) हमें और (प्रजाभ्यः) प्रजाओं के लिये (शम्) सुखदायक (भवतु) हो, (शंभुः) मङ्गल दाता (क्षेत्रस्य) खेत का (पतिः) स्वामी (नः) हमें (शम्) सुखदायक (अस्तु) हो ॥

कण्डिका ११ ॥

अथातोनैकाहिकं श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति, प्रातःसवनेऽहीनमेव तत्सन्तन्वन्त्यहीनस्य सन्तत्यै । तद्यथा ह वा एकाहःसुत एवमहीनः सुतः, तद्यथैकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि यन्ति, एवमहीनस्य सुतस्याहानि सन्तिष्ठमानानि यन्ति । तद्यच्छ्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति, प्रातःसवनेऽहरेव तदह्नो रूपं कुर्वन्ति। अपरेणैव तदह्नापरमहरभ्यारभन्ते, तत्तथा न माध्यन्दिने सवने। श्रीवँ पृष्ठानि तानि तस्मिन्नेवावस्थितानि भवन्ति । एतेनैव विधिना तृतीयसवने न श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति ॥ ११ ॥

कण्डिका ११ ॥ अनैकाहिक वा अहीन अर्थात् अनेक दिनों में होने वाले यज्ञ का वर्णन ॥

(अथ अतः अनैकाहिकम्) अब यहाँ अनैकाहिक [वा अहीन अर्थात् अनेक दिनों में होने वाला वा सम्पूर्ण अङ्ग वाला यज्ञ कर्म कहा जाता है]। (श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति) आगामी दिन में होने वाले स्तोत्रिय [स्तोत्र] को आज होने वाले स्तोत्रिय के अनुरूप [छन्द, देवता आदि से सदृश] करते हैं। (प्रातःसवने अहीनम् एव तत् अहीनस्य सन्तत्यै सन्तन्वन्ति) प्रातःसवन में अहीन [बहुत दिनों में होने वाले वा सम्पूर्ण अङ्ग वाले यज्ञ] को ही तब अहीन के फैलाव के लिये फैलाते हैं [क० १५]। (तत् यथा ह वै एकाहः सुतः एवम् अहीनः सुतः) सो जैसे ही एकाह [एक दिन में होने वाला यज्ञ] निचोड़ा जाता है, वैसे ही अहीन [बहुत दिन में होने वाला यज्ञ] निचोड़ा जाता है। (तत् यथा एकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि यन्ति, एवम् अहीनस्य सुतस्य अहानि सन्तिष्ठमानानि यन्ति । सो जैसे एकाह यज्ञ के निचोड़े हुए सोम के

११--(अनैकाहिकम्) कालाट्ठञ् (पा० ४ । ३ । ११) एकाह--ठञ्, नञ्समासः । अनेकदिनवर्तमानं यज्ञकर्म । अहीननामकयज्ञः (श्वःस्तोत्रियम्) आगामिदिने क्रियमाणं स्तोत्रम् (अद्यस्तोत्रियस्य) अस्मिन् दिने क्रियमाणस्य स्तोत्रस्य (अनुरूपम्) छन्दोदेवतादिना सदृशम् (अहीनम्) गो० ब्रा० उ० २ । ८ । अहर्गणसाध्यसुत्याकम् । बहुदिनेषु क्रियमाणं यज्ञविशेषम् । सम्पूर्णाङ्गयज्ञम् (सन्तन्वन्ति) सम्यग् विस्तारयन्ति । अनुतिष्ठन्ति (एकाहः) राजाहःसखिभ्यष्टच् (पा० ५ । ४ । ६१) एकाहन्--टच् । उत्तमैकाभ्याञ्च (पा० ५ ।

[तीन] सवन साथ साथ वर्तमान होकर चलते हैं, वैसे ही अहीन यज्ञ के निचोड़े हुये सोम के दिन [दिनों में होने वाले यज्ञ कर्म] साथ साथ वर्तमान होकर चलते हैं। (तत् यत् श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति, प्रातःसवने अहः एव तत् अह्नः रूपं कुर्वन्ति) सो जब आगामी दिन में होने वाले स्तोत्रिय को आज होने वाले स्तोत्रिय के अनुरूप [समान रूप] करते हैं, प्रातः सवन में दिन को ही तब दिन के अनुरूप करते हैं। (अपरेण एव अह्ना तत् अपरम् अहः अभ्यारभन्ते, तत् तथा न माध्यन्दिने सवने) दूसरे ही दिन के साथ तब दूसरे दिन को आरम्भ करते हैं, सो वैसा माध्यन्दिन सवन में नहीं [आरम्भ करते]। (श्रीः वै पृष्ठानि तानि तस्मिन् एव अवस्थितानि भवन्ति) श्री ही पृष्ठ [स्तोत्र] हैं, वे [पृष्ठ] उस [माध्यन्दिन सवन] में ही ठहरे हुये हैं। (एतेन एव विधिना तृतीयसवने श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं न कुर्वन्ति) इस ही विधि से तीसरे सवन में आगामी दिन में होने वाले स्तोत्रिय को आज होने वाले स्तोत्रिय के अनुरूप नहीं करते हैं ॥ ११ ॥

भावार्थः—यज्ञों को यथा विधान करना चाहिये ॥ ११ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६ । १७ ॥

विशेषः २—(प्रातःसवनेऽहीनमेव तत् सन्तन्वन्त्यहीनस्य सन्तत्यै) ऐसा पाठ राजेन्द्रलाल मित्र एशियाटिक सोसैटी के पुस्तक से और आगे वाली कण्डिका १५ के पाठ से (प्रातःसवनेऽहीनस्य सन्तत्यै) जीवानन्द विद्यासागर के पाठ के स्थान पर शुद्ध किया है। (तद्यश्वः) के स्थान पर (तद्यच्छ्वः) ऐतरेय ब्राह्मण में है ॥

कण्डिका १२ ॥

अथात आरम्भणीया एव, ऋजुनीती नो वरुण इति मैत्रावरुणस्य। मित्रो नयतु विद्वानिति, प्रणेता वा एष होत्रकाणां, यन्मैत्रावरुणः, तस्मादेषा प्रणेत्रिमती [प्रणेतृमती] भवति, इन्द्रं वो विश्वतस्परीति ब्राह्मणाच्छंसिनः। हवामहे जनेभ्य इति, इन्द्रमेवैतयाहरहर्निर्ह्वयन्ते, न हैवेषां विहवेऽन्य इन्द्रं वृङ्क्ते, यत्रैवं विद्वान् ब्राह्मणाच्छंस्येतामहरहः शंसति। यत् सोम आ सुते नर इत्यच्छावाकस्य। इन्द्राग्नी अजोहवुरितीन्द्राग्नी एवैतयाहरहर्निर्ह्वयन्ते, न हैवैषां विहवेऽन्य इन्द्राग्नी वृङ्क्ते। यत्रैवं विद्वानच्छावाक एताम् अहरहः शंसति, ता वा एताः स्वर्गस्य लोकस्य नावः सन्तारण्यः। स्वर्गमेवैताभिर्लोकमनुसञ्चरन्ति ॥ १२ ॥

कण्डिका १२ ॥ अहीन [अहर्गण यज्ञ] में आरम्भणीया ऋचाओं का वर्णन ॥

(अथ अतः आरम्भणीयाः एव) अब यहां आरम्भणीया [अहर्गण यज्ञ की पहिली ऋचायें] ही हैं। (ऋजुनीती नो वरुणः इति मैत्रावरुणस्य) ऋजुनीती नो

---

४ । ९०) अहन् इत्यस्य अह्न इत्ययमादेशो न। एकस्मिन् दिने क्रियमाणो यज्ञः (सन्तिष्ठमानानि) सहवर्त्तमानानि (यन्ति) गच्छन्ति। अनुष्ठीयन्ते ॥

वरुणः ··· १ ऋ० १ । ९० । १ । यह ऋचा मैत्रावरुण ऋत्विज् की [आरम्भणीया] है। (मित्रो नयतु विद्वान् इति, एषः वै होत्रकाणां प्रणेता, यत् मैत्रावरुणः) मित्रो नयतु विद्वान् [यह उसी मन्त्र का दूसरा पाद है, उसमें नयतु ले चले—यह पद णीञ् = ले चलना, धातु से है] इसमे यह होता लोगों का प्रणेता [प्रवर्त्तक, ले चलने वाला] है, जो मैत्रावरुण ऋत्विज् है। (तस्मात् एषा प्रणेत्रिमती [प्रणेतृमती] भवति) इसलिये यह ऋचा प्रणेतृ [ले चलने वाले शब्द] वाली है। (इन्द्र वो विश्वतस्परि इति ब्राह्मणाच्छंसिनः) इन्द्रं वो विश्वतस्परि··· ··· २, अथर्व० २० । ३९ । १ । यह ब्राह्मणाच्छंसी की [आरम्भणीया] है। (हवामहे जनेभ्यः इति, इन्द्रम् एव एतया अहरहः निर्ह्वयन्त) हवामहे जनेभ्यः [यह उसी मन्त्र का दूसरा पाद है, उसमें हवामहे—हम बुलाते हैं—यह पद है] इस ऋचा से इन्द्र को ही दिन दिन वे बुलाते हैं। (एषां ह एव विहवे अन्यः इन्द्रं न वृङ्क्ते, यत्र एवं विद्वान् ब्राह्मणाच्छंसी एताम् अहरहः शंसति) इन [यजमानों] के विशेष आवाहन में दूसरा कोई इन्द्र को नहीं रोकता है, जहां ऐसा विद्वान् ब्राह्मणाच्छंसी इस ऋचा को दिन दिन बोलता है। (यत् सोम आ सुते नरः इति अच्छावाकस्य) यत् सोम आ सुते नरः ··· ३, ऋ० ७ । ९४ । १० । यह अच्छावाक ऋत्विज् की [आरम्भणीया] है। (इन्द्राग्नी अजोहवुः इति, इन्द्राग्नी एव एतया अहरहः निर्ह्वयन्ते) इन्द्राग्नी अजोहवुः [यह उस मन्त्र का दूसरा पाद है उसमें अजोहवुः—वे बुलाते हैं—यह पद है] इससे इन्द्र और अग्नि को ही इस ऋचा से दिन दिन वे बुलाते रहते हैं। (एषां ह एव विहवे इन्द्राग्नी न वृङ्क्ते यत्र एवं विद्वान् अच्छावाकः एताम् अहरहः शंसति) इन ही [यजमानों] के विशेष आवाहन में दूसरा कोई इन्द्र और अग्नि को नहीं रोकता है, जहां ऐसा विद्वान् अच्छावाक इस [ऋचा] को दिन दिन बोलता है। (ताः वै एताः स्वर्गस्य लोकस्य सन्तारण्यः नावः) वे ही यह [तीनों ऋचायें] स्वर्ग लोक की तरा देने वाली नावें हैं। (स्वर्गम् एव लोकम् एताभिः अनुसञ्चरन्ति) स्वर्ग लोक को ही इन [ऋचाओं] से वे निरन्तर चले जाते हैं ॥ १२ ॥

१२—(आरम्भणीयाः) अहर्गणे आरब्धुमर्हाः ऋचः (ऋजुनीती) सुपां सुलुक्० (पा० ७ । १ । ३९) तृतीयायाः पूर्वसवर्णदीर्घः । ऋजुनीत्या । सरलनयनेन (नः) अस्मान् (वरुणः) श्रेष्ठः (मित्रः) सर्वोपकारी (नयतु) गमयतु (प्रणेता) प्रवर्त्तकः (प्रणेतृमती) प्रणेतृवाचकशब्दवती (इन्द्रम्) परमैश्वर्य्यवन्तं परमात्मानम् (वः) युष्मभ्यम् (विश्वतः) सर्वेभ्यः (परि) सर्वतः (हवामहे) आह्वयामः (जनेभ्यः) प्राणिनां हिताय (निर्ह्वयन्ते) नितराम् आह्वयन्ते (एषाम्) यजमानानाम् (विहवे) विशेषावाहने (वृङ्क्ते) वर्जयति (अजोहवुः) आहूतवन्तः । आह्वयन्ते (सन्तारण्यः) सम्पारण्यः । सम्यक् पारनेत्र्यः (अनुसञ्चरन्ति) निरन्तरं गच्छन्ति ॥

भावार्थः—जहाँ यज्ञ में ऋत्विज् लोग मन्त्रों का प्रयोग ठीक२ करते हैं, वहाँ यजमान परमानन्द पाते हैं ॥ १२ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६ । ६ ॥

विशेषः २—शुद्धिपत्र नीचे है ।

अशुद्ध	शुद्ध	प्रमाण
प्रणेत्रिर्मती	प्रणेतृमती	ऐ० ब्रा० ६ । ६
आ सते	आ सुते	वेद और ऐ० ब्रा०
अच्छावाकस्येता	अच्छावाक एता	ऐ० ब्रा० ६ । ६

विशेषः ३—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् । अर्यमा देवैः सजोषाः ·· ऋ० १ । ९० । १ ॥ (वरुणः) श्रेष्ठ गुण वाला (मित्रः) सबका उपकारी, (विद्वान्), जानकार, (अर्यमा) न्यायकारी पुरुष, (देवैः) दिव्य गुण वाले विद्वानों से (सजोषाः) समान प्रीति करता हुआ (नः) हमको (ऋजुनीती) सीधी नीति से (नयतु) ले चले ॥

२—इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः—अथर्व० २० । ३९ । १, ऋ० १ । ७ । १०, साम० उ० ८ । १ । २ । [हे मनुष्यो !] (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले परमेश्वर] को (वः) तुम्हारे लिये और (विश्वतः जनेभ्यः) सब प्राणियों के लिये (परि) सब प्रकार (हवामहे) हम बुलाते हैं वह (अस्माकम्) हमारा (केवलः) सेवनीय (अस्तु) हो ॥

३—यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः । सप्तीवन्ता सपर्यवः—ऋ० ७ । ९४ । १० ॥ (यत्) जब (सोमे सुते) सोम [तत्त्वरस] निचुड़ने पर (सपर्यवः) सत्कार करने वाले (नरः) नर [नेता लोग] (सप्तीवन्ता) उत्तम घोड़ों वाले (इन्द्राग्नी) इन्द्र और अग्नि [सूर्य और अग्नि के समान राजा और मन्त्री] को (आ अजोहवुः) बुलाते हैं [तब वे दोनों सहायता करते हैं] ॥

कण्डिका १३ ॥

अथातः परिधानीया एव, ते स्याम देव वरुणेति, मैत्रावरुणस्य । इषं स्वश्च धीमहीति, अयं वै लोक इषमित्यसौ वै लोकः स्वरिति, उभावेवैनौ तौ लोकाच्चारभते । व्यन्तरिक्षमतिरदिति ब्राह्मणाच्छंसिनो विवृतृचम् । स्वर्गमेवैताभिर्लोकं विवृणोति । मदे सोमस्य रोचनेन्द्रो यदभिनद् वलमिति, सिषासवो ह वा एते यद् दीक्षिताः, तस्मादेषा वलवती भवति । उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहासतीः । अर्वाञ्चं नुनुदे वलमिति, सनिमेतेभ्य एतयावरुन्धे । इन्द्रेण रोचना दिवो दृढानि दृंहितानि च । स्थिराणि न पराणुद इति, स्वर्गमेवैतयाहर-

हलोंकमवरुन्धे । आहुं सरस्वतीवत्तोरित्यच्छावाकस्य । इन्द्राग्न्योरवो वृण इति, एतद् ह वा इन्द्राग्न्योः प्रियं धाम यद्वागिति, प्रियेणैवेनौ तद्धाम्ना समर्द्धयति । प्रियेणेव धाम्ना समृध्यते, य एवं वेद ॥ १३ ॥

कण्डिका १३ ॥ अहीन वा अहर्गण यज्ञ में परिधानीया अर्थात् समाप्ति वाली ऋचाओं का वर्णन ॥

(अथ अतः परिधानीयाः एव) अब यहाँ परिधानीया ही [समाप्ति वाली ऋचायें कही जाती हैं] । (ते स्याम देव वरुण इति, मैत्रावरुणस्य) ते स्याम देव वरुण ......१, ऋग्० ७ । ६६ । ६, यह मैत्रावरुण की [परिधानीया] है । (इषं स्वश्च धीमहि इति, अयं वै लोकः इषम् इति, असौ वै लोकः स्वः इति, उभौ एव एनौ तौ लोकात् च आरभते) इषं स्वश्च धीमहि--अन्न और सुख को हम धारण करें [यह उस मन्त्र का तीसरा पाद है], यह ही लोक अन्न है, वह ही लोक सुख है, इससे दोनों ही उन [दो लोकों] को इस लोक से वह अवश्य पाता है । (व्यन्तरिक्षमतिरत् इति ब्राह्मणाच्छंसिनः विवृतृचम्) व्यन्तरिक्षम् अतिरत्......अथर्व० २० । २८ । १—३, यह ब्राह्मणाच्छंसी का विवृतृच् [विवृ-खोलना, शब्द वाला तीन मन्त्रों का समूह, परिधानीया] है । (स्वर्गम् एव लोकम् एताभिः विवृणोति) स्वर्ग ही लोक को इन [तीन ऋचाओं] से वह खोल देता है [विवृ शब्द का अर्थ--खोलना--है, मन्त्र के वि शब्द से विवृ-खोलना-लिया है] (मदे सोमस्य रोचना, इन्द्रो यदभिनद् वलम् इति, सिषासवः ह वै एते यत् दीक्षिताः, तस्मात् एषा वलवती भवति) मदे सोमस्य रोचना, इन्द्रः यत् अभिनद् वलम् [तृच के पहिले मन्त्र के यह दूसरे और तीसरे पाद हैं, तीसरे पाद में वल शब्द है], देने की इच्छा वाले ही यह सब हैं जो दीक्षा पाये हुये हैं, इसलिये यह ऋचा वलवती [वल शब्द वाली] है । (उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः, अर्वाञ्चं नुनुदे वलम् इति, सनिम् एतेभ्यः एतया

१३--(परिधानीयाः) समाप्तिसाधनभूता ऋचः (इषम्) अन्नम् (स्वः) सुखम् (धीमहि) धारयामहे (लोकात्) अस्माल्लोकात् (च) अवधारणे (आरभते) आलभते । प्राप्नोति (वि) विविधम् । वियुक्तम् । (अतिरत्) पारं कृतवान् (विवृतृचम्) विवृशब्दयुक्त तृचम् (विवृणोति) विवृतं करोति (मदे) आनन्दे (सोमस्य) ऐश्वर्यस्य (रोचना) विभक्तेराकारः । रोचनया । प्रीत्या (इन्द्रः) परमैश्वर्यवान् परमात्मा (यत्) यदा (अभिनत्) व्यदारयत् (वलम्) हिंसकम् । विघ्नम् (सिषासवः) षणु दाने वा षण संभक्तौ—सनि उप्रत्ययः । सनीवन्तर्द्ध० (पा० ७ । २ । ४९) इटो विकल्पनाद् अभावपक्षे जनसनखनां० (पा० ६ । ४ । ४२) आत्वम् । सनितुं दातुं वेच्छवः (वलवती) वलशब्दयुक्ता ऋक् (उत्) ऊर्ध्वम् (गाः) वाणीः । विद्याः (आजत्) अज गतिक्षेपणयोः—लङ् । अगमयत् (अङ्गिरोभ्यः) विज्ञानिभ्यः (आविष्कृण्वन्) प्रकटयन् (गुहा) गुहायाम् । गुप्तावस्थायाम् (सतीः) विद्यमानाः (अर्वाञ्चम्)

अवरुन्धे) उद्गा आजदङ्गिरोभ्यः······[यह उस तृच का दूसरा मन्त्र है] इससे लाभ इन [दीक्षितों] के लिये इस [ऋचा] से वह प्राप्त करता है। (इन्द्रेण रोचना दिवो दृह्लानि दृंहितानि च स्थिराणि न पराणुदे इति, स्वर्गम् एव लोकम् एतया अहरहः अवरुन्धे) इन्द्रेण रोचना दिवः······[यह तृच का तीसरा मन्त्र है] स्वर्ग ही लोक को इस [ऋचा] से दिन दिन वह [यजमान] प्राप्त करता है। (आहं सरस्वतीवतोः, इति अच्छावाकस्य) आहं सरस्वतीवतोः··· ऋग्० ८। ३८। १०। यह अच्छावाक की [परिधानीया ऋचा] है। (इन्द्राग्न्योरवो वृणे, इति, एतत् ह वै इन्द्राग्न्योः प्रियं धाम यत् वाक् इति) इन्द्राग्न्योरवो वृणे, [यह उसी मन्त्र का दूसरा पाद है]; इन्द्र और अग्नि का यह ही प्रिय धाम है [मन्त्रोक्त—अवः—रक्षा ही धाम वा स्थान है], जो वाणी [सरस्वती] है। (प्रियेण एव धाम्ना एनौ तत् समर्धयति) प्रिय धाम से ही इन दोनों [इन्द्र और अग्नि] को तब वह [अच्छावाक] समृद्ध [सफल] करता है। (प्रियेण एव धाम्ना समृध्यते यः एवं वेद) प्रिय धाम से ही वह समृद्ध होता है, जो ऐसा विद्वान् है ॥ १३ ॥

भावार्थ :—कण्डिका १२ के समान है ॥ १३ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६। ७ ॥

विशेषः २—शुद्धिपत्र नीचे दिया जाता है ॥

अशुद्ध	शुद्ध	प्रमाण
इषांश्च	इषं	वेद तथा ऐ० ब्रा०
स्वधी०	स्वश्च धी०	,, ,,
व्यन्ततरिक्ष	व्यन्तरिक्ष	,, ,,
धामः	धाम	ऐतरेय ब्राह्मण

विशेषः ३—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—ते स्याम देव वरुण ते मित्र सूरिभिः सह। इषं स्वश्च धीमहि—ऋ० ७। ६६। ९, साम० उ० ४। १। ८ ॥ (देव) हे देव ! [विजय चाहने वाले वीर] (वरुण) हे वरुण ! [श्रेष्ठ] (मित्र) हे मित्र ! [सर्वोपकारी] (सूरिभिः सह) बुद्धिमानों सहित (ते ते) तेरे ही (स्याम) हम होवें और (इषम्) अन्न (च) और (स्वः) सुख (धीमहि) धारण करें ॥

अधोगतम् (नुनुदे) प्रेरितवान् (सनिम्) लब्धम् (इन्द्रेण) परमैश्वर्यवता परमात्मना (रोचना) रोचनानि। प्रकाशाः (दिवः) व्यवहारस्य (दृह्लानि) दृह वृद्धौ—क्तः। दृढीकृतानि (दृंहितानि) दृहि वृद्धौ—क्तः। वर्धितानि। विस्तारितानि (स्थिराणि) स्थितिशीलानि (न) निषेधे (पराणुदे) परा+णुद प्रेरणे क्विप्। परानोदनाय। दूरे प्रेरणाय (सरस्वतीवतोः) वाग्वतोः (अवः) रक्षणम् (आ वृणे) सर्वतः प्रार्थयामि (धाम्ना) स्थानेन (समर्धयति) समृद्धौ करोति ॥

२—अथ्य्ऽन्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद् वलम्—अथर्व० २०।२८।१—३, ऋग्० ८।१४।७–९, साम० उ० ८।१।तृच ६॥ (इन्द्रः) इन्द्र [बड़े ऐश्वर्यवान् परमात्मा] ने (सोमस्य) ऐश्वर्य के (मदे) आनन्द में (रोचना) प्रीति के साथ (अन्तरिक्षम्) आकाश को (वि अतिरत्) पार किया है, (यत्) जब कि उसने (वलम्) वल [हिंसक विघ्न] को (अभिनत्) तोड़ डाला॥ १॥

३—उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः। अर्वाञ्चं नुनुदे वलम्॥ (गुहा) गुहा [गुप्त अवस्था] में (सतीः) वर्तमान (गाः) वाणियों को (आविः कृण्वन्) प्रकट करते हुये उस [परमेश्वर] ने (अङ्गिरोभ्यः) विज्ञानी पुरुषों के लिये (उत् आजत्) ऊँचा पहुँचाया और (वलम्) वल [हिंसक विघ्न] को (अर्वाञ्चम्) नीचे (नुनुदे) हटाया है॥ २॥

४—इन्द्रेण रोचना दिवो दृह्लानि दृंहितानि च। स्थिराणि न पराणुदे॥ (इन्द्रेण) इन्द्र [बड़े ऐश्वर्य वाले परमात्मा] कर के (दिवः) व्यवहार के (स्थिराणि) ठहराऊ (रोचना) प्रकाश (न पराणुदे) न हटने के लिये (दृह्लानि) पक्के किये गये (च) और (दृंहितानि) बढ़ाये गये [फैलाये गये] हैं॥ ३॥

५—आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे। याभ्यां गायत्रमृच्यते—ऋ० ८।३८।१०॥ (अहम्) मैं (सरस्वतीवतोः) सरस्वती [विज्ञानवती वेद वाणी] वाले (इन्द्राग्न्योः) इन्द्र और अग्नि [सूर्य और अग्नि के समान तेजस्वी राजा और मन्त्री] की (अवः) रक्षा (आ वृणे) चाहता हूँ, (याभ्यां) जिन दोनों के लिये (गायत्रम्) गायत्र [गाने योग्य वैदिक स्तोत्र] (ऋच्यते) गाया जाता है॥

कण्डिका १४॥

उभय्यो होत्रकाणां परिधानीया भवन्ति, अहीनपरिधानीयाश्चैकाहिन्यस्य [न्यश्च] तत एकाहिकीभिरेव मैत्रावरुणः परिदधाति, तेनास्माल्लोकान्न प्रच्यवते। आहिनीकीभिरच्छावाकः स्वर्गस्य लोकस्याप्त्यै, उभयीभिर्ब्राह्मणाच्छंसी, एवमसावुभौ व्यन्वारभमाण एतीमञ्च लोकममुञ्च। अथोऽहीनञ्चैकाहञ्च, अथो संवत्सरञ्चाग्निष्टोमञ्च, अथो मैत्रावरुणञ्चाच्छावाकञ्च, एवमसावुभौ व्यन्वारभमाण एति। अथ तत एकाहिकीभिरेव तृतीयसवने होत्रकाः परिद[1]धति, तेनास्माल्लोकान्न प्रच्यवते। आहिनीकीभिरच्छावाकः स्वर्गस्य लोकस्य समष्टचै। कामं तद्धोता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः। यद्वै होता तद्धोत्रकाः, प्राणो वै होता, अङ्गानि होत्रकाः, समानो वा अयं प्राणोऽङ्गान्यनुसञ्चरन्ति। तस्मात् तत् कामं होता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः। यद्वै होता तद्धोत्रकाः, आत्मा वै होता, अङ्गानि होत्रकाः, समानो वा इमेऽङ्गानामन्ताः, तस्मात् तत् कामं होता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः। यद्वै होता तद्धोत्रकाः, सूक्तान्तैर्होता परिदधाति, अथ समान्य एव होत्रकाणां परिधानीया भवन्ति॥ १४॥

१. पू. सं. "परिदधाति" इति पाठः॥ सम्पा०॥

कण्डिका १४ ॥ अहीन और एकाह यज्ञों में होत्रक लोगों की दो प्रकार की परिधानीया ऋचायें ॥

(उभय्यः होत्रकाणां परिधानीयाः भवन्ति, अहीनपरिधानीयाः च एकाहिन्यस्य = एकाहिन्यः च) दो प्रकार की होत्रक लोगों [तीन सहायक होताओं] की परिधानीया [समाप्ति वाली ऋचायें] होती हैं, अहीनपरिधानीया [बहुत दिन वाले यज्ञ की परिधानीया] और एकाहिनी [एक दिन वाले यज्ञ की] । (ततः एकाहिकीभिः एव मैत्रावरुणः परिदधाति, तेन अस्मात् लोकात् न प्रच्यवते) इसलिये एकाहिकी [एक दिन में होने वाले यज्ञ की ऋचाओं] से ही मैत्रावरुण ऋत्विज् परिधानीया बोलता है, इस कारण इस लोक से वह [यजमान] नहीं गिरता है । (आहिनीकीभिः अच्छावाकः स्वर्गस्य लोकस्य आप्त्यै) आहिनीकी [बहुत दिन में होने वाले यज्ञ की ऋचाओं] से अच्छावाक ऋत्विज् स्वर्ग लोक की प्राप्ति के लिये [परिधानीया बोलता है] । (उभयीभिः ब्राह्मणाच्छंसी, एवम् असौ उभौ इमं च अमुं च लोकं व्यन्वारभमाणः एति) दोनों प्रकार वाली [ऋचाओं] से ब्राह्मणाच्छंसी [परिधानीया बोलता है], इस प्रकार से वह [यजमान] दोनों इस और उस लोक को निरन्तर पाता हुआ चलता है । (अथो अहीनं च एकाहं च, अथो संवत्सरं च अग्निष्टोमं च, अथो मैत्रावरुणं च अच्छावाकं च, एवम् असौ उभौ व्यन्वारभमाणः एति) फिर अहीन [बहुत दिनों में होने वाले] और एकाह [एक दिन में होने वाले यज्ञ] को, फिर संवत्सर और अग्निष्टोम [यज्ञ] को, फिर मैत्रावरुण और अच्छावाक [ऋत्विज्] को, इस प्रकार वह [यजमान] दो दो को ग्रहण करता हुआ चलता है ॥

(अथ ततः एकाहिकीभिः एव तृतीयसवने होत्रकाः परिदधति तेन अस्मात् लोकात् न प्रच्यवन्ते) फिर तब एकाहिकी [एक दिन में होने वाले यज्ञ की ऋचाओं] से ही तीसरे सवन में होत्रक लोग परिधानीयायें बोलते हैं, इस कारण इस लोक से वह [यजमान] नहीं गिरता । (आहिनीकीभिः अच्छावाकः स्वर्गस्य लोकस्य समष्टयै) आहिनीकी [बहुत दिन में होने वाले यज्ञ की ऋचाओं] से अच्छावाक स्वर्ग लोक की प्राप्ति के लिये [परिधानीया बोलता है] । (तत् होता कामं शंसेत्, यत् होत्रकाः पूर्वेद्युः शंसेयुः) तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहिले दिन बोले थे । (यत् वै होता, तत् होत्रकाः) जो ही होता ऋत्विज् है वे ही होत्रक लोग हैं । (प्राणः वै होता,

---

१४--(उभय्यः) उभय--ङीप् द्विविधाः (एकाहिन्यस्य) लेखप्रमादः । एकाहिन्यश्च । एकाह--इनिः, ङीप्, जसि रूपम् । एकाहिन्यः । एकाहयज्ञे विहिता ऋचः (एकाहिकीभिः) एकाह--ठन्, ङीप् । ऐकाहिकाभिः । एकाहविहिताभिः (परिदधाति) परिधानीयां शंसति (आहिनीकीभिः) अहीन --ठक्, ङीप्, वर्णव्यत्ययः । आहीनिकीभिः । अहीनेषु अहर्गणेषु विहिताभिः (व्यन्वारभमाणः) लस्य रः । विविधमालभमानः स्पृशन् (एति) गच्छति । प्राप्नोति (कामम्) यथाकामम् । यथेष्टम् (समानः) तुल्यः (पूर्वेद्युः) सद्यः

अङ्गानि होत्रकाः, अयं प्राणः वै समानः अङ्गानि अनुसञ्चरन्ति=अनुसञ्चरति) प्राण [के तुल्य] ही होता ऋत्विज् है, और अङ्ग होत्रक लोग हैं, यह प्राण ही समान [एक रस फैलने वाला होकर अङ्गों में घूमता रहता है। (तस्माद् तद् कामं होता शंसेत् यत् होत्रकाः पूर्वेद्युः शंसेयुः) इसलिये तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहिले दिन बोले थे। (यत् वै होता तत् होत्रकाः) जो ही होता ऋत्विज् है वे ही होत्रक लोग हैं। (आत्मा वै होता, अङ्गानि होत्रकाः, अङ्गानां वै इमे अन्ताः समानः=समानाः) आत्मा ही होता ऋत्विज् है, और अङ्ग होत्रक लोग हैं, अङ्गों के यह अन्त [हाथ पैर अङ्गुली आदि] एक से हैं। (तस्मात् तत् होता कामं शंसेत् यत् होत्रकाः पूर्वेद्युः शसेयुः) इसलिये तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहले दिन बोले थे। (यत् वै होता तत् होत्रकाः, सूक्तान्तैः होता परिदधाति) जो ही होता ऋत्विज् है, वे ही होत्रक लोग हैं, [इसलिये] सूक्त के पिछले [मन्त्रों] से होता परिधानीया बोलता है। (अथ होत्रकाणाम् एव परिधानीयाः समान्यः भवन्ति) फिर होत्रक लोगों की परिधानीया भी समान [एक साथ बोली हुई] होती हैं ॥ १४ ॥

भावार्थः—जहाँ विद्वान् ऋत्विज् लोग अपना अपना काम यथाविधि करते हैं, वह यज्ञ सर्वथा सुफल होता है ॥ १४ ॥

विशेषः—इस कण्डिका को क० १३ और ऐतरेय ब्राह्मण ६। ८ से मिलाओ।

कण्डिका १५ ॥

यः श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवनेऽहीनमेव तत्सन्तन्वन्ति, अहीनस्य सन्तत्यै। त एते होत्रकाः प्रातःसवने षडहस्तोत्रियं शस्त्वा माध्यन्दिनेऽहीनसूक्तानि शंसन्त्या सत्यो यातु मघवाँ ऋजीषीति। सत्यवन्[1] मैत्रावरुणो अस्मा इदु प्रतवसे तुरायेति ब्राह्मणाच्छंसी। शासद्वह्निर्दुहितुर्नप्त्य गादित्यच्छावाकः। तदाहुः कस्मादच्छावाको वह्निवदेतद् सूक्तमुभयत्र शंसति, स पराक्षु चैवाह सर्वाक्षु चेति। वीर्य्यवान् वा एष बह्वृचः, यदच्छावाकः। वहति ह वै वह्निर्धुरः, यासु युज्यते। तस्मादच्छावाको वह्निवदेतद् सूक्तमुभयत्र शंसति, स पराक्षु चैवाह सर्वाक्षु चेति। तानि पञ्चस्वहःसु शस्यन्ते। चतुर्विंशेऽभिजिति विषुवति विश्वजिति महाव्रते तान्येतान्यहीनसूक्तानीत्याचक्षते। न ह्येषु किञ्चन हीयते, पराञ्चि ह वा एतान्यहान्यभ्यावर्त्तीनि भवन्ति। तस्मादेतान्येतेष्वहःसु शस्यन्ते। यदेनानि शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम्। यद्वेवैतानि शंसति, इन्द्रमेवैतैर्निर्ह्वयन्ते, यथा ऋषभं वासितायै ते वै देवाश्च ऋषयश्चाब्रुवन्, समानेन

परुत्परार्यैषमः० (पा० ५। ३। २२) पूर्व—एद्युस्। पूर्वदिने (सूक्तान्तैः) सूक्तानाम् अन्तिमाभिर्ऋग्भिः (समान्यः) तुल्याः ॥

---

१. पू. सं. 'सत्यवान्' इति पाठः ॥ सम्पा० ॥

यज्ञꣳ सन्तन्वामहा इति। तदेतद्यज्ञस्य समानमपश्यत्। समानां प्रगाथां समानीः प्रतिपदः समानानि सूक्तानि ओकःसारी वा इन्द्रो यत्र वा इन्द्रः पूर्वं गच्छति, गच्छत्येव तत्रापरं यज्ञस्यैव सेन्द्रतायै ॥ १५ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणोत्तरभागे पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥

कण्डिका १५ ॥ यज्ञों में अच्छावाक ऋत्विज् के विशेष स्तोत्र ॥

(यः श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति, प्रातःसवने अहीनम् एव तत् अहीनस्य सन्तत्यै सन्तन्वन्ति) जब आगामी दिन में होने वाले स्तोत्रिय [स्तोत्र] को आज होने वाले स्तोत्रिय के अनुरूप [छन्द, देवता आदि से सदृश] करते हैं, प्रातःसवन में अहीन [बहुत दिनों में होने वाले यज्ञ] को ही तब अहीन [पूर्ण व्यवहार] के फैलाव के लिए फैलाते हैं [कण्डिका ११ तथा ऐ० ब्रा० ६ । १७]। (ते एते होत्रकाः प्रातःसवने षडहस्तोत्रियं शस्त्वा माध्यन्दिने अहीनसूक्तानि शंसन्ति) वे ही यह होत्रक लोग प्रातःसवन में छह दिन वाले यज्ञ के स्तोत्रिय बोलकर माध्यंदिन सवन में अहीन [बहुत दिनों में होने वाले यज्ञ] के सूक्तों को बोलते हैं— (आ सत्यो यातु मघवान् ऋजीषी इति, सत्यवत् मैत्रावरुणः, अस्मा इदु प्र तवसे तुराय इति, ब्राह्मणाच्छंसी, शासद् वह्निर्दुहितुर्नप्त्यं गात् इति, अच्छावाकः) आ सत्यो यातु मघवाँ ऋजीषी··· अथर्व० २० । ७७ । १—८, इस सत्यवत् [सत्य शब्द वाले आठ मन्त्र के सूक्त] को मैत्रावरुण [बोलता है]। (अस्मा इदु प्र तवसे तुराय··· अथर्व० २० । ३५ । १—१६ इस [सोलह मन्त्र वाले सूक्त] को ब्राह्मणाच्छंसी [बोलता है]। (शासद् वह्निर्दुहितुर्नप्त्यं गात् इति··· ऋग्० ३ । ३१ । १—२२, इस [बाईस मन्त्र वाले सूक्त] को अच्छावाक [बोलता है] ॥

(तत् आहुः, कस्मात् अच्छावाकः वह्निवत् एतत् सूक्तम् उभयत्र शंसति सः पराक्षु च एव सर्वाक्षु च आह इति) वे कहते हैं—किसलिये अच्छावाक वह्निवत् [वह्निशब्द वाले] इस सूक्त को दो जगह बोलता है, [अर्थात्] आवृत्ति रहित [चतुर्विंश आदि यज्ञों] में और भी आवृत्ति वाले [षडह आदि यज्ञों] में बोलता है। [समाधान] (वीर्यवान् वै एषः बह्वृचः, यत् अच्छावाकः वह्नेः धुरः ह वै वहति यासु

१५–(यः) यत्। यदा (मघवान्) धनवान् (ऋजीषी) ऋजीष–इनिः। सरलस्वभावः। (सत्यवत्) सत्यशब्दयुक्तं सूक्तम् (अस्मै) संसारहिताय (इत्) एव (उ) विचारे (तवसे) बलाय (तुराय) त्वर त्वरणे—कः। वेगवते (शासत्) शासु अनुशिष्टौ—शतृ। जक्षित्यादयः षट् (पा० ६ । १ । ६) अभ्यस्तसंज्ञात्वात् नुमभावः। अनुशासनं कुर्वन् (वह्निः) वोढा। गृहवाहकः (दुहितुः) नप्तृनेष्टृत्वष्टृ० (उ० २ । ९५) दुह प्रपूरणे –तृच्। इडागमः। सुखस्य पूरयित्र्याः कन्यायाः (नप्त्यम्) नप्तृ–यत् स्वार्थे। रलोपः। नप्तारम्। दौहित्रम्–निरु० ३ । २१। दुहितृपुत्रम् (गात्) अगमत्। प्राप्नोति। (पराक्षु) परा–अञ्चु गतिपूजनयोः–क्विन्। परा अञ्चति गच्छतीति पराक्। आवृत्तिरहितेषु चतुर्विंशादिषु अहस्सु (आह) ब्रवीति (सर्वाक्षु)

युज्यते) सामर्थ्यं वाला ही यह बहुत ऋचायें जानने वाला है जो अच्छावाक है और वह वह्लि [बोझ ले चलने वाले] के बोझों को ही ले जाता है, जिन [बोझों] में वह जोड़ा जाता है। (तस्मात् अच्छावाकः वह्लिवत् एतत् सूक्तम् उभयत्र शंसति, सः पराक्षु च एव सर्वाक्षु च आह इति) इसलिये अच्छावाक वह्लिवत् [वह्लि शब्द वाले] इस सूक्त को दो जगह बोलता है, [अर्थात्] आवृत्ति रहित [चतुर्विंश आदि यज्ञों] में और भी आवृत्ति वाले [षडह आदि यज्ञों] में बोलता है। (तानि पञ्चसु अहःसु शस्यन्ते, चतुर्विंशे अभिजिति विषुवति विश्वजिति महाव्रते तानि एतानि अहीनसूक्तानि इति आचक्षते हि एषु किंचन न हीयते) वे [सूक्त] पाँच दिन [यज्ञों] में बोले जाते हैं, [अर्थात्] चतुर्विंश में, अभिजित् में, विषुवान् में, विश्वजित् में और महाव्रत में, वे ही यह अहीन [बहुत दिन रहने वाले वा हीनता रहित यज्ञ के] सूक्त हैं—ऐसा कहते हैं, क्योंकि इन [सूक्तों] में कुछ भी [अङ्ग] नहीं छोड़ा जाता है। (पराञ्चि ह वै एतानि अहानि अभ्यावर्तीनि भवन्ति) आवृत्ति रहित ही यह दिन आवृत्ति वाले होते हैं। (तस्मात् एतानि एतेषु अहःसु शस्यन्ते) इसलिये यह [सूक्त] इन दिनों में बोले जाते हैं। (यत् एतानि शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम्) जो वे इनको बोलते हैं, वह स्वर्ग लोक का रूप [चिह्न] है। (यत् उ एव एतानि शंसति [शंसन्ति] इन्द्रम् एव निर्ह्वयन्ते, यथा ऋषभं वासितायै) जो ही इन [सूक्तों] को वे बोलते हैं, इन्द्र को ही इनसे वे बुलाते हैं, जैसे गतिमान् [पुरुषार्थी वीर] को निवास करायी हुई प्रजा के लिये [बुलाते हैं] [ऐ० ब्रा० ६ । १८]॥

(ते वै देवाः च ऋषयः च अब्रुवन्, समानेन यज्ञं सन्तन्वामहै इति) वे ही देव [विजयी पुरुष] और ऋषि लोग [दूरदर्शी पुरुष] बोले—एक से विधान से यज्ञ को हम फैलावें। (तत् एतत् यज्ञस्य समानम् अपश्यत् [अपश्यन्], समानां प्रगाथां समानीः प्रतिपदः समानानि सूक्तानि) सो यह ही यज्ञ के एक से विधान को उन्होंने देखा—अर्थात् एक सी प्रगाथा को, एक सी आरम्भणीया ऋचाओं को और एक से सूक्तों को। (ओकःसारी वै इन्द्रः, यत्र वै इन्द्रः पूर्वं गच्छति तत्र यज्ञस्य एव सेन्द्रतायै अपरम् एव गच्छति) घर घर पहुँचने वाला ही इन्द्र है जहाँ ही इन्द्र पहिले घर जाता है, वहाँ यज्ञ में इन्द्र सहित विद्यमानता के लिये दूसरे [घर] भी जाता है [ऐ० ब्रा० ६ । १७] ॥ १५ ॥

सर्व-अञ्चु गतिपूजनयोः-क्विन्। सर्वम् अञ्चति गच्छतीति सर्वाक्। आवृत्तिसहितेषु षडहगतेषु अहःसु (वीर्यवान्) शक्तिमान् (बह्वृचः) बह्वीनाम् ऋचामध्येता (धुरः) भारान् (हीयते) त्यज्यते (पराञ्चि) आवृत्तिरहितानि (अभ्यावर्तीनि) आवृत्तिसहितानि (ऋषभम्) ऋषिवृषिभ्यां कित् (उ० ३ । १२३) ऋष गतौ दर्शने च--अभच्, कित्। गतिमन्तं पुरुषार्थिनम् (वासितायै) वस निवासे—णिच्—क्तः, टाप्। निवासितायै प्रजायै (समानेन) सदृशेन विधानेन (प्रतिपदः) आरम्भणीया ऋचः (ओकःसारी) गृहेषु सञ्चरणशीलः (सेन्द्रतायै) इन्द्रेण सह वर्तमानतायै ॥

भावार्थ:--ऋत्विज् लोग समय के अनुकूल मन्त्रों से देवताओं का आवाहन करें ॥ १५ ॥

विशेष: १--इस कण्डिका को ऐ० ब्रा० ६ । १७, । ६ । १८ से मिलाओ ॥

विशेष: २--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ।

१--आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः । तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः--अथर्व० २० । ७७ । १--८, ऋ० ४ । १६ । १--८ ॥ (सत्यः) सच्चा [सत्यवादी, सत्यकर्मी]. (मघवान्) महाधनी, (ऋजीषी) सरल स्वभाव वाला [राजा] (आ यातु) आवे और (अस्य) इस [राजा] के (हरयः) मनुष्य (नः) हमारे (उप द्रवन्तु) पास आवें । (तस्मै) उसके लिये (इत्) ही (सुदक्षम्) सुन्दर बल वाला (अन्धः) अन्न (सुषुम) हमने सिद्ध किया है, (गृणानः) उपदेश करता हुआ वह (इह) यहाँ (अभिपित्वम्) मेल मिलाप (करते) करे ॥ [सूक्त में आठ मन्त्र हैं, शेष के लिये वेद देखो] ॥

२--अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय । ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा--अथर्व० २० । ३५ । १--१६ ऋ० १ । ६१ । १--१६ ॥ (अस्मै) इस [संसार] के हित के लिए (इत्) ही (उ) विचार पूर्वक (तवसे) बल के निमित्त, (तुराय) फुर्तीले (माहिनाय) पूजनीय, (ऋचीषमाय) स्तुति के समान गुण वाले, (अध्रिगवे) वे रोग गति वाले, (इन्द्राय) इन्द्र [बड़े ऐश्वर्य वाले सभापति] के लिए (स्तोमम्) स्तुति को (ओहम्) पूरे विचार को और (राततमा) अत्यन्त देने योग्य (ब्रह्माणि) धनों को (प्रयः न) तृप्ति करने वाले अन्न के समान (प्र हर्मि) मैं आगे लाता हूँ [सूक्त में १६ मन्त्र हैं, शेष के लिए वेद देखो] ॥

३--शासद् वह्निर्दुहितुर्नप्त्यं गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन् । पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे--ऋ० ३ । ३१ । १--२२ ॥ (विद्वान्) जानकार (वह्निः) वह्नि [घर का चलाने वाला पिता] (ऋतस्य) सत्य नियम के (दीधितिम्) धारण करने वाले [जामाता] को (शासत्) शिक्षा देता हुआ और (सपर्यन्) पूजता हुआ (दुहितुः) पुत्री से (नप्त्यम्) नाती [नाती के समान दोहते] को (गात्) पाता है, (यत्र) जहाँ [गृहस्थ व्यवहार में] (दुहितुः) पुत्री के (सेकम्) सेचन [सींचे हुए पुत्र] को (ऋञ्जन्) समर्थ पाता हुआ (पिता) वह पिता (शग्म्येन) सुखी (मनसा) मन के साथ (सं दधन्वे) संगत होता है, [अर्थात् पुत्रहीन पिता बेटी से दोहते को लेकर नाती के समान अपना दायभागी करता और सुखी होता है ॥ यह मन्त्र निरु० ३ । ४ और ५ में व्याख्यात है । सूक्त में २२ मन्त्र हैं, शेष के लिए वेद देखो] ॥

इति श्रीमद्राजाधिराज-प्रथितमहागुणमहिम-*श्रीसयाजीराव-गायकवाडा-धिष्ठित*-बड़ोदेपुरीगत-श्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु

लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदास त्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्योत्तरभागे पञ्चमः प्रपाठकः समाप्तः ॥

अयं प्रपाठकः प्रयागनगरे फाल्गुनमासे शुक्लपक्षे पञ्चम्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे समाप्तिमगात् ॥

मुद्रितम्—कार्तिककृष्ण ८ संवत् १९८० वि० ता० २१ अक्टूबर सन् १९२४ ई० ॥

अथ षष्ठः प्रपाठकः ॥

कण्डिका १ ॥

ओम् । तान्वा एतान् सम्पातान् विश्वामित्रः प्रथममपश्यत्, एवा त्वामिन्द्र वज्रिन्नत्र, यन्न इन्द्रो जुजुषे यच्च वष्टि कथा महामवृधत् कस्य होतुरिति । तान् विश्वामित्रेण दृष्टान् वामदेवो असृजत । स हेक्षाञ्चक्रे विश्वामित्रो यान् वाहं सम्पातानदर्शंस्तान्वामदेवो असृजत । कानि न्वहं हि सूक्तानि सम्पातांस्तत्प्रतिमान् सृजेयमिति । स एतानि सूक्तानि सम्पातांस्तत्प्रतिमानसृजत, सद्यो ह जातो वृषभः कनीन, उदु ब्रह्माण्यैरत श्रवस्याभितष्टेव दीधया मनीषामिति विश्वामित्रः । इन्द्रः पूर्भिदातिरद्दासमर्कैर्य एक इद्धव्यश्चर्षणीनां यस्तिग्मशृङ्गो वृषभो न भीम इति वसिष्ठः । इमामू षु प्रभृतिं सातये धा इच्छन्ति त्वा सोम्यासः सखायः शासद्वह्नि-र्दुहितुर्नप्त्यङ्गादिति भरद्वाजः । एतैर्वै सम्पातैरेत ऋषय इमान् लोकान् समपतन् । तद्यत्समपतन्, तस्मात् सम्पाताः, तत् सम्पातानां सम्पातत्वम् । ततो वा एतांस्त्रीन् सम्पातान् मैत्रावरुणो विपर्य्यासमेकैकमहरहः शंसति, एवा त्वामिन्द्र वज्रिन्नत्रेति प्रथमेऽहनि, यन्न इन्द्रो जुजुषे यच्च वष्टीति द्वितीये, कथा महामवृधत् कस्य होतु-रिति तृतीये । त्रीनेव सम्पातान् ब्राह्मणाच्छंसी विपर्य्यासमेकैकमहरहः शंसति, इन्द्रः पूर्भिदातिरद्दासमर्कैरिति प्रथमेऽहनि, य एक इद्धव्यश्चर्षणीनामिति द्वितीये, यस्तिग्मशृङ्गो वृषभो न भीम इति तृतीये । त्रीनेव सम्पातानच्छावाको विपर्या-समेकैकमहरहः शंसति, इमामू षु प्रभृतिं सातये धा इति प्रथमेऽहनि, इच्छन्ति त्वा सोम्यासः सखाय इति द्वितीये, शासद्वह्निर्दुहितुर्नप्त्यङ्गादिति तृतीये । तानि वा एतानि नव त्रीणि चाहरहः शंस्यानि । तानि द्वादश भवन्ति । द्वादश ह वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिर्यज्ञः, तत् संवत्सरं प्रजापतिं यज्ञमाप्नोति । तस्मिन् संवत्सरे प्रजापतौ यज्ञे अहरहः प्रतितिष्ठन्तो यन्ति, प्रतितिष्ठन्ते । इदं सर्वमनु प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । तान्यन्तरेणावापमावपेरन्, अन्यूङ्खा विराजश्चतुर्थेऽहनि, वैमदीश्च पङ्क्तीः पञ्चमे, पारुच्छेपीः षष्ठेऽथ यान्यन्यानि महास्तोत्राण्यष्टर्चान्यावपेरन् ॥ १ ॥

कण्डिका १ ॥ अहीन यज्ञ में सम्पात सूक्तों का वर्णन ॥

(ओम्) ओम् [हे रक्षक परमेश्वर] । (तान् वै एतान् सम्पातान् विश्वामित्रः प्रथमम् अपश्यत्, एवा त्वामिन्द्र वज्रिन्नत्र, यन्न इन्द्रो जुजुषे यच्च वष्टि, कथा

महामवृधत् कस्य होतुः—इति) उन ही इन सम्पातों [भली भाँति प्राप्ति योग्य वा ऐश्वर्ययुक्त ज्ञान वाले सूक्त विशेषों] को विश्वामित्र [सब के मित्र वा सब के प्यारे ऋषि] ने पहिले ही पहिले देखा [विचारा]—एवा त्वामिन्द्र······ऋ० ४ । १६ । १—११, यन्न इन्द्रो जुजुषे यच्च वष्टि·····ऋ० ४ । २२ । १—११, और कथा महामवृधत् कस्य होतुः······ऋ० ४ । २३ । १—११ । (विश्वामित्रेण दृष्टान् तान् वामदेवः असृजत) विश्वामित्र के देखे हुए उन [तीन सम्पातों] को वामदेव [श्रेष्ठ विद्वान् ऋषि] ने प्रकट कर दिया । (सः ह विश्वामित्रः ईक्षाञ्चक्रे, अहं वा यान् सम्पातान् अदर्शम् तान् वामदेवः असृजत) उस ही विश्वामित्र ने देखा [विचारा]—मैंने जिन सम्पातों को देखा था, इनको वामदेव ने प्रकट कर दिया । (कानि नु अहं सूक्तानि हि तत्प्रतिमान् सम्पातान् सृजेयम् इति) कौन से सूक्तों को अब मैं उनके सदृश सम्पात प्रकट करूं ।

(सः एतानि सूक्तानि तत्प्रतिमान् सम्पातान् असृजत—सद्यो ह जातो वृषभः कनीनः, उदु ब्रह्माण्यैरत श्रवस्या, अभि तष्टेव दीधया मनीषाम् इति विश्वामित्रः, इन्द्रः पूर्भिदातिरद्दासमर्कैः, य एक इद्धव्यश्चर्षणीनाम्, यस्तिग्मशृङ्गो वृषभो न भीमः इति वसिष्ठः, इमामू षु प्रभृतिं सातये धाः, इच्छन्ति त्वा सोम्यासः सखायः, शासद् वह्निर्दुहितुर्नप्त्यं गात् इति भरद्वाजः) उसने इन सूक्तों को उनके सदृश सम्पात प्रकट किया—सद्यो ह जातो वृषभो कनीनः······ऋ० ३ । ४८ ।१—५, उदु ब्रह्माण्यैरत श्रवस्या····ऋ० ७ । २३ । १—६, अभि तष्टेव दीधया मनीषाम्······ऋ० ३ । ३८ । १—१०, इन [तीन सूक्तों] के विश्वामित्र [ऋषि] हैं, इन्द्रः पूर्भिदातिरद्दासमर्कैः—ऋ० ३ । ३४ । १—११, यः एकइद् धव्यश्चर्षणीनाम्—ऋ० ६ । २२ । १—११, यस्तिग्मशृङ्गो वृषभो न भीमः—ऋ० ७ । १६ । १—११, इन [तीन सूक्तों] के वसिष्ठ [ऋषि] हैं, इमामू षु प्रभृतिं सातये धाः—ऋ० ३ । ३६ । १—६, इच्छन्ति त्वा सोम्यासः सखायः—ऋ० ३ । ३१ । १—२२, शासद् वह्निर्दुहितुर्नप्त्यं गात्······ऋ० ३ । ३० । १—२२, इन [तीन सूक्तों] के भरद्वाज [ऋषि] हैं । (एतैः वै सम्पातैः एते ऋषयः इमान् लोकान् समपतन्) इन ही सम्पातों [प्राप्ति योग्य ज्ञानों] से इन ऋषियों ने इन लोकों को पाया । (तत् यत् समपतन् तस्मात् सम्पाताः, तत् सम्पातानां सम्पातत्वम्) सो जो उन्होंने [लोकों को] अच्छे प्रकार पाया, इसी से वे सम्पात [अच्छे प्रकार पाने योग्य ज्ञान] हैं, वह ही सम्पातों का सम्पातत्व [अच्छे पाने योग्य धर्म है] । (ततः वै एतान् त्रीन् सम्पातान् मैत्रावरुणः विपर्य्यासम् एकैकम् अहरहः शंसति, एवा त्वामिन्द्र वज्रिन्नत्र इति—प्रथमे अहनि, यन्न इन्द्रो जुजुषे यच्च वष्टि इति द्वितीये, कथा महामवृधत् कस्य होतुः इति तृतीये) फिर ही इन तीन सम्पातों

१—(सम्पातान्) सम्+पत गतौ ऐश्वर्ये च—घञ्, अथवा पा रक्षणे—क्तः । सम्पतनशीलान् । सम्यक् प्राप्तव्यान् सम्यगैश्वर्ययुक्तान् बोधान् । सूक्तविशेषान् (अपश्यत्) दृष्टवान् । वेदमध्ये ज्ञातवान् (जुजुषे) जुषते । सेवते (वष्टि) कामयते (कथा) केन प्रकारेण (महाम्) महान्तम् (अवृधत्) वर्धते

को मैत्रावरुण ऋत्विज् उलटे क्रम से एक एक को दिन दिन बोलता है—[अर्थात्] एवा त्वामिन्द्र वज्रिन्नत्र—इस [सम्पात] को पहिले दिन में, यन्न इन्द्रो जुजुषे यच्च वष्टि—इसको दूसरे में, कथा महामवृधत् कस्य होतुः—इसको तीसरे में ।

(त्रीन् एव सम्पातान् ब्राह्मणाच्छंसी विपर्यासम् एकैकम् अहरहः शंसति, इन्द्रः पूर्भिदातिरद्दासमर्कैः—इति प्रथमे अहनि, य एक इद्धव्यश्चर्षणीनाम्—इति द्वितीये, यस्तिग्मश्रृङ्गो वृषभो न भीमः—इति तृतीये) तीन ही सम्पातों को ब्राह्मणाच्छंसी उलटे क्रम से एक एक को दिन दिन बोलता है—[अर्थात्] इन्द्रः पूर्भिदातिरद् दासमर्कैः—इसको पहिले दिन में, यः एक इद्धव्यश्चर्षणीनाम्—यह दूसरे में, यस्तिग्मश्रृङ्गो वृषभो न भीमः—यह तीसरे में । (त्रीन् एव सम्पातान् अच्छावाकः विपर्यासम् एकैकम् अहरहः शंसति, इमामू षु प्रभृतिं सातये धाः—इति प्रथमे अहनि इच्छन्ति त्वा सोम्यासः सखायः—इति द्वितीये, शासद् वह्निर्दुहितुर्नप्त्यं गात्—इति तृतीये) तीन ही सम्पातों को अच्छावाक उलटे क्रम से एक एक को दिन दिन बोलता है—इमामू षु प्रभृतिं सातये धाः—यह पहिले दिन में, इच्छन्ति त्वा सोम्यासः सखायः—यह दूसरे में, शासद् वह्निर्दुहितुर्नप्त्यं गात्—यह तीसरे में । (तानि त्रीणि वै एतानि नव च अहरहः शंस्यानि) वे तीन [वामदेव वाले] और यह नौ [विश्वामित्र, वसिष्ठ और भरद्वाज वाले सूक्त] दिन दिन बोलने चाहियें । (तानि द्वादश भवन्ति) वे बारह होते हैं । (द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिः यज्ञः, तत् प्रजापतिं संवत्सरं यज्ञम् आप्नोति) बारह ही महीने संवत्सर हैं, संवत्सर प्रजापति है और प्रजापति यज्ञ है, इसलिए प्रजापति, संवत्सर और यज्ञ को वह [यजमान] पाता है । (तस्मिन् प्रजापतौ संवत्सरे यज्ञे अहरहः प्रतितिष्ठन्तः यन्ति, प्रतितिष्ठन्ते) उस प्रजापति, संवत्सर और यज्ञ में दिन दिन दृढ़ बैठे हुए वे चलते हैं और प्रतिष्ठा पाते हैं । (इदं सर्वम् अनु प्रतितिष्ठति) इस सब [कर्म] के पीछे पीछे मनुष्य प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) प्रजा के साथ और पशुओं के साथ वह प्रतिष्ठा [बड़ाई] पाता है जो ऐसा विद्वान् है । (तानि अन्तरेण आवापम् आवपेरन्, अन्यूङ्खाः विराजः चतुर्थे अहनि, वैमदीः च पङ्क्तीः पञ्चमे, पारुच्छेपीः षष्ठे) उन

(असृजत) प्रकटीकृतवान् (ईक्षांचक्रे) विचारितवान् (वा) वै । एव (तत्प्रतिमान्) तैः सदृशान् (सृजेयम्) प्रकटीकरवाणि (कनीनः) गो० उ० ४ । १ । दीप्तिमान् (उद् ऐरत) ईर गतौ—लङ् । ते उदीरितवन्तः । उच्चारितवन्तः (उ) एव (ब्रह्माणि) वेदज्ञानानि (श्रवस्या) श्रवसे यशसे हितानि (तष्टा) सूक्ष्मीकरणशीलः (दीधय) प्रकाशय (मनीषाम्) प्रज्ञाम् (चर्षणीनाम्) कृषेरादेश्च चः (उ० २ । १०४) कृष विलेखने—अनिः, कस्य चः । मनुष्याणाम् —निघ० २ । ३ (सोम्यासः) सोममर्हति यः (पा० ४ । ४ । १३७) सोम—यः । तत्त्वरसयोग्याः (समपतन्) सम्यक् प्राप्तवन्तः (विपर्यासम्) वि+परि+असु क्षेपे-घञ् । यथा भवति तथा विपर्यासेन । विपरीतक्रमेण (आवापम्) आ उप्यते स्थाप्यते । डुवप बीजतन्तुसन्ताने—घञ् । प्रक्षेपणीयम् (आवपेरन्)

[सूक्तों] में आवाप [क्षेपक सूक्त] को वे [ऋत्विज्] डालें--[अर्थात् न्यूङ्ख को छोड़कर विराट् छन्द छह दिन वाले यज्ञ के] चौथे दिन में, वैमदी [विमदी अर्थात् विमद ऋषि की देखी हुई ऋचायें] पङ्क्ति छन्द वाली पाचवें में, और पारुच्छेपी [परुच्छेपी अर्थात् परुच्छेप ऋषि की देखी हुई ऋचायें] छठे में [इस विषय में विशेषः ४ देखो] (अथ यानि अन्यानि महास्तोत्राणि अष्टर्चानि, आवपेरन्) जो दूसरे महास्तोत्र आठ ऋचा वाले हैं, [उनको] आवाप [क्षेपणीय] बनावें [कण्डिका २ देखो] ॥१॥

भावार्थः—यज्ञ में ठीक ठीक मन्त्रों के प्रयोग से ऋत्विज् लोग यजमान को स्वर्ग में पहुँचाते हैं ॥ १ ॥

विशेषः १—इस कण्डिका को ऐतरेय ब्राह्मण ६ । १८ तथा ६ । १९ से मिलाओ।

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित दिये जाते हैं ॥

१—एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः। महामुभे रोदसी वृद्धमृष्वं निरेकमिद् वृणते वृत्रहत्ये--ऋ० ४ । १९ । १—११, वामदेव ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ । शेष मन्त्र वेद में देखो ।

२—यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान् करति शुष्म्या चित्। ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति--ऋग्० ४ । २२ । १—११, वामदेव ऋषि ॥ (यत् इन्द्रः) जो इन्द्र [बड़े ऐश्वर्य वाला राजा] (नः) हमें (जुजुषे) सेवता है (च) और (यत्) जो (वष्टि) चाहता है, (तत्) वह (महान्) महान् [पूजनीय], (शुष्मी) अति बली (नः) हम को (चित्) ही (आ करति) स्वीकार करे, (यः) जो (मघवा) महाधनी [राजा] (ब्रह्म) बहुत धन वा अन्न, (स्तोमम्) प्रशंसनीय गुण, (सोमम्) तत्त्वरस, (उक्था) प्रशंसनीय वस्तुओं और (अश्मानम्) मेघ [के समान उपकारी गुण] को (शवसा) बल के साथ (बिभ्रत्) धारण करता हुआ (एति) चलता है ॥ [शेष मन्त्र वेद में देखो] ॥

३—कथा महामवृधत् कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः। पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय--ऋ० ४ । २३ । १--११, वामदेव ऋषि ॥ (कथा) किस प्रकार से (कस्य होतुः) किस दानी के (महाम्) बड़े (यज्ञम्) यज्ञ [सङ्गति योग्य व्यवहार] को (जुषाणः) सेवन करता हुआ वह [इन्द्र विद्वान्] (ऊधः) निवाहने वाले (सोमम् अभि) सोम [तत्त्वरस] के लिये (अवृधत्) बढ़ता है। [उस सोम को] (उशानः) चाहता हुआ (पिबन्) पीता हुआ, और (जुषमाणः) प्रसन्न होता हुआ (ऋष्वः) वह महान् पुरुष (अन्धः) अन्न (ववक्ष) पहुँचाता है, और (धनाय) धन के लिये (शुचते) सोचता है ॥ [शेष मन्त्र वेद में देखो] ॥

प्रक्षिपेयुः (अन्यूङ्खाः) न्यूङ्खाख्याभिर्ऋग्भी रहिताः (वैमदीः) विमद—अण्, ङीप्। विमदाख्येन महर्षिणा दृष्टाः (पारुच्छेपीः)—ऐ० ब्रा० ६ । १९ । परुच्छेपेण दृष्टाः ॥

४—सद्यो ह जातो वृषभः कनीनः—..........ऋ० ३ । ४८ । १—५, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ ॥ शेष मन्त्र वेद में देखो ॥

५—उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ । आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि—अथर्व० २० । १२ । १—६, ऋग्० ७ । २३ । १ ६, वसिष्ठ ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ ॥ शेष मन्त्र वेद में देखो ॥

६—अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः । अभिप्रियाणि मर्मृशत् पराणि कवीँरिच्छामि संदृशे सुमेधाः—ऋ० ३ । ३८ । १—१० । विश्वामित्र के गोत्र का प्रजापति, अथवा वाच्य वाक् का पुत्र, अथवा प्रजापति और वाच्य दोनों, अथवा विश्वामित्र ही ऋषि—शाकलर्क संहिता और सायण भाष्य ॥ [हे इन्द्र विद्वन् !] (तष्टा इव) बढ़ई के समान और (सुधुरः) बहुत बोझ उठाने वाले, (अत्यः) लगातार चलने वाले (वाजी न) घोड़े के सदृश (जिहानः) चलता हुआ तू (मनीषाम्) बुद्धि को (अभि)सब ओर से (दीधय) प्रकाशित कर, (प्रियाणि) प्रिय और (पराणि) श्रेष्ठ कर्मों को (अभि मर्मृशत्) सब ओर से विचारता हुआ (सुमेधाः) उत्तम बुद्धि वाला मैं (कवीन्) बड़े विद्वानों को (सन्दृशे) ठीक ठीक दर्शन के लिए (इच्छामि) चाहता हूँ ॥ [शेष मन्त्र वेद में देखो] ॥

७—इन्द्रः पूर्भिदातिरद् दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् । ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे—ऋ० ३ । ३४ । १—११, विश्वामित्र ऋषि—अथर्व० २० । ११ । १—११ ॥ यह मन्त्र आ चुका है—गो० उ० ४ । २, शेष मन्त्र वेद में देखो ॥

८—य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः । यः पत्यते वृषभो वृष्ण्यावान् त्सत्यः सत्वा पुरुमायः सहस्वान्—ऋ० ६ । २२ । १—११, भरद्वाज ऋषिः । अथर्व० २० । ३६ । १—११ ॥ (तम्) उस (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले परमात्मा] को (आभिः) इन (गीर्भिः) वाणियों से (अभि) सब प्रकार (अर्चे) मैं पूजता हूँ । (यः) जो (एकः) अकेला (इत्) ही (चर्षणीनाम्) मनुष्यों के बीच (हव्यः) ग्रहण करने योग्य है और (यः) जो (वृषभः) श्रेष्ठ (वृष्ण्यावान्) पराक्रम वाला (सत्यः) सच्चा (सत्वा) वीर (पुरुमायः) बहुत बुद्धि वाला और (सहस्वान्) महाबलवान् (पत्यते) स्वामी है ॥ [शेष मन्त्र वेद में देखो] ॥

९—यस्तिग्मश्रृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः । यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः—ऋ० ७ । १९ । १—११, वसिष्ठ ऋषि, अथर्व० २० । ३७ । १—११ ॥ (एकः) अकेला [वही] (विश्वाः) सब (कृष्टीः) मनुष्य प्रजाओं को (प्र) अच्छे प्रकार (च्यावयति) चलाता है, (यः) जो (तिग्मश्रृङ्गः न) तीखी किरणों वाले सूर्य के समान (भीमः) भयङ्कर और (वृषभः) वर्षा करने वाला है । और (यः) जो तू (शश्वतः) निरन्तर (अदाशुषः)

न देने वाले के (गयस्य) घर का (वेदः) धन (सुष्विततराय) अधिक ऐश्वर्य वाले व्यवहार के लिए (प्रयन्ता) देने वाला (असि) है ॥ [शेष मन्त्र वेद में देखो]॥

१०--इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः। सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत्--ऋ० ३ । ३६ । १--६, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है--गो० उ० ४ । ३ ॥ शेष मन्त्र वेद में देखो ॥

११—इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि। तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः—ऋ० ३ । ३० । १--२२, विश्वामित्र ऋषि ॥ (सोम्यासः) तत्त्वरस के योग्य [ब्रह्मज्ञानी] (सखायः) मित्र लोग (त्वा) तुझे (इच्छन्ति) चाहते हैं, (सोमम्) ऐश्वर्य को (सुन्वन्ति) सिद्ध करते हैं, (प्रयांसि) तृप्त करने वाले अन्न आदि वस्तुयें (दधति) धारण करते हैं और (जनानाम्) मनुष्यों की (अभिशस्तिम्) सब ओर से हिंसा का (आ तितिक्षन्ते) भले प्रकार सहते हैं, (हि) क्योंकि, (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले वीर] (त्वत्) तुझसे [अधिक] (प्रकेतः) उत्तम बुद्धिवाला (कः चन) कौन सा है ? ॥ शेष मन्त्र वेद में देखो ॥

१२--शासद् वह्निर्दुहितुर्नप्त्यं गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन्। पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे—ऋ० ३ । ३१ । १--२०, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है । गो० उ० ५ । १५ ॥ शेष मन्त्र वेद में देखो ॥

विशेषः ३—(अन्यूङ्खा विराजः--इत्यादि) न्यूङ्ख रहित । विराट् छन्द, वैमदी, पङ्क्ति, और पारुच्छेपी ऋचायें । (यज्ञकर्मण्यजपन्यूङ्खसामसु पाणिनि १ । २ । ३४) यज्ञ कर्म में जप, न्यूङ्ख और साम गान को छोड़ कर एक श्रुति स्वर हो—यहाँ न्यूङ्ख शब्द आया है । सोलह प्रकार के ओङ्कार सहित वेद मन्त्र न्यूङ्ख कहाते हैं । सायण भाष्य ऐ० ब्रा० ६ । १६ में अन्यूङ्ख आदि इस प्रकार माने हैं—(न ते गिरो अपि मृष्ये—ऋ० ७ । २२ । ५–८) तथा (प्र वो महे महिवृधे भरध्वं—ऋ० ७ । ३१ । १०–१२) यह सात विराट् ऋचायें हैं जिनका प्रयोग न्यूङ्ख विना होता है ॥

(यजामह इन्द्रं—ऋ० १० । २३ । १ – ७) यह सात ऋचायें वैमदी हैं, अर्थात् इन के विमद ऋषि हैं । (यच् चिद्धि सत्य सोमपा ऋ० १ । २९ । १—७) यह सात ऋचायें पङ्क्ति छन्द वाली हैं ॥

(इन्द्राय हि द्यौरसुरो—ऋ० १ । १३१ । १—७) यह सात ऋचायें पारुच्छेपी हैं, इन के परुच्छेप ऋषि हैं ॥

कण्डिका २ ॥

को अद्य नर्यो देवकाम इति मैत्रावरुणः । वने न वा यो न्यधायि चाकन्निति ब्राह्मणाच्छंसी । आ याह्यर्वाङुप बन्धुरेष्ठा इत्यच्छावाकः । एतानि वा आवपनानि, एतैरेवावपनैर्देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यज-

माना एतैरेवावपनैः स्वर्गं लोकं यन्ति । सद्यो ह जातो वृषभः कनीन इति मैत्रावरुणः पुरस्तात् सम्पातानामहरहः शंसति । तदेतत् सूक्तं स्वर्ग्यमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदृषभवत् पशुमद्भवति पशूनामाप्त्यै । तत्पञ्चर्चं भवति, अन्नं वै पङ्क्तिः, अन्नाद्यस्यावरुध्यै, अरिष्टैर्नः पथिभिः पारयन्तेति स्वर्गताया एवैतदहरहः शंसति । उदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी । ब्रह्मण्वदेतत् सूक्तं समृद्धमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदु वै षडर्चं, षड् वा ऋतवः ऋतूनामाप्त्यै । तदुपरिष्टात् सम्पातानामहरहः शंसति । अभि तष्टेव दीधया मनीषामित्यच्छावाकोऽहरहः शंसति । अभिवदति तत्यै रूपमभिप्रियाणि मर्मृशत्पराणीति, यान्येव पराण्यहानि, तानि प्रियाणि, तान्येव तदभिमर्मृशन्तो यन्त्यभ्यारभमाणाः परो वा अस्माल्लोकात् स्वर्गो लोकः, स्वर्गमेव तं लोकमभिमृशन्ति । कवीँरिच्छामि संदृशे सुमेधा इति, ये ह वा अनेन पूर्वे प्रीतास्ते वै कवयः तानेव तदभ्यभिवदति । यदु वै दशर्चं, दश वै प्राणाः, प्राणानेव तदाप्नोति प्राणानां सन्तत्यै । यदु वै दशर्चं, दश वै पुरुषे प्राणाः, दश स्वर्गा लोकाः, प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नोति । प्राणेषु चैवैतत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति । यदु वै दशर्चं, दशाक्षरा विराड् *इयं वै वि[1]राड्* इय वै स्वर्गस्य लोकस्य प्रतिष्ठा, तदेतदस्यां प्रतिष्ठायां प्रतिष्ठापयति । सकृदिन्द्रं निराह तेनै[2]न्द्राद्रूपान्न प्रच्यवते, तदुपरिष्टात् सम्पातानामहरहः शंसति ।। २ ।।

कण्डिका २ ।। अहीन यज्ञ में आवाप सूक्तों का वर्णन और महत्त्व ।।

(को अद्य नर्यः देवकामः इति मैत्रावरुणः) को अद्य नर्यः देवकामः--ऋ० ४ । २५ । १—८, इस सूक्त को मैत्रावरुण [अहीन यज्ञ में बोलता है] । (वने न वा यो न्यधायि चाकन्—इति ब्राह्मणाच्छंसी) वने न वा यो न्यधायि चाकन्—ऋ० १० । २९ । १—८, इस सूक्त को ब्राह्मणाच्छंसी [बोलता है] । (आ याह्यर्वाङुप बन्धुरेष्ठाः—इति अच्छावाकः) आ याह्यर्वाङुप बन्धुरेष्ठाः—ऋ० ३ । ४३ । १—८, इस सूक्त को अच्छावाक [बोलता है] । (एतानि वै आवपनानि, एतैः एव आवपनैः देवाः च ऋषयः च स्वर्गं लोकम् आयन्) यह ही आवपन [क्षेपणीय सूक्त] हैं, इन ही आवपनों से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्गलोक पाया है । (तथा एव एतत्, यजमानाः एतैः एव आवपनैः स्वर्गं लोकं यन्ति) वैसे ही यह है—यजमान लोग

२—(अद्य) इदानीम् (नर्यः) नृषु साधुः (देवकामः) देवान् विदुषः कामयमानः (वने) अरण्ये वृक्षे (न) इव (वायः) शकुनिः (नि अधायि) निहितः (चाकन्) कामयमानः । उत्सुकमनाः (आ याहि) आगच्छ (अर्वाङ्)

---

१. पुष्पाङ्कितः पाठः जर्मनसंस्करणे नास्ति ।।

२. पू. सं. 'तेनेन्द्रात्' इति पाठः ।। सम्पा० ।।

करता है। (तस्मात् इमाः प्रजाः अदन्त्यः जायन्ते) इस लिए यह प्रजायें विना दांत वाली उत्पन्न होती हैं [क्योंकि जीभ बिना दांत की है]। (तं ह एके प्रगाथानां पुरस्तात् शंसन्ति, पुरस्तादायतना वाक् इति वदन्ते) उस [नाराशंस सूक्त] को ही कोई २ ऋषि प्रगाथों [दो दो मन्त्रों के समूहों] के पहिले बोलते हैं, [मुख में] पहिले स्थान वाली वाणी है - ऐसा वे कहते हैं। (एके उपरिष्टात्, उपरिष्टादायतना वाक् इति वदन्तः) कोई कोई [प्रगाथों के] पीछे [बोलते हैं], पीछे [मुख के मूर्धा आदि] स्थान वाली वाणी है—ऐसा वे कहते हैं। (मध्ये एव शंसेत्, मध्यायतना वै इयं वाक्) [प्रगाथों के] मध्य में ही [नाराशंस] बोले, मध्य [शरीर में नाभि हृदय आदि] स्थान वाली ही यह वाणी है। (उपरिष्टात् नेदीयसि इव तं रेतोभूतं शस्त्वा होता मैत्रावरुणाय संप्रयच्छति) उपरान्त अत्यन्त निकट वाले [नाभानेदिष्ठ के सूक्त के अन्त के अत्यन्त समीप भाग] में ही उस वीर्य रूप सूक्त को बोल कर होता मैत्रावरुण को [यजमान को] देता है—(एतस्य प्राणान् त्वं कल्पय इति) इसके प्राणों को तू समर्थ कर॥

(बालखिल्याः शंसति) बालखिल्य ऋचाओं को [क० ७] वह [मैत्रावरुण] बोलता है। (प्राणाः वै बालखिल्याः अस्य प्राणान् एव तत् कल्पयति) प्राण ही बालखिल्य [स्वीकार योग्य के ग्रहण कराने वाले] हैं, इस [यजमान] के प्राणों को ही उससे वह समर्थ करता है। (ताः विहृताः शंसति, विहृताः वै प्राणाः, प्राणेन अपानः, अपानेन व्यानः) उन्हें आपस में मिली हुई वह बोलता है, आपस में मिले हुये ही प्राण [श्वास मात्र] हैं, प्राण [भीतर जाने वाले श्वास] के साथ अपान [बाहर निकलने वाला श्वास], और अपान के साथ व्यान [समस्त शरीर में फैला वायु मिला हुआ है]। (सः पच्छः प्रथमे सूक्ते विहरति, अर्धर्चशः द्वितीये, ऋक्शः तृतीये) वह पाद पाद करके पहिले सूक्त में [बालखिल्य ऋचाओं को] बोलता है आधी आधी ऋचाओं से दूसरे में ऋचा ऋचा से तीसरे में। (सः यत् प्रथमे सूक्ते विहरति, तत् वाचं च एव मनः च विहरति) वह जो पहिले सूक्त में [बालखिल्य ऋचाओं को] संयुक्त करता है उस से वाणी और मन को ही संयुक्त करता है। (यत् द्वितीये, तत् चक्षुः च एव श्रोत्रं च विहरति) वह जो दूसरे में [संयुक्त करता है।] उससे आंख और कान को ही संयुक्त करता है। (यत् तृतीये, तत् प्राणं च एव आत्मानं च विहरति) वह जो तीसरे [सूक्त] में [जोड़ता है], उससे प्राण को और आत्मा को ही वह जोड़ता है। (तत् उपाप्तः कामः, विहरेत्) उससे कामना प्राप्त हुई, वह [वैसा ही] जोड़े। (अन्ये तु वै प्रगाथाः कल्पयन्ते, अतिमर्शम् एव सं विहरेत्) कोई कोई तो प्रगाथाओं को मानते

सङ्गं प्राप्तः (निषिश्वत्) निषिश्वति (अदन्त्यः) नञ्+दन्त—ङीप्। दन्तशून्याः (पुरस्तादायतना) पूर्वभागस्थाना (उपरिष्टादायतना) उपरिष्टात् मूर्ध्नि आयतनं स्थानं यस्याः सा (मध्यायतना) शरीरमध्ये नाभ्यादौ स्थानं यस्याः सा (उपरिष्टान्नेदीयसि) उपरिष्टात् नाभानेदिष्ठसूक्तस्यावसानभागस्यात्यन्तसमीपवर्तिनि भागे (इव) एव (विहृताः) परस्परव्यतिषिक्ताः। परस्परसंगताः (पच्छः) पद्—शः। पादेन पादेन (विहरति) योजयति। शंसति (उपाप्तः) प्राप्तः

हैं, अतिमर्श [मन्त्रों के अत्यन्त संयोग] को ही वह बोले—(तथा वै प्रगाथाः कल्पयन्ते) इस प्रकार से ही वे प्रगाथाओं को मानते हैं। (यत् एव अतिमर्शम्, तत् स्वर्गस्य लोकस्य रूपम्) जो ही अतिमर्श [मन्त्रों का मिलान] है, वह स्वर्गलोक का रूप है। (यत् उ एव अतिमर्शम्, आत्मा वै बृहती, प्राणाः सतोबृहती) जो ही अतिमर्श [मिलान] है, आत्मा ही बृहती छन्द है और प्राण सतोबृहती छन्द हैं। (सः बृहतीम् अशंसीत्, सः आत्मा, अथ सतोबृहतीम्, ते प्राणाः अथ बृहतीम् अथ सतोबृहतीं तत् आत्मानं प्राणैः परिवृहन् एति) [जो] वह बृहती छन्द बोलता है, वह आत्मा है, फिर सतोबृहती छन्द को, वे प्राण हैं, फिर बृहती फिर सतोबृहती को [बोलता है], उससे आत्मा को प्राणों के साथ बढ़ाता हुआ वह चलता है। (यत् उ एव अतिमर्शम्, आत्मा वै बृहती, प्रजाः सतोबृहती) क्योंकि यह ही अतिमर्श [मिलान] है, आत्मा ही बृहती है, और प्रजायें सतोबृहती। (सः बृहतीम् अशंसीत् सः आत्मा, अथ सतोबृहतीं, ते [=ताः], प्रजाः, अथ बृहतीम् अथ सतोबृहतीं तत् आत्मानं प्रजया परिवृहन् एति) वह जो बृहती को बोलता है वह आत्मा है, फिर जो सतोबृहती को, वे प्रजायें हैं, फिर जो बृहती को फिर सतोबृहती को [मिला कर बोलता है], उस से आत्मा को प्रजा के साथ बढ़ाता हुआ वह चलता है। (यत् उ एव अतिमर्शम्, आत्मा वै बृहती, पशवः सतोबृहती) क्योंकि यह भी अतिमर्श [अत्यन्त विचार] है—आत्मा ही बृहती है और पशु सतोबृहती हैं। (सः बृहतीम् अशंसीत् सः आत्मा, अथ सतोबृहतीम्, ते पशवः, अथ बृहतीम् अथ सतोबृहतीं, तत् आत्मानं पशुभिः परिवृहन् एति) [जो] वह बृहती छन्द बोलता है वह आत्मा है फिर सतोबृहती को, वे सब पशु हैं, फिर बृहती को फिर सतोबृहती को [बोलता है], उससे आत्मा को पशुओं के साथ बढ़ाता हुआ वह चलता है॥

(मैत्रावरुणः तस्य प्राणान् कल्पयित्वा ब्राह्मणाच्छंसिने सम्प्रयच्छति-त्वम् एतस्य प्रजनय इति) मैत्रावरुण इस [यजमान] के प्राणों को समर्थ करके [उसे] ब्राह्मणाच्छंसी को देता है—तू इस का उत्तम जन्म कर। (सुकीर्त्तिं शंसति, देवयोनिः वै सुकीर्तिः, तत् यज्ञियायां देवयोन्यां यजमानं प्रजनयति) वह [ब्राह्मणाच्छसी] सुकीर्ति [सुकीर्ति ऋषि के देखे हुये सूक्त—अप प्राच इन्द्र विश्वां—ऋ० १० । १३१ । १-७] को बोलता है, देवों [दिव्य गुणों] की उत्पत्ति स्थान सुकीर्ति [उत्तम बड़ाई] है, तब पूजनीय दिव्य गुणों की उत्पत्ति स्थान में यजमान को उत्तम जन्म देता है। (वृषाकपिं शंसति, आत्मा वै वृषाकपिः अस्य आत्मानम् एव तत् कल्पयति) वृषाकपि [वृषाकपि के देखे सूक्त—क० ७] को वह बोलता है आत्मा ही वृषाकपि [बलवान् चेष्टा कराने वाला] है, उस के आत्मा को ही तब वह समर्थ करता है। (तं न्यूङ्खयति) उस [वृषाकपि सूक्त] को न्यूङ्ख युक्त करता है [क० १]। (अन्नं वै न्यूङ्खः, अन्नाद्यम् एव अस्मै तत्

(कल्पयन्ते) रचयन्ति (अतिमर्शम्) संयोगम् (परिवृहन्) परिवर्धयन् (एति) गच्छति। प्रवर्तते (सुकीर्तिम्) सुकीर्तिनामकेन ऋषिणा दृष्टं सूक्तम्—ऋ० १० । १३१ (तं न्यूङ्खयति) तं वृषाकपिं न्यूङ्खयुक्तं करोति (पाङ्क्तः) पङ्क्तिविंशति० (पा० ५ । १ । ५९) पश्चन्—तिप्रत्ययः, टिलोपः, पङ्क्ति—

सम्प्रयच्छति, यथा जाताय कुमाराय स्तनम्) अन्न ही न्यूङ्ख है, खाने योग्य अन्न ही उस [यजमान] को तब वह देता है, जैसे उत्पन्न हुये बच्चे को स्तन [माता देती है]। (सः पाङ्क्तो भवति, पाङ्क्तः हि अयम् पुरुषः पञ्चधा विहितः, लोमानि त्वक् अस्थि मज्जा मस्तिष्कम्) वह न्यूङ्ख पाङ्क्त [पङ्क्ति छन्द पाँच पाद वाला] है, पाङ्क्त [पाँच परिमाण वाला] ही यह पुरुष है [जो] पाँच प्रकार से विधान किया गया है—लोम, त्वचा, हड्डी, मज्जा और मस्तिष्क [भेजा] ।

(यावान् एव पुरुषः, सः तावन्तं यजमानं संस्कृत्य अच्छावाकाय सम्प्रयच्छति त्वम् एतस्य प्रतिष्ठां कल्पय इति) जितना ही पुरुष है, वह [ब्राह्मणाच्छंसी] उतना यजमान को शुद्ध करके अच्छावाक को देता है—तू इस [यजमान] की प्रतिष्ठा कर । (एवयामरुतं शंसति) वह [अच्छावाक] एवयामरुत् सूक्त [क० ७] बोलता है । (प्रतिष्ठा वै एवयामरुत्, प्रतिष्ठायै एव एनम् अन्ततः प्रतिष्ठापयति) प्रतिष्ठा [गौरव] ही एवयामरुत् [पाने योग्य का प्राप्त कराने वाला शत्रु नाशक] है, प्रतिष्ठा के लिये ही इस [यजमान] को अन्त में वह स्थापित करता है । (याज्यया यजति) वह याज्या [ऋचा] से यज्ञ करता है । (अन्नं वै याज्या, अन्नाद्यम् एव अस्मै तत् प्रयच्छति) अन्न ही याज्या है, खाने योग्य अन्न ही इस [यजमान] को वह उससे देता है ॥ ८ ॥

भावार्थः—जो मनुष्य वेद मन्त्रों के तत्त्व को समझकर आत्मपुष्टि करते हैं, वे ही अपनी और दूसरों की उन्नति करते हैं ॥ ८ ॥

विशेषः—इस कण्डिका को मिलाओ–ऐ० ब्रा० ६ । २७, २८, २९, ३० ॥

कण्डिका ९ ॥

तानि वा एतानि सहचरणानीत्याचक्षते, यन्नाभानेदिष्ठो बालखिल्यः, वृषाकपिरेवयामरुतानि सह वा शंसेत् सह वा न शंसेत् । यदेषामन्तरीयात् तद्यजमानस्यान्तरीयात् । यदि नाभानेदिष्ठं रेतोस्यान्तरीयात्, यदि बालखिल्याः प्राणानस्यान्तरीयात्, यदि वृषाकपिमात्मानमस्यान्तरीयात्, यदेवयामरुतं प्रतिष्ठा वा एवयामरुत्, प्रतिष्ठाया एवैनन्तꣳश्रावयेत्, दैव्याश्च मानु[१]ष्याश्च तानि सह वा शंसेत्, सह वा न शंसेत् । स ह बुडिल आश्वितरा स्युर्विश्वजितो होता सन्नो[२]क्षाञ्चक्रे, एतेषां वा एषां शिल्पानां विश्वजिति सांवत्सरिके द्वे होतुरुक्थे माध्यन्दिनमभिप्रच्यवेते । हन्ताहमिच्छमेवयामरुतं शंस[३]यानीति, तद्ध तथा शंसयाञ्चक्रे। तद्ध तथा शंसमाने गोश्ल आजगाम । स होवाच, होतः कथा ते शस्त्रं विचक्रं प्लवत इति, किं ह्यभूदित्येवयामरुदयमुत्तरतः शस्यत इति । स होवाच, इन्द्रो वै माध्यन्दिनः, कथेन्द्रं माध्यन्दिनान्यनीकसीति, नेन्द्रं माध्यन्दिनान्यनीषा-

---

अण् । पञ्चपरिमाणयुक्तः । पञ्चधाविहितः (संस्कृत्य) संशोध्य । अन्यद् गतम्—क० ७ ॥

---

१. पू. सं. 'मनुष्याश्च' इति पाठः ॥ २. पू. सं. 'सदीक्षाञ्चक्रे इति पाठः ॥
३. पू. सं. 'शस्ययानि' इति पाठः ॥ सम्पा० ॥

मिति । स होवाच, छन्दस्त्वदमु माध्यन्दिनं, सातिजागतं वातिजागतं वा य उ मारुतो मैवं संसृष्टेति [शंसिष्टेति] । स होवाच, अरमच्छावाकेत्यथास्मिन्ननुशासनमीषे । स होवाच, इन्द्रमेष विष्णुं न्यङ्गानि शंसति, अथ त्वं होतुरुपरिष्टाद्रौद्रिया धाय्या, या पुरस्तान्मारुतस्य सूक्तस्याप्यस्यथा इति । तथेति । तदप्येतर्हि तथैव शस्यते, यथा षष्ठे पृष्ठ्याहनि । कल्पत एव यज्ञः, कल्पते यजमानस्य प्रजापतिः, कथमत्राशस्त एव नाभानेदिष्ठो भवति । अथ बालखिल्याः शंसति, रेतो वा अग्रेऽथ प्राणाः एवं ब्राह्मणाच्छंस्यशस्त एव नाभानेदिष्ठो भवति । अथ वृषाकपिं शंसति, रेतो वा अग्रेऽथात्मा, कथमत्र यजमानस्य प्रजापतिः, कथं प्राणा अवरुद्धा भवन्तीति । यजमानं वा एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति, स यथा गर्भो योन्यामन्तरेव[१] सम्भवञ्छेते, न ह वै सकृदेवाग्रे सर्वं सम्भवति, एकैकं वाङ्गं सम्भवति । सर्वाणि चेत्समानेऽहनि क्रियेरन्, कल्पत एव यज्ञः, कल्पते यजमानस्य प्रजापतिः । अथ हैव एवयामरुतं होता शंसेत्, तस्यास्य प्रतिष्ठा, तस्या एवैनमन्ततः प्रतिष्ठापयति प्रतिष्ठापयति ॥ ६ ॥

कण्डिका ९ ॥ नाभानेदिष्ठ, बालखिल्य, वृषाकपि और एवयामरुत् सहचरणों का वर्णन तथा बुडिल और गोश्ल के प्रश्नोत्तर ॥

(तानि वै एतानि सहचरणानि इति आचक्षते, यत् नाभानेदिष्ठः, बालखिल्यः, वृषाकपिः एवयामरुत्, तानि सह वा शंसेत्, सह वा न शंसेत्) वे ही यह सहचरण [एक दिन में बोले गये सूक्त] हैं, ऐसा वे [ब्रह्म वादी] कहते हैं, जो नाभानेदिष्ठ, बालखिल्य, वृषाकपि और एवयामरुत् [क० ७] हैं, उनको अथवा वह एक साथ ही बोले, अथवा एक साथ न बोले । (यत् एषाम् अन्तरीयात्, तत् यजमानस्य अन्तरीयात्) जो इनमें से कुछ वह छोड़ दे, उससे यजमान का नाश करे । (यदि नाभानेदिष्ठम्, अस्य रेतः अन्तरीयात्) यदि नाभानेदिष्ठ को [छोड़े], इस के वीर्य को वह नष्ट करे, (यदि बालखिल्याः, अस्य प्राणान् अन्तरीयात्) यदि बालखिल्याओं को [वह छोड़े !] इस के प्राणों को वह नष्ट करे । (यदि वृषाकपिम्, अस्य आत्मानम् अन्तरीयात्) यदि वृषाकपि को [वह छोड़े] वह इस के आत्मा को नष्ट करे । (यत् एवयामरुतम्, प्रतिष्ठा वै एवयामरुत्, दैव्याः च मानुष्याः च प्रतिष्ठायाः एव एनं तं श्रावयेत्) यदि एवयामरुत् को वह छोड़े प्रतिष्ठा ही एवयामरुत् है, दैवी [दिव्य गुण वाली] और मानुषी [मननशीलों वाली] प्रतिष्ठा से ही इस [यजमान] को वह निकाल देवे । (तानि सह वा शंसेत्, सह वा न शंसेत्) उनको अथवा वह एक साथ ही बोले, अथवा एक साथ न बोले ॥

६—(सहचरणानि) एकस्मिन् दिने सह शंसनीयानि शिल्पसूक्तानि (अन्तरीयात्) विच्छेदो भेदो भवेत् । विनाशयेत् (श्रावयेत्) श्रु गतौ । गमयेत् । च्यावयेत् (दैव्याः) देवसंबन्धिन्याः (मानुष्याः) मनुष्यसम्बन्धि-

---

१. योन्यामन्तरेव इत्यस्यानन्तरं जर्मनसंस्करणे "प्राणानस्यान्तरियाद्यदि वृषाकपिमात्मानमस्यान्तरियाद्यद्येव या" इत्यधिकः पाठः ॥ सम्पा० ॥

(सः ह बुडिलः, आश्वितराः स्युः, विश्वजितः होता सन् ईक्षांचक्रे एतेषां वै एषां शिल्पानां सांवत्सरिके विश्वजिति होतुः द्वे उक्थे माध्यन्दिनम् अभि प्रच्यवेते) वह [प्रसिद्ध] बुडिल [त्यागी ऋषि] यह विचार कर, कि [यह लोग] बलवान् पुरुषों के तराने वाले हों, विश्वजित् यज्ञ का होता होकर विचारने लगा—इन शिल्पों [नाभानेदिष्ठ आदि] के संवत्सर रहने वाले विश्वजित् यज्ञ में होता के दो उक्थ माध्यन्दिन सवन पर होते हैं।(हन्त, अहम् इच्छम् एवयामरुतं शंसयानि इति, तत् ह तथा शंसयाञ्चक्रे) हर्ष है–मैंने चाहा है–मैं एवयामरुत् सूक्त बोलूँ – उसको उसने उसी प्रकार उच्चारण कराया। (तत् ह तथा शंसमाने गोश्लः आजगाम) तब ही वैसा बोले जाने पर गोश्ल [वेदवाणी का सेवक, ऋषि] आ गया। (सः ह उवाच, होतः कथा ते शस्त्रं विचक्रं प्लवते इति) वह गोश्ल बोला– हे होता ! कैसे तेरा स्तोत्र बिना पहिये चलता है। (किं हि अभूत् इति) [बुडिल बोला] क्या ही [दोष] हुआ है। (एवयामरुत् अयम् उत्तरतः शस्यते [शंसति] इति)। [गोश्ल बोला] एवयामरुत् सूक्त को यह [अच्छावाक] उत्तर ओर से बोलता है। (सः ह उवाच, इन्द्रः [ऐन्द्रः] वै माध्यन्दिनः, कथा इन्द्रं माध्यन्दिनानि अनीकसि इति) वही [गोश्ल फिर] बोला—इन्द्र देवता वाला ही माध्यन्दिन सवन है, कैसे इन्द्र को माध्यन्दिन सूक्तों से तूने निकाला है। (इन्द्रं माध्यन्दिनानि न अनीषाम् इति) [बुडिल बोला] इन्द्र को माध्यन्दिन सूक्तों से मैंने नहीं निकाला। (सः उवाच, इदम् उ छन्दः तु माध्यन्दिनं साति जागतं वा अतिजागतं वा) वह [गोश्ल] बोला–यह छन्द तो माध्यन्दिन के अवसान में जगती छन्द वा अतिजगती छन्द [तो ठीक है, परन्तु] (सः उ मारुतः, एवं मा संसृष्ट [शंसिष्ट] इति) वह [स्तोम] मरुत् देवता वाला है, इस प्रकार वह [उसे] न बोले। (सः ह उवाच अरम् अच्छावाक इति, अथ अस्मिन् अनुशासनम् ईषे) वह [बुडिल] बोला—हे अच्छावाक ! बस [चुप रह], क्योंकि इसमें [गोश्ल का] अनुशासन मैं मानता हूं। (सः ह उवाच एषः इन्द्रं विष्णुं न्यङ्गानि शंसति = शंसतु) वह [गोश्ल] बोला—यह अच्छावाक इन्द्र को विष्णु के चिह्नों सहित

न्याः (बुडिलः) बुड त्यागे संवरणे च—इलच्, कित्। त्यागी। ऋषिविशेषः (आश्वितराः) अश्व—इञ् स्वार्थे + तॄ तारणे—अप् आश्वीनाम् अश्वानां बलवत्पुरुषाणां तारकाः (ईक्षाञ्चक्रे) विचारितवान् (अभि) अभिलक्ष्य (प्रच्यवेते) प्रवर्तते (हन्त) हर्षोऽस्ति (इच्छम्) लङि आर्षरूपम्। ऐच्छम् (शंसयाञ्चक्रे) शंसनं कारितवान् (गोश्लः) गो + श्रिञ् सेवायां—डप्रत्ययः, रस्य लः। वेदवाणीसेवकः। ऋषिविशेषः (कथा) कथम् (विचक्रम्) चक्ररहितं (प्लवते) गच्छति प्रवर्तते (उत्तरतः) उत्तरस्यां दिशि (अनीकसि) णीञ् प्रापणे—लुङ्, आर्षम्। अनैषीः। प्रेरितवान् असि (अनीषाम्) लुङ्, आर्षम्। अनैषम्। प्रेरितवान् अस्मि (साति) ऊतियूतिजूतिसाति० (पा० ३। ३। ९७) षो अन्तकर्मणि यद्वा षै क्षये—क्तिन्, विभक्तेर्लुक्। सातौ। अवसाने (मा संसृष्ट) मा शंसिष्ट। शंसनं मा करोतु (अरम्) अलम्। पर्याप्तम् (ईषे) ईष गतौ। गच्छामि। प्राप्नोमि (विष्णुम्) विष्णोः (न्यङ्गानि) लिङ्गानि (होतुः)

मन्त्रों [ऋ० ६ । २० । १-१३ जिसके दूसरे मन्त्र में विष्णु शब्द है और जो इन्द्र देवता वाला है] बोले । (अथ त्वम् होतुः [होतः] उपरिष्टात् या रौद्रिया धाय्या, अस्य मारुतस्य सूक्तस्य पुरस्तात् अपि धाः इति) और तू हे होता ! अन्त में जो रुद्र देवता वाली धाय्या है, [उसको] इस मारुत सूक्त के पहिले ही धारण कर । (तथा इति)। [बुडिल बोला] वैसा ही हो । (तत् अपि एतर्हि तथा एव शस्यते, यथा षष्ठे पृष्ठयाहनि) वह अब भी वैसा ही बोला जाता है, जैसे पृष्ठयाह यज्ञ के छठे दिन ॥

(यज्ञः एव कल्पते, यजमानस्य प्रजापतिः कल्पते, कथम् अत्र नाभानेदिष्ठः अशस्तः एव भवति) यज्ञ ही समर्थ होता है और यजमान का प्रजापालक व्यवहार समर्थ होता है, कैसे यहाँ नाभानेदिष्ठ स्तोम बिना बोला हुआ ही रहता है । (अथ बालखिल्याः शंसति, रेतः वै अग्रे अथ प्राणाः, एवं ब्राह्मणाच्छंसी [ब्राह्मणाच्छंसिना] नाभानेदिष्ठः अशस्तः एव भवति) फिर वह बालखिल्य ऋचायें बोलता है, वीर्य ही पहिले है फिर प्राण हैं, इस प्रकार ब्राह्मणाच्छंसी करके नाभानेदिष्ठ स्तोम बिना बोला हुआ ही होता है । (अथ वृषाकपि शंसति, रेतः वै अग्रे अथ आत्मा, कथम् अत्र यजमानस्य प्रजापतिः कथं प्राणाः अवरुद्धाः भवन्ति इति) फिर वृषाकपि [वृषाकपि वाले स्तोम] को वह बोलता है, वीर्य ही पहिले फिर आत्मा होता है, कैसे यहाँ यजमान का प्रजापालक व्यवहार [समर्थ होता है], और कैसे प्राण रक्षित होते हैं । (यजमानं वै एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति, यथा सः गर्भः योन्याम् अन्तः एव सम्भवन् शेते) [उत्तर] यजमान को ही इस सब यज्ञ कर्म से वे संस्कार युक्त करते हैं, जैसे गर्भ गर्भाशय के भीतर ही उत्पन्न होता हुआ रहता है । (सर्वं सकृत् एव अग्रे न ह वै सम्भवति, एकैकं वा अङ्गं सम्भवति) सब एक बार ही पहिले नहीं समर्थ होता, एक एक ही अङ्ग समर्थ होता है । (सर्वाणि चेत् समाने अहनि क्रियेरन्, यज्ञः एव कल्पते, यजमानस्य प्रजापतिः कल्पते) जो सब [शिल्प स्तोत्र] एक दिन में किये जावें, यज्ञ अवश्य समर्थ होता है, और यजमान का प्रजापालक व्यवहार समर्थ होता है । (अथ ह एव एवयामरुतं होता शंसेत्, तस्य अस्य प्रतिष्ठा, तस्यै एव एनम् अन्ततः प्रतिष्ठापयति प्रतिष्ठापयति) फिर ही एवयामरुत् स्तोम को होता बोले, उस [यजमान] की प्रतिष्ठा है, उस [प्रतिष्ठा] के लिए ही इस [एवयामरुत् स्तोम] को अन्त में वह स्थापित करता है, वह स्थापित करता है ॥ ६ ॥

भावार्थः—मनुष्य यज्ञ के अङ्ग अङ्ग के विचार के साथ यज्ञ सिद्धि करके प्रतिष्ठा पावे ॥ ६ ॥

विशेषः १—इस कण्डिका के लिये देखो पीछे क० ७ । ८ और ऐ० ब्रा० ५ । १५ और ६ । ३०, ३१ ॥

विशेषः २—संकेतित मन्त्रों में से दो मन्त्र यहाँ लिखते हैं, शेष वेद में देखो—द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान् । तं नः सहस्र-

---

हे होतः (धाः) अधाः । धेहि (प्रजापतिः) प्रजातिः । जन्म (अवरुद्धाः) रक्षिताः (संस्कुर्वन्ति) संस्कारयुक्तं कुर्वन्ति (योन्याम्) गर्भाशये (सम्भवन्) उत्पन्नः सन् (शेते) वर्तते (कल्पते) समर्थयते ॥]

भरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् । १ । दिवो न तुभ्यमन्विन्द्र सत्रा-सुर्यं देवेभिर्धायि विश्वम् । अहिं यद् वृत्रमपो वव्रिवांसं हन्नृजीषिन् विष्णुना सचानः । २ । ऋ० ६ । २० । १, २ ॥

१—(इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (यः रयिः) जो धन (द्यौः न भूम) सूर्य के समान सत्तामात्र को, (शवसा) बल से (पृत्सु) सङ्ग्रामों में (अर्यः = अरेः) वैरी के (जनान्) मनुष्यों को (अभि तस्थौ) वश में करता है। (सहसः सूनो) हे बल से प्रेरणा करने वाले [शूर !] (नः) हमें (तम्) उस (सहस्रभरम्) सहस्रों पदार्थ धारण करने वाले, (उर्वरासाम्) उपजाऊ भूमि के सेवने वाले (वृत्रतुरम्) शत्रुओं के नाश करने वाले [धन] को (दद्धि) दें ॥ १ ॥

२—(इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (दिवः = दिवे न) सूर्य समान (तुभ्यम्) तेरे लिये (सत्रा) सत्य से (विश्वम्) सब (असुर्यम्) असुरों का ऐश्वर्य (देवेभिः) विद्वानों करके (अनु धायि) निरन्तर धारण किया गया है। (ऋजीषिन्) हे सरल धर्म वाले ! (यत्) जब कि तूने (वृत्रम्) वैरी को, (विष्णुना) विजुली से (सचानः) मिले हुए [सूर्य के समान] (अपः) जलों को (वव्रिवांसम्) बांटने वाले (अहिम्) मेघ को (हन्) मारा है ॥ २ ॥

कण्डिका १० ॥

देवक्षेत्रं वै षष्ठमहः । देवक्षेत्रं वा एत आगच्छन्ति, ये षष्ठमहरागच्छन्ति । न वै देवा अन्योऽन्यस्य गृहे वसन्ति, नर्त्तुर्ऋतोर्गृहे वसतीत्याहुः, तद्यथायथ-मृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायम्, तद्यदृतून् कल्पयति, यथायथं जनिता। तदाहुः नर्त्तुप्रैषी प्रेष्येयुर्नर्त्तुप्रैषी वषट्कुर्युः, वाग्वा ऋतुप्रैषा, आप्यायते वै वाक् षष्ठेऽहनीति । यदृतुप्रैषी प्रेष्येयुः, यदृतुप्रैषी वषट्कुर्युः, वाचमेव तदाप्तां शान्तामृक्तवतीं वहरावणीमृच्छेयुः, अच्युताद्यज्ञस्य च्यवेरन्, यज्ञान् प्राणान् प्रजायाः पशुभ्यो जिह्मायेयुः, तस्मादृग्मेभ्य एव प्रेषितव्यमृग्मेभ्योऽधि वषट्कृत्यम् । तत्र वाचमाप्तां शान्तामृक्तवतीं वहरावणीमृच्छन्ति, नाच्युताद्यज्ञस्य च्यवेरन्, यज्ञान् प्राणान् प्रजायाः, पशुभ्यो जिह्मायन्ति । पारुच्छेपीरुपदधति, द्वयोः सव-नयोः पुरस्तात् प्रस्थितयाज्यानाम् । रोहितं वै नामैतच्छन्दः, यत् पारुच्छेपम् । एतेन ह वा इन्द्रः सप्त स्वर्गाल्लोकानारोहत् । आरोहति सप्त स्वर्गाल्लोकान्, य एवं वेद । तदाहुः, यत् पञ्चपद एव पञ्चमस्याह्नोरूपं, षट्पदात् षष्ठस्य, अथ कस्मात् सप्तपदात् षष्ठेऽहनि शस्यन्त इति । षड्भिरेव पदैः षष्ठमहरवाप्नुवन्ति, विच्छिद्ये[1] वै तदहः, यत् सप्तमम् । तदेव सप्तमेन पदेनाभ्यारुह्य वसन्ति, सन्त-तैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति, य एवं विद्वांस उपयन्ति ॥ १० ॥

कण्डिका १० ॥ षडह यज्ञ में पारुच्छेपी ऋचाओं का प्रयोग ॥

(देवक्षेत्रं वै षष्ठम् अहः) देवक्षेत्र [विद्वानों का घर] ही छठा दिन है। (देवक्षेत्रं वै एते आगच्छन्ति, ये षष्ठम् अहः आगच्छन्ति) विद्वानों के घर ही यह

१. "विच्छिद्यैवैतद्" पाठोऽत्र समीचीनः ॥ सम्पा० ॥

[यजमान लोग] आते हैं, जो छठे दिन आते हैं। (न वै देवाः अन्योन्यस्य गृहे वसन्ति, न ऋतुः ऋतोः गृहे वसति इति आहुः) न तो देवता [सूर्य वायु आदि] एक दूसरे के घर में बसते हैं, न ऋतु [वसन्त आदि] ऋतु के घर में बसता है—ऐसा लोग कहते हैं। (तत् यथायथं ऋत्विजः असम्प्रदायम् ऋतुयाजान् यजन्ति, यत् तत् जनिता यथायथम् ऋतून् कल्पयति) फिर यथायोग्य स्थान पर बैठे ऋत्विज् लोग दूसरे को स्थान न देकर ऋतुओं के यज्ञों को करते हैं, जिससे तब जनिता [ऋतुओं का ठीक करने वाला ऋत्विज्] यथायोग्य स्थान पर बैठा हुआ ऋतुओं को समर्थ करता है। (तत् आहुः ऋतुप्रैषी न प्रेष्येयुः न ऋतुप्रैषी वषट्कुर्युः) फिर कहते हैं––ऋतुप्रैषी [ऋतु यज्ञ के मन्त्र बतलाने वाला] प्रेष्य मन्त्र [होता यक्षदिन्द्रम्––इत्यादि यजु० २१ । ४५] को न बोले और न ऋतुप्रैषी वषट्कार [समाप्ति कर्म] करे। (वाक् वै ऋतुप्रैषा, वाक् वै षष्ठे अहनि आप्यायते इति) वाणी ही ऋतुप्रैष मन्त्र है, वाणी ही छठे दिन में समाप्त हो जाती है। (यत् ऋतुप्रैषी प्रेष्येयुः यत् ऋतुप्रैषी वषट्कुर्युः, तत् आप्तां शान्तां ऋक्तवतीं वहरावणीं वाचम् एव ऋच्छेयुः यज्ञस्य अच्युतात् च्यवेरन्) यदि ऋतुप्रैषी प्रैष मन्त्रों को बोले, और जो ऋतुप्रैषी वषट्कार करे, वह तब समाप्त हुई थकी हुई शून्य वाली [निरर्थक] और बोझ से चिल्लाती हुई वाणी को ही प्राप्त करें और यज्ञ के न गिरते हुए प्रयोग से वे गिर पड़ें। (यज्ञान् प्राणान् प्रजायाः पशुभ्यः जिह्मायेयुः) यज्ञों और प्राणों को प्रजा से और पशुओं से वे टेढ़ा [प्रतिकूल] करें। (तस्मात् ऋग्मेभ्यः एव प्रेषितव्यम्, ऋग्मेभ्यः अधि वषट्कृत्यम्) इसलिये ऋचा [तुभ्यं हिन्वानो वसिष्ठ––ऋ० २ । ३६ । १] को पहिले बोलकर ही प्रैष मन्त्र बोले और ऋचा को ही पहिले बोलकर वषट्कार बोले। (तत् आप्तां शान्ताम् ऋक्तवतीम् वहरावणीं वाचं न ऋच्छन्ति, न यज्ञस्य अच्युतात् च्यवेरन्, [न] यज्ञान् प्राणान् प्रजायाः पशुभ्यः जिह्मायन्ति) तब वे समाप्त हुई, थकी हुयी, शून्य वाली [निरर्थक] बोझ से चिल्लाती हुई वाणी को नहीं प्राप्त करते,

---

१०––(देवक्षेत्रम्) क्षि निवासे––ष्ट्रन्। देवानां विदुषां गृहम् (अन्योन्यस्य) परस्परस्य (यथायथम्) यथायोग्यम्। स्वस्वस्थानग्रहणेन (असंप्रदायम्) नञ्+सम्+प्र+ददातेः—णमुल्। युक् च, स्वस्थानम् अन्यस्मै अदत्वा (ऋतुप्रैषी) ऋतुप्रैष––इनिः। ऋतुप्रैषाणाम् ऋतुयाजार्थं मन्त्राणां प्रवर्तकः (प्रेष्येयुः) प्रेष्येत। प्रवर्तेत (ऋतुप्रैषा) ऋतुप्रवर्तिका (आप्यायते) आ समाप्तौ+प्यैङ् वृद्धौ––लट्। समाप्यते (आप्ताम्) समाप्ताम् (शान्ताम्) श्रान्ताम्। खेदयुक्ताम् (ऋक्तवतीम्) रिचिर् विरेचने पृथग्भावे च––क्तः, मतुप् [1]आर्षरूपम्। ऋक्तां शून्याम् (वहरावणीम्) वह+रवण––स्वार्थे ––अण्, ङीप्,। वहेन गुरुभारेण रवणं रोदनं यस्याः ताम् (ऋच्छेयुः) प्राप्नुयुः (अच्युतात्) अनष्टात् प्रयोगात् (च्यवेरन्) पतनं प्राप्नुयुः (जिह्मायेयुः) जहातेः सन्वदाकारलोपश्च (उ० १ । १४१) ओहाक् त्यागे––मन्, जिह्म इति नामधातुः। कुटिलान् विरुद्धान् कुर्युः (ऋग्मेभ्यः) ऋच+माङ् माने––कः। ऋक्शिरस्केभ्यः प्रैषमन्त्रेभ्यः ऊर्ध्वम् (जिह्मायन्ति) कुटिलान् कुर्वन्ति (पारुच्छेपीः)

---

१. यहाँ "रिक्त" पाठ ही शुद्ध होना चाहिये ॥ सम्पा० ॥

और न यज्ञ के न गिरे हुए प्रयोग से गिरते और [न] यज्ञों और प्राणों को प्रजा से और पशुओं से टेढ़ा करते हैं ॥

(पारुच्छेपीः द्वयोः सवनयोः प्रस्थितयाज्यानां पुरस्तात् उपदधति) पारुच्छेपी [परुच्छेप की देखी ऋचाओं--अग्निं होतारं मन्ये--इत्यादि, ऋ० १ । सूक्त १२७—१३९] ऋचाओं को दोनों [पहिले] सवनों में प्रयोग के योग्य याज्याओं के पहिले वे धरते हैं। (रोहितं वै नाम एतत् छन्दः यत् पारुच्छेपम्) रोहित [चढ़ने योग्य] ही नाम यह छन्द है जो पारुच्छेप [परुच्छेप ऋषि के सूक्तों वाला] है। (एतेन ह वै इन्द्रः सप्त स्वर्गान् लोकान् आ-अरोहत्) इस [रोहित छन्द] से ही इन्द्र [परम ऐश्वर्यवान् जीव] सात स्वर्ग लोकों [अर्थात् भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् सात व्याहृतियों से जिनका सम्बन्ध शिर, नेत्र, कण्ठ, हृदय, नाभि, पाद और शिर से है] को चढ़ा। (सप्त स्वर्गान् लोकान् आरोहति, यः एवं वेद) सात स्वर्ग लोकों को वह चढ़ता है जो ऐसा विद्वान् है। (तत् आहुः यत् पञ्चपदः एव पञ्चमस्य अह्नः रूपम्, षट्पदात् षष्ठस्य, अथ कस्मात् सप्तपदात् षष्ठे अहनि शस्यन्ते इति) फिर वे कहते हैं—पांच पाद वाली ऋचायें ही पाँचवें दिन का रूप हैं, छह पद वाले मन्त्र से छठे का [रूप है], फिर किस लिए सात पाद वाले मन्त्र से छठे दिन में वे स्तुति करते हैं। (षड्भिः एव पदैः षष्ठम् अहः अवाप्नुवन्ति, विच्छिद्य वै तत् अहः यत् सप्तमम्) छह ही पादों से छठे दिन को वे प्राप्त करते हैं, काट लेने पर [सातवाँ पाद निकाल देने पर] ही वह दिन है जो सातवाँ है [पारुच्छेपी सूक्त छन्दों और अतिछन्दों वाले हैं और अतिछन्दों में पाँच, छह और सात पाद हैं]। (तत् एव सप्तमेन पदेन अभ्यारुह्य वसन्ति, संततैः अव्यवच्छिन्नैः त्र्यहैः यन्ति, ये एवं विद्वांसः उपयन्ति) तब ही वे लोग सातवें पाद से चढ़कर वसते हैं और फैले हुए और न टूटे हुए तीन दिन वाले यज्ञों से चलते हैं, जो ऐसे विद्वान् आते हैं ॥ १० ॥

भावार्थः—मन्त्रों के यथावत् विचारपूर्वक प्रयोग करने से यज्ञ सिद्धि करनी चाहिए ॥१०॥

विशेषः—इस कण्डिका को ऐ० ब्रा० ५ । ६७, १० से मिलाओ ॥

कण्डिका ११ ॥

देवासुरा वा एषु लोकेषु समयतन्त। ते देवा षष्ठेनाह्ना एभ्यो लोकेभ्यो-ऽसुरान् पराणुदन्त। तेषां यान्यन्तर्हस्तानि वसून्यासन्, तान्यादायन् समुद्रं प्रारूप्यन्त। तेषां वै देवा अनुहायैतेनैव च्छन्दसा अन्तर्हस्तानि वसून्याददत। तदेवैतत् पदं, पुनःपदम्। स वांकुश आकुञ्चनाया द्विषतो वसु दत्ते, निरेवैनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते, य एवं वेद। द्यौर्वै देवता[1] षष्ठमहर्वहति, त्रयस्त्रिंशस्तोमो रैवतं

परुच्छेपेन महर्षिणा दृष्टाः ऋचः (प्रस्थितयाज्यानाम्) प्राप्तयाज्यानाम् (पञ्चपदः) पंचपादोपेताः (षट्पदात्) षट्पादयुक्ताच्छन्दसः (सप्तपदात्) सप्तपादयुक्तात् (विच्छिद्य) छिदिर् द्वैधीकरणे—ल्यप्। विच्छेदनीये सति (सन्ततैः) सम्+तनु विस्तारे—क्तः। विस्तृतैः (अव्यवच्छिन्नैः) विच्छेदरहितैः। परस्परसंयुक्तैः ॥

१. पू. सं. 'देवताः' इति पाठः ॥

सामातिच्छन्दश्छन्दो यथादैवतमनेन यथास्तोमं यथासाम यथाछन्दः समृध्नोति, य एवं वेद । यद्वै समानोदर्कं, तत् षष्ठस्याह्नो रूपम् । यद्येव प्रथममहः, तदुत्तममहः, तदेवैतत् पदम् । पुनर्यत् षष्ठं, यदश्ववद्यद्रथवद्यत् पुनरावृत्तं, यत् पुनर्निवृत्तं, यदन्तरूपं, यदसौ लोकोऽभ्युदितः, यन्नाभानेदिष्ठं, यत् पारुच्छेपं, यन्नाराशंसं, यद् द्वैपदा, यत् सप्तपदा, यत् कृतं, यद्रैवतं, तत्तृतीयस्याह्नो रूपम् । एतानि वै षष्ठस्याह्नो रूपाणि छन्दसामु ह षष्ठेनाह्नाक्तानां रसो निनेजत्, तं प्रजापतिरुदानए नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभा पारिक्षित्या जगत्या गाथया अनुष्टुभा एतानि वै छन्दांसि षष्ठेऽहनि शस्तानि भवन्ति अयातयामानि, छन्दसामेव तत् सरसताया अयातयामतायै । सरसानि हास्य छन्दांसि षष्ठेऽहनि शस्तानि भवन्ति, सरसैः छन्दोभिरिष्टं भवति, सरसैः छन्दोभिर्यज्ञं तनुते य एवं वेद ॥ ११ ॥

कण्डिका ११ ॥ देवासुर सङ्ग्राम की आख्यायिका, यज्ञों में छठे दिन के कर्म ॥

(देवासुराः वै एषु लोकेषु समयतन्त) देवता और असुर इन लोकों में युद्ध करने लगे । (ते देवाः षष्ठेन अह्ना एभ्यः लोकेभ्यः असुरान् पराणुदन्त) उन देवताओं ने छठे दिन [के यज्ञ] द्वारा इन लोकों से असुरों को निकाल दिया । (तेषां यानि अन्तर्हस्तानि वसूनि आसन्, तानि आदायन् समुद्रं प्रारूप्यन्त) उन [देवताओं] के जो हाथों में धन थे, उन्हें वे [असुर] ले गये और समुद्र में फेंक दिया । (देवाः वै तेषाम् अनुहाय एतेन एव छन्दसा अन्तर्हस्तानि वसूनि आददत) देवताओं ने उनका पीछा करके इस ही [पारुच्छेप] छन्द से [उनके] हाथ में के धनों को ले लिया । (तत् एव एतत् पदं, पुनःपदम्) वह ही यह पाद है, [जो] पुनःपद [छह पाद के बोले जाने के पीछे सातवां पाद] है । (सः वा अंकुशः आकुञ्चनाय, द्विषतः वसु आ दत्ते, एनम् एभ्यः सर्वेभ्यः लोकेभ्यः एव निर् नुदते, यः एवं वेद) वह ही समेटने के लिये अंकुश है, वह बैरी के धन को ले लेता है, और इसको इन सब लोकों से ही निकाल देता है, जो ऐसा विद्वान् है ॥

(द्यौः वै देवता षष्ठम् अहर्वहति, त्रयस्त्रिंशः स्तोमः, रैवतं साम अतिच्छन्दः छन्दः, अनेन यथादैवतम्, यथास्तोमम्, यथासाम, यथाछन्दः समृध्नोति, यः एवं वेद) प्रकाशमान सूर्य देवता [यज्ञ के] छठे दिन को ले चलता है, त्रयस्त्रिंश स्तोम, रैवत साम और अतिछन्द छन्द होता है । इस [विधान] से देवता के अनुसार, स्तोम के अनुसार,

---

११—(समयतन्त) सग्रामं कृतवन्तः (पराणुदन्त) परा—अनुदन्त । निःसारितवन्तः (अन्तर्हस्तानि) हस्तगतानि । अधिकारप्राप्तानि (आदायन्) आ+अदायन् । गृहीतवन्तः (प्रारूप्यन्त) प्र—अरूप्यन्त । रुह बीजजन्मनि प्रादुर्भावे च—णिच् । प्रक्षिप्तवन्तः (अनुहाय) अनु+ओहाङ् गतौ—ल्यप् । पृष्ठतो गत्वा (आददत) आ—अददत । गृहीतवन्तः (तत्) तत्र । पारुच्छेपीषु ऋक्षु (पुनःपदम्) षट्सु पादेषु समाप्तेषु पुनः पश्चात् उच्चार्यमाणः सप्तमः पादः (अङ्कुशः) वक्राग्रलौहास्त्रभेदः (आकुञ्चनाय) आकर्षणाय (आ दत्ते) गृह्णाति

सामगान के अनुसार और छन्द के अनुसार वह समृद्ध होता है, जो ऐसा विद्वान् है। (यत् वै समानोदर्कं, तत् षष्ठस्य अह्नः रूपम्) जो ही समान अन्त कर्म है, वह छठे दिन का रूप है। (यदि एव प्रथमम् अहः, तत् उत्तमम् अहः, तत् एव एतत् पदम्) जो ही पहिला दिन है, वह ही सबसे पिछला दिन है [पहिले दिन के समान पिछले दिन काम होता है], वह ही वह पाद है। (पुनः यत् षष्ठं, यत् अश्ववत्, यत् रथवत्, यत् पुनरावृत्तम् यत् पुर्नानिवृत्तं, यत् अन्तरूपं, यत् असौ अभ्युदितः लोकः यत् नाभानेदिष्ठं यत् पारुच्छेपं यत् नाराशंसं, यत् द्वैपदा, यत् सप्तपदा, यत् कृतं, यत् रैवतं, तत् तृतीयस्य अह्नः रूपम्) फिर जो छठा [दिन] है, जो अश्व शब्द वाला, जो रथ शब्द वाला, जो आवृत्ति वाला और जो पुर्ननिवृत्ति वाला, और जो अन्तरूप वाला छन्द है, जो वह [सूर्य] उदय होता हुआ लोक है, जो नामानेदिष्ठ, जो पारुच्छेप और जो नाराशंस सूक्त है, जो दो पाद वाली ऋचा और सात पाद वाली ऋचा है, जो कृत [भूत काल] है और जो रैवत साम है, वह तीसरे दिन का रूप [चिह्न] है। (एतानि वै षष्ठस्य अह्नः रूपाणि, षष्ठेन अह्ना अक्तानां छन्दसाम् उ रसः निनेजत्) यह ही छठे दिन के रूप हैं, छठे दिन के साथ मिले हुये छन्दों का रस पुष्ट किया जावे। (तं [तस्मै] प्रजापतिः उदानः ए [एव]) उस [यजमान] के लिये उदान वायु ही प्रजापालक है। (नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभा पारिक्षित्या जगत्या गाथया अनुष्टुभा) नाराशंसी, गायत्री, रैभी, त्रिष्टुप् पारिक्षिती [पारिक्षित शब्द वाली] जगती, गाथा और अनुष्टुप् ऋचा साथ [यह काम होता है]। (एतानि वै छन्दांसि षष्ठे अहनि अयातयामानि शस्तानि भवन्ति, तत् छन्दसाम् एव सरसतायै अयातयामतायै) यह ही छन्द छठे दिन में उचित समय के अनुकूल बोले गये होते हैं, यह काम छन्दों के ही रसीलेपन और उचित समय के अनुकूलपन के लिये है। (अस्य ह सरसानि छन्दांसि षष्ठे अहनि शस्तानि भवन्ति, सरसैः छन्दोभिः इष्टं भवति, सरसैः छन्दोभिः यज्ञं तनुते यः एवं वेद) उसके ही रसीले छन्द छठे दिन में बोले गये होते हैं, रसीले छन्दों से वह इष्ट [प्रिय पदार्थ] पाता है, और रसीले छन्दों से वह यज्ञ फैलाता है, जो ऐसा विद्वान् है ॥ ११ ॥

भावार्थः— कण्डिका १० के समान है ॥ ११ ॥

(द्यौः) प्रकाशलोकः। सूर्यः (वहति) निर्वहति। प्रवर्तयति (अतिच्छन्दः) गायत्र्यादि-सप्तछन्दोभ्यो अधिकाक्षरयुक्तं छन्दः (समानोदर्कम्) तुल्यसमाप्तिकम् (पुनरावृत्तम्) पुनरावृत्तियुक्तम् (पुर्नानिवृत्तम्) पुर्नानिष्पादितं। पुनः सिद्धम् (पारुच्छेपम्) परुच्छेपेन दृष्टम् (द्वैपदा) द्विपादोपेता ऋक् (सप्तपदा) सप्तपादोपेता। यथा पारुच्छेपी (कृतम्) भूतार्थवाचि प्रत्यययुक्तं धातुमात्रम् (अक्तानाम्) सङ्गतानाम् (निनेजत्) णिजिर् शौचपोषणयोः। शोधयेत्। पोषयेत् (पारिक्षित्या) परिक्षित्— अण्, ङीप्। परीक्षिच्छब्देनोपेतया (अयातयामानि) उचितसमययोग्यानि (इष्टम्) अभिलषितम्। प्रियम् (भवति) प्राप्नोति (तनुते) विस्तारयति ॥

विशेषः—इस कण्डिका के लिये अगली कण्डिका १२ और ऐतरेय ब्राह्मण ५ । ११, १२ तथा ६ । ३२ देखो ॥

कण्डिका १२ ॥

अथ यद् द्वैपदी स्तोत्रियानुरूपौ भवतः, इमा नु कं भुवना सीषधामेति । द्विपाद्वै पुरुषः, द्विप्रतिष्ठः पुरुषः, पुरुषो वै यज्ञः, तस्माद् द्वैपदी स्तोत्रियानुरूपौ भवतः । अथ सुकीर्त्ति शंसति, अपेन्द्र प्राचो मघवन्नमित्रानिति । देवयोनिर्वै सुकीर्त्तिः, स य एवमेतां देवयोन्यां सुकीर्त्ति वेदकीर्ति प्रतिष्ठापयति, भूतानां कीर्त्तिमान् स्वर्गे लोके प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । अथ वृषाकपिं शंसति, वि हि सोतोरसृक्षतेति । आदित्यो वै वृषाकपिः तद्यत् कम्पयमानो रेतो वर्षति, तस्माद् वृषाकपिः, तद् वृषाकपेर्वृषाकपित्वं वृषाकपिरिव वै सर्वेषु लोकेषु भाति, य एवं वेद । तस्य तृतीयेषु पादेष्वाद्यन्तयोर्न्यूङ्खनिनर्दां करोति, अन्नं वै न्यूंखः, बलं निनर्दः, अन्नाद्यमेवास्मै तद् बले निदधाति । अथ कुन्तापं शंसति कुयं ह वै नाम कुत्सितं भवति, तद्यत्तपति, तस्मात् कुन्तापाः, तत् कुन्तापानां कुन्तापत्वम् । तप्यन्तेऽस्मै कुयानिति तप्तकुयः स्वर्गे लोके प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । तस्य चतुर्दश प्रथमा भवन्ति, इदं जना उपश्रुतेति । ताः प्रग्राहं शंसति, यथा बृषाकपिं वार्षरूपं हि वृषाकपेस्तन्न्यायमित्येव । अथ रैभीः शंसति, वच्यस्व रेभ वच्यस्वेति । रेभन्तो वै देवाश्च ऋषयश्च स्वर्गं लोकमायन्, तथैवैतद्यजमाना रेभन्त एव स्वर्गं लोकं यन्ति, ताः प्रग्राहमित्येव । अथ पारिक्षितीः शंसति, राज्ञो विश्वजनीनस्येति । संवत्सरो वै परिक्षित्, संवत्सरो हीदं सर्वं परिक्षियतीति । अथो खल्वाहुः, अग्निर्वै परिक्षिद् अग्निर्हीदं सर्वं परिक्षियतीति । अथो खल्वाहुः,गाथा एवैताः कारव्या राज्ञः परिक्षित इति । स नस्तद्यथा कुर्य्यात्, गाथा एवैतस्य शस्ता भवन्ति । यद्यु वै गाथा अग्नेरेव गाथाः संवत्सरस्य वेति ब्रूयात्, यद्य वै मन्त्रोऽग्नेरेव मन्त्रः संवत्सरस्य वेति ब्रूयात् ताः प्रग्राहमित्येव । अथ कारव्याः शंसति इन्द्रः कारुमबूबुधदिति । यदेव देवाः कल्याणं कर्माकुर्वंस्तत् कारव्याभिरवाप्नुवन्, तथैवैतत् यजमानाः यदेव देवाः कल्याणं कर्मकुर्वन्ति, तत् कारव्याभिरवाप्नुवन्ति, ताः प्रग्राहमित्येव । अथ दिशां क्लृप्तीः, पूर्वं शस्त्वा यः सभेयो विदथ्य इति । जनकल्पा उत्तराः शंसति, योनाऽक्ताक्षो अनभ्यवत इति, ऋतवो वै दिशः प्रजननः, तद्यद् दिशाङ्क्लृप्तीः पूर्वं शस्त्वा यः सभेयो विदथ्य इति जनकल्पा उत्तराः शंसति, ऋतूनेव तत् कल्पयति, ऋतुषु प्रतिष्ठापयति । प्रतिष्ठन्तीरिदं सर्वमनुप्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । ता अर्धर्चशः शंसति प्रतिष्ठित्या एव । अथेन्द्रगाथाः शंसति, यदिन्द्रादो दाशराज्ञ इति । इन्द्रगाथाभिर्ह वै देवा असुरानाज्ञायाथैनानन्या[1]यन्, तथैवैतत् यजमाना इन्द्रगाथाभिरेवाप्रियं भ्रातृव्यमागायाथैनमागायाथैनमतियन्ति, तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव ॥ १९ ॥

---

१. जर्मनसंस्करणे "अत्यायन्" इति पाठः, स च सङ्गतः ॥ सम्पा० ॥

कण्डिका १२ ॥ षडह यज्ञ में स्तोत्रिय, अनुरूप, सुकीर्ति, वृषाकपि, कुन्ताप [अथर्व० २० । १२७-१३६], रैभी, पारिक्षिती, कारव्या, दिशां क्लृप्ती और इन्द्र गाथाओं का वर्णन ॥

१--(अथ यत् द्वैपदौ स्तोत्रियानुरूपौ भवतः इमा नु कं भुवना सीषधाम इति) फिर जो दो पाद वाले स्तोत्रिय और अनुरूप स्तोत्र होते हैं—इमा नु कं भुवना सीषधाम--अथर्व० २० । ६३ । १, द्विपात् त्रिष्टुप्, यह मन्त्र बोला जाता है। (द्विपाद् वै पुरुषः, द्विप्रतिष्ठः पुरुषः, पुरुषः वै यज्ञः, तस्मात् द्वैपदौ स्तोत्रियानुरूपौ भवतः) दो पांव वाला ही पुरुष है, दो प्रतिष्ठा वाला [दोनों स्थूल और सूक्ष्म शरीर का आश्रय वाला] पुरुष है, पुरुष ही यज्ञ है, इसलिये दो पाद वाले स्तोत्रिय और अनुरूप होते हैं ॥

२—(अथ सुकीर्ति शंसति अपेन्द्र प्राचो मघवन्नमित्रान् इति) फिर सुकीर्ति [सुकीर्ति ऋषि के देखे सूक्त] को वह बोलता है—अपेन्द्र प्राचो मघवन्नमित्रान्-अथर्व० २० । १२५ । १-७, यह सूक्त है। (देवयोनिःवै सुकीर्तिः, सः यः एवं देवयोन्याम् एतां सुकीर्ति वेदकीर्ति प्रतिष्ठापयति, भूतानां कीर्तिमान् स्वर्गे लोके प्रतितिष्ठति) विद्वानों का उत्पत्ति स्थान ही सुकीर्ति [उत्तम यश] है, वह जो पुरुष इस प्रकार विद्वानों के उत्पत्ति स्थान में इस सुकीर्ति, वेद कीर्ति को स्थापित करता है, वह प्राणियों के बीच कीर्तिमान् होता हुआ स्वर्ग लोक में प्रतिष्ठा पाता है। (प्रजया पशुभिः प्रतितिष्ठति, यः एवं वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है जो ऐसा विद्वान् है ॥

३—(अथ वृषाकपिं शंसति, वि हि सोतोरसृक्षत—इति) फिर वृषाकपि [वृषाकपि ऋषि के देखे सूक्त] को वह बोलता है, वि हि सोतोरसृक्षत ... अथर्व० २० । १२६ । १—२३, यह सूक्त है। (आदित्यः वै वृषाकपिः यत् तत् कम्पयमानः रेतः वर्षति, तस्मात् वृषाकपिः, तत् वृषाकपेः वृषाकपित्वम्) सूर्य ही वृषाकपि [वृष्टि का कपाने वाला] है, क्योंकि वह कांपता हुआ जल बरसाता है, इसलिये वृषाकपि है, यह ही वृषाकपि का वृषाकपित्व है। (वृषाकपिः इव वै सर्वेषु लोकेषु भाति, यः एवं वेद) वृषाकपि, सूर्य के समान ही सब लोकों में वह चमकता है जो ऐसा विद्वान् है। (तस्य तृतीयेषु पादेषु आद्यन्तयोः न्यूङ्खनिनर्दां करोति) उस [सूक्त] के तीसरे पादों के बीच आदि अन्त में न्यूङ्ख [ओंकार सहित मन्त्र उच्चारण] के सहित निनर्द [ध्वनि विशेष] करता है। (अन्नं वै न्यूङ्खः, बलं निनर्दः, अन्नाद्यम् एव अस्मै तत्

१२—(द्वैपदौ) द्विपादयुक्तौ (कम्) सुखम् (सीषधाम) साधयेम (द्विप्रतिष्ठः) द्वे प्रतिष्ठे स्थूलसूक्ष्मशरीररूपाश्रयौ यस्य सः (भूतानाम्) प्राणिनां मध्ये (वृषाकपिम्) गो० उ० ६ । ७ । वृष्टेः कम्पयितारं चेष्टयितारं सूर्यम् (वि) वियोगे (सोतोः) ईश्वरे तोसुन्कसुनौ (पा० ३ । ४ । १३) षुञ् अभिषवे--तोसुन्। अभिषोतुम्। तत्त्वरसं निष्पादयितुम् (असृक्षत) विसृष्टवन्तः । त्यक्तवन्तः (रेतः) जलम् (वृषाकपिः) वृष्टेः कम्पयिता सूर्यः (न्यूङ्खनिनर्दाम्) न्यूङ्खेन सह निनर्दं ध्वनिविशेषम् (कुन्तापम्) कुङ् आर्तस्वरे—डु,

बले निदधाति) अन्न ही न्यूङ्ख है, और बल निनर्द है, खाने योग्य अन्न को ही इस [यजमान] के लिये उससे वह बल में स्थापित करता है ॥

४—(अथ कुन्तापं शंसति) फिर वह कुन्ताप सूक्त [अथर्व० २० । १२७—१३६] को बोलता है । (कुयं ह वै नाम कुत्सितं भवति, तत् यत् तपति तस्मात् कुन्तापाः, तत कुन्तापानां कुन्तापत्वम्) कुय, यह कुत्सित [निन्दित] का नाम है क्योंकि वह उसे तपाता है, इसलिये वे कुन्ताप [पाप के भस्म करने वाले] हैं, वह ही कुन्तापों का कुन्तापत्व [पापनाशक व्यवहार] है । (अस्मै कुयान् [=कुयाः] तप्यन्ते इति, तप्तकुयः स्वर्गे लोके प्रतितिष्ठति) इस [यजमान] के लिये पाप भस्म किये जाते हैं, इसलिये पाप भस्म किया हुआ वह स्वर्ग लोक में प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एव वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है, जो ऐसा विद्वान् है । (तस्य चतुर्दश प्रथमाः भवन्ति, इदं जना उपश्रुत इति) उस [कुन्ताप] के चौदह पहिले मन्त्र हैं–इदं जना उपश्रुत······अथर्व० २० । १२७ । १—१४, यह ऋचायें हैं । (ताः प्रग्राहं शंसति, यथा वृषाकपिम्) उन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर वह बोलता है जैसे वृषाकपि सूक्त को । (वार्षरूपं हि वृषाकपेः) वृष्टि वाला रूप ही वृषाकपि का है । (तत् न्यायम् इति एव) सो वह ठीक ही है ॥

५—(अथ रैभीः शंसति, वच्यस्व रेभ वच्यस्व—इति) फिर रेभ शब्द वाली ऋचाओं को वह बोलता है—वच्यस्व रेभ वच्यस्व······अथर्व० २० । १२७ । ४—६, यह ऋचायें हैं । (रेभन्तः वै देवाः च ऋषयः च स्वर्गं लोकम् आयन्) रेभ [स्तुति] करते हुये ही देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शकों] ने स्वर्ग लोक पाया है । (तथा एव एतत् यजमानाः रेभन्तः एव स्वर्गं लोकं यन्ति) वैसे ही इस [विधान] से यजमान रेभ [स्तुति] करते हुये ही स्वर्ग लोक पाते हैं । (ताः प्रग्राहम् इति एव) इन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है], यह ही विधान है ॥

६—(अथ पारिक्षितीः शंसति, राज्ञः विश्वजनीनस्य इति) फिर परिक्षित् शब्द वाली ऋचायें वह बोलता है, राज्ञो विश्वजनीनस्य······अथर्व० २० । १२७ । ७—१० यह ऋचायें है । (संवत्सरः वै परिक्षित्, संवत्सरः हि इदं सर्वं परिक्षियति

यद्वा कुयं कुत्सितं + तप दाहे—घञ् । पापस्य दुःखस्य तापकं दाहकम् (तप्त-कुयः) भस्मीकृतपापः (प्रग्राहम्) पादे पादे प्रगृह्य अवसाय च (न्यायम्) न्याय्यम् । उचितम् (रैभीः) रेभशब्दयुक्ताः (वच्यस्व) ब्रवीतेर्यक् । ब्रूहि । उपदिश (रेभ) रेभतिरर्चतिकर्मा—निघ० ३ । १४ । अच् । हे स्तोतः । हे विद्वन् (रेभन्तः) स्तुवन्तः (पारिक्षितीः) परिक्षित् इति शब्दयुक्ताः (परिक्षित्) परि + क्षि निवासे ऐश्वर्ये च—क्विप्, तुक् । सर्वतो निवासकः (कारव्याः) कारु-शब्दयुक्ताः (राज्ञः) शासकस्य (परिक्षितः) सर्वत ऐश्वर्य्ययुक्तस्य (विश्व-जनीनस्य) आत्मन्विश्वजनभोगोत्तरपदात् खः (पा० ५ । १ । ९) विश्वजन—

इति) संवत्सर ही परिक्षित् [सब ओर से बसने वाला] है, क्योंकि संवत्सर ही इस सब में सब ओर से वास करता है। (अथो खलु आहुः, अग्निः वै परिक्षित्, अग्निः हि इदं सर्वं परिक्षियति इति) फिर कोई कहते हैं—अग्नि ही परिक्षित् है, क्योंकि अग्नि इस सब में सब ओर से वास करता है। (अथो खलु आहुः, गाथाः एव एताः कारव्याः राज्ञः परिक्षितः इति) फिर कोई कोई कहते हैं—यह कारु शब्द वाली ऋचायें गाथा हैं [जिनमें] राज्ञः परिक्षितः पद आये हैं अथर्व० २०। १२७। ६, १०। (सः नः तत् यथा कुर्यात्, गाथाः एव एतस्य शस्ताः भवन्ति) वह [ऋत्विज्] हमारे लिये उस विधान से जैसा करे, यह ऋचायें, इस [सूक्त] की गाथायें ही बोली हुई होती हैं। (यदि उ वै गाथाः अग्नेः एव संवत्सरस्य वा गाथाः इति ब्रूयात्) यदि वे गाथायें हैं, वे अग्नि की वा संवत्सर की गाथायें हैं—ऐसा वह बतलावे। (यदि उ वै मन्त्रः अग्नेः एव संवत्सरस्य वा मन्त्रः इति ब्रूयात्) जो वह मन्त्र है, वह अग्नि का वा संवत्सर का मन्त्र है—यह वह बतावे। (ताः प्रग्राहम् इति एव) इन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है], यह ही विधान है॥

७—(अथ कारव्याः शंसति, इन्द्रः कारुमबूबुधत्—इति) फिर कारु [स्तोता] शब्द वाली ऋचायें वह बोलता है-इन्द्रः कारुमबूबुधत्... अथर्व० २०। १२७। ११, यह मन्त्र है। (यत् एव देवाः कल्याणं कर्म अकुर्वन् तत् कारव्याभिः अवाप्नुवन्) जो कुछ भी विद्वानों ने कल्याण कर्म किया है, वह कारु शब्द वाली ऋचाओं से पाया है। (तथा एव एतत् यजमानाः) वैसे ही इससे यजमानों ने [कल्याण कर्म पाया है]। (यत् एव देवाः कल्याणं कर्म कुर्वन्ति तत् कारव्याभिः अवाप्नुवन्ति) जो ही विद्वान् लोग कल्याण कर्म करते हैं वह कारु शब्द वाली ऋचाओं से ही पाते हैं। (ताः प्रग्राहम् इति एव) उन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है] यह ही विधान है॥

८—(अथ दिशां क्लृप्तीः, यः सभेयः विदथ्यः इति पूर्वं शस्त्वा) फिर दिशां क्लृप्ती [दिशाओं की रचना वाली ऋचाओं] को, यः सभेयः विदथ्यः......—अथर्व० २०। १२८। १, इस मन्त्र को पहिले बोलकर [वह बोलता है]। (जनकल्पाः उत्तराः शंसति योऽ नाक्ताक्षो अनभ्यक्त इति) जनकल्प वाली ऋचाओं को वह पीछे बोलता है,

---

खप्रत्ययः। सर्वजनेभ्यो हितस्य (कारुम्) कृवापाजि० (उ० १। १) करोतेः—उण्। कार्यकर्तारम्। स्तोतारम्--निघ० ३। १६ (अबूबुधत्) प्रबोधितवान् (अकुर्वन्) कृतवन्तः (क्लृप्तीः) कृपू सामर्थ्ये रचनायां च--क्तिन्। रचनाः (सभेयः) सभा—ढः। सभ्यः (विदथ्यः) विदथेषु विद्वत्सु साधुः (जनकल्पाः) जनकल्पाभिधा ऋचः (अनाक्ताक्षः) नञ्+आ+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—क्तः+अक्षू व्याप्तौ—अच्। अशुद्धव्यवहारयुक्तः (अनभ्यक्तः) नञ्+अञ्जू व्यक्तौ—क्तः। अव्यक्तः। अविख्यातः (अर्धर्चशः) पादे पादे अर्धर्चेन अर्धर्चेन (यत्) यदा (अदः) तत् (दाशराज्ञे) दाशृ दाने--घञ्+राजृ ऐश्वर्ये—कनिन्। दाशानां दानपात्राणां भृत्यानां स्वामिहिताय (आज्ञाय) आकारोऽत्र अवशब्दार्थे। अवज्ञाय। अवज्ञातवन्तः।

यो ऽनाक्ताक्षः अनभ्यक्तः······अथर्व० २० । १२८ । ६, यह मन्त्र है । (ऋतवः वै दिशः प्रजननः [प्रजननाः]) ऋतुयें ही दिशा के उत्पन्न करने वाले हैं । (तत् यत् दिशां क्लृप्तीः, यः सभेयः विदथ्यः इति पूर्वं शस्त्वा जनकल्पाः उत्तराः शंसति, ऋतून् एव तत् कल्पयति, ऋतुषु प्रतिष्ठापयति) फिर जो दिशां क्लृप्तीः को, यः सभेयः विदथ्यः······ इस मन्त्र को पहिले बोलकर, [बोलता है] और जनकल्प ऋचाओं को पीछे बोलता है, ऋतुओं को ही वह उससे समर्थ करता है और ऋचाओं में [यजमान को] स्थापित करता है । (प्रतिष्ठन्तीः अनु इदं सर्वं प्रतितिष्ठति) प्रतिष्ठा वाली ऋचाओं के साथ यह सब [जगत्] प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है जो ऐसा विद्वान् है । (ताः अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उन ऋचाओं को आधी आधी ऋचाओं करके प्रतिष्ठा के लिये ही वह बोलता है ॥

९—(अथ इन्द्रगाथाः शंसति यदिन्द्रादो दाशराज्ञः इति) फिर इन्द्रगाथाओं को वह बोलता है, यदिन्द्रादो दाशराज्ञः ·····अथर्व० २० । १२८ । १२—१६, यह मन्त्र हैं । (इन्द्रगाथाभिः ह वै देवाः असुरान् अथ एनान् अन्यान् आज्ञाय) इन्द्र गाथाओं से ही देवताओं ने असुरों को और इन दूसरों को निन्दित किया । (तथा एव एतत् यजमानाः इन्द्रगाथाभिः एव अप्रियं भ्रातृव्यम् अथ एनम् आगाय अतियन्ति) वैसे ही यह है—यजमान लोग इन्द्र गाथाओं से ही अप्रिय वैरी को फिर इस [शत्रु] को चढ़ाई करके लांघते हैं । (ताम् अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उस ऋचा को आधी आधी ऋचा करके प्रतिष्ठा के लिये ही वह बोलता है ॥ १२ ॥

भावार्थः—मनुष्य वेदविहित कर्म करने से बाहिरी और भीतरी शत्रुओं को हराकर संसार में उन्नति करें ॥ १२ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । २९, ६ । ३२, ६ । ३३ से मिलाओ ।

विशेषः २—प्रतीक वाले सूक्तों के पहिले पहिले मन्त्र अर्थ सहित लिखे जाते हैं, शेष मन्त्र वेद में देखो ॥

१—दो स्तोत्रियानुरूप—इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः । यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥—अ० २० । ६३ । १—९, तथा देखो ऋ० १० । १५७ । १—५, यजु० २५ । ४६, साम उ० ४ । १ । तृच २३ ॥ (इमा) यह (भुवना) उत्पन्न पदार्थ, (च) और (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला सभापति] (च) और (विश्वे) सब (देवाः) विद्वान् लोग हम (नु) शीघ्र (कम्) सुख को (सीषधाम) सिद्ध करें । (आदित्यैः सह) अखण्ड व्रतधारी विद्वानों के साथ (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला सभापति] (नः) हमारे (यज्ञम्) यज्ञ [मेल मिलाप आदि] (च) और (तन्वम्) शरीर (च) और (प्रजाम्) प्रजा [सन्तान आदि] को (च) भी (चीक्लृपाति) समर्थ करें ॥

तिरस्कृतवन्तः (आगाय)आ + गाङ् गतौ—ल्यप् । आभिमुख्येन प्राप्य (अतियन्ति) उल्लंघयन्ति । जयन्ति ॥

२--(अपेन्द्र प्राचो मघवन्नमित्रानपापाचो अभिभूते नुदस्व । अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम ॥ १ ॥ अ० २० । १२५ । १-७, ऋ० १० । १३१ । १--७ ।) यह मन्त्र आ चुका है—गो० उ० ६ । ४ ॥

३—वृषाकपि सूक्त—वि हि सोतोरसृक्षत नेन्द्रं देवममंसत । यत्रामदद् वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ १ ॥ अ० २० । १२६ । १--२३, ऋ० १० । ८६ । १—२३ ॥ (हि) क्योंकि (सोतोः) तत्त्वरस का निकलना (वि असृक्षत) उन्होंने [लोगों ने] छोड़ दिया है, [इसी से] (देवम्) विद्वान् (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले मनुष्य आत्मा] को (न) (अमंसत) उन्होंने नहीं जाना, (यत्र) जहां [संसार में] (अर्यः) स्वामी (मत्सखा) मेरा [देह वाले का] साथी (वृषाकपिः) वृषाकपि [बलवान् कपाने वाले अर्थात् चेष्टा कराने वाले जीवात्मा] ने (पुष्टेषु) पुष्टिकारक धनों में (अमदत्) आनन्द पाया है, (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला मनुष्य] (विश्वस्मात्) सब [प्राणीमात्र] से (उत्तरः) उत्तम है ॥

४—कुन्ताप सूक्त—इदं जना उप श्रुत नराशंस स्तविष्यते । षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ॥ १ ॥ अ० २० । १२७ । १—१४, कुन्ताप सूक्त—(जनाः) हे मनुष्यो ! (इदं) यह (उप) आदर से (श्रुत) सुनो, [कि] (नराशंसः) मनुष्यों में प्रशंसा वाला पुरुष (स्तविष्यते) बड़ाई किया जावेगा । (कौरम) हे पृथिवी पर मरण करने वाले राजन् ! (षष्टिम् सहस्रा) साठ सहस्र (च) और (नवतिम्) नब्बे [अर्थात् अनेक दानों] को (रुशमेषु) हिंसकों के फेंकने वालों के बीच (आ दद्महे) हम पाते हैं ॥

५--रैभी ऋचायें—वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः । नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥४॥ अ० २० । १२७ । ४--६ ॥ (रेभ) हे विद्वान् ! (वच्यस्व) उपदेश कर, (न) जैसे (शकुनः) पक्षी (पक्वे) फल वाले (वृक्षे) वृक्ष पर [चहचहाता है] । (नष्टे) दुख व्यापने पर (भुरिजोः) दोनों धारण पोषण करने वाले [स्त्री पुरुष] की (इव) ही (जिह्वा) जीभ (चर्चरीति) चलती रहती है; (न) जैसे (क्षुरः) छुरा [केशों पर चलता है] ॥

६--पारिक्षिती ऋचायें—राज्ञो विश्वजनीनस्य यो देवो मर्त्यां अति । वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ॥ अ० २० । १२७ । ७-११ ॥ (यः) जो (देवः) देव [विजय चाहने वाला पुरुष] (मर्त्यान् अति) मनुष्यों में बढ़कर [गुणी है] (विश्वजननीस्य) सब लोगों के हितकारी, (वैश्वानरस्य) सबके नेता, (परिक्षितः) सब प्रकार ऐश्वर्य वाले (राज्ञः) उस राजा की (सुष्टुतिम्) उत्तम स्तुति को (आ) भले प्रकार (सुनोत) मथो ॥

७--कारव्या ऋचायें—इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जनम् । ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ॥ अ० २० । १२७ । ११ ॥ (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाले पुरुष] ने (कारुम्) काम करने वाले को (अबूबुधत्) जगाया है—(उत्तिष्ठ) उठ और (जनम्) लोगों में (वि चर) विचर, (मम इत् उग्रस्य) मुझ ही तेजस्वी की

[भक्ति] (चकृधि) तू करता रहे, (सर्वः) प्रत्येक (अरिः) वैरी (इत्) भी (ते) तेरी (पृणात्) तृप्ति करे ॥

८—दिशां क्लृप्ति ऋचायें—यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः। सूर्यं चामू रिशादसस्तद् देवाः प्रागकल्पयन्॥ अ० २०। १२८। १—१६॥ (यः) जो (सभेयः) सभ्य [सभाओं में चतुर], (विदथ्यः) विद्वानों में प्रशंसनीय, (सुत्वा) तत्त्व रस निकालने वाला (अथ) और (यज्वा) मिलनसार (पूरुषः) पुरुष है। (अमू) उस (सूर्यम्) सूर्य [के समान प्रतापी] को (च) निश्चय करके (तत्) तब (रिशादसः) हिंसकों के नाश करने वाले (देवाः) विद्वानों ने (प्राक्) पहले [ऊँचे स्थान पर] (अकल्पयन्) माना है ॥

९, उत्तर जनकल्प ऋचा—योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः। अब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता॥ अ० २०। १२८। ६॥ (यः) जो (ब्रह्मणः) ब्रह्मा [वेदज्ञानी] का (पुत्रः) पुत्र (अब्रह्मा) अब्रह्मा [वेद न जानने वाला, कुमार्गी] (अनाक्ताक्षः) अशुद्ध व्यवहार वाला और (अनभ्यक्तः) अविख्यात है। वह (अमणिवः) मणियों [रत्नों] का न रखने वाला और (अहिरण्यवः) तेज ही न होवे, (तोता) यह कर्म (कल्पेषु) शास्त्र विधानों में (संमिता) प्रमाणित है ॥

१०, इन्द्रगाथा ऋचायें—यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः। विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते॥ अ० २०। १२८। १२—१६॥ (यत्) जब, (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले मनुष्य] दाशराज्ञे) दानपात्र सेवकों के राजा के लिये [अर्थात् अपने लिये] (अदः) उस [वेदोक्त] (मानुषम्) मनुष्य के कर्म को (वि गाहथाः) तूने बिलो डाला है [गड़बड़ कर दिया है]। (सर्वस्मै) सबके लिये (विरूपः) वह दुष्ट रूप वाला व्यवहार (आसीत्) हुआ है। यह [मनुष्य] (यक्षाय) पूजनीय कर्म के लिये (सह) मिल कर (कल्पते) समर्थ होता है ॥

कण्डिका १३ ॥

अथैतशप्रलापं शंसति, एता अश्वा आप्लवन्त इति। ऐतशो ह मुनिर्यज्ञस्यायुर्ददर्श। स ह पुत्रानुवाच, पुत्रका यज्ञस्यायुरभिददृक्षं तदभिलपिष्यामि मा मा तृप्तं मन्यध्वमिति। तथेति तदभिललाप। तस्य ह इत्यग्निरैतशायनो ज्येष्ठः पुत्रोऽभिदुद्रत्य मुखमपि जग्राह, ब्रुवन्, तृप्तो नः पितेति। स होवाच, धिक् त्वा जाल्मापरस्य पापिष्ठान्ते प्रजां करिष्यामीति। यो मे मुखं प्राग्र[1]हीष्यो यदि जाल्म मे मुखं प्राग्रहीष्यः, शतायुषं गामकरिष्यं सहस्रायुषं पुरुषमिति। तस्मादभ्यग्नय ऐतशायना आजानेयाः सन्तः पापिष्ठा अन्येषां बलिहृतः पितायच्छन् ताः स्वेन प्रजापतिना स्वया देवतया। यदैतशः, प्रलापः, तत् स्वर्गस्य लोकस्य रूपम्। यद्वेवैतशः प्रलापः, यातयामा वा क्षितिः, ऐतशैतशः प्रलापोऽयातयामा मे यज्ञोऽसदक्षितिर्मे[2] यज्ञोऽसदिति। तं वा ऐतशैतशप्रलापं शंसति, पदावग्राहन्तासामुत्तमेन पदेन प्रणौति, यथा निविदः। अथ प्रवह्लिकाः पूर्वं[3] शस्त्वा विततौ किरणौ द्वाविति प्रतिराधानुत्तराः शंसति, भुगित्यभिगत इति

१ पू. सं. "प्रागृहीष्यः" इति पाठः। २. पू. सं. अक्षिति मे इति पाठः॥
३. पू. सं. पूर्वंशस्त्वा इति पाठः॥ सम्पा०॥

प्रवह्लिकाभिर्ह वै देवा असुराणां रसान् प्रववृहुः। तद्यथाभिर्ह वै देवा असुराणां रसान् प्रववृहुः, तस्मात् प्रवह्लिकाः, तत् प्रवह्लिकानां प्रवह्लिकात्वम्। ता वै प्रतिराधैः प्रत्यराध्नुवन्। तद्यत् प्रतिराधैः प्रत्यराध्नुवन्, तस्मात् प्रतिराधाः, तत् प्रतिराधानां प्रतिराधत्वम्। प्रवह्लिकाभिरेव द्विषतां भ्रातृव्याणां रसान् प्रवह्लिकास्ता वै प्रतिराधैः प्रतिराध्नुवन्ति, ताः प्रग्राहमित्येव। अथाजिज्ञासेन्याः शंसति, इहेत्थ प्रागपागुदगधरागिति। आजिज्ञासेन्याभिर्ह वै देवा असुरानाज्ञाय अथैनानत्ययन्, तथैवैतद्यजमाना आजिज्ञासेन्याभिरेवाप्रियं भ्रातृव्यमागायाथैनमतियन्ति। ता अर्द्धर्चशः शंसति, प्रतिष्ठित्या एव। अथातिवादं शंसति, वी३मे देवा अक्रंसतेति। श्रीर्वा अतिवादस्तमेकर्च्चं शंसति, एकस्ता वै श्रीस्तां वै विरेभं शंसति, विरेभैः श्रियं पुरुषो वहतीति। तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव॥ १३॥

